श्रीमद्भगवद्गीतायास्तृतीयोऽध्याय

(पूर्ववत् षोडशटीकासहितम्, एवञ्च सप्तदश-

संख्याको भाषानुवाद ।)

पत्राणि २४१

तृतीयाध्याय ३॥

शंकरभाष्यं
आनंदगिरिकृतटी॰
श्रीधरी स्वामिकृता
पिशाचभाष्यं
रामानुजभाष्य
अभिनवगुप्ती
परमार्थप्रपा
वनमाली
ऋज्मवैजयंती
मधुसूदनी
सदानिधी
नीलकंठी
आनंदी
रामकंठी
तासिकी
पंचोली॥

भाषा अनुवाद ॥

अर्ज्जुनउवाच ज्यायसी चेत् कर्म्मणस्ते मता बुद्धि
र्जनार्दन तत् किं कर्म्मणि घोरे मां नियोजयसि ।
केशव ॥ १ ॥

शाङ्करभाष्य १

शास्त्रस्य प्रवृत्तिनिवृत्तिविषयभूते द्वे बुद्धी भगवता निर्दिष्टे सांख्यबु
द्धिर्योगबुद्धिश्च तत्र प्रजहाति यदा कामानित्यारभ्याध्यायपरि समाप्तेः,
सांख्यबुद्ध्याश्रितानां संन्यासकर्त्तव्यतामुक्त्वा तेषां तन्निष्ठतयैव च कृ
तार्थतोक्तैषा ब्राह्मी स्थितिरित्यर्ज्जुनाय च कर्म्मण्येवाधिकारस्ते मा
ते सङ्गोऽस्त्वकर्म्मणीति कर्म्मैव कर्त्तव्यमुक्तवान् योगबुद्धिमाश्रित्य न
तत एव श्रेयःप्राप्तिमुक्तवान् तदेतदालक्ष्य पर्य्याकुलीभूतबुद्धिरर्ज्जुन
उवाच कथं भक्ताय श्रेयोऽर्थिने यत् साक्षात् श्रेयःप्राप्तिसाधनं सांख्य
बुद्धिनिष्ठां श्रावयित्वा मां कर्म्मणि दृष्टानेकानर्थयुक्ते पारम्पर्येणाप्य
नैकान्तिकश्रेयः प्राप्ति फले नियुञ्ज्यादिति युक्तः पर्याकुली भावोऽर्ज्जु
नस्य तदनुरूपश्च प्रश्नो ज्यायसी चेदित्यादि प्रश्नापाकरणाय वाक्यञ्च
भगवतो युक्तं यथोक्तं विभाग विषये शास्त्रे केचित्त्वर्ज्जुनस्य प्रश्नार्थम
न्यथा कल्पयित्वा तत्प्रति कूलं भगवतः प्रतिवचनं वर्णयन्ति यथा ।
चात्मना सम्बन्धग्रंथे गीतार्थो निरूपितः तत्प्रतिकूलञ्चेह पुनः प्रश्नप्र
ति वचनयोरर्थं निरूपयन्ति कथं तत्र सम्बन्धग्रन्थे तावत् सर्वेषा
माश्रमिणां ज्ञान कर्म्मणोः समुच्चयो गीताशास्त्रे निरूपितोऽर्थ इत्युक्तः
पुनर्व्विशेषितञ्च यावज्जीवं श्रुतिचोदितानि कर्म्माणि परित्यज्य केव
लादेव ज्ञानान्मोक्षः प्राप्यते इत्येतदेकान्तेनैव प्रतिषिद्धमितीह त्वाश्र
मविकल्पं दर्शयता यावज्जीवं श्रुतिचोदितानामेव कर्म्मणां परित्या

ग उक्तः तत् कथमीदृशं विरुद्धमर्थमर्ज्जुनाय ब्रूयाद्भगवान् श्रोता वाक
थं विरुद्धमर्थमवधारयेत् तत्रैतत् स्यात् गृहस्थानामेव श्रौतकर्म्मपरि
त्यागेन केवलादेव ज्ञानान्मोक्षः प्रतिषिध्यते न त्वाश्रमान्तराणामित्येतदपि
पूर्वोत्तरविरुद्धमेव कथं सर्व्वाश्रमिणां ज्ञानकर्म्मणोः समुच्चयो गीताशा
स्त्रे निश्चितोर्थ इति प्रतिज्ञायेह कथं तद्विरुद्धं केवलादेव ज्ञानान्मोक्षं
ब्रूयात् आश्रमान्तराणां अथ मतं श्रौतकर्म्मापेक्षयैतद्वचनं केवलादेव
ज्ञानात् श्रौतकर्म्मरहितात् गृहस्थानां मोक्षः प्रतिषिध्यत इति तत्र गृह
स्थानां विद्यमानमपि स्मार्त्तं कर्म्माविद्यमानवदुपेक्ष्य ज्ञानादेव केवलादित्यु
च्यते इत्येतदपि विरुद्धं कथं गृहस्थस्यैव स्मार्त्तकर्म्मणा समुच्चितात् ज्ञा
नान्मोक्षः प्रतिषिध्यते न त्वाश्रमान्तराणामिति कथं विवेकिभिः शक्यमवधा
रयितुं किंच यदि मोक्षसाधनत्वेन स्मार्त्तानि कर्म्माण्यूर्द्ध्वरेतसां समुच्ची
यन्ते तथा गृहस्थस्यापि इष्यतां स्मार्त्तैरेव समुच्चयो न श्रौतैः अथ श्रौतैः
स्मार्त्तैश्च गृहस्थस्यैव समुच्चयो मोक्षायोर्द्ध्वरेतसां तु स्मार्त्तकर्म्ममात्रसमु
च्चितात् ज्ञानान्मोक्ष इति तत्रैवं सति गृहस्थस्यायासबाहुल्यात् श्रौतं स्मा
र्त्तञ्च बहुदुःखरूपं कर्म्म शिरस्यारोपितं स्यात् अथ गृहस्थस्यैवायास
बाहुल्यात् तत्कारणान्मोक्षः स्यान्नाश्रमान्तराणां श्रौतनित्यकर्म्मरहितत्वा
दिति तदप्यसत् सर्वोपनिषत्स्वितिहासपुराणयोगशास्त्रेषु च ज्ञानाङ्गत्वे
न मुमुक्षोः सर्व्वकर्म्मसंन्यासविधानादाश्रमविकल्पसमुच्चयविधानाच्च श्रु
तिस्मृत्योः सिद्धस्तर्हि सर्व्वाश्रमिणां ज्ञानकर्म्मणोः समुच्चयो न मुमुक्षोः
सर्व्वकर्म्म संन्यासविधानात् पुत्रैषणायाः वित्तैषणायाश्च लोकैषणायाश्च व्यु
त्थायाथ भिक्षाचर्य्यं चरन्ति तस्मात् संन्यासमेषां तपसामतिरिक्तमाहुः न्या
स एवात्यरेचयदिति न कर्म्मणा न प्रजया धनेन त्यागेनैके ऽमृतत्वमान
शुरिति च ब्रह्मचर्यादेव प्रव्रजेदित्याद्याः श्रुतयः त्यज धर्म्ममधर्म्मञ्च
उभे सत्यानृते त्यज येन त्यजसि तं त्यज संसारमेव निःसारं दृष्ट्वा सारदि

हत्वया प्रव्रजन्त्य कृतोद्वाहाः परं वैराग्य माश्रिता इति बृहस्पतिः परमात्मनि
यो रक्तो योरक्तोऽपरमात्मनि सर्वैषणाविनिर्मुक्तः सभैक्ष्यं भोक्तुमर्हति कर्म्म
णा बध्यते जन्तुर्विद्यया च विमुच्यते तस्मात् कर्म्म न कुर्वन्ति यतयः पार·
दर्शिन इति शुकानुशासनं इहापिच सर्व्व कर्म्माणि मनसा संन्य·स्येत्यादि मो
क्षस्य चाकार्यत्वान्मुमुक्षोः कर्म्मानर्थक्यं नित्यानि प्रत्यवायपरिहारार्थानीति
चेत् नासंन्यासिविषयत्वात् प्रत्यवायप्राप्तेर्न ह्यग्निकार्य्याद्यकरणात् संन्या
सिनः प्रत्यवायः कल्पयितुं शक्यो यथा ब्रह्मचारिणां असंन्यासिनामपि न·
तावन्नित्यानां कर्म्मणामभावादेव भावरूपस्य प्रत्यवायस्योत्पत्तिः कल्पयितुं
शक्या कथमसतः सज्जायेतेत्यसतः सज्जन्मासंभवश्रुतेः यदि विहिताक
रणाद्यसम्भवाख्यमपि प्रत्यवायं ब्रूयाद्वेदस्तदानर्थकरो वेदोऽप्रमाणमि।
त्युक्तं स्यात् विहितस्य करणाकरणयोः दुःखमात्रफलत्वात् तथा च का
रकं शास्त्रं न ज्ञापकमित्यनुपपन्नार्थं कल्पितं स्यान्न चैतदिष्टं तस्मान्न सं
न्यासिनां कर्म्माणि नोज्ञान कर्म्मणोः समुच्चयानुपपत्तिः ज्यायसी चेत्।
कर्म्मणस्ते मता बुद्धिरित्यर्ज्जुनस्य प्रश्नानुपपत्तेश्च यदि हि भगवता द्वि
तीयेऽध्याये ज्ञानं कर्म्म च समुच्च येन त्वया एकेनानुष्ठेयमित्युक्तं स्यात् त
तोऽर्ज्जुनस्य प्रश्नोऽनुपपन्नोज्यायसी चेत् कर्म्मणस्ते मता बुद्धिरित्यर्ज्जुना
य चेत् बुद्धि कर्म्मणी त्वयानुष्ठेये इत्युक्ते या च कर्म्मणो ज्यायसी बुद्धिः
साप्युक्तैवेति तत् किं कर्म्मणि घोरे मां नियोजयसि केशवेति उपालम्भो
वा प्रश्नोवान कथञ्चनोपपद्यते न चार्ज्जुनस्यैव ज्यायसी बुद्धिर्नानुष्ठेयेति
भगवतोक्तं पूर्व्वमिति कल्पयितुं युक्तं येन ज्यायसी चेदिति विवेकतः प्र
श्नः स्यात् यदि पुनरेकस्य पुरुषस्य ज्ञानकर्म्मणोर्विरोधात् युगपदनुष्ठा
नं न सम्भवतीति भिन्नपुरुषानुष्ठेयत्वं भगवता पूर्व्वमुक्तं स्यात् ततोऽ
यं प्रश्न उपपन्नो ज्यायसी चेदित्यादिर विवेकतः प्रश्नकल्पनायामपि भि
न्नपुरुषानुष्ठेयत्वेन भगवतः प्रतिवचनं नोपपद्यते न चाज्ञाननिमित्तं·
भगवत्प्रति वचनं कल्पनीयं अस्माच्च भिन्नपुरुषानुष्ठेयत्वेन ज्ञानकर्म्म

3

निष्ठयोर्भगवतः प्रतिवचनदर्शनात् ज्ञानकर्म्मणोः समुच्चयानुपपत्तिः तस्मा
त् केवलादेव ज्ञानान्मोक्ष इत्येषोऽर्थो निश्चितो गीतासु सर्वोपनिषत्सु च ज्ञानक
र्म्मणोरेकं वद निश्चित्येति चैकविषयैव प्रार्थनानुपपन्नोभयोः समुच्चय सम्भ
वे कुरु कर्म्मैव तस्मात्त्वमिति च ज्ञाननिष्ठासम्भवमर्ज्जुनस्यावधारणेन दर्श
यिष्यति ज्यायसी चेदिति ज्यायसी श्रेयसी चेद्यदि कर्म्मणः सकाशात्ते तव
मता अभिप्रेता बुद्धिर्ज्ञानं हे जनार्द्दन यदि बुद्धि कर्म्मणी समुच्चिते इष्टे त
देकं श्रेयःसाधनमिति कर्म्मणो ज्यायसी बुद्धिरिति कर्म्मणोतिरिक्तं करणं
बुद्धेरनुपपन्नं अर्ज्जुनेन कृतं स्यान्न हि तदेव तस्मात् फलतोतिरिक्तं स्यात्।
तथा च कर्म्मणः श्रेयस्करी भगवतोक्ता बुद्धिर श्रेयस्करञ्च कर्म्म कुर्व्विति मां
प्रतिपादयति तत् किन्नु कारणमिति भगवत उपालम्भमिव कुर्व्वन् तत् किं
कस्मात् कर्म्मणि घोरे क्रूरे हिंसालक्षणे मां नियोजयसि केशवेति च यदा
ह तच्च नोपपद्यते ॥ १ ॥

आनन्दगिरिकृतटीका २

पूर्वोत्तराध्याययोः सम्बन्धं पूर्वस्मिन्नध्याये वृत्तमर्थं संक्षिप्यानुवदति शा
स्त्रस्येति गीताशास्त्रप्रारम्भापेक्षितं हेतुफलभूतं बुद्धिद्वयं भगवतोपदिष्ट
मित्यर्थः प्रष्टुरर्ज्जुनस्याभिप्रायं निर्देष्टुं वृत्तमर्थान्तरं कथयति तत्रेति अध्या
ययोर्बुद्धिद्वयनिर्धारणं वा सम्बन्धः पारमार्थिके तत्त्वे तज्ज्ञानं तन्निष्ठाना
मशेषकामत्यागिनां काममूलानां कर्म्मणामपि प्रतिपत्ति कर्म्मवत्त्यागं कर्त्त
व्यत्वेन भगवानुक्तवानित्यर्थः। तथापि मोक्षसाधने विकल्प समुच्चययोरन्य
तरस्य विवक्षितत्त्वबुद्ध्या समनन्तरप्रश्नप्रवृत्तिरित्याशंक्याह उक्तेति अर्ज्जुन
स्य मनसि व्याकुलत्वं प्रश्नबीजं दर्शयितुमुक्तमर्थान्तरमनुभाषते अर्ज्जुना
य चेति सांख्यबुद्धिमाश्रित्य कर्म्मत्यागमुक्त्वा पुनस्तस्यैव कर्त्तव्यत्वं कथं
मिथो विरुद्धं ब्रवीतीत्याशंक्याह योगेति यथा सांख्यबुद्धिमाश्रितानां संन्या
सद्वारा तन्निष्ठानां कृतार्थतोक्ता तथा योगबुद्धिमाश्रित्य कर्म्म कुर्व्वतोपि·

कृतार्थत्वमुक्तमित्याशंक्याह नतत यदेवेति दूरेण ह्यवरं कर्म्म बुद्धियो·
गादिति दर्शनादिति शेषः बुद्धिव्याकुलत्वं प्रश्नबीजं प्रतिलभ्य प्रश्नं क
रोतीत्याह तदेतदिति साक्षादेव श्रेयःसाधनं ज्ञानमन्येभ्यो दर्शितं तदि
त्युच्यते तद्विपरीतं कर्म्म स्वस्यानुष्ठेयत्वेनोक्तमेतदिति निर्दिश्यते भगवदु
क्तेर्थे संदिह्यमानस्य निर्णयाकाङ्क्षया प्रश्नप्रवृत्तेरस्ति पूर्वोत्तराध्याय·
योरुत्थाप्योत्थापकलक्षणा सङ्गतिरित्यर्थः अर्ज्जुनस्य प्रश्ननिमित्तं पर्य्या
कुलत्वं प्रश्नपूर्वकं प्रपञ्चयति कथमित्यादिना यदि साक्षादेव श्रेयःसाधनं
सांख्यशाहितं परमार्थतत्त्वविषयबुद्धौ निष्ठारूपं तदन्यस्मै श्रेयोऽर्थिने भक्ता
य श्रावयित्वा मां पुनरभक्तमश्रेयोऽर्थिनमिव कर्म्मणि पूर्वोक्तविपरीते क
थं भगवान्नियोक्तुमर्हतीति इत्यर्ज्जुनस्य पर्य्याकुलीभावो युक्त इति सम्बन्धः
ज्ञाननिष्ठातो वैपरीत्यं स्फोरयितुं कर्म्म विशिनष्टि दृष्टेति युद्धे हि तत्क
र्म्मणि दृष्टोऽनेकोऽनर्थो गुरुभ्रात्रहिंसादिलेन सम्बन्धेन बुद्धिशुद्धिद्वा
रापि वर्त्तमाने जन्मन्येव फलमित्यनियते मम भक्तस्य श्रेयोऽर्थिनो नियो
गो भगवता युक्तोन भवतीति शेषः यथोक्तं निमित्तं प्रश्नस्य युक्तं तदनुगुण
त्वात्तस्येति द्योतकमाह तदनुरूपश्चेति ज्ञाननिष्ठानां कृतार्थता कर्म्मनिष्ठा
स्मि नात्तु न तथेत्युक्ते विभागभागिशास्त्रं त्यत्र लोकेस्मि न्नित्यादिवाक्यस्यापि ।
द्योतकत्वं दर्शयति प्रश्नेति साक्षादेव श्रेयः साधनमन्येभ्यो भगवतो
क्तं न तत्त मह्यमिति मत्वा व्याकुलीभूतः सन्पृच्छतीति स्वाभिप्रायेण सम्ब·
न्धमुक्त्वा वृत्तिकाराभिप्रायं दूषयति केचित्त्विति ज्ञानकर्म्मणोः समुच्चय
मवधारयितुं प्रश्नाङ्गीकारे समुच्चयावधारणेनैव प्रतिवचनमुचितं न तथा
भगवता प्रतिवचनमुक्तं तथा च प्रश्नस्य समुच्चयविषयत्वावगमात् प्रयु
क्तेश्चासमुच्चय विषयत्वात्तयो र्मिथो विरोधो वृत्तिकारमते स्यादित्यर्थः कि
ञ्च केवलं प्रश्नप्रतिवचनयोरेव परमते परस्परविरोधोन भवत्यपितु प·
रेषां स्वग्रन्थेपि पूर्वापरविरोधोऽस्तीत्याह यथाचेति आत्मना वृत्तिकारैरिति
यावत् सम्बन्धग्रन्थो गीताशास्त्रारम्भोपोद्घातः इहेति तृतीयाध्यायारम्भे

परामृशति तदेव विवृण्वन्नाशङ्कामाह कथमिति पूर्वापरविरोधं स्फोरयि
तुं सम्बन्धग्रन्थोक्तमर्थमनुवदति तत्रेति परकीयावृत्तिः समस्तासमुच्चित्य व्या
ते सम्बंधग्रंथेतावदयमर्थ उक्तइति सम्बंधः तमेवार्थं विशदयति सर्वेषामिति
सर्वकर्मसंन्यासपूर्वकज्ञानादेव केवलात् कैवल्यमित्यस्मिन्नर्थे शास्त्रस्य पर्य
वसानान्न समुच्चयो विवक्षित इत्याशंक्याह पुनरिति उक्तो गीतार्थो वृत्तिका
रैरेव कर्मत्यागायोगेन विशेषितत्वान्नाविवक्षितो भवितुमर्हते तथाच श्रौ
तानि कर्माण्यत्यक्त्वा ज्ञानादेव केवलान्मुक्तिर्भवतीत्येतन्मतं नियमेनैव याव
ज्जीवंश्रुतिभिर्हि प्रतिषिद्धत्वात्तत्राभ्युपगन्तुमुचितमित्यर्थः तथापि कथं मिथो
विरोधधीरित्याशंक्याह इह त्विति प्रथमतो हि सम्बंधग्रन्थे समुच्चयो गीतार्थः
प्रतिपाद्यत्वेन वृत्तिकृता प्रतिज्ञातः श्रौतकर्मपरित्यागस्य श्रुतिविरोधादेव न
सम्भवतीत्युक्तं तृतीयाध्यायारम्भे पुनः संन्यासिनां ज्ञाननिष्ठा कर्मिणां कर्म
निष्ठेत्याश्रमविभागमभिदधता पूर्वप्रतिसिद्धकर्मत्यागाभ्युपगमान्मिथो वि
रोधो दर्शितः स्यादित्यर्थः ननु यथा भगवता प्रतिपादितं तथैव वृत्तिकृता व्या
ख्यातमिति न तस्यापराधोऽस्तीत्याशंक्याह तत्कथमिति नहीह भगवान् वि
रुद्धमर्थमभिधत्ते सर्वज्ञस्य परमाप्तस्य विरुद्धार्थवादित्वायोगात् किंतु तदभि
प्रायापरिज्ञानादेव व्याख्यातुर्विरुद्धार्थवादितेत्यर्थः। भगवतो विरुद्धार्थवादि
त्वाभावेपि श्रोतुर्विरुद्धार्थप्रतिपत्तिं प्रतीत्य व्याचक्षाणो वृत्तिकारो नापराध्यती
त्याशंक्याह श्रोतावेति। अर्जुनो हि श्रोता सोपि बुद्धिपूर्वकारी भगवदुक्तमेवा
धारयन्न विरुद्धमर्थमवधारयितुमर्हति तथाच परस्यैव विरुद्धार्थवादितेत्य
र्थः। विरोधं परिहरन्नाशङ्कते तत्रेति सम्बन्धग्रन्थे हि वृत्तिकारस्येतदभिप्रेतं गृ
हस्थानामेव सतां परिपक्वज्ञानमन्तरेण यावज्जीवश्रुतिचोदिताग्निहोत्रादित्या
गेन केवलादेवापातिकादात्मज्ञानान्मोक्षमवेक्षमाणानां यावज्जीवादिश्रु
तिरसौ निषिध्यते न तु स्वरूपेणैव कर्मत्यागी ज्ञानान्मोक्षो वा निषेद्धुमिष्यते त
तीयेपुनरध्याये कर्मत्यागिनां गृहस्थेभ्यो व्यतिरिक्तानामेव केवलादात्मज्ञाना
न्मोक्षो विवक्षितोऽतो भिन्नविषयत्वान्निषेधाभ्यनुज्ञानयोर्न विरोधाशङ्केत्यर्थः।

तद्यमित्यर्थः। त्यक्तत्वाभिमानस्यापि तत्त्वतः स्वरूपसम्बंधाभावात् त्यज्यत्व
मविशिष्टमित्याह येनेति अनुभवानुसारेण प्रमातृताप्रमुखस्य संसारस्य
दुःखफलत्वमालक्ष्य मोक्षहेतुसम्यक्ज्ञानसिद्धये ब्रह्मचर्य्यादेव पारिव्रा
ज्यमनुष्ठेयमित्युत्पत्तिविधिमुपन्यस्यति संसारमिति। तत्त्वज्ञानमुद्दिश्य ब्रह्म
चर्य्यादेव कर्म्मसंन्याससामग्रीमभिदधानो विनियोगविधिं सूचयति परमि
ति। ज्ञानकर्म्मणोरसमुच्चयार्थं फलविभागं कथयति कर्म्मणेति। उक्तं फल
विभागमनूद्य ज्ञाननिष्ठानां कर्म्मसंन्यासस्य कर्त्तव्यत्वमाह तस्मादिति। वा
क्यशेषेऽपि सर्वकर्म्मसंन्यासो विवक्षितोऽस्तीत्याह इहापीति। ज्ञानार्थिनो मुमु
क्षोः संन्यासविध्यनुपपत्तिबाधितं समुच्चयविधिवचनमित्युक्तमिदानीं मोक्ष
स्वभावालोचनयापि समुच्चयवचनमनुचितमित्याह मोक्षस्य चेति। अकु
र्वन्विहितं कर्म्म निन्दितञ्च समाचरन्। प्रसज्जंश्चेन्द्रियार्थेषु नरः पतनमृ
च्छतीति स्मृतेः मुमुक्षूणामपि प्रत्यवायनिहृत्यर्थं कर्त्तव्यं नित्यकर्म्मेति शङ्कते·
नित्यानीति। यो यस्मिन् कर्म्मण्यधिकृतस्तस्य तदकरणात् प्रत्यवायो भवतीति न
तु कर्म्मानधिकारिणः संन्यासिनस्तदकरणात् प्रत्यवायः सम्भवतीति दूषयति
नासंन्यासीति तदेव स्पष्टयति नहीति समिद्धोमाध्ययनाद्यकरणात् प्रत्यवायः
संन्यासिनो नास्तीत्यर्थः तत्र व्यतिरेकोदाहरणमाह यथेति। अकरणात् प्रत्यवा
योत्पत्तिमभ्युपेत्योक्तं सम्प्रति प्रतिषिद्धकरणादेव प्रत्यवायो न त्वकरणादभा
वात् भावोत्पत्तिर्लोकवेदविरुद्धत्वादित्याह न तावदिति ननु नित्यकर्म्मविधा
यी वेदस्तदकरणात्प्रत्यवायो भवतीति ब्रवीति तत्कथमकरणात्प्रत्यवायो न
भवतीति श्रुतिमाश्रित्योच्यते श्रुत्यन्तरविरोधादिति तत्राह यदीति। विहितस्या
करणे सत्यनर्थप्राप्तेर्न नित्यकर्म्मविधायी वेदोऽनर्थकरत्वेनाप्रमाणमित्याशं·
क्याह विहितस्येति नहि विहितस्य करणे पितृलोकप्राप्तिलक्षणं फलं भ
वत्यथ तेह्यमादिनानशनपीडादिदुःखं तत्प्रत्यक्षमेवाकरणे च प्रत्यवायोत्पत्ति
रुभयथापि पुरुषस्यानर्थकरो वेदोऽप्रमाणमेव स्यादित्यर्थः तत्त्वभावस्यापि भा
वोत्पादनसामर्थ्यं वेदः समापादयिष्यति तथा च विहिताकरणात्प्रत्यवायपरिहा

रोविहितकरणे फलिष्यतीति नेत्याह तथा चेति लोकप्रसिद्धपदार्थशक्त्याश्रय
णेन शास्त्रप्रवृत्त्यङ्गीकारादपूर्वशक्त्याधानायोगात् ज्ञापकमेव शास्त्रमित्यर्थः
कारकत्वे च न स्यात्प्रमाणम् प्रत्याह स्यादित्याह कारकमिति भवतु शास्त्रस्या
प्रामाण्यमित्याशंक्यापौरुषेयतयाऽशेषदोषानागंधितत्वान्नैवमित्याह न चेति
अनिर्वाच्यानुपलम्भस्य सम्वेदनमभावज्ञाने कारणसमीहितसाधनज्ञानं त
च्चरणाभ्यासादिप्रवृत्तिकारणमित्यङ्गीकृत्योपसंहरति तस्मादिति अकरणा
त्प्रत्यवायोत्पत्त्यसंभवस्तच्छब्दार्थः। संन्यासिनां ज्ञाननिष्ठानां कर्मसंन्यासित्वाद
वकर्मसंभवे फलितमाह अत इति समुच्चयानुपपत्तौ हेत्वन्तरमाह ज्यायसी
व ति प्रश्नानुपपत्तिमेव प्रपञ्चयति यदि हीति समुच्चयोपदेशे प्रश्नैकदेशानुप
पत्तेश्च न तदुपदेशोपपत्तिरित्याह अर्जुनायेति। कर्मण्येवाधिकारस्ते मा
फलेषु कदाचनेति अर्जुनं प्रत्युपदेशात्तं प्रति ज्यायसी बुद्धिर्नोक्तेत्युक्तं तत्कि
मित्युपालम्भवचनमित्याशंक्याह न चेति येन कल्पनेन ज्यायसी चेदित्यार
भ्यते तत्किं कर्मणीत्युपालम्भात्मा प्रश्नः स्यात्तथा नमुक्तं कल्पयितुं पक्षान्तेऽभि
हितासांख्यबुद्धिरिति वचनविरोधादिति योजना कस्मिन्पक्षे तर्हि प्रश्नस्योपप
त्तिरित्याशंक्याह यदीति भगवदुक्तेऽर्थे प्रष्टुर्विवेकाभावात्प्रश्नः स्यादित्याशं
क्य पूर्वोक्तमेवाधिकं विवक्षयास्मारयति अविवेकत इति। भगवतोऽपि प्रतिवच
नमज्ञाननिमित्तं प्रश्नाननुरूपत्वादित्याशंक्याधिकं दर्शयति न चेति भगवतः
सर्वज्ञत्वप्रसिद्धिविरोधादज्ञानाधीनप्रतिवचनायोगादित्यर्थः इतश्च समुच्च
यः शास्त्रार्थो न भवतीत्याह अस्माच्चेति कस्तर्हि शास्त्रार्थो विवक्षितस्तत्राह के
वलादिति ज्ञानकर्मणोः समुच्चयानुपपत्तौ कारणान्तरमाह ज्ञानेनेति वाक्या
शेषवशादपि समुच्चयस्याशास्त्रार्थत्वेत्याह कुरु कर्मैवेति प्राथमिकेन सम्ब
न्धग्रन्थेन समस्तशास्त्रार्थसंग्राहकेण तद्विवरणात्मनोऽस्य सन्दर्भस्य नास्ति पौ
नरुक्त्यमिति मत्वा प्रतिपदं व्याख्यातं प्रश्नैकदेशं समुत्थापयति ज्यायसी चेदिति
वेदाश्चेत्प्रमाणमिति वच्चेदित्यस्य निश्चयार्थत्वं व्यावर्त्तयति यदीति बुद्धिशब्दा
दस्यान्तःकरणविषयत्वं व्यावच्छिनत्ति ज्ञानमिति पूर्वार्द्धस्याक्षरयोजनां कृत्वास

समुच्चयाभावे तात्पर्यमाह यदीति ३ हेभगवन्निति शेषःएकंज्ञानंकर्म्मासमु-
च्चितमिति यावत्ज्ञानकर्म्मणोरभीष्टेसमुच्चयेसमुच्चितस्यश्रेयःसाधनस्यैक
त्वात्कर्म्मणःसकाशात्ज्ञानस्यपृथक्करणमयुक्तमित्यर्थः एकमपिसाधनंफ
लतोऽतिरिक्तंकिंनस्यादित्याशंक्याह नहीति नचकेवलात् कर्म्मणोज्ञानस्यकेव
लस्यफलतोऽतिरिक्तत्वंविवक्षित्वा पृथक्करणंसमुच्चयपक्षेप्रत्येकंश्रेयःसाधन
त्वानभ्युपगमादितिभावः पूर्वार्द्धस्येवोत्तरार्द्धस्यापिसमुच्चयपक्षेतस्यानुपप।
त्तिरित्याहतथेति दूरेणह्यवरंकर्मेत्यत्रकर्म्मणःसकाशात्बुद्धिःश्रेयस्करी
स भगवतोक्ताकर्म्मचबुद्धेःकाशादश्रेयस्करमुक्तंतथापितदेवकर्म्मण्येवाधिकार
स्तेमाफलेष्वितिस्त्रियर्थंशिष्यंभक्तञ्चमांप्रतिकुर्व्वितिभगवान्प्रतिपादयतित
त्कारणानुपलम्भादयुक्तमतिक्रूरेकर्म्मणिभगवतोमन्नियोजनमितियद
र्ज्जुनोब्रवीतितच्चसमुच्चयपक्षेऽनुपपन्नंस्यादित्यर्थः ॥ २ ॥ ॥ ॥

श्रीधरी टीका ३

शोकपंकनिमग्नंयःसांख्ययोगोपदेशतः उज्जहारार्ज्जुनंभक्तंसकृष्णःशरणं
मम॥ एवंतावदशोच्यानन्वशोचस्त्वमित्यादिनाप्रथमंमोक्षसाधनंदेहात्मवि त्वेन
वेकबुद्धिरुक्तातदनंतरंएषातेभिहितासांख्येबुद्धिर्योगेत्विमांशृणुइत्यादिना
कर्मचोक्तं नचतयोर्गुणप्रधानभावः स्पष्टंदर्शितः तत्रबुद्धियुक्तस्यस्थितप्र
ज्ञस्यनिष्कामत्वनियतेंद्रियत्वनिरहंकारत्वाद्यभिधानात् एषाब्राह्मीस्थितिः
पार्थेतिसप्रशंसमुपसंहाराच्चबुद्धिकर्मणोर्मध्येबुद्धेःश्रेष्ठ्यंभगवतोभिमतं
मत्वार्ज्जुनउवाच ज्यायसीति कर्मणःसकाशान्मोक्षांतरंगत्वेनबुद्धिर्ज्याय
सीअधिकतराश्रेष्ठाचेत्तवसंमतातर्हिकिमर्थंतस्मात्कथयस्वेतितस्मादिति हे
तिचवारंवारंवदन् घोरेहिंसात्मकेकर्मणिमांनियोजयसिप्रवर्त्तयसि ॥
॥ १ ॥

पिशाचभाष्य ४

गी॰ टी॰ का॰ कर्मण्यास्सकाश्चात्तेजनार्दनबुद्धिर्ज्यायसीनवमताचेत्तत्त्वर्हिंयोरेघुर्णात्मके।
कर्मणिमांकिमर्थंनियोजयसिकेशव १ ॥ १ ॥

रामानुजभाष्य ५

यदिकर्मणोबुद्धिरेवज्यायसीतितेमतंकिमर्थंतर्हिघोरेकर्मणिमांनियोजय
सिएतदुक्तंभवतिज्ञाननिष्ठैवात्मावलोकनसाधनंकर्मनिष्ठातुतस्याःनिष्पादि
काआत्मावलोकनसाधनमंतातुज्ञाननिष्ठासकलेंद्रियमनसांशब्दादिविषय॰
व्यापारोपरतिनिष्पाद्येत्यभिहितांइंद्रियव्यापारोपरतिनिष्पाद्यमात्मावलोकनं
चेत्सिसाधयिषितंसकलकर्मनिवृत्तिपूर्वकज्ञाननिष्ठायामेवाहंनियोजयितव्यः
किमर्थंघोरेसर्वेंद्रियव्यापाररूपआत्मावलोकनविरोधिनिकर्मणिमांयोजय
सि ॥ १ ॥

अभिनवगुप्त ६

कर्मोक्तंज्ञानंचनत्वन द्वयोःप्राधान्यमुक्तंअपितुज्ञानस्य ॥ १

परमार्थप्रपा ७

पूर्वंकर्मण्येवाधिकारस्तेइत्यादिवाक्यैः कर्मप्रशंसाकृता अनंतरंस्थितप्र
ज्ञस्येत्यादिवाक्यैर्याविदध्यायसमाप्तिस्तावद्बुद्धियोगप्रशंसाकृताएवमु
भयोः प्रशंसनेसंदिहानोर्जुनः पृच्छतिज्यायसीचेदितिद्वाभ्यां १ ॥

वनमाली ८

जीवेरागत्वधीहेतुर्यत्कर्मोक्तंसमासतः तदेवविस्तरादीशोब्रूतेध्यायेतृ
तीयके १ ॥ ज्ञानकर्माधिकारंचैकस्यैवभूमिभेदतः कामदुर्जयतां

विधान्तरेण विरोधं दर्शयन्नुत्तरमाह एतदपीति विरोधमेवाकाङ्क्षाद्वारा साधय
ति कथमित्यादिना श्रौतं कर्म्म गृहस्थानामवश्यमनुष्ठेयमित्यनेनाभिप्रायेणैते
षां केवलादात्मज्ञानान्मोक्षो निषिध्यते न तु गृहस्थानां ज्ञानमात्राद्यत्नं मोक्षप्र·
तिषिद्धान्येषां केवलज्ञानाधीनो मोक्षो विवक्ष्यते अ आश्रमान्तराणामपि स्मार्त्तेन
कर्म्मणा समुच्चयाभ्युपगमादिति चोदयति अथेति एतत्पदपरामृष्टं वचनमेवा
भिनयति केवलादिति ननु गृहस्थानां श्रौतकर्म्मराहित्येऽपि सति स्मार्त्तकर्म्मणि
कृते ज्ञानस्य केवलत्वं लभ्यते येन निषेधोक्तिरर्थवती न त्वाहतत्रेति प्रकृतवच
नमेव समर्थयति प्रधानं हि श्रौतं कर्म्म तद्राहित्ये सति स्मार्त्तस्य कर्म्मणः सत्त्वेऽप्य
सद्भावमभिप्रेत्य ज्ञानस्य केवलत्वमुक्तमिति युक्ता निषेधोक्तिरित्यर्थः। गृहस्था
नामेव श्रौतकर्म्मसमुच्चयो नान्येषां अन्येषां तु स्मार्त्तेनेति पक्षपाते हेत्वभावं मत्वा
नः सन् परिहरति एतदपीति। तमेव हेत्वभावं प्रश्नद्वारा विवृणोति कथमित्यादि
ना गृहस्थानां श्रौतस्मार्त्तकर्म्मसमुच्चितं ज्ञानं मुक्तिहेतुरित्यभ्युपगमात् केवल·
स्मार्त्तकर्म्मसमुच्चितात् ज्ञानान्न मुक्तिरिति निषेधो युज्यते ऊर्द्ध्वरेतसां तु स्मार्त्त
कर्म्ममात्रसमुच्चितात् ज्ञानान्मुक्तिरिति विभागे नास्ति हेतुरित्यर्थः पक्षपाते·
कारणं नास्ति इत्युक्त्वा पक्षपातपरित्यागे कारणमस्तीत्याह किञ्चेति। गृहस्था
नामपि ब्रह्मज्ञानं स्मार्त्तैरेव कर्म्मभिः समुच्चितं मोक्षसाधनं ब्रह्मज्ञानत्वादूर्द्ध्व
रेतःसु व्यवस्थितब्रह्मज्ञानवदिति पक्षपातत्यागे हेतुं स्फुटयति यदीत्यादि
ना। यदि गृहस्थानां ब्रह्मज्ञानं स्मार्त्तैरेव कर्म्मभिः समुच्चितं तदीयं ज्ञानं मोक्ष
स्य हेतुरिति विवक्षितं तदा तान् प्रति यावज्जीवश्रुतिर्विरुध्येत यदि स्मार्त्तैरपि·
कर्म्मभिः समुच्चितं तदीयं ज्ञानं मोक्षसाधनं विवक्षितं तदा सिद्धसाध्यतेति प्रा
गुक्तमभिप्रेत्य चोदयति अथेति आश्रमान्तराणां तर्हि केवलादेव ज्ञानान्मु·
क्तिरिति प्रागुक्तविरोधतादवस्थ्यमित्याशङ्क्याह ऊर्द्ध्वरेतसां त्विति यथोक्ते विभा
गे गार्हस्थ्यं क्लेशात्मकं कर्म्म बाहुल्यात् अनुपादेयमापद्येतेति दूषयति तत्रे
ति साधनभूयस्त्वे फलभूयस्त्वमिति न्यायमाश्रित्य शङ्कते अथेति क्लेशबाहु
ल्योपेतं श्रौतं स्मार्त्तञ्च बहुकर्म्म तस्यानुष्ठानात् गृहस्थस्य मोक्षः स्यादेवेत्यर्थः

एवकारनिरस्यं दर्शयति नाश्रमान्तराणामिति। तेषां नास्ति मुक्तिरित्यत्र यावज्जी
वादिश्रुतिविहिताग्निहोत्रादिकर्माराहित्यं हेतुं सूचयति श्रौतेति। शास्त्रविरोधे
न्यायस्य निरवकाशत्वमभिप्रेत्य दूषयति तदपीति। एकाश्रम्यस्मृत्या गार्हस्थ्यस्यै
व प्राधान्यादनधिकृतांधादिविषयं कर्मसंन्यासविधानमित्याशंक्याह ज्ञाना
ङ्गत्वेनेति। न खल्वनधिकृतानामंधादीनां संन्यासः श्रवणाद्यावृत्तिद्वारा ज्ञाना
ङ्गं भवितुमलं तेषां श्रवणाद्यभ्याससामर्थ्यादतः श्रुत्यादीनां विरोधे नास्ति गा
र्हस्थ्यस्य प्राधान्यमित्यर्थः तस्य प्राधान्याभावे हेत्वन्तरमाह आश्रमेति ब्रह्मच
र्यं समाप्य गृही भवेत् गृहाद्वनी भूत्वा प्रव्रजेत् यदि वेतरथा ब्रह्मचर्यादेव प्र
व्रजेत् गृहाद्वा वनाद्वेति श्रुतौ तस्याश्रमविकल्पमेके ब्रुवते इति यमिच्छेत्तमा
वसेदित्यादिस्मृतौ चाश्रमाणां समुच्चयेन विकल्पेन चाश्रमान्तरमिच्छन्तं प्रति
विधानान्न गार्हस्थ्यस्य प्रधानत्वमित्यर्थः यदि सर्वेषामाश्रमाणां श्रुतिस्मृतिमू
लत्वं तर्हि तत्तदाश्रमविहितकर्मणां ज्ञानेन समुच्चयः सिध्यतीति शङ्कते सिद्ध
स्तर्हीति। यद्यपि ज्ञानोत्पत्तावाश्रमकर्मणां साधनत्वं तथापि ज्ञानमुत्पन्नं नैव फ
ले सहकारित्वेन तान्यपेक्षते अन्यथा संन्यासविध्यनुपपत्तेरिति दूषयति न मु
मुक्षोरिति। संन्यासविधानमेवानुक्रामति श्रुत्यायेत्यादिना एषणाभ्यो वैमुख्ये
नोत्थानं तत्परित्यागः आश्रमसम्पत्त्यनन्तरं तत्तद्विहितकर्मकलापानुष्ठानम
पि कर्तव्यमित्याह अथेति। प्रागुक्तानां सत्यादीनामल्पफलत्वान्न्यासस्य च ज्ञान
द्वारा मोक्षफलत्वादित्याह तस्मादिति। अतिरिक्तमतिशायित्वं महाफलमिति या
वत् प्रकृतकर्मभ्यः सकाशान्न्यास एवातिशायवानासीदित्युक्तेऽपि वाक्यान्तरं प
ठति न्यास एवेति। लोकत्रयहेतुं साधनत्रयं परित्यज्य संसाराद्विरक्ताः संन्यास
पूर्वकादात्मज्ञानादेव प्राप्तवन्तो मोक्षमित्याह न कर्मणेति। सति वैराग्ये ना
स्ति कर्मापेक्षा सत्यां सामग्र्यां कार्यापेक्षानुपपत्तेरित्याह ब्रह्मचर्यादेवेति इ
त्याद्याः सर्वकर्मसंन्यासविधायिन्यः श्रुतयो भवन्तीति शेषः आत्मानमेव लोक
मिच्छन्तः प्रव्रजन्तीत्यादिवाक्यसंग्रहार्थमादिपदं तत्रैव स्मृतिमुदाहरति त्य
जेति। धर्माधर्मयोः सत्यानृतयोश्च संसारारम्भकत्वान्मुमुक्षुणा तत्त्यागे प्रयति

जित्येन सोपायांख्यमाथवन्नत्वेवाहमित्यारभ्य एषातेभिहितासांख्येबुद्धिरित्यंतेन
ज्ञानयोगउक्तः तथासांख्येत्विमांशृणिवत्यारभ्यकर्मण्येवाधिकारस्तेमातेसंगा
गोस्त्वकर्मणीत्यंतेनकर्मयोगोनयोरधिकार्यधिकारिभेदःस्पष्टंनूक्तोभगव
तानचैकाधिकारिकत्वमेव समुच्चयस्यविवक्षितत्वादितिवाच्यं दूरेणह्यवरं
कर्मबुद्धियोगाद्धनंजयेतिकर्मनिष्ठायाबुद्धिनिष्ठापेक्षयानिकृष्टत्वाभिधानात्
तमेवंविदित्वातिमृत्युमेतीतिश्रुत्यर्थज्ञानस्यैवमोक्षहेतुत्वोक्तेः नतुविरुद्धयोः
समुच्चयासंभवाद्भिन्नाधिकारिकत्वमेवास्त्वितिचेत्सत्यमेकमर्जुनंप्रतितूभयोप
देशेनयुक्तः नहिकर्माधिकारिणंप्रतिज्ञाननिष्ठोपदेष्टुंयोग्या नवाज्ञानाधि
कारिणंप्रतिकर्मनिष्ठा नचैकंप्रत्येवविकल्पेनोभयोक्तिः उत्कृष्टनिकृष्टयो
य४ विकल्पासंभवादितिसमुच्चयस्यविकल्पस्यवासंभवादित्यतिव्याकुलीभूतबुद्धि
रर्जुनःउवाचज्यायसीतिहेजनार्दनसर्वैर्जनैरर्थ्यतेयाच्यतेस्वाभिलषितसिद्ध
यइत्येवंभूतस्त्वंमयिश्रेयोनिश्चयार्थंयाच्यसइतिसंबोधनाभिप्रायः यदिकर्मणो
बुद्धिस्तेनज्यायसीमतातत्तदाकर्मणिघोरेहिंसाद्यनेकापायबहुलेमामतिभ
क्तंकिंनियोजयसिकर्मण्येवाधिकारस्तइत्यादिनाप्रेरयसिहेकेशवसर्वेश्वरपर
मकृपालोस्तवशिष्यस्तेहंशाधिमामित्यादिनात्वदेकचरणंशरणंमांप्रतिप्रता
रणनोचितेतिभावः त्रि४ ॥ १ ॥

ऊसमवैजयन्ती ४

यःशोकाब्धौनिमज्जंतमर्जुनंनाविकोहरिः तर्यात्मविद्ययासम्यगुज्जहारनमा
म्यहे १ तृतीयेज्ञानयोगस्यकर्मयोगस्यचैकताम् वदन्पार्थसखःकामजयोपा
यमवर्णयत् २ एवंतावत्द्वितीयेऽध्यायेनत्वेवाहंजातुनासमित्यारभ्यसुख
दुःखेसमेकृत्वेत्यंतेनग्रंथेनदेहाद्यनात्मवर्गात्पृथगात्माज्ञानेनशोकमोहाविष्टो
यमर्जुनस्तद्भ्रांतिंविनायुद्धंनकरिष्यतीत्येवंज्ञात्वास्वजनकष्टहारिणाभगव
तात्मानात्मविवेकायसांख्यविषयिणीबुद्धिरुक्ता ततएषातेऽभिहितासांख्येबु
द्धिर्योगेत्विमांशृणिवत्यारभ्येषाब्राह्मीस्थितिरित्यंतेनग्रंथेननिष्कामकर्मवि

स्वस्य तत्त्वज्ञानयोगे एवाधिकारित्वं मत्वा स्वस्य सारथेः सर्वेश्वरस्य वचनाभिप्रायमजानन् कल्याणतीव्रवैराग्येण मोहव शेनार्जुनः पृच्छति ४

ज्ञानयोग एवास्मदर्थं निश्चितश्चेत्तर्हि तस्मात् त्वं कर्मयोगे तदधिकारिणं मां प्रति तव प्रेरणं नोचितं भवतीत्यर्थः

यथा बुद्धिः कथिता तयोरुभयोर्ज्ञानकर्मणोर्मध्ये यद्यपि भगवता कर्मण्येवाधिका
रस्ते इत्यादिना फलाभिसन्धानरहितस्य [illegible] कर्मकरणायैवोपदिष्टस्त
थापि दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जयेत्यादिना बुद्धियोगात्कर्मयोगस्या
वरत्वं ज्यायसी चेदिति हे जनार्दन चेत् यदि कर्मणः फलकामरहितादपि कर्म
णः सकाशाद्बुद्धिरात्मनिष्ठा ज्यायसी श्रेष्ठतरा ते तव मता सम्मता तर्हि हे केशव
घोरे गुरुगोत्रादिमारणरूपे अतिभयानके कर्मणि तत्त्वज्ञानानुवर्तिनं शरणापन्नं
किं कथं नियोजयसि तस्माद्युद्धि(ष्ठ) कौन्तेय तस्माद्युध्यस्व भारत कर्मण्येवाधिका
रस्ते इत्यादिना सहेतुकं किमर्थं प्रेरयसि मां त्वं जनार्दनः जनैर्भक्तजनैर्याच्यते याच्य
ते कामं य इत्येवंभूतस्त्वमसि अतो मयाप्यात्मकल्याणनिर्णयरूपं कामं याच्यसे
इति भक्तकामपरिपूरकत्वात्त्वपि मया ज्ञातव्यो अभविवितमनर्हो भवन्तीति सम्बो
धनाशयः केशवेति सम्बोधनेन कश्चेशश्च केशौ विधिशिवौ तावपि यतनि स्वे स्वेऽधिकारे
प्रवर्त्तयतीति तथासः यथा विधिशिवोपलक्षितान् जरायुजाण्डजस्वेदजोद्भिज्जा
तीन्बद्धमुक्तमुमुक्षून्सर्वान्जीवान् स्वस्वकर्मानुसारेण यथाधिकारे स्वे स्वे कर्म
णि प्रवर्त्तयसि तथा मामपि प्रवर्त्तयेति सूचितम् ॥ १ ॥ ॥

एवं तावत्प्रथमेनाध्यायेनोपोद्घातितः द्वितीयेनाध्यायेन कृत्स्नः शास्त्रार्थः सूचि
तः तथाहि आदौ निष्कामकर्मनिष्ठा ततोऽन्तःकरणशुद्धिः ततः शमदमादिसाध
नपुरःसरः सर्वकर्मसंन्यासः ततो वेदान्तवाक्यविचारसहिता भगवद्भक्तिनिष्ठा
ततस्तत्त्वज्ञाननिष्ठा तस्याः फलं च त्रिगुणात्मकाविद्यानिवृत्त्या जीवन्मुक्तिः प्रारब्ध
कर्मफलभोगपर्यन्तं तदन्ते विदेहमुक्तिः जीवन्मुक्तिदशायां च परमपुरुषार्था
लंबनेन परमवैराग्यप्राप्तिः दैवीसंपदाख्यशुभवासनानामुपकारित्वं देयाच्चा
सुरीसंपदाख्याशुभवासनानां विरोधित्वं हेया दैवीसंपदोऽसाधारणं कारणं
सात्त्विकी श्रद्धा आसुरीसंपदस्तु राजसी तामसी चेति हेयोपादेयविभागेन कृत्स्नशास्त्रा
र्थपरिसमाप्तिः तत्र योगस्थः कुरु कर्माणीत्यादिना सूचिता सत्त्वशुद्धिसाध

नभूत्वा निष्कामकर्मनिष्ठा सामान्यविशेषरूपेण तृतीयचतुर्थाभ्यां प्रपंच्यते त·
तःशुद्धांतःकरणस्य शमदमादिसाधनसंपत्तिपुरस्सरा विहाय कामान् यः स
र्वानित्यादिना सूचिता सर्वकर्मसंन्यासनिष्ठा संक्षेपविस्तररूपेण पंचमषष्ठाभ्यां
प्रतावता च त्वंपदार्थोपि निरूपितः ततो वेदांतवाक्यविचारसहिता युक्तभ्यासी·
त्तमत्पर इत्यादिना सूचितानेकप्रकारा भगवद्भक्तिनिष्ठाध्यायषट्केन प्रतिपाद्यते
तावता च तत्पदार्थोपि निर्णीतः सप्तमाध्याये चाध्यायांतरसंगतिमध्यायांतरप्रयोजनभे
दं च तत्र तत्र दर्शयिष्यामः ततस्तत्त्वंपदार्थैक्यज्ञानरूपा वेदाविनाशिनं नित्यं इ
त्यादिना सूचिता तत्त्वज्ञाननिष्ठा त्रयोदशे प्रकृतिपुरुषविवेकद्वारा प्रपंचिता ज्ञा
ननिष्ठायाश्च फलं त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुनेत्यादिसूचितं त्रै· ला
गुण्यनिवृत्तिरूपं जीवन्मुक्तिरिति गुणातीतलक्षणकथनेन प्रपंचि
ता तदा गंतासि निर्वेदमित्यादिना सूचिता परवैराग्यनिष्ठा संसारवृक्षोच्छेदद्वा
रेण पंचदशे दुःखेष्वनुद्विग्नमना इत्यादिना स्थितप्रज्ञलक्षणेन सूचिता परवै·
राग्योपकारिणी दैवी संपदादेया यामिमां पुष्पितां वाचमित्या
दिना सूचिता तद्विरोधिन्यासुरी संपच्च हेया षोडशे दैवसंपदो साधारणं कारणं
च सात्त्विकी श्रद्धा निर्द्वंद्वो नित्यसत्त्वस्थ इत्यादिना सूचिता तद्विरोधिपरिहारेण
सप्तदशे एवं सफला ज्ञाननिष्ठाध्यायपंचके प्रतिपादिता अष्टादशेन च। न
पूर्वोपसंहार इति कृत्स्नगीतार्थसंगतिः तत्र पूर्वाध्याये सांख्यबुद्धिमाश्रित्य ज्ञान·
निष्ठा भगवतोक्ता यथा नेभिहिता सांख्ये बुद्धिरिति तथा योगबुद्धिमाश्रित्य कर्म
निष्ठोक्ता योगे त्विमां शृणु इत्यारभ्य कर्मण्येवाधिकारस्ते मा ते संगोस्त्वकर्मणीत्यं
तेन न त्वनयोर्निष्ठयोरधिकारिभेदः स्पष्टमुपदिष्टो भगवता न चैकाधिकारि
निष्ठयोः कत्वमेवोभयोः समुच्चयस्य विवक्षितत्वादिति वाच्यं दूरेण ह्यवरं कर्म बुद्धियोगा
द्धनंजयेति कर्मनिष्ठाया बुद्धिनिष्ठापेक्षया निकृष्टत्वाभिधानात् यावानर्थ उद
पाने इत्यत्र च ज्ञानफले सर्वकर्मफलांतर्भावस्य दर्शितत्वात् स्थितप्रज्ञस्य लक्ष
णमुक्त्वा एषा ब्राह्मी स्थितिः पार्थेति सप्रशंसं ज्ञानफलोपसंहारात् या निशा स
र्वभूतानामित्यादौ ज्ञानिनो द्वैतदर्शनाभावेन कर्मानुष्ठानासंभवस्य चोक्तत्वात्।

त्र अविद्यानिवृत्तिलक्षणे मोक्षफले ज्ञानमात्रस्यैव लोकानुसारेण साधनत्व
कल्पनात् तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेयनायेति श्रुतेश्च त
र्हि तेजस्तिमिरयोरिव विरोधिनोर्ज्ञानकर्मणोः समुच्चयासंभवाद्भिन्नाधि
कारित्वमेवास्तु सत्यमेवं संभवति एकमर्जुनं प्रति उभयोपदेशो न युक्तः नहि
कर्माधिकारिणमर्जुनं प्रति ज्ञाननिष्ठोपदेष्टुमुचितः नवाज्ञानाधिकारिणं
प्रति कर्मनिष्ठा एकमेव प्रति विकल्पेनोभयोपदेशः इति चेन्न उत्कृष्टनिकृष्ट
योर्विकल्पानुपपत्तेः अविद्यानिवृत्त्युपलक्षितात्मस्वरूपे मोक्षे तारतम्यासंभवा
च्च तस्माज्ज्ञानकर्मनिष्ठयोर्भिन्नाधिकारिकत्वे एकं प्रत्युपदेशायोगादेका
धिकारित्वेन विरुद्धयोः समुच्चयासंभवात् कर्मापेक्षया ज्ञानप्रशस्त्याऽनुपप
त्तेश्च विकल्पाभ्युपगमे चोत्कृष्टमनायाससाध्यं ज्ञानं विहाय निकृष्टमनेकाया
सबहुलं कर्मानुष्ठानमयोग्यमिति मत्वा पर्याकुलीभूतबुद्धिः । १ अर्जुन उवाच
हे जनार्दन सर्वैर्जनैरर्द्यते याच्यते स्वाभिलषितसिद्धये इति त्वं तथाभूतो मयापि
श्रेयो निश्चयार्थं याच्यसे इति नैवानुचितमिति संबोधनाभिप्रायः कर्मणो निःकामा
बु॰ दपि त्वं हि रात्मतत्त्वविषया ज्यायसी प्रशस्ततरा चेद्यदि ते तव मता तत्तदा किं क तत्॰
घ॰ र्मणि घोरे हिंसात्मके यासबहुले मामतिभक्तं नियोजयसि कर्मण्येवाधिकारस्ते
इत्यादिना विशेषेण प्रेरयसि हे केशव सर्वप्रवर सर्वेश्वरस्य सर्वेष्टदायिनस्तव मा
भक्तं शिष्यस्तेहं शाधि मामित्यादिना त्वदेकशरणतयोपपन्नं प्रति प्रतारणानो
चितेत्यभिप्रायः १ ॥ ॥

सदानंदी ११

गुरुं॰

ॐ महीभारोद्धारं स्वजनपरिवारं हरङ्गणाधारं सारं निरवधिविहारं रसं परमे रस॰
मागारं व्रजभुवि सुचारं कलपदं हरिं वारं वारं हृदि गतमुदारं सकलये १
पूर्वाध्याये समाश्रित्य सांख्यबुद्धिं विपश्चितां ज्ञाननिष्ठा विभज्योक्ता हरिणा वि
जयं प्रति २ एषा तेभिहिता सांख्ये बुद्धिरित्यादिना स्फुटे योगबुद्धिं समाश्रित्य
कर्मनिष्ठाप्युदाहृता ३ योगे त्विमां शृण्वित्यादौ कर्मण्येवेति चांततः ज्ञानयो
र्निष्ठयोः स्पष्टमधिकारभिदोदिता ४ नैकाधिकारिकत्वं वा उभयोः प्रोक्तं यतो

नयोः परस्परविरुद्धत्वं तेजस्तिमिरयोरिव ५ दूरेण ह्यवरं कर्म बुद्धियोगादि
ति स्फुटं कर्मणां बुद्धिनिष्ठायाः सकाशान्न्यूनतोदिता ६ यावानर्थ उदपा
ने इति ज्ञानफले परे सर्वकर्मफलानां चाप्यंतर्भावः प्रदर्शितः ७ स्थितधील
क्षणं मोक्षाध्याये तेथी प्रशंसया एषा ब्राह्मीति विज्ञानफलेनैवोपसंहृतिः ८
या निशा सर्वभूतानामित्यादौ तत्त्ववेदिनः द्वैतदृष्टेरभावाच्चानुष्ठानासंभवः।
कुतो ९ भिन्नाधिकारिकत्वे चाप्यनयोर्ज्ञानकर्मणोः एककर्तृकनिर्देशः स्या
दयोग्यस्तदा किल १० एकाधिकारिकत्वे तु विरोधान्न समुच्चयः संभवे युगपत्त
त्र तथा सत्यपि च द्वयोः ११ नैव स्याज्ज्ञानप्राशस्त्यवचनं तदपेक्षया विकल्पस्तीक्ष्ण
तो श्रेष्ठं ज्ञानं सुकरमास्तवं १२ त्यक्त्वा निष्ठामायासबहुलं कर्म नश्वरं श्रेयोगं स्या
दनुष्ठातुमिति मत्वाकुलोऽर्जुनः १३ हे जनार्दन नाम्नैव त्वं प्रार्थ्योसीत्युवाच ह·
यतस्त्वं याच्यसे सर्वैः स्वाभिवांछितसिद्धये १४ तथाभूतो मयापि त्वं श्रेयो नि·
श्चयेऽर्थ्यं स्वात्मतत्त्वैकविषया निष्कामादपि कर्मणः १५ सुप्रशस्ततरा बुद्धिर्यदि ते
भिमता तदा हिंसाद्यायासबहुले भक्तं मां कुरु कर्मणि १६ कर्मण्येवाधिकार
स्त इत्यारभ्य विशेषतः किमर्थं प्रेरयस्येवं हे सर्वेश्वर केशव १७ शिष्यत्वेन प्रपन्नं
मामनन्यशरणं प्रति सर्वेश्वरस्याहकसस्य नोचिता ने प्रतारणा १८ १ ॥

नीलकंठी ॥

पूर्वस्मिन्नध्याये यथा तेभिहिता सांख्ये बुद्धिर्योगे त्विमां शृण्विति द्वे बुद्धी प्रदर्श्य ए
व्यवसायात्मिका बुद्धिरिति श्लोकेन सांख्यनिष्ठावतां या न शंका नास्ति कर्मयोगनि
ष्ठावतां तु सा लीनुक्ता यावानर्थ उदपाने इति सांख्यनिष्ठायां सर्वकर्मफलांतर्भा
वश्रवणात्तामेव प्रशमात्मिकां स्वाशयानुकूलां मन्वानोऽर्जुन उवाच ज्यायसीति
हे जनार्दन कर्मणो निष्कामकर्मयोगापेक्षया बुद्धिः सांख्यनिष्ठालक्षणं ज्ञानं ज्याय
सी प्रशस्ततरा चेत्ते तव मता तत्तर्हि मां भेदृष्ट्यापितृघ्नं तं घोरे बंधुवधाख्ये कर्म
णि किं कुतो हेतोर्नियोजयसि पुनः पुनर्युध्यस्वेति वदन् ॥ २ ॥

आनन्दीटीका

पृथक्कर्मण्येवाधिकारस्ते ~~[illegible]~~ इति दूरेणह्यवरंकर्मबुद्धियो
गाद्धिमादिभगवद्वचनेषुपृथक्पृथग्ज्ञानस्यकर्मणश्चप्रशंसांपृ
त्वापृतयोस्समुच्चयमुद्दिश्यमपिविनानवधानादज्ञात्वा सं
शयानोभगवन्तमर्जुनउवाच ~~[illegible]~~ जनार्दन दूरेणह्यवरंकर्मे
त्याद्युक्त्याकर्मणस्सकाशाज्ज्ञानमेवतेयदिप्रकृष्टतमम्मतम्त
त्किमर्थंकर्मणियुद्धाख्येघोरेगुरुज्ञातिहिंसयाक्रूरेमहापात
कहेतौनितरांनियोजयसिकर्मण्येवाधिकारस्तेइत्यादिवा
क्यैरावश्यकतयाप्रेरयसि १ ॥

२४

रामकंठीटीका

अथज्ञानस्यकर्मणश्चभगवद्भाषितानिश्श्रेयस्कत्वशंसावच।
नान्यनुविमृशन् सम्यक्तमुच्चयार्थमवधार्यनिश्चयंकृत्वा।
किमेतयोरुपदेयतरंस्यादितिसंशयानोभगवन्तम् दूरेणह्य
वरंकर्मबुद्धियोगाद्धिमादिवदनस्तवकर्मणः सकाशाद्यदिबु
द्धिर्ज्यायसीमता ज्ञानंप्रकृष्टतरत्वेनाभिप्रेतं तत्किंकेनहेतुना
वन्धहेतुत्वात्सर्वस्मिन्कर्मणिदारुणविपाकत्वाद्घोरेविशेष
तोस्मिन् गुरुज्ञातिघातादिमहापातकहेतौसंग्रामरूपे मां।
कर्मण्येवाधिकारस्तेइत्यादिनानियोजयसिप्रवर्तयसि १

ज्ञातिकी ~~[illegible]~~टीका

त्वतीयेकर्मयोगाख्येध्यात्मावष्टम्भयोगतः कार्यकर्मसमाभ्य
स्वासिद्ध्यसिद्ध्योःफलस्यच अथकर्मयोगंपूर्वंसूचितमपिविस्त
रेणवक्तुंतृतीयमध्यायंप्रस्तौतमुपक्रमते ननुकर्मचोक्तंश्चा।
त्मबोधलक्षणंज्ञानंचोक्तंतत्रद्वयोःप्राधान्यंप्रकृतेत्वपितत्बोधस्से
वनहलेनकर्मणोतत्पत्तीयत्नकथनात् तत्कर्मणःकिंप्रयोज
नमित्यर्जुनउवाच ज्यायसीचेत् दूरेणह्यवरंकर्मेत्यादिवदत
स्तेनवकर्मणःसकाशाद्यदिबुद्धिरात्मबोधोज्यायसी प्रकृष्ट

गी. टी. ल.

तरत्वेन मताभिप्रेता तत्किं केन हेतुना तथापि घोरे हिंसात्मके कर्मणि ततो युद्धाय युज्यस्वेति कर्मण्येवाधिकारस्ते इति च मां नियोजयसि प्रवर्तयसीति १॥

पंचोलीटीका

सांख्ययोगबुद्धी शास्त्रस्य महति विषये भगवता निर्दिष्टेन तत्र प्रजहाति यदा कामानित्यारभ्याध्याय परिसमाप्ते सांख्यबुद्ध्याश्रितानां संन्यासं कर्तव्यमुक्त्वा पश्चाद्ब्राह्मी स्थितिरियमेनेन तत्त्विष्ठतयेव चक्तुना। धिता उक्ता अर्जुनाय च कर्मण्येवाधिकारस्ते मा ते संगोऽस्त्वकर्मणीति योगबुद्धिमाश्रित्य कर्मैव कर्तव्यमुक्तवान् केवलान्न तत्पदश्रेयः प्राप्ति उक्तवान् तदेतदालक्ष्य पर्याकुलीभूतबुद्धिरर्जुन उवाच ज्यायसी चेदिति हे जनार्दन चेत् यदि कर्मणः सकाशात् बुद्धिर्ज्ञानं तव ज्यायसी श्रेयसी मता अभीष्टा हे केशव तत्तर्हि घोरे कर्मणि कर्मभोगे मां किं कस्मात् नियोजयसि १

रणवीरसमिद्धोधिनी॥

श्रीकार्तवीर्यार्जुनाय नमः पूर्वस्मिन्नध्याये कर्मैव श्रेयः साधनमिति सिद्धान्तितं तत्र कर्मणां घोराघोरात्मकत्वेन द्वैविध्ये किं घोरात्मकं कर्म श्रेयःसाधनं किं वेतरदिति निश्चयाभावेन संदिग्धोऽर्जुनः पृच्छति ज्यायसीति हे भगवन् कर्मणः प्रवृत्तिरूपस्य बुद्धिर्निश्चयो ज्यायसी श्रेयसी यदि त्वया मता तत् कर्मणां घोराघोरात्मकानामनंतानां मध्ये घोरे हिंसाप्राये कर्मणि किं मां नियोजयसि प्रयुंक्षे किंवा हेतु संदेह एवं के प्रश्ने संदेहस्य चोभयकोट्याश्रयत्वात् उत ताघोरे कर्मणि नियोजयसीति वाक्यशेषो ध्यादेव ज्ञायते तथा च किं घोरे कर्मणि मां नियोजयसि आहोस्विदघोरे इति संदिग्धोऽहं भवंतमेव प्रार्थनापूर्वकं पृच्छामीति तात्पर्यं १॥

मधुभाष्य

श्रीगणेशाय नमः॥ आत्मस्वरूपं ज्ञानसाधनं चोक्तं पूर्वत्र
ज्ञानसाधनत्वेनाकर्मविनियोगे कर्मविधीयते उत्तराध्याये क
र्मणो ज्ञानमत्युत्तममिति अभिहितं भगवता हेतुमत्स्य एवं
कर्मेत्यादौ एवं चेत्किमिति कर्मणि घोरे युद्धे मां नियोज
यसीति पृच्छत्यर्जुनः ज्यायसीति कर्मणः सकाशा
द्बुद्धिर्ज्यायसी चेत्ते मता तत्किं ज्यायस्त्वेपि बुद्धेरप्यकारि
कत्वात् कर्मण्यप्यधिकृत इति तत्र नियोक्ष्यामीत्यपेक्षया
वान्भगवानाह ॥१॥

एवंपूर्वाध्यायेबुद्धियोगंकर्मयोगंचोक्त्वोभयोरप्येषाब्राह्मीस्थितिरित्यत्रउक्त
बुद्धियोगलक्षणनिष्ठायाःफलसंबंधोदर्शितः नचबुद्धिप्राधान्यंकर्मणोगु
णत्वमितिविवक्षितं विस्पष्टंकंवतउक्तंनचैकफलयोः साधनयोरनायासेसा
धनेसंभवतिबह्वायासंकश्चिदाहातेनचफलगतस्वल्पत्वमहत्वेनसंभवतः
मोक्षफलस्यैकरूप्यात् ततोनायासंबुद्धिरूपमोक्षसाधनमुपदिश्यबह्वायासे
कर्मयोगमप्युपदिशतोवासुदेवस्यकोभिप्रायः इत्यर्जुनप्रश्नंभगवन्तमुत्तर
व्याजेनयथावस्थितकर्मयोगस्यमुक्तिसाधनत्वंदर्शयितुंतृतीयोध्यायआरभ्य
ते तत्र ज्यायसीचेदितिद्वाभ्याम् अर्जुन उवाच ज्यायसीचेत्। ज्यायसीवंधुपशुबंधानात्मकतयाचबुद्धिर्व्यवसायात्मिकासाचनवचे
तवचेद्यदिमतामोक्षसाधनतयेतिशेषः तदेति तर्हिहेहेदेवंधुपशुबंधात्मकेत
स्याद्दुर्निष्पाद्येकर्मणिकिंकृतोमांकृपास्पदेनियोजयसियोगस्थःकुरुकर्माणीत्यु
क्त्वाप्यस्त्वभावनेतिकुतोज्यायसीत्यत उक्तंकर्मण इति। कर्मणउपदेशाज्ज्ञानार्द
नःबुध्युपदेशात्केशवइतिपूर्ववत् मयोभयमुपदिष्टंत्वंनशक्यमनुतिष्ठेतिचे
तत्राह व्यामि २॥ प्रेलेति ॥ ॥

भाषा अनुवाद

गीताशास्त्रमें प्रथम प्रवृत्ति और निवृत्ति की हेतु रूप सांख्य तथा
योग ये दो प्रकारकी बुद्धि देखावते हुये श्रीजगदीश्वरने अशोच्या
नन्वशोचस्त्वं इत्यादि श्लोकसे पहिले मुक्ति साधनके विषयसे ।
देह और आत्माका भेद कहा तिसके अनन्तर एषातेऽभिहिता ।
सांख्ये इत्यादि श्लोकके द्वारा निष्काम कर्म करनेको कहा परन्तु
तिससे कौनपक्ष मुख्य कहे श्रेष्ठ और कौन गौण कहे साधा
रणहै यह जुदा भाव कहे भगवत की अभिप्राय जानी नगई
और तिसके बीचमें ज्ञानी पुरुषको कर्म रहित होना तथा इं
द्री वश करना और निरहंकार रहना कहिकर एषा ब्राह्मी
स्थिति पार्थ इस श्लोकसे प्रसंसा पूर्वक भगवतकी कहावत
से तत्वज्ञान और निष्काम कर्मयोग रूप भक्तियोग इन दोनो
के मध्य ज्ञानहीकी श्रेष्ठता भगवानको अभिमतहै यह ।
जानिकर अर्जुन कहतेहै कि हे केशव जो निष्काम कर्म्म यो
गरूप भक्तियोगकी अपेक्षा शीघ्र मुक्तिका देनहार तत्वज्ञान
ही श्रेष्ठ आपको अभिमतहै तो फेरि किसवास्ते तस्माद्युध्यस्व
तस्मादुत्तिष्ठ येबातें कहि कहिकर हे जनार्दन घोर हिंसा रूप
कर्ममें हमें प्रवृत्त करते हो जनार्दन संबोधन देनेसे यह ।
आया कि जन कहे भक्तजन जो मैं तिसको अर्दन कहे पीड़ा
देनेवाले काहे होतेहो यह अर्जुन का तात्पर्य्यहै १ ॥

दोहा ॥

तवमतमेहेकर्मसें बुद्धिश्रेष्ठ हरिजोहि तौकौंघोरहिं कर्ममे
केशवजोडत मोहि १॥

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे तदेकं
२ वद निश्चित्य येन श्रेयोऽहमाप्नुयां ॥ २ ॥

शाङ्करभाष्यं

अथ स्मार्त्तेनैव कर्म्मणा समुच्चयः सर्वेषां भगवतोक्तः अर्ज्जुनेन चाव।
धारितश्चेत्तत् किं कर्म्मणि घोरे मां नियोजयसीत्यादि कथं युक्तं वचनं कि
ञ्च व्यामिश्रेणेति व्यामिश्रेणेव यद्यपि विविक्ताभिधायी भगवान् तथापि मम
मन्दबुद्धेर्व्यामिश्रमिव भगवद्वाक्यं प्रतिभाति तेन मम बुद्धिं मोहयसीवेति म
म मन्दबुद्धेर्व्यामोहापनयाय हि प्रवृत्तस्त्वं तत्कथं मोहयसीति ब्रवीमि बु
द्धिं मोहयसीवेति मम मे इति त्वं तु भिन्नकर्त्तृकयोर्ज्ञानकर्म्मणोरेकपुरुषानुष्ठा
नासम्भवं यदि मन्यसे तत्रैवं सति तत्तयोरेकं बुद्धिं कर्म्म वा इदमेवार्ज्जुनस्य
योग्यं बुद्धिशक्त्यवस्थानुरूपमिति निश्चित्य वद ब्रूहि येन ज्ञानेन कर्म्मणा वान्य
तरेण श्रेयोऽहमाप्नुयां इति यदुक्तं तदपि नोपपद्यते यदि हि कर्म्मनिष्ठायां गुण
भूतमपि ज्ञानं भगवतोक्तं स्यात्तत्कथं तयोरेकं वदेति एकविषयैवार्ज्जुनस्य शु
श्रूषा स्यान्नहि भगवतोक्तमन्यतरदेव ज्ञानकर्म्मणोर्वक्ष्यामि नैव द्वयमिति ये
नोभयप्राप्त्यसम्भवमात्मनो मन्यमान एकमेव प्रार्थयेत् ॥ २ ॥

आनन्दगिरिकृतटीका

यत्तद्वृत्तिकारैरुक्तं श्रौतेन स्मार्त्तेन च कर्म्मणा समुच्चयो गृहस्थानां श्रेयःसाध
नमितरेषां स्मार्त्तेनैवेति भगवतोक्तमर्ज्जुनेन च निर्द्धारितमिति तदेतदनुवद
ति अथेति तत्रापि तत् किमित्याद्युपालम्भवचनमनुपपन्नं कर्म्ममात्रस
मुच्चयवादिनो भगवतो नियोजनाभावादिति दूषयति तत् किमिति इतश्च
प्रश्नः समुच्चयानुसारी न भवतीत्याह किञ्चेति भगवतो विविक्तार्थवादित्वा
दयुक्तं व्यामिश्रेणेत्यादिवचनमित्याशंक्याह यद्यपीति यदि भगवद्वच
नं संकीर्णमिव ते भाति तर्हि तेन त्वदीयबुद्धिव्यामोहनमेव तस्य विवक्षित

मितिकिमितिमोहयसीवेत्युच्यते नत्वाहममेति । ज्ञानकर्म्मणोर्मिथोविरोधा
त् युगपदेकपुरुषानुष्ठेयतया भिन्नकर्तृकैकक्ष्येतेन यथाच तयोरन्यतरस्मि
न्नेवत्वंनियुक्तोनतत्तेनबुद्धिव्यामोहनमभिमतमिति भगवतोमतमनुवदति
त्वमिति तदेकमित्यादि श्लोकार्द्धेनोत्तरमाहतत्रेति उक्तंभागवतमतंसम्।
15
म्यापरामृश्यतेयकमित्युक्तप्रकारोक्तिः एकमित्युक्तमेवस्फुटयतिबुद्धिमिति
निश्चयप्रकारंप्रकटयतिइदमिति योग्यत्वंस्पष्टयतिबुद्धीति अस्यहित्रि·
घस्यसतोऽन्तःकरणस्यदेहशक्तेःसमरसमारम्भावस्थायामिदमेवज्ञानं ।
कर्म्मवानुगुणमितिनिर्द्धार्य्यब्रूहिइत्यर्थः निश्चित्यान्यतरोक्तेनतेनश्रोतुःश्रे
योवाभिफलमाहयेनेति । तदेकमित्यादिवाक्यस्यान्तरोऽप्यमर्थमुक्त्वा समुच्च
यस्यशास्त्रार्थत्वाभावेतात्पर्य्यमाहयदिहीति गुणभूतमपि इत्यादिना प्र
धानभूतमपिचेति विवक्षितं नत्वभयप्राप्त्यसम्भवमात्मनोमन्यमानस्यार्ज्जु
नस्यान्यतरविषयशुश्रूषाभविष्यतिनेत्याहनहीति यथोक्तभगवद्वचना
भावेह्ययमाश्यहमस्यवबुद्ध्यानान्यतरप्रार्थनासम्भवतीत्याहयेनेति नहित
थाविधंभगवद्वचनंभवतेहूंभगवतःसमुच्चयवादित्वाट्टीकारादतत्वद्भा
वादुक्तबुद्ध्यानमुक्तान्यतरप्रार्थनेत्यर्थः ॥ २ ॥

श्रीधरी २

ननुधर्म्याद्धियुद्धाच्छ्रेयोन्यत्क्षत्रियस्यनविद्यतइत्यादिनाकर्मणोपिश्रेष्ठ
त्वमुक्तमेवेत्याशंक्याह व्यामिश्रेणेति क्वचित्कर्मप्रशंसा क्वचिज्ज्ञानप्रशंसाइत्ये
वंव्यामिश्रसंदेहोत्पादकमिववाक्यं तेनमेबुद्धिंमतिमुभयत्रदोलायितांकुर्व
न्मोहयसीवपरमकारुणिकस्यतवमोहकत्वंनास्त्येवतथापिभ्रांत्यामेमेवमा
भाति अतउभयोर्मध्येयद्भद्रंतदेकंवदनिश्चित्येति इदमेवश्रेयःसाधनमिति
निश्चित्ययेनानुष्ठितेनश्रेयोमोक्षमाप्नुयांप्राप्स्यामितदेकंवदेत्यर्थः २

पिशाचभाष्य ५

॥किंच॥ व्यामिश्रेणेवसंकीर्णेनेववुद्धिंमोहयसीवकदाचित्कर्मश्रेयइति
६ कदाचिद्बुद्धिःश्रेयसीतिचसंकीर्णेनेववाक्येनबुद्धिंमोहयसीवमोहंनयसी
वमें तत्तस्मादेवमनुष्ठेयंनिश्चित्यवदयेनानुष्ठितेनश्रेयोहमाप्नुयां ॥ २ ॥

अतोव्यामिश्रवाक्येनमांमोहयसीवेतिप्रतिभातितथाह्यात्मावलोकनसाधन
भूतायाःसर्वेन्द्रियव्यापारोपरतिरूपायाज्ञाननिष्ठायाविपर्ययरूपंकर्मसाध
नंतदेकंकुर्वितिवाक्यंव्यामिश्रमेवतस्मादेकमसंमिश्रंवाक्यंवदयेनवाक्येनाहम
नुष्ठेयरूपंनिश्चित्यात्मनःश्रेयःप्राप्नुयां ।२ ॥

अभिनवगुप्त ६

नहलेनदत्तपणीयत्वंयदिकर्मणां बुद्धियुक्तोजहातीहेमेइत्यादिनयेनमूलत एवतर्हि
कर्मणाकिंप्रयोजनमितिप्रश्नाभिप्रायः ॥ २ ॥

परमार्थप्रपा ७

भोजनार्दननेतत्वकंकर्मणःकर्मयोगात्तत्सकाशान्मतिर्बुद्धिर्ज्यायसीश्रेष्ठामता
ज्ञानयोगःश्रेष्ठइत्यभिमतंचेत्तर्हिमांघोरे॥ अतिप्रयाससाध्येकर्मणिकथंनियो
जयसिप्राज्ञायपतिशेषंस्पष्टं ॥ २ ॥

वनमाली ८

परमात्मासर्वभूतसुहृदाप्तकामःशरणागतवत्सलोहंतकमपिप्रतारयामित्वया
किंप्रतारणचिन्हंमयिदृष्टमतत्राह नवबचनंव्यामिश्रंनभवत्येवममत्वेकाधि
कारिकत्वभिन्नाधिकारिकत्वसंदेहाद्व्यामिश्रंसंकीर्णमिवतेयद्वाक्यंमांप्रतिज्ञा
नकर्मनिष्ठाद्वयप्रतिपादकत्वेनवाक्येनत्वंमेममाल्पबुद्धेर्वाक्यतात्पर्यापरिज्ञाना
द्बुद्धिंमोहयसीवपरमकारुणिकत्वेनमोहयस्येवममत्वस्वीयदोषात्तमोहोभव
तीतिवशब्दार्थः मांप्रतिविरुद्धयोर्निष्ठयो[illegible]रुपदेशायोगादेकंज्ञानंकर्मवा
निश्चित्यवदयेनाधिकारनिश्चयपुरःसरमुक्तेनमयानुष्ठितेनज्ञानेनकर्मणावेके
नश्रेयोमोक्षमाप्नुयां एवंनिष्ठाद्वयस्यैकाधिकारित्वविकल्पासंभवादधिकारिभे
दज्ञानायार्जुनस्यप्रश्नइतिस्थितम् २ ॥

कुसुमवैजयन्ती ९

ननुज्ञानकर्मणोरुभयोरपिमाहात्म्यंमयोक्तंतत्रैकस्यस्वीकारोऽन्यस्यपरित्याग

म्न्वयात्कस्मान्निश्चीयते इति चेन्न आह व्यामिश्रेणेति विशेषेण समंतान्मिश्रं कर्म
ज्ञानाभ्यां मिलितं यद्वाक्यं तेन संशयजनकेन मे मम बुद्धिं मतिं मोहयसीव भ्रमविषये
पातयसीवेति मे प्रतिभाति यद्यपि करुणावरुणालयस्य चेतनाचेतनात्मकजग
दुपकृतिमत्स्य ब्रह्मादिस्थावरांतलोकगुरोस्तव वाक्यं कर्मज्ञानमिश्रं नास्ति त
थापि ज्ञातिद्रोहेन व्याकुलचित्तस्य मम [illegible] इत्यर्जुनस्य प्रश्नाशयः।
ननु त्वन्मोहविनाशायैवाहं वदामि प्रत्युत तेनैव मद्वाक्येन यदि तव बुद्धिर्मोहं प्रा
प्नोति तर्हि मम कथनमेव व्यर्थं स्या [illegible]
[illegible] नदेकमिति येन मद्वचनप्रकारकेण मिश्रेण वाक्येन न वाक्कुलोद्दंत
द वकुलेन वा राधनादिकं कृत्वा श्रेयो गर्हादिदोषरहितं ऐहिकपारलौकिकं
सर्वं मोक्षं वा [illegible] प्नुयां तद्वाक्यं वद मम मोपदिक्षपांकृत्वा कथय प्रार्थनायां लोट्
न तु प्रेरणायां [illegible] बुद्धियोगकर्मयो
[illegible] अहं त्वां प्रार्थयामि न तु प्रेरयामीत्यर्थः किंतु एकमविमिश्रं निश्चित्य निश्चयं कृत्वा यद्यनेकमिश्रं
वदिष्यसि तदा त्वत्सौहृदं न्वारयितुं कथं मो भवामीत्यभिप्रायः २

मधुसूदनी १०

ननु नाहं कं विदपि प्रतारयामि किं पुनस्त्वामतिप्रियं त्वं तु किं मे प्रतारणचिह्नं पश्यसि इति चेन्न आह

व्यामिश्रेणेति

न च वचनं व्यामिश्रं न भवत्येव मन्मते एकाधिकारिकत्वं भिन्नाधिकारिकत्वं संदेहाद्
व्यामिश्रं संकीर्णार्थमिव तेन यद्वाक्यं मां प्रति ज्ञानकर्मनिष्ठाद्वयप्रतिपादकं तेन
वाक्येन मे मम मंदबुद्धेर्वाक्यतात्पर्यापरिज्ञानाद्बुद्धिमंतःकरणं मोहयसीव भ्रां
त्यायोजयसीव परमकारुणिकत्वात्त्वं न मोहयस्येव तथापि मम तु स्वाशयदोषान्मोहो
भवतीति विवक्षार्थः एकाधिकारित्वे विरुद्धयोः समुच्चयानुपपत्तेरेकार्थत्वाभा
वेन च विकल्पानुपपत्तेः प्रागुक्तेर्यदधिकारिभेदं मन्यसे तदेकं मां प्रति विरुद्ध
योर्निष्ठयोरुपदेशायोगात् तत्ज्ञानं वा कर्म वा एकमेवाधिकारं मे निश्चित्य व
द येनाधिकारनिश्चयपुरःसरमुक्तेन त्वया ज्ञानानुष्ठितेन ज्ञानेन कर्मणा चैकेन श्रे
योमोक्षमहं अवाप्नुयां प्राप्तुं योग्यः स्यां एवं ज्ञानकर्मनिष्ठयोरेकाधिकारित्वे वि
कल्पसमुच्चययोरसंभवात् अधिकारिभेदज्ञापनार्जुनस्य प्रश्नः इति स्थितं इहेतरे
षां मतं सम्यक् प्रतिस्पर्धिन्यायबलान्निरस्तं पुनः पुनरभिप्रायकृतानि यत्नादतो

ननुकर्मण्यहंप्रवृत्तः भाष्यकारमतसारदर्शिनाग्रंथमात्रमिहयोज्यतेमया
आशयोभगवतःप्रकाश्यतेकेवलंस्ववचसोविशुद्धये([illegible]
[illegible]) ॥ २ ॥

८

सदानंदी २२

नाहंप्रतारयाम्यन्यंकिंपुनस्त्वामनिंदितं किंवाप्रतारणाचिन्हंयत्पश्यसित्वंम
मेतिचेत् १ नह्येवंकिंतुमेभ्रांतिवशाज्जातिप्रतारणाव्यामिश्रेणैवतेवाक्यं
सुविविक्ताभिधायिनः २ भिन्नाधिकारिकंवास्यात्किंस्यादेकाधिकारिकं कर्मज्ञा
नंममेत्येवसंदेहात्तेवचस्त्विदं ३ संकीर्णार्थमिवाभातितात्पर्यानवधारणा
त् मममंदमतेस्तेनवाक्येनैवांतरिंद्रियं ४ भ्रांत्यायोजयसीवेतिकल्पयामि
नवस्तुतः त्वंमोहयसिमेकिंतुमोहःस्वाशयदोषतः ५ तस्माद्विरुद्धयोरेकं
मांप्रतिज्ञानकर्मणोः निर्देशासंभवादेकंज्ञानंवाकर्मवाममः ६ अधिका
रानुसारेणविनिश्चित्यवदस्फुटं येनाधिकारमाश्रित्यानुष्ठितेनयथाविधि ७
ज्ञानेनकर्मणावाहंसम्यक्श्रेयोनमवाप्नुयां २ ॥ ८

धिका

नीलकंठी १२

ननुनवज्ञाननिष्ठायामनधिकारात्कर्मैवकुर्वितित्वांब्रवीमीत्याशंक्याह
व्यामिश्रेणेति व्यामिश्रेणअविविक्तेनइवशब्दोविविक्तेपिबुद्धिदोषात् अवि
विक्ततांगृह्णामीतिसूचयतितेनवाक्येनत्रैगुण्यविषयावेदानिस्त्रैगुण्योभवा
र्जुनेति क्वचिद्वेदनिष्ठांत्याजयसिकर्मण्येवाधिकारस्तेइतितामेवग्राहयसि
तथानिर्द्वंद्वोनित्यसत्त्वस्थोनिर्योगक्षेमआत्मवान्भवेतिनिवृत्तिमार्गंउपदिश
सि धर्म्याद्धियुद्धाच्छ्रेयोन्यत्क्षत्रियस्यनविद्यतइतिप्रवृत्तिमप्युपदिशसि
नह्येकेनमयायुगपद्भयंस्थितिगतिवदनुष्ठातुंशक्यं अतोमेममबुद्धिंमो
हयसीववस्तुतस्तुममामोहनाशयित्वंप्रवृत्तोसीतिइवशब्दोनोच्यते तत्तयो
र्मध्येयदेकंप्रधानंमद्योग्यंतन्निश्चित्यवदयेनानुष्ठितेनाहंश्रेयःकल्याणं
आप्नुयां ॥ २ ॥

चै

17

आनन्दीटीका

त्वंतोकर्मप्रशंसालक्षणंज्ञानप्रशंसेतिव्यामिश्रेणानयोरर्थोस्य
विरोधात्संकीर्णेनवाक्येनमेबुद्धिंव्यामोहयसीवममनुग्रहता
मवेत्योपहसत्सीवेतीवशब्दोगम्यउपालम्भः ततस्मात्कारणादे
ज्ञानं४ नयोर्मध्यादेकंवाकर्मवामयानुष्ठेयमितिनिश्चित्यवदयेनाहं
श्रेयआप्नुयाम् २॥

रामकंदीटीका

इत्थंचपरस्परविरुद्धत्वानुकर्मप्रशंसारूपत्वाद्व्यामिश्रेणसं
प्रश्नं४ कीर्णेनवाक्येनममबुद्धिंमोहयसीवनिश्चयोपदेशेनप्रबोधन य४
मिच्छन्तंसंशयापादकवचनप्रणयनाहेत्वित्यमिवमोहयसी
यर्थस्तस्मात्कारणादेनयोर्ज्ञानकर्मणोर्मध्यादेकंज्ञानंकर्मवे
दमेवानुष्ठेयमितिनिश्चित्यनिर्णीयब्रूहियेनैकतरेणमयागृहीते य५
नमतात्श्रेयोपवर्गलक्षणमभ्युदयमहंशाश्वतंपालभेयेति(
[illegible]
[illegible] वाच) २॥

लासिकी [illegible]टीका

ननुधर्माद्विपुत्रालक्षेयोग्याहिंसादिनाकर्मणोपिश्रेष्ठत्वमुक्तमे
वेत्याशंक्याह व्यामिश्रेणेति क्वचित्कर्मप्रशंसाक्वचिद्ज्ञानप्र
शंसा इत्येवंव्यामिश्रेणेवसंदेहोत्पादकेनेववाक्येनमेबुद्धिंम
तिंमोहयसीवोभयत्रदोलायितामिवकरोषि परमकारुणि
कस्यतवमोहकत्वंनास्त्येव आत्मानममैवंभातीतीव शब्दप्रयो
गः अतउभयोर्मध्यादेकंकर्मज्ञानंवेदमेवानुष्ठेयमिति निश्चि
त्यब्रूहि येनैकतरेणसम्यग्गृहीतेनश्रेयोमोक्षमाप्नुयां २॥

पंचोलीटीका

किंचहेजनार्दन व्यामिश्रेणमिश्रितवाक्येनेवमेममबुद्धिंमोहयसीव
तदेकंज्ञानंवाकर्मवानिश्चित्यवदयेनाहंश्रेयोनिर्वाणमाप्नुयां २

रणावीरसमिद्धायिनी॥

किंच व्यामिश्रेणेव क्षीरनीरयोगवद निश्चितैकार्थेनेव वाक्ये
न दूरेणह्यवरं कर्मबुद्धियोगाद्धनंजयेत्येवंरूपेणमेमम बु
द्धिं मतःकरणंमोहयसीव ध्रुवमाहेनवाचंयोस्यार्थः ममसो
द्धनिरासार्थमेवप्रवृत्तस्त्वं ममतु बुद्धियोगात्सकामात्कर्म
प्रवृत्तिलक्षणमवरं श्रेयः प्रतिकूलत्वादधमं दूरेणमहांतर
वद्भवति बुद्धियोगएवश्रेयान् नपुनःकर्मेतिस्फुटार्थतया
बुद्धियोगाद्धेतोः स्वधर्माचरणमेवश्रेयःसाधनंसर्वथानुष्ठे
यमितिनिश्चयात्मकबुद्धिंसंगतेऽदंतोऽरवरमनुल्लंघ्यस्वधर्मो
चिताचारबहिष्कृतंभिक्षाचरणादिकर्मदूरेणभवति नकिं
चिमेनप्रयोजनमस्तीत्यस्फुटार्थतयाचप्रतिभासान्मोहोभ
वतीव नतुतस्माद्धंसइवत्वंकियत्क्षीरंकियन्नीरमितिविहिवि
व्यस्फुटतयैकमेवबोरमेव श्रद्धोरमेव वावदयन्ममश्रेयस्क
रंस्यादिति २॥

मधुभाष्य

२॥

18

मनोमात्रसाधकं तत्त्वज्ञानमुपदिश्य पुनर्बाह्यबहुविधदुःसंपादनसा
ध्यं कर्माप्युपदिशतस्तव वाक्यं किं कर्म प्रधानं ज्ञानमुपकारकं ज्ञानं वा
प्रधानं कर्मोपकारकं किं वोभयं समुच्चितमिति विरुद्धविकल्पमिश्रितज्ञा
नजनकत्वाद्व्यामिश्रमिव स्फुटतो व्यामिश्रं सर्वज्ञस्य तव वाक्यत्वात्तेनेदृ
शेन वाक्येन मे बुद्धिमंतःकरणं मोहयसीव न तु वस्तुतो मोहयसि परमाप्त
त्वात् तस्मादेकं प्रत्येकसामर्थ्यं वा गुणप्रधानभावं वा समुच्चयं वा वद येन त
त्ववचनेनाहं निश्चित्य साधनं तदनुष्ठानेन श्रेयो मोक्षाख्यमाप्नुयामित्य
र्थः २ तत्र भगवान्मनोमात्रसाधकत्वेन मोचकज्ञान— स्य ज्यायस्त्वमर्जुना
भिमतमसहमानो ऽव प्रपंचं कर्मापेक्षां प्रपंचयिष्यन्नाह लो[illegible]केस्मिन्निति ॥ ॥

19

हे अनघ नि: पाप अर्ज्जुन यह बात कहि चुका हूं तहां जो मोक्ष के हेतु रूप ज्ञा
न तथा कर्म्म ये दोनो निष्ठा मे पृथक पृथक कहे अलग २ कहे होता था अभी
जो तुमसे कहा इसी मे पृथक करि कहा होता तो अलग ता दोनो के बीच जो
उचित हो सो निश्चय करके कहो यह तुमारा कहना ठीक था परन्तु मैने तो ऐ
सा कहा नहीं केवल दोनो ही पक्ष से एक ब्रह्म निष्ठा ही कहा क्योंकि गौण औ
मुख्य फल दायक ये कर्म्म योग औ ज्ञान योग से भिन्न ऐसी एक ज्ञान निष्ठा ई क भिन्न
हा सो भी अधिकारी के भेद से जैसा अधिकारी होवै सा आचरण करै और दोनो
का अधिकारी एक कैसे होगा जो तुम कहते हो कि दोनो मे से एक कहो सो शु
द्ध अन्त:करण औ अशुद्ध अन्त:करण होने से अधिकारी दो प्रकार के हैं इस से
गये हैं दो मत कहे हैं सोई दो प्रकार ब्रह्म निष्ठा मोक्ष प्राप्ति की उपाय पूर्व्व अध्याय मे ह
मने स्पष्ट कहा है अब उक्त दोनो मत का निर्णय करते हैं कि सांख्य कहे शु
द्ध अन्त:करण ज्ञान मार्ग मे आरूढ पुरुष को ज्ञान परिपाक रूप कारण से ज्ञा
न योग के द्वारा आत्मा को निश्चय करने वाली ध्यान आदि निष्ठा और धर्म्या
द्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते इत्यादि श्लोकों से भगवान कर्म्म
को प्रधान कहा है इसी शंका पर अर्ज्जुन कहते हैं कि कहीं तो कर्म्म की प्र।
शंसा और कहीं ज्ञान की बडाई करते हुये आप की ये सन्देह के उत्पन्न।
करने वाली बातों से हमारी बुद्धि ज्ञान औ कर्म्म इन दोनो पक्ष मे भी ठ
हरती नहि अर्थात् ये मिली जुली बातों से मेरी बुद्धि को मोह सा करते
आप क्या कहते हो यद्यपि परम करुणामय जो आप तिनके मोह नहां है
तो भी भ्रान्ति से हम को मोह की ऐसी बातै समझ पडती हैं सो ज्ञान औ क
र्म्म दोनो के बीच मे जो कल्याण कारी होय वही एक पक्ष निश्चय करके
हम को कहो या जो हमारा कल्याण इस युद्ध कर्म्म ही से निश्चय कि
ये होतो इसी को निधार करि ठीक कहो ॥ २ ॥

दोहा ॥

ज्यों तमसमिश्रित वचनसें बुद्धिमोह करेह । ताते निश्चय एक ह्व लेहुं श्रेय जिमिमे हं २ ॥

॥ श्रीभगवानुवाच ॥ लोकेस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ज्ञानयोगेन सांख्यानां कर्म्म योगेन योगिनाम् ३ ॥ ॥

शाङ्करभाष्यं १

प्रश्नानुरूपमेव प्रतिवचनं श्रीभगवानुवाच लोकेस्मिन्निति । लोके अस्मिन् शास्त्रार्थानुष्ठानाधिकृतानां त्रैवर्णिकानां द्विप्रकारा निष्ठा स्थितिरनुष्ठेय तात्पर्यं पुरा पूर्वं सर्गादौ प्रजाः सृष्ट्वा तासामभ्युदयनिःश्रेयसप्राप्तिसाधनं वेदार्थसंप्रदायं आविष्कुर्वता प्रोक्ता मया सर्व्वज्ञेन ईश्वरेण हे अनघ अपापा तत्र कासा द्विविधा निष्ठेत्याह ज्ञानेनेति । तत्र ज्ञानयोगेन ज्ञानमेव योगस्तेन सांख्यानामात्मानात्मविषयविवेकज्ञानवतां ब्रह्मचर्य्याश्रमादेव कृतसंन्यासानां वेदान्तविज्ञानसुनिश्चितार्थानां परमहंसपरिव्राजकानां ब्रह्मण्येवावस्थितानां निष्ठा प्रोक्ता कर्म्मयोगेन कर्म्मैव योगः कर्म्मयोगस्तेन कर्म्मयोगेन योगिनां कर्म्मिणां निष्ठा प्रोक्तेत्यर्थः यदि चैकेन पुरुषेणैकस्मै पुरुषार्थाय ज्ञानं कर्म्म च समुच्चित्यानुष्ठेयं भगवतेष्टमुक्तं वक्ष्यमाणं वा गीतासु वेदेषु चोक्तं कथमिहार्ज्जुनायोपसन्नाय प्रियाय विशिष्टभिन्नपुरुषकर्तृके एव ज्ञानकर्म्मनिष्ठे ब्रूयात् यदि पुनरर्ज्जुनो ज्ञानं कर्म्म च द्वयं श्रुत्वा स्वयमेवानुष्ठास्यति अन्येषां तु भिन्नपुरुषानुष्ठेयतां वक्ष्यामीति मतं भगवतः कल्प्येत तदा । रागद्वेषवानप्रमाणभूतो भगवान् कल्पितः स्यात् तच्चायुक्तं तस्मात् कयापि युक्त्या न समुच्चयो ज्ञान कर्म्मणोः ॥ ३ ॥

द्विविधा

आनन्दगिरिकृतटीका २

समुच्चयविरोधितया प्रश्नं व्याख्याय तद्विरोधित्वेनैव प्रतिवचनमुत्थापयति प्रश्नेति येषां व्यवहारभूमिरुपलभ्यते तत्र त्रैवर्णिकाः ज्ञानं कर्म्म वा

स्वीयमनुष्ठानमधिक्रियन्ते तेषां द्विधा स्थितिर्मया प्रोक्तेति सार्द्धं योजयति लो
केऽस्मिन्निति स्थितिमेव व्याकरोति अनुष्ठेयेति पूर्व्वं प्रवचनप्रसङ्गं प्रकारं । प्रदर्शयन्
विभिन्न दृष्टिसर्गादाविति प्रवचनस्यायथार्थत्वशङ्काम् वारयति सर्वज्ञेनेति ॥
अर्ज्जुनस्य भगवदुपदेशश्रवणे योग्यत्वं सूचयति अनघेति निर्द्धारणार्थेन त्वेति
सम्यग्धीज्ञानं परमार्थवस्तुविषयं तदेव योगशास्त्रं युज्यते अनेन ब्रह्मणेति व्यु
त्पत्तेस्तेन निष्ठेत्यनुवर्त्तते उक्तज्ञानोपायमुपदिदिक्षुः सांख्यशब्दार्थमाह आत्मेति
तेषामेव कर्म्मनिष्ठत्वं व्यावर्त्तयति ब्रह्मचर्येति तेषां जपादिपारवश्येन श्रवणा·
दिपराङ्मुखत्वं पराकरोति वेदान्तेति । उक्तविशेषणवतां मुख्यसंन्यासित्वेन फ
लावस्थत्वं दर्शयति परमहंसेति कर्म्म वर्णाश्रमविहितं धर्म्माख्यं तदेव युज्य
ते तेनाभ्युदयेनेति योगस्तेन निष्ठा कर्म्मिणां प्रोक्तेत्यनुषङ्गं दर्शयन्नाह कर्म्मैवे
त्यादिना एवं प्रतिवचनवाक्यस्यान्वयाक्षराणि व्याख्याय तस्यैव तात्पर्यार्थं कथ
यति यदि चेति इष्टस्यापि दुर्ब्बोधत्वमाशंक्याह उक्तमिति ज्ञानस्यापि मूलविकल
तया विभ्रमत्वमाशंक्याह वेदेष्विति तस्याशिष्यत्वबुद्ध्यान्यथाकथनमित्याशंक्या·
ह उपसन्नायेति तथापि तस्मिन्नौदासीन्यादव्यवस्थोक्तिरित्याशंक्याह प्रियाये
ति ब्रवीति च भिन्नपुरुषकर्त्तृकं निष्ठाद्वयं तेन समुच्चयो भगवदभीष्टः शास्त्रार्थो
न भवतीति शेषः नन्वर्ज्जुनस्य प्रेक्षापूर्व्वकारित्वाज्ज्ञानकर्म्मश्रवणानन्तरमुभय
निर्देशानुपपत्त्या समुच्चयानुष्ठानं सम्भवत्स्यते तद्व्यतिरिक्तानां तु ज्ञानकर्म्मणोर्भि
न्नपुरुषानुष्ठेयत्वं श्रुत्वा प्रत्येकं तदनुष्ठानं भविष्यतीति भगवतो मतं कल्प्यते त
स्यार्ज्जुनेऽनुरागातिरेकादितरेषु च तदभावादिति तत्राह यदि पुनरिति अप्रमा
णभूतत्वमनाप्तत्वं न च भगवतो रागादिमत्त्वेनानाप्तत्वं युक्तं समं सर्व्वेषु भूतेषु
तिष्ठन्तमित्यादिविरोधादित्याह तच्चेति निष्ठाद्वयस्य भिन्नपुरुषानुष्ठेयत्वनिर्दे
शफलमुपसंहरति तस्मादिति २ ॥

श्रीधरी

अतोत्तरं श्रीभगवानुवाच ॥ लोकेऽस्मिन्निति अयमर्थः यदि मया परस्परनिरपे

प्रकारद्वयमेव निर्दिशति सांख्यानां शुद्धान्तःकरणानां ज्ञानभूमिमारूढानां
ज्ञानपरिपाकार्थं ज्ञानयोगेन ध्यानादिना निष्ठा ब्रह्मपरतोक्ता तानि सर्वाणि संयम्य
युक्त आसीत मत्पर इत्यादिना सांख्यभूमिकामनारूढानां त्वन्तःकरणशुद्धिद्वारा तदारोहार्थं तदुपायभूतकर्मयोगाधिकारिणां
योगिनां कर्मयोगेन निष्ठोक्ता धर्म्याद्धि युद्धाच्छ्रेयोन्यत्क्षत्रियस्य न विद्यते इत्यादिना अत एव तव चित्तशुद्ध्यशुद्धिरूपावस्थाभेदे
न द्विविधा निष्ठोक्ता एषा तेभिहिता सांख्ये बुद्धियोगे त्विमां शृणु इति

त्वं मोक्षसाधनत्वेन कर्मज्ञानयोगद्वयं निष्ठाद्वयमुक्तं स्यात् नहि तयोर्मध्ये य-
दुक्तं तदेकं वद निश्चित्य दीयमस्मः संगच्छेत न तु मया तयोक्तं किंतु द्वाभ्यामेकैव ब्र-
ह्मनिष्ठोक्ता गुणप्रधानभूतयोस्तयोः स्वातंत्र्यानुपपत्तेः एकस्यैव तु प्रकार
भुक्तं भेदमात्रमधिकारिभेदेनेत्याह अस्मिंस्तु शुद्धान्तःकरणतया द्विविधे लोके अ-
धिकारिजने द्वैविध्ये प्रकारो यस्यास्सा द्विविधा निष्ठा मोक्षपरता पूर्वाध्याये मया
सर्वज्ञेन ते प्रोक्ता स्पष्टमेव [illegible] उक्ता ३ ॥

पिशाचभाष्य ४

श्री० लोकेस्मिन् शास्त्रानुष्ठानेधिकृतेषु पुरुषेषु द्विविधा द्विप्रकारा निष्ठा
स्थितिः अनुष्ठेयतात्पर्यं पुरा पूर्वं सर्गादौ प्रजाः सृष्ट्वा तासामभ्युदयनिःश्रेयस
प्राप्तिसाधनं वेदार्थसंप्रदायं कुर्वता पुरा प्रोक्ता मया सर्वज्ञेन ईश्वरेणानघ अपा-
पक निष्ठा द्विविधेत्यत आह ज्ञानेति तत्र ज्ञानमेव योगः तेन सांख्यानां आत्म
विषयविवेकज्ञानवतां निष्ठा प्रोक्ता कर्मयोगेन कर्मैव योगः अनेन कर्मयोगे-
न कर्मिणां कर्मनिष्ठा प्रोक्तेत्यर्थः ३

रामानुजभाष्य ५

पुरोक्तं न सम्यगवधृतं त्वया पुरा ह्यस्मिंल्लोके विविधाधिकारपूर्णे द्विविधा निष्ठा
— ज्ञानकर्मविषया यथाधिकारसंकीर्णं मयोक्ता न हि सर्वो लौकिकः पुरुषः
संजातमोक्षाभिलाषस्तदानीमेव ज्ञानयोगाधिकारे प्रभवति अपि त्वनभिसं-
हितफलेन परमपुरुषाराधनरूपेणानुष्ठितेन कर्मणा विध्वस्तमनोमलो व्याकु-
लेन्द्रियो ज्ञाननिष्ठायामधिकरोति यतः प्रवृत्तिर्भूतानामित्यादिना परमपुरुषारा-
धनैकचेष्टता कर्मणां वक्ष्यते इहापि कर्मण्येवाधिकारस्ते इत्यादिनानभिसंहितं
फलं कर्मानुष्ठेयं विधाय तेन विषयव्याकुलतारूपमोहादुत्तीर्णबुद्धेः प्रजहाति
यदा कामानित्यादिना ज्ञानयोग उदितः अतः सांख्यानामेव ज्ञानयोगेन योगस्थि-
तिरुक्ता योगिनां कर्मयोगेन कर्मयोगस्थितिरुक्ता संख्या बुद्धिस्तद्युक्ताः सांख्याः
आत्मैकविषयया बुद्ध्या युक्ताः सांख्याः अतद्दृशः कर्मयोगाधिकारिणो योगि-

नैर्विषयव्याकुलबुद्धिप्रयुक्तानांकर्मयोगाधिकारः अव्याकुलं बुद्धीनांतुज्ञानयो
गाधिकार उक्त इति न किंचिदिह विरुद्धं नापि व्यामिश्रमभिहितं २

अभिनवगुप्ती ६

श्रीभगवांस्तूत्तरं ददाति (लोकेस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ज्ञानयो)
लोकपक्षाद्द्वयोगतिः प्रसिद्धा सांख्यानां ज्ञानं प्रधानं योगिनां च कर्मेति मया
तु से कैव निष्ठोक्ता ज्ञानक्रियामयत्वात्संवित्तत्त्वस्येति भावः २

परमार्थप्रपा ७

ततो भगवानाह लोकेस्मिन्निति लोक्यते ज्ञायते नेनेति लोको मुमुक्षुजनस्तस्मिन्।
द्विविधा द्विप्रकारा निष्ठा मर्यादा पुरा द्वितीयाध्याये प्रोक्ता तत्र सांख्यानां शुद्धान्तःक
रणानां ज्ञानयोगेन तथा अशुद्धान्तःकरणानां योगिनां कर्मकुशलानां कर्मयोगे
न न त्वेकं प्रत्यपायद्वय कथनं किं त्वधिकारभेदाद तो व्यामिश्रेणेव वाक्येने
ति वक्तुं नार्हतीत्यर्थः २

वनमाली ८

व

अधिकारभेदं वदन्नुत्तरयति लोक इति अस्मिन्नधिकारित्वाभिमते लोके विषये

वित्त

राकुलचित्तभेदेन द्विविधे जने द्विविधा द्विप्रकारा निष्ठा स्थिति ज्ञानपरता कर्म

दि

परता च पूर्वाध्याये व्यासेन मया प्रोक्ता साध्यसाधनावस्थाभेदेन द्विप्रकारान्
उद्देश्यत्वं त्वे निष्ठे इति बोधयितुं निष्ठेत्येकवचनं संख्यात्मविषयका स्थिरा बुद्धि
स्तां भागवतां सांख्यानां ज्ञानमपरोक्षं प्रज्ञाते ब्रह्म लक्षणं येन स ज्ञानयोगः ब्रह्मापरो
क्षोत्पादकवचनं संख्यात्मविषयका स्थिरा बुद्धिः सांख्यं तेषां सांख्यानां ज्ञानम
येनं प्रज्ञाते ब्रह्मलक्षणं येन स ज्ञानयोगः ब्रह्मापरोक्षोत्पादकं ध्यानमिति यावत्
तेन निष्ठोक्ता तानि सर्वाणि संयम्य युक्त आसीत मत्पर इत्यादिना योगिनां क
र्माधिकारयोगेन कर्मणैव प्रज्ञाते तःकरणशुद्धायेन स कर्मयोगस्तेन निष्ठो
क्ता धर्म्याद्धि युद्धाच्छ्रेयोन्यत् क्षत्रियस्य न विद्यत इत्यादिना अत एवात्र चैर्यक्षेत्रा

वस्थाभेदेनैकं प्रत्युभयोपयोगान्नाधिकारभेदेष्वप्युपदेशवैयर्थ्यमितिभावः
त्वं त्वात्मविदामग्रेसरोपि गृहस्थाश्रमित्वाज्जनकादीनामिव स्वरूपेणैव क
र्मत्यक्तुं नार्हसि किं तु जनकादीनामिव लोकसंग्रहार्थं स्वोचितं कर्म कर्तुमे
वार्हसीत्यत एवेति सबोधनेन सूचितम् ३ ॥ ॥

हे मदुक्तं त्वयास्मयगनवधृतमितीवं प्रहस्य स्वजनसंशयोच्छेदनाय बद्धपरिकरः प्रसन्नवदनः सन्नाह श्रीभगवानुवाच ४

एवमनाकलितनिजोक्तिमर्मणोर्जुनस्य वचनं निशम्याऽ सर्वोत्तमं स्मारयन्निभ
गवान् लोकेस्मिन्निति हेऽनघ हे निष्पाप लोकेऽस्मिन् ज्ञानकर्मादिफल
जनकत्वाद्भारतवर्षं गृह्यते यद्वा सर्वज्ञस्य भगवतः करामलकवद्विश्व
त्वेनं त्रैलोक्यं गृह्यते यत्तल्लोकनिवासिनां ब्रह्मादीनामपि ज्ञानकर्म
णोरधिकारिकत्वाविशेषोस्ति अस्मिन्विविधविचित्रशुभाशुभमिश्रितक
र्मकर्तृपरिपूर्णे भारतवर्षे त्रैलोक्ये वा लोके तत्तत्स्थाने जने वा निष्ठा स्थिति
र्द्विविधा द्विप्रकारा कर्मज्ञानविषयिका अधिकार्यनुसारेण संकीर्णा म
या सर्वेश्वरेण सर्वज्ञेन तवातिप्रायहितकारिणा पुरा पूर्वस्मिन्नध्याये प्रोक्ता
प्रकर्षेण तव प्रश्नानुकूल्येनैव कथिता यदि तु त्वं मोक्षाभिलाषी भविष्यति
तदेव त्वं ज्ञानयोगाधिकारी कर्मयोगाधिकारी चापि भविष्यसीत्येवं ज्ञान
कर्मणोः संकीर्णरूपं वाक्यं मयोक्तं स्यात्तर्ह्येवं तत्त्वज्ञापयसी चेत्कर्मणस्तेम
नेनि व्यामिश्रेणेव वाक्येनेति शंका चेन्न तत्र मया नोक्तमप्युत कर्मण्येवाधि
कारस्ते मा फलेष्वित्यादिना फलानुसंधानरहितपरमपुरुषाराधनरूपक
र्मकरणायैवोक्तं तस्मान्नैवंयं शंका अनाकलितविषया सङ्गेत्यर्थः नि
ष्ठायास्त्वेकवचनत्वेनैकेश्वरोद्देश्यत्वात्साधनावस्थाद्वैभेदेन हि प्राकाराप्ये
कैव निष्ठेति सूचितम् एकं सांख्यं च योगं चेत्यादिना वक्ष्यते येनाद्येनन त्वे
वं बुद्धिरनाकलितशंकामाप्नोतिनदं वं मत्प्रसादात्प्राप्स्यत्विति संबोधनाभि
प्रायः ननु केषां वा ज्ञाननिष्ठा केषां वा कर्मनिष्ठा भवेत्तामया नावगम्यते य
स्यां स्थित्वाहं सत्वमानयामित्याशंकायामाह ज्ञानयोगेनेति सांख्यमात्मे

°दर्शित्वा

सितिन्त्यनुकल्पानिर्दिष्टत्वेनास्य लोकस्य ४

कर्मणः सकाशाद्बुद्धिः श्रेष्ठेत्येवं मोक्तिः स्यादथवयदेव २

धसा ४

ज्ञानमेवयोगोयुज्यतेआत्मनाने
नेतिव्युत्पत्तेः ५३
कर्मैवयोगोयुज्यतेज्ञानगर्भयान्त
करणशुद्ध्याज्ञानेनेतिव्युत्पत्तेस्तेन ५४

93

युक्ताये

कविषयाबुद्धिस्तयाबुद्ध्यायुक्ताःसांख्याज्ञानवन्तःपूर्वाश्रमएवचतेषांविषया
विरक्तिमबुद्धीनामात्मज्ञानवतांज्ञानयोगेननिष्ठास्थितिरुक्ताप्रजहातियदा
कामानित्यादिनायोगिनांफलानुसंधानकर्मरहितानांविषयविरक्तिमबुद्धी
नांकर्मयोगेननिष्ठास्थितिरुक्ताकर्मण्येवाधिकारस्तइत्यादिना उभयोरे
तयोर्निष्ठयोर्मध्येनवत्तकर्मयोगएवाधिकारोनतुज्ञानयोगेस्वाधिकारपू
र्वकंपरमपुरुषाराधनरूपेकर्मणिस्थित्वापरमसत्त्वमाश्रयसीत्यभिप्रा
यः ॥ ३ ॥

+एवमधिकारिभेदेनाज्ञेनेनदृष्टतदृहूपंप्रतिवचनं + मधुसूदनी ९

श्रीभगवानुवाच

+अस्मिन्नधिकारित्वाभिमतेलोकेशुद्धाशुद्धांतःकरणभेदेनद्विविधेजनेद्वि
विधाद्विप्रकारानिष्ठामतिःज्ञानपरताकर्मपरताचपुरापूर्वाध्यायेमयानवा
त्यंतहितकारिणाप्रोक्ताप्रकर्षेणस्पष्टत्वलक्षणेनोक्तानतथाचाधिकार्यैक्या
शंकयामाज्ञासीरितिभावः हेअनघअपापेतिसंबोधयन्नुपदेशयोग्यतामा
र्जुनस्यसूचयति एकैवनिष्ठासाध्यसाधनावस्थाभेदेनद्विप्रकारानतुद्वेएव
स्वतंत्रेनिष्ठेइतिकथयितुंनिष्ठेत्येकवचनं तथाचवक्ष्यति एकंसांख्यंचयो
गंचयःपश्यतिसपश्यति तामेवनिष्ठांद्वैविध्येनदर्शयति संख्यासम्यगात्मबु
द्धिस्तांप्राप्तवतांब्रह्मचर्यादेवकृतसंन्यासानांवेदांतविज्ञानेनसुनिश्चितार्था
नांज्ञानभूमिमारूढानांशुद्धांतःकरणानांसांख्यानांज्ञानमेवयुज्यतेनेनस्व। योगेनज्ञान
ने एणंनेतिव्युत्पत्त्यायोगस्तेननिष्ठोक्तातानिसर्वाणिसंयम्ययुक्तआसीतमत्प
रइत्यादिना अशुद्धांतःकरणानांतुज्ञानभूमिमनारूढानांयोगिनांकर्माधि
कारयोगिनांकर्मयोगेनकर्मैवयुज्यतेनेनांतःकरणशुद्ध्याज्ञानेनेतिव्युत्पत्त्यायोगस्ते
ननिष्ठोक्तांतःकरणशुद्धिद्वाराज्ञानभूमिकारोहणार्थं धर्म्याद्धियुद्धाच्छ्रेयो
न्यत्क्षत्रियस्यनविद्यते इत्यादिना अतएवनज्ञानकर्मणोःसमुच्चयोविकल्पो
वाकिंतुनिष्कामकर्मणाशुद्धांतःकरणानांसर्वकर्मसंन्यासेनैवज्ञाननिष्ठेति
चित्तशुद्ध्यशुद्धिरूपावस्थाभेदेनैकमेवत्वांप्रतिद्विविधानिष्ठोक्ता एषातेऽभि
हितासांख्येबुद्धिर्योगेत्विमांशृणुइति अतोभूमिकाभेदेनैकमेवप्रत्युभयो

रूपयोगान्नाधिकारभेदेप्युपदेशवैयर्थ्यमित्यभिप्रायः एतदेवदर्शयितु
मशुद्धचित्तस्यचित्तशुद्धिपर्यंतंकर्मानुष्ठानं नकर्मणामनारंभादित्यादि
नामोक्तंपार्थसंवृत्तीत्यंतैस्त्रयोदशभिर्दर्शयति शुद्धचित्तस्यतुज्ञाननिष्ठो
नकिंचिदपिकर्मापेक्षितमितिदर्शयति यस्त्वात्मरतिरितिद्वाभ्यां तस्मा
दसक्तइत्यारभ्यतुबंधहेतोरपिकर्मणोमोक्षहेतुत्वंसत्वशुद्धिज्ञानोत्पत्ति
द्वारेणसंभवति फलाभिसंधिराहित्यरूपकौशलेनेतिदर्शयिष्यति ततः
परमप्यकेनेतिप्रश्नमुत्थाप्यकामदोषेणैवकाम्यकर्मणः शुद्धिहेतुत्वंना।
स्त्यतःकामराहित्येनैवकर्माणिकुर्वन्नंतःकरणशुद्ध्याज्ञानाधिकारीभवि
ष्यतीतियावदध्यायसमाप्तिवदिष्यतिभगवान् ॥ ३ ॥

मदानंदी ११

एवमेकाधिकारित्वेनविकल्पसमुच्चयौ अधिकारभिदाज्ञाननिष्ठेप्रश्नो
र्जुनस्यच १ एष्टेधिकारभेदेश्रीभगवानाहसूत्तरं चित्तशुद्ध्यविशुद्धिभ्यां
ज्ञानेस्मिन्नधिकारिणि २ द्विविधेद्विप्रकारैवपूर्वाध्यायेस्फुटंमया ज्ञान·
कर्मपरत्वाख्यानिष्ठोक्ताते हितेविण ३ यज्ञाभ्युरेतिसर्गादौप्रजाःसृष्ट्वाच
तुर्विधाः तासांस्वर्गापवर्गाप्तिसाधनंवेदपद्धतिः ४ मयाविकुर्वताप्रोक्ता·
सर्वज्ञेनेश्वरेणच तथाचत्वंभोमाग्लासीरधिकार्येकशंकया ५ अनघेति
पदेनेशोसूच्यनेयोग्यतार्जुने साध्यसाधनभेदेननिष्ठैकैवास्तिसाद्विधा ६
ननुनिष्ठेस्वतंत्रेद्वेनिष्ठेत्यत्रैकताध्वनिः द्वैविध्येनचतामेवनिष्ठांसंदर्शयत्य
जः ७ सम्यक्तत्वमतिःसंख्यातांसमाश्रवतांसतां ब्रह्मचर्याश्रमादेववेदां·
तश्रवणादिभिः ८ ज्ञानभूमौप्रविष्टानांसांख्यानांशुद्धचेतसां प्रुज्यतेब्रह्म
णानेनज्ञानंतद्योगइत्यतः ९ ज्ञानयोगेनतेनैवनिष्ठैतेषामुदाहृता कर्मा·
धिकारिणांपुंसामशुद्धमनसांतथा १० कर्मैवयुज्यतेचित्तशुद्ध्यानेनेतियो
गिकः तेनैवकर्मयोगेननिष्ठातेषामुदाहृता ११ धीशुद्धिद्वारतोज्ञानभूमौस
म्यक्प्रवेशनंतान्यपेत्याशयोविष्णोः श्रीकृष्णस्यकृपानिधेः १२ अतोभिन्नाधि
कारित्वात्साध्यसाधनरूपयोः नविकल्पस्तयोर्ज्ञानकर्मणोर्वासमुच्चयः १३

तस्मादवस्थाभेदेनचैकमेवप्रतिष्ठयोः उपयोगान्नवैयर्थ्यमुपदेशस्यचेति
दिक् १४ ३ ॥

नीलकंठी

अत्रोत्तरंश्रीभगवानुवाच लोकेस्मिन्निति पुरापूर्वाध्यायेमयानिष्ठापके
वलोक्तापरंतस्याद्विविधाद्विप्रकारा एकस्याएवब्रह्मनिष्ठायाःप्रकारद्वय
मुक्तंअधिकारिभेदेन नतुब्रह्मप्राप्तयेपरस्परनिरपेक्षमार्गद्वयमुक्तमिति
भावः हेऽनघविशुद्धांतःकरणमद्वचनस्यार्थंसम्यगालोचयेत्यर्थः तदेवप्र
कारद्वयमाह ज्ञानयोगेनेतिसांख्यानांप्रकृतिपुरुषयोर्विविक्तत्वंजानतां।
आत्मानात्मविवेकज्ञानवतां ज्ञानार्थंयुज्यतेइतिज्ञानयोगःज्ञानोपायोवेदां
तश्रवणमनननिदिध्यासनात्मकस्तेनज्ञानयोगेनब्रह्मणिनिष्ठांपरिस
माप्तिंसांख्याःप्राप्नुवंतीत्यर्थः योगिनांसिद्ध्यसिद्ध्योःसमोभूत्वासमत्वंयो
गउच्यतइतिउक्तलक्षणयोगवतांकर्मयोगेनसंध्योपासनादिनिर्विकल्पक
समाध्यन्तस्थानांतमिहकर्मयोगपदार्थः तेनयोगिनोब्रह्मनिष्ठांप्राप्नुवंती
त्यर्थः अयंभावः इहजन्मनिजन्मांतरेवाईश्वरप्रीत्यर्थमनुष्ठितैःकर्मभि
र्विशुद्धसत्वोविवेकवैराग्यशमादिषट्कोपेतोमुमुक्षुःसम्यक्श्रवणचित्तःश्रव
णमननाभ्यामेवकृतकृत्योभवति सचेत्श्रवणादेःप्राक्पूर्वसमाहितचित्त
स्तर्हिनिदिध्यासनमस्यापेक्षितं अतएवसहकार्यंतरविधिःपक्षेणेतिसूत्र
कृतानिदिध्यासनस्यपाक्षिकत्वमुक्तंसोयंसांख्यमार्गः तथासर्वाणिकर्माणि
परमगुरावर्पयन्श्रवणमननात्मकंविचारमंतरेणैवकेवलंयोगाभ्यासमात्रा
त्प्रतीचोनिर्विशेषब्रह्मरूपत्वंगुरुवाक्यात्तोनिश्चित्यासंभावनादिदोषरहि
तश्चाचार्यान्निर्गुणब्रह्मोपास्तिप्रकारमधिगम्यकर्मच्छिद्रेषुसमाध्यभ्यासं
कुर्वन्निष्कलंप्रत्यगात्मस्वरूपंसाक्षात्करोतिसोयंयोगमार्गः तेनऊहापो
हकौशलंयेषामस्तितेसांख्याः येषांतन्नास्तितेयोगिनइति अतएवद्विप्र
कारानिष्ठानतुद्वेनिष्ठेइतिभ्रमितव्यंयथोक्तंवसिष्ठेन द्वौक्रमौचित्तनाश
स्ययोगोज्ञानंचराघव योगोवृत्तिनिरोधोहिज्ञानंसम्यगवेक्षणं असाध्यः

कस्यचिद्योगः कस्यचित्तत्वनिश्चयः प्रकारौ द्वौ ततो देवो जगाद परमः
शिव इति चित्ताद्दर्शनोपलक्षितस्य ब्रह्मसाक्षात्कारस्य द्वौ क्रमौ चित्तादेर्मि
थ्यात्वप्रत्ते ज्ञानमेव यथा रज्ज्वुरगादि सम्यग्वेदनेनैव नश्यति निवृत्त न
स्य सत्यत्वप्रत्ते योग एव यथा सत्य उरगः मंत्रादिना निरुद्धप्रचारः स्वयमे
व नश्यति निरुद्धचित्तमपि योगेन निरुध्यमानं नश्यति तस्य निरन्वयोच्छेदस्तु
प्रारब्धकर्मान्ते पदद्वयेपि तुल्य इति ३

25

अत्रोत्तरं पूर्वोध्यायोदिष्टस्य ज्ञानकर्मसमुच्चयानुष्ठानेन मुक्ति
रित्युपदेशस्यास्मिन्नध्याये लक्षणलक्षितं श्रीभगवानुवाच
इत्यत्र अस्मिन्लोके पुरा द्वितीयेध्याये निष्ठानिर्वहणं ज्ञानक
र्मसमुच्चयानुष्ठानेन श्रेयः प्राप्तिरिति मध्ये सिद्धान्तस्योक्तिः द्वि
विधा हि विधेः साधनप्रकारो यस्मात्सैकैव प्रकारद्वयसाध्या न।
लोके मनुष्यः कथमित्याह ज्ञानयोगेन सांख्यानामित्यादि ज्ञा
नात्मात्मनोः द्वयोपादेयता विचारे ज्ञानेनास्मियोगसमाधिस्थि
तैकाग्रेनेन सांख्यानां ज्ञानतां निष्ठा प्रोक्ता ननु ज्ञाना हि ज्ञावप्र
केकर्मणि प्रवृत्ता अपि यथाकालं ज्ञानसमाधेर्न ध्रुवत्वेन यावण
त्त्वोदितानियता वर्णाश्रमक्रियाकर्म तत्र योगो ज्ञानापरिमा
गेन कर्मानुष्ठानपरत्वेनेन कर्मयोगेन योगिनां पुंसां कर्मोक्तेति
हृतां निष्ठानि वीहः श्लोकः न हि ज्ञानिनां कर्माविनाभावात्
कर्मिणां च ज्ञानाविनाभावात् एकैव निष्ठा प्रकारद्वयसाध्ये कपु
रुषविषया प्रोक्ता न तु भिन्नपुरुषविषये द्वे निष्ठे इति तथा हि
दूरेण ह्यवरं कर्म नित्ज्ञानेन प्रशस्यत नत्समाधिप्रतिपादनायोक्ते
नस्मात् योगाय युज्यस्वेत्यादि तस्मात्कर्मण्येवाधिकारस्त इत्यादि
ना कर्मणोवश्यं करणीयत्वप्रतिपादकं कर्मजं बुद्धियुक्ता हि फ
लं त्यक्त्वा मनीषिण इत्यादिना ज्ञानेन समाधिफलका पञ्चमश्रीपा
दैः सांख्यानां केवलाज्ञानान्मुक्तिः कर्मयोगिनां तु कर्मनिष्ठेवे
ति द्वे निष्ठे भिन्नपुरुषविषये इति सर्वं सर्वकर्मसंन्यास सम्यग्दर्शि
नां सांख्यानामिति व्याख्यानम् तदाद्ज्ञेनस्य सर्वकर्मसंन्यासाभि
प्रायवतः मयाकिमनुष्ठेयमिति निश्चयाभावादाकुलमतित्वं
तद्दवस्थमेवेमलम् तथा चैतद्दोषपरिहरप्रकारान्तरेणामोक्षप
र्यन्तफलभाजनक संवादजनकवाक्यैः सखीसोहमवाधार्थं
समस्ताप्राप्यमकांचनः मुक्तसंगः स्थितो राज्ये भर्तृशासनैः स्थितए
भिः मोले द्विविधा निष्ठा द्रष्टा पूर्वैर्महात्मभिः ज्ञानेनोकोन
रयन्तस्तु सर्वागामम कर्मणाम् ज्ञाननिष्ठां वदंत्यन्ये मोक्षशास्त्रवि।

गी॰
टी॰
३॰

26

द्योजनाः कर्मनिष्ठां न ये वा ममुनयः स्तत्वदर्शिनः प्रज्ञायोगमयम
येन ज्ञानं कर्म च केवलम् तृतीये यत्समाख्याता निष्ठा नेन महात्म
ना तृतीया समुच्चयरूपेति व्याख्यानं गुरुभिः ३ ॥

रामकंठटीका

संख्यायया प्रतिपादितेन लक्षणशरीरिशरीराद्युपादेयहेयपदार्थ
संख्यानेन तद्विदो मुख्येन या सांख्या उच्यन्ते योगाय योक्त सांख्या।
निश्चितार्थसाक्षात्कारणक्रियाविशेषः स विद्यते येषां ते पि मुख्ये
न या योगिनः कपिलादयो हिरण्यगर्भादयश्च गौणाहाम्यां सांख्याः
योगिनश्चोच्यन्ते यथोक्तलक्षणस्यात्मादेरर्थस्य तेषां निश्चयात्सा
क्षात्काराच्च तदेवं विधानां मुख्यानां सांख्यानां योगिनां च पुरस्तात्
ध्यायात्त्र्वे द्वितीये ध्याये मयैकैव निष्ठाकानिश्चयसिद्धान्तः प्रतिपा
दितः कीदृशी निष्ठा द्विविधा हेयकानुष्ठानरूपभनिष्ठगणस्य।
योज्ये विधेयविधाने प्रकारोपसासानयोनाकेनप्रकारेणाद्विविधेमा
ह ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् इति यथा प्रतिपा
दितात्मचिन्मात्रस्वरूपस्यात्मतत्वस्य प्रमभिन्नालक्षणप्रतिपत्तिरि
हज्ञानमुख्यत्वेन तद्विषयो योगः समाधिः कर्म एव पि सति यथोक्त
स्वरूपाप्रच्युतिलक्षणं प्रणिधानं तेन ज्ञानयोगेन मुख्यानाय यथोक्ता
^ सांख्यानां नां निष्ठा मयोक्ता ने हि नेष्टिकाः सांख्या येषा कर्मणा प्रहतानाम।
पि ये योक्तात्मज्ञानविषयः समाधिरविस्ततः कर्म यथावर्णाय यथा
श्रमं शास्त्रचोदिता साक्षाक्रिया तत्र योगः समाधिर्यथोक्तज्ञानाप
रिपाकेन तदनुष्ठाननिष्ठिताते न कर्मयोगे मुख्यानां योगिनां निष्ठा
का एवं ज्ञानयोगस्य कर्मा विना भावात्कर्मयोगस्य ज्ञानाविनाभावा
देकैव प्रकारद्वयवती वर्मा निष्ठा मया पूर्वमुक्ता तत्प्रतिपादकश्च ग्रन्थ
स्त्वेवोक्तः कथं विस्तरतो भगवता तथा च हरेणा सर्वे कर्मेत्यादिना
ज्ञानस्य प्रकर्षप्रतिपादनमुपक्रम्य तत्समाधिप्रतिपादनायोक्तं त
स्माद्योगाय युज्यस्व कर्मनिष्ठो भव यतः कर्मसु योगस्तत्कौशले
साबुद्धिसत्ताज्ञानिन्तमिसेने ज्ञानयोगेन सांख्यानां निष्ठेति तत्रोक्ता

तथाकर्मण्युपलक्षितश्चकारश्चेन तस्माद्योगाययुज्यस्वेत्याह्निकाकर्म।
णोव एव कर्तव्यत्वेनब्रह्माद्यनन्तरमपिप्रतिपादनायोक्तम् क नत्वे
र्मजंबुद्धियुक्ताहिफलंत्यक्तामनीषिणः कर्मबन्धविनिर्मुक्ताः
पदंगच्छंत्यनामयम् तथा रागद्वेषविमुक्तैस्तु विषयानिन्द्रियै
श्चरन् आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छतीत्यादिनेनापि
कर्मयोगेन योगिनांनिष्ठानत्वोक्ता किंबहुनाहरेणयवरकर्मम
नः प्रभृत्याध्यायपरिसमाप्ति यावदेकपुरुषानुष्ठेयद्विविधनिष्ठा
प्रतिपादनपरत्वेन सर्वोऽप्यध्यायस्तत्रव्याख्यातः तत्कामेवाभिप्राव
वनता यचैवंतेबुद्धिमोह उत्तरः ([illegible]
[illegible]
[illegible]
[illegible] नवपारिका
[illegible] नचैवविधबुद्धिमोहकारणमनेनोऽ
[illegible]) १

लासिकी[illegible]टी:

अथात्प्रैवमयोकमुमध्येवलयाप्रतिपत्तिमिनर्जने प्रति उपाल
म्भमिवाविकुर्वन्नसंशयमुदासायश्रीभगवानुवाच लोकइति
अस्मिंलोकेऽधिकारिजनेनिष्ठात्मपरतापकेवाधिकारिभेदेनद्वि।
विधाद्विप्रकारा पुराप्रवीध्यायमयासर्वज्ञेनप्रोक्तानेस्पष्टमेवाक्ता
प्रकारद्वयमेवाह ज्ञानयोगेनेति संख्यादेहात्मविवेकस्तस्मिन्नधि
कारिणः सांख्याः तेषामत्यन्तात्मबोधानांदेहात्मविवेकाधिकारि
णांज्ञानयोगेन ज्ञानमात्मनतत्त्वस्यप्रत्यभिज्ञालक्षणं नत्रयोगःक
र्मण्यपिसतिसमाधानेनेनविष्ठोक्ता योगःपरमात्मनिनिर्विल्प
वेसमाधानं सविद्यतेयेषांते लब्धबोधानांआत्मनिसमाहितानां
योगिनांकर्मयोगेन कर्मणाक्रियमाणेयोगःसमाधानंस्वात्मप। रा
रामर्शणात्यागः तेननिष्ठोक्ता सांख्यानांज्ञानेनप्रधाने योगिनांचवोध
हृदयेकर्मस्वैत्कप्रत्योक्तम् १ ॥

अपिकारभेदेन विषयव्यवस्थया उत्तरमाह लोकइति हे नवअस्मि
न्लोके मया पूर्वं द्विविधा निष्ठा प्रोक्ता कतेव्यतानान् पंचेउक्तस्तान।
योगेन सांख्यानां ज्ञानमेव योगः ज्ञानयोगः तेन परब्रह्मणि स्थितानां
संन्यासिनामुक्ता कर्मयोगेन कर्मैव योगः कर्मयोगस्तेन कर्मयोगि
नां कर्मनिष्ठानामुक्ता ३

रणवीरसमिहोधिनी॥

अथान्यथैवमयोक्तमन्यथैव त्वयाप्रतिपन्नमित्यर्जुनं प्रत्युपाल
भमिवाविकुर्वंस्तं प्रत्युत्साय भगवानुवाच लोक इति
हे अनघ बुद्धिमालिन्यरहितशुद्धमते इति यावत् इत्यनेन सं
बोधनेन तव तत्कालं निश्चितार्थग्रहणयोग्यमतेः कथंमोह
इति द्योत्यते अस्मिंल्लोके या द्विविधा निष्ठा सा मया पुरा अस्माद
ध्यायात्पूर्वस्मिन्नध्याये प्रोक्ता प्रकर्षेणैकत्वरूपेणोक्ता यथाते
भिहिता सांख्ये बुद्धियोगे त्विमां शृण्वित्यादिनाग्रंथेन न तु सति
द्वैविध्ये कथमेकत्वमित्यत आह ज्ञानेति ज्ञानं निश्चयः स चात्र
स्वधर्मभूतात्कर्मणः सकाशाद प्रच्युतिलक्षणः तेन योयोगः
संगतिर्योगः सन्नहनोपायध्यानसंगतिर्युक्तिश्चित्यनुसन्धा
तू तेन ज्ञानयोगेन स्ववर्णाश्रमाचारोचिते कर्मणि दृढनिश्च
येन सांख्यानां प्रथमास्कंदनं संख्यमित्यनुशासनात्संख्यः
बुद्धं तत्र प्रवृत्तानां कृतारंभाणां तन्निष्ठा निष्ठा प्रोक्ता योगि
नां सत्वशुद्धं तांशुद्धे संमुखस्थितानां कर्मयोगेन कर्मसु फलत्यागस
प्रयोगलक्षणोऽयोयोगः कौशलं योगः कर्मसुकौशलमि
ति भगवदुक्तेः तेन निष्ठा श्रेयस्करीति प्रथमाभिप्रायः कर्म
णि यद्यपि ज्ञानयोगात्मकत्वेन द्विविधानि तथापि सामान्यरू
त्येकरूपाण्येव तथापि यत्र यस्याधिकारस्तत्र तस्यानुष्ठेयत्वं
प्रतिपादितं अत एव सर्वमवश्यमहं स्वधर्मभूतं शुद्धमनुतिष्ठा

मीतिनिश्चित्यशुद्धमार्गं भजतीयं अर्थव्याख्यायाखण्डादिप्रयोगो वि
धेयः इतिसांख्यानां योगिनां चैकमेव वदन्ति च एकं सांख्यं च
योगं च यः पश्यति स पश्यतीति शुद्धं एककाले सांख्यत्वं आरं
भानंतरं प्रयोगदशायां योगित्वं इत्येवं भवतः समरमारब्ध
वतः समरसंमुखस्यैव तत्रजातेः स्वधर्मभूते घोरयुद्धात्म
के एव कर्मण्यधिकारवतः शास्त्रानुप्रयोगपरवाधुनान्तेष्ठय
इतितात्पर्यं यद्वा मयास्मिंल्लोके पुरास्मादध्यायात् सर्वस्मि
न्नध्याये निष्ठास्थितिर्द्विविधा हि प्रकारा प्रोक्ता कथमित्याह
सांख्यानां संख्येशुद्धे सज्ञानात्वन्त्रियाणांज्ञानयोगविषयेण ।
निष्ठा योगिनां चैवागश्चित्तवृत्तिनिरोधलक्षणोष्टांगस्तद्वतां
कर्मयोगविषयेन निष्ठा किं तु द्वन्द्रियाणां स्वधर्मभूते युद्धा
त्मके घोरे कर्मयोगे निष्ठा श्रेयस्करीति तथा च दूरेणात्यव
रं कर्मेत्यादि वाक्यं यद्यपि संकीर्णं तथापि भवंतं प्रति स्वध
र्मभूतयुद्धादिघोरकर्मानुष्ठानपरतयैवोक्तमितितात्पर्यं ॥

३ ॥

मधुभाष्य

लोकइति द्विविधा अपि जनाः संति गृहस्थादिकर्मत्या
गेन ज्ञाननिष्ठाः सनकादिवत् तस्यापवज्ञाननिष्ठाः ।
अजनकादिवत् सद्धर्मस्यापवेत्यर्थः सांख्यानां ज्ञानि
नां सनकादीनां योगिनामप्यार्थिनां जनकादीनां ज्ञाननि
ष्ठा अप्यार्थिकादिकमादौ एवं या लोकसंग्रहार्थं तावद्
येकर्मयोग्या भवंतितेपियोगिनः निष्ठास्थितिः तद्वजन
कादिवत् सत्कर्मैव ज्ञानयोग्यः न तु सनकादिवत्त्यागे
नेत्यर्थः मतिर्दीप्ताश्रेष्ठ्ये वक्कर्मकृतः प्रियव्रतादयोपि

ज्ञानिनएव तथाह्युक्तम् ईश्वरेच्छाविनिवेशितकर्माधि
कारइति अतश्च नियोक्ष्यामीत्यादि ३॥

द्विविधेति लिंगविभक्तिविपरिणामेन द्विविधेत्यपि द्रष्टव्यं तत्रश्च
द्विविधेस्मिन्लोके अधिकारित्वाभिमते द्विविधा निष्ठा मया पूर्वाध्या
ये प्रकर्षेण विवेकेनोक्ता । तथा हि प्रजहाति यदा कामानित्यारभ्या
ध्यायपरिसमाप्तेः सन्न्यासकर्तव्यतामुक्त्वा तन्निष्ठैव कृतार्थतोक्ता
एषा ब्राह्मी स्थितिः अर्जुनाय तु कर्मण्येवाधिकारस्ते मा ते संगोस्त्व
कर्मणीति कर्मनिष्ठामेवोक्त्वा एषानंतरोक्ता ब्राह्मी स्थितिरिति अ
तो ज्ञाननिष्ठैव कृतार्थतोक्ता अतः सन्न्यासपूर्वं श्रवणादौ प्रवृत्तानां ज्ञा
ननिष्ठैव मुमुक्षुसन्न्यासिनां तु कर्मनिष्ठैवेति गीताशास्त्रतात्पर्यं प्रतिभा
ति एवं च विभिन्नाधिकारिप्रदर्शनेन भगवता समुच्चयपक्षो निरा
कृतः न चायमुपपन्नोपि कथं स पुरुषः पार्थ कं घातयतीत्यत्र ज्ञा
नेन क्रियाकारकदर्शनस्य विरोधोक्तेरिति दिक् कथं द्विविधा लोके
द्विविधा निष्ठा ब्रह्मतादात्म्यलक्षणोक्तेत्याशंक्य विवृणोति ज्ञानयो
गेनेति ज्ञानमेव योगस्तेन निदिध्यासनात्मना सांख्यानां संख्या बुद्धि
स्तत्त्वं धिनोत्यत्र स्थचर्यादेव कृतसंन्यासिनां वेदांतविज्ञानसुनिश्चि
तार्थानामित्यर्थः । तानि सर्वाणि संयम्य युक्त आसीत मत्पर इत्यादिने
तिभावः कर्मनित्यादि तदेव योगस्तेन योगिनां कर्माधिकृतानामित्य
र्थः धर्म्याद्धि युद्धादित्यादिनेतिभावः ननु तर्हि समुच्चयानुपपत्ताव
पि प्रत्येकमोक्षसाधनता भविष्यतीत्याशंक्याद्यमेव श्लोकमाहन्या
योज्यायामया निष्ठा प्रागुक्ता सांख्यानां ज्ञानयोग एव सति भवति इति
न किंतु प्राग्भवोपार्जितसुकृतकर्मापेक्षत एवेतिभावः तथाक
र्मयोग एवं सति योगिनां निष्ठापि न कर्मणो ज्ञाननिवर्तकत्वाभावे
नाज्ञाननिवृत्त्यभावान्मोक्षसाधनतानुपपन्ने विविदिषावाक्येन च
ज्ञानविधियोगात्तस्मात्कर्मयोगो वश्यं प्रधानीभूतं ज्ञानं निवर्तयन्नेव
निष्ठां साधयतीतिभावः द्वितीयव्याख्यानमेव व्यतिरेकमुखेन द्र
ढयन्नाह न कर्मणामिति ॥

29

अर्ज्जुन की प्रश्नके अनुरूप उत्तर करते हुये श्रीभगवान कहते हैं कि
इसलोकमे शास्त्रके अर्थ अनुसार चलनेवाले ब्राह्मण क्षत्री वैश्य इ
नतिनि वर्णोंके अर्थ दो प्रकार की निष्ठा पूर्वही अर्थात् सृष्टिके प्र
थमही उनका श्रेयसाधन कहे मुक्ति कादेन हार वेदार्थ संप्रदाय प्रग
ट करते मैंने इसरूप ब्रह्म परता कही है यथा तानि सर्वाणि संयम्य यु
क्त आसीत मत्परः इस श्लोकसे और जो ज्ञान मार्गमे नहीं प्राप्त हैं उनलो
गों को चित्त शुद्धिके द्वारा ज्ञानमार्ग पर आरूढ होनेके अर्थ उसकी
उपाय रूप कर्मयोगके अधिकारियों को कर्मयोगसे निष्ठा अर्थात् ब्र
ह्मपरता कही गई है यथा धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य नविद्यते इ
त्यादि श्लोकोंसे कहा है अतएव चित्त शुद्धि अशुद्धि दो अवस्था भेदसे दो
प्रकार ब्रह्मपरता कथित भई है पर तोभी तुमसे प्रकाश करि करि
खुलसा से कहिदिया कि यथा तेऽभिहिता सांख्ये बुद्धिर्योगेत्विमां शृण
इस श्लोकसे फिरि भी सन्देह करते हो ३

श्रीभगवानवाक्य दोहा॥

पारथ दो विधलोकमे कहि पूर्व धारणा मेंह ज्ञानयोग सें
सांख्यकों योगीहिं कर्मयोगसें यह ३॥

न कर्म्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते न च
संन्यसनादेव सिद्धिं समधिगच्छति ॥ ४ ॥

शाङ्करभाष्यं १

यदर्ज्जुनेनोक्तं कर्म्मणो ज्यायस्त्वं बुद्धेः तच्च स्थितमनिराकरणात्तस्याश्च
ज्ञाननिष्ठायाः संन्यासिनामेवानुष्ठेयत्वं भिन्नपुरुषानुष्ठेयत्ववचनाच्च भगव
त एवमेवानुमतमितिगम्यते मां च बन्धकारणे कर्म्मण्येव नियोजयसीति
विषण्णमनसं अर्ज्जुनं कर्म्मणामनारम्भे इत्येवं मन्वानमालक्ष्याह भगवान् न
कर्म्मणामनारम्भादिति अथवा ज्ञानकर्म्मनिष्ठयोः परस्परविरोधादेकेन पु
रुषेण युगपदनुष्ठातुमशक्यत्वे सतीतरेतरानपेक्षयोरेव पुरुषार्थहेतुत्वे प्रा
प्ते कर्म्मनिष्ठायाः ज्ञाननिष्ठाप्राप्तिहेतुत्वेन पुरुषार्थहेतुत्वं न स्वातन्त्र्येण ज्ञा
ननिष्ठा तु कर्म्मनिष्ठोपायलब्धात्मिका सती स्वातन्त्र्येण पुरुषार्थहेतुरन्यानपे
क्षेत्येतमर्थं दर्शयिष्यन्नाह भगवान् न कर्म्मणेति न कर्म्मणामनारम्भादना
रम्भात् कर्म्मणां क्रियाणां यज्ञादीनामिह जन्मनि जन्मान्तरे वानुष्ठितानामु
पात्तदुरितक्षयहेतुत्वेन सत्त्वशुद्धिकारणानां तत्कारणत्वेन च ज्ञानोत्पत्तिद्वा
रेण ज्ञाननिष्ठाहेतूनां ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्म्मणः यथादर्शतल
ख्ये. प्र पश्यत्यात्मानमात्मनीत्यादिस्मरणादनारम्भादननुष्ठानात् नैष्कर्म्यं निष्क
र्म्मभावं कर्म्मशून्यतां ज्ञानयोगेन निष्ठां निःक्रियात्मस्वरूपेणैवावस्थानमिति
यावत् पुरुषो नाश्नुते न प्राप्नोतीत्यर्थः कर्म्मणामनारम्भान्नैष्कर्म्यं नाश्नुत इति व
चनात्तद्विपर्ययात् तेषामारम्भात् नैष्कर्म्यमश्नुत इति गम्यते कस्मात् पुनः
कारणात् कर्म्मणामनारम्भान्नैष्कर्म्यं नाश्नुत इत्युच्यते कर्म्मारम्भस्यैव नैष्कर्म्यो
पायत्वात् न ह्युपायमन्तरेणोपेयप्राप्तिरस्ति कर्म्मयोगोपायत्वञ्च नैष्कर्म्यलक्ष
णस्य ज्ञानयोगस्य श्रुताविह च प्रतिपादनात् श्रुतौ तावत् प्रकृतस्यात्मलोकस्य वेद्य
स्य वेदनोपायत्वेन तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेनेत्यादिना क
र्म्मयोगस्य ज्ञानयोगोपायत्वं प्रतिपादितमिहापि च संन्यासस्तु महाबाहो दुःखमा
प्तुमयोगतः योगिनः कर्म्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये यज्ञो दानं तपश्चैव पावनानि

३

गी· टी· का·

31

मनीषिणामित्यादिप्रतिपादयिष्यति न त्र चाभयं सर्व्वभूतेभ्यो दत्वा नैष्कर्म्यमा·
चरेदित्यादौ कर्त्तव्यकर्म्मसंन्यासादपि नैष्कर्म्यप्राप्तिं दर्शयति लोके च कर्म्मणा
मनारम्भान्नैष्कर्म्यमिति प्रसिद्धतरमतश्च नैष्कर्म्यार्थिनः किं कर्म्मारम्भेनेति
प्राप्तमतआह न च संन्यसनादेवेति नापि संन्यसनादेव केवलात् कर्म्मपरित्याग
मात्रादेव ज्ञानरहितात् सिद्धिं नैष्कर्म्यलक्षणां ज्ञानयोगेन निष्ठां समधिगच्छ
ति न प्राप्नोति ४ ॥ आनन्दगिरिकृतटीका २

किमितिभगवता बुद्धेर्ज्यायस्त्वं ज्यायसी चेदित्यत्रोक्तमुपेक्षितमिति तत्राह य
दर्ज्जुनेनेति किन्तु ज्ञाननिष्ठायां संन्यासिनामेवाधिकारो भगवतोऽभिप्रेतोऽ
न्यथा तदीयविभागवचनविरोधादिति विभागवचनसामर्थ्यसिद्धमर्थमाहत
स्माच्चेति तर्हि विभागवचनानुरोधादर्ज्जुनस्यापि संन्यासपूर्व्विकायां ज्ञाननि
ष्ठायामेवाधिकारो भविष्यति नेत्याह माञ्चेति । बुद्धेर्ज्यायस्त्वमुपेत्यापीति
चकारार्थः अर्ज्जुनमालक्ष्य भगवानाहेति सम्बन्धः अन्तरेणापि कर्म्माणि श्र
वणादिभिर्ज्ञानावाप्तिर्भविष्यतीति परबुद्धिमनुरुध्य विशिनष्टि कर्म्मेति ।

व२

विभागवचनवशात् समुच्चयस्येदुभयोरपि ज्ञानकर्म्मणोः स्वातन्त्र्येण पुरुषार्थ
हेतुत्वमन्यथा कर्म्मवत् ज्ञानमपि न स्वातन्त्र्येण पुरुषार्थं साधयेदित्याशंक्या स
म्बन्धान्तरमाह अथवेति तर्हि ज्ञाननिष्ठापि कर्म्मनिष्ठावत् निष्ठात्वाविशेषा·
न्न स्वातन्त्र्येण पुरुषार्थहेतुरिति समुच्चयसिद्धिरित्याशंक्याह ज्ञाननिष्ठात्वि·
ति न हि रज्जुतत्त्वज्ञानमुत्पन्नं फलसिद्धौ सहकारिसापेक्षमालक्ष्यते तथेद
मपि चोत्पन्नं मोक्षाय नान्यदपेक्षते तेन तदाह अन्येति यस्य चैतत्तत्कर्म्मेति सूत्रता
विव कर्म्मशब्दस्य क्रियमाणवस्तुविषयत्वमाशंक्याचष्टे क्रियाणामिति ।
तस्य नित्यनैमित्तिकत्वेन विभजते यज्ञादीनामिति अस्मिन्नेव जन्मन्यनुष्ठि
तानां कर्म्मणां बुद्धिशुद्धिद्वारा ज्ञानकारणत्वे ब्रह्मचारिणां कुतो ज्ञानोत्पत्ति
र्जन्मान्तरकृतानां कर्म्मणां वा तथात्वे गृहस्थादीनामैहिकानि कर्म्माणि न ज्ञा
नहेतवः स्युरित्याशंक्याह नियमं दर्शयति इहेति नेमानि सत्त्वशुद्धिकारणानु
पात्तदुरितप्रतिबन्धादित्याशंक्याह उपात्तेति तर्हि तावतैव कृतार्थानां कुतो

ज्ञाननिष्ठाहेतुत्वं तत्राह तत्कारणत्वेनेति कर्म्मणां चित्तशुद्धिद्वारा ज्ञान
हेतुत्वे मानमाह ज्ञानमिति । अनारम्भशब्दस्योपक्रमविपरीतविषयत्वं व्या
वर्त्तयति अननुष्ठानादिति निष्कर्म्मणः संन्यासिनः कर्म्म ज्ञानं नैष्कर्म्यमि
ति˘ कर्म्माभावावस्थां व्यवछिनत्ति ज्ञानयोगेनेति तस्याः साधनपदत्वाति
त्वं व्यावर्त्तयति निष्क्रियेति । कर्म्मानुष्ठानोपायलभ्या ज्ञाननिष्ठा स्वतन्त्रा
पुमर्थहेतुरिति प्रकृतार्थसमर्थव्यतिरेकवचनस्यान्वये पर्य्यवसानं मत्वा
व्याचष्टे कर्म्मणामिति नहि पर्य्ययमेव व्याचष्टे तेषामिति उक्तेऽर्थे हेतुं पृच्छ
ति कर्म्मादिति जिज्ञासितं हेतुमाह उच्यत इति उपायत्वेऽपि तदभावे कुतो
नं नैष्कर्म्यासिद्धिरित्याशंक्याह नहीति ज्ञानयोगं प्रति कर्म्मयोगस्य उपाय
त्वे श्रुतिस्मृती प्रमाणयति कर्म्मयोगेति श्रौतमुपायोपेयत्वप्रतिपादनं प्र
कटयति श्रुताविति यत्तु गीताशास्त्रे कर्म्मयोगस्य ज्ञानयोगं प्रत्युपायत्वोप·
पादनं तदिदानीमुदाहरति इहापि चेति न कर्म्मणामित्यादिना पूर्वार्द्धं व्या
ख्याय उत्तरार्द्धं व्याख्यातुमाशङ्कयति नन्विति आदिशब्देन शान्तो दान्त उपरत
स्तितिक्षुः संन्यासयोगाद्यतयः शुद्धसत्त्वा इत्यादि गृह्यते तत्रैव लोकप्र
सिद्धिमनुकूलयति लोके चेति प्रसिद्धतरं यतो यतो निवर्त्तते ततस्ततो वि
मुच्यते निवर्त्तनाद्धि सर्वतो न वेत्ति दुःखमण्वपीत्यादिदर्शनादिति शेषः
लौकिकवैदिकप्रसिद्धिभ्यां सिद्धमर्थमाह अतश्चेति तत्रोत्तरत्वेनोत्तरार्द्ध
मवतार्य्य व्याकरोति अतश्चाहेत्यादिना एवकारार्थमाह केवलादिति त
देव स्पष्टयति कर्म्मेति उक्तमेव तन्त्रमनुक्तपक्षक्रियापदेन सङ्गतिं दर्शय
ति न प्राप्नोतीति

४

श्रीधरी· २

अतः सम्यक्चित्तशुद्ध्या ज्ञानोत्पत्तिपर्यंतं वर्णाश्रमोचितानि कर्माणि कर्तव्या
नि अन्यथा चित्तशुद्ध्यभावेन ज्ञानानुत्पत्तेरित्याह नकर्मणामिति कर्मणा
मनारंभादननुष्ठानान्नैःकर्म्यं ज्ञानं नाश्नुते न प्राप्नोति ननु च एतमेव प्रव्रा
जिनो लोकमीप्संतः प्रव्रजंतीति संन्यासस्य मोक्षांगत्वश्रुतेः संन्यासादेव
मोक्षो भविष्यतीति किं कर्मभिरित्याशंक्योक्तं नचेति नच चित्तशुद्धिं विनाकृता

…चष्टे नैष्कर्म्य
मिति

संन्यसनादेवज्ञानशून्यात्सिद्धिं मोक्षं समधिगच्छति प्राप्नोति ४ ॥

पिशाचभाष्य ४

घोरं कर्म लं कर्तव्यमिति मन्यमानं मां प्रति कर्माधिकारिणा कर्म कर्तव्यमिति प्रतिपादयितुमाह न कर्मणामिति कर्मणामनारंभादकरणादेव प्रासीयाणं नैष्कर्म्य [illegible] मकर्त्रात्मज्ञाननलक्षणां सिद्धिं पुरुषो नाश्नुते यथाज्ञानाधिकारी ज्ञानेन तर्हि सकलकर्मसंन्यास एव पुरुषार्थफलमनुतिष्ठामीति चेत्तदपि ना नियतः न च सन्न्यसनादेव कर्मत्यागमात्रादेव सिद्धिं नैष्कर्म्यलक्षणां सिद्धिं समधिगच्छति ४ ॥

रामानुजभाष्य ५

सर्वस्य लौकिकस्य पुरुषस्य मोक्षेच्छायां संजातायां सहसैव ज्ञानयोगो दुःकर इत्याह न शास्त्रीयाणां कर्मणामनारंभादेव पुरुषो नैष्कर्म्यं ज्ञानमाप्नोति सर्वेंद्रियव्यापारोपरतिपूर्विकां ज्ञाननिष्ठां न प्राप्नोतीत्यर्थः न चारब्धस्य शास्त्रीयस्य त्यागादयतोऽनभिसंहितफलस्य परमपुरुषाराधनविषयस्य कर्मणः सिद्धिमात्मनिष्ठां न तत्त्वेन विना तां न प्राप्नोति अनभिसंहितफलैः कर्मभिरनाराधितगोविंदैरविनष्टानादिकालप्रवृत्तानंतपापसंचयैरव्याकुलेंद्रियतापूर्विकात्मनिष्ठा दुःसंपादा ४

अभिनवगुप्ती ६

ज्ञानं कर्मणा रहितं न भवति कर्म च कौशलोपेतं [illegible] ज्ञानरहितं न भवति इत्येकमेव वस्तु ज्ञानकर्मणि ॥ ॥

परमार्थप्रपा ७

अ ज्ञानः सम्यक् चित्तशुद्ध्या ज्ञानोत्पत्तिपर्यंतं वर्णाश्रमोचितानि कर्माणि कर्तव्या
नि अन्यथा चित्तशुद्ध्यभावे ज्ञानानुत्पत्तिरित्यभिप्रायं प्रकटयन्नाह ॥ न
कर्मणामिति कर्मणामनारंभादननुष्ठानान्नैष्कर्म्यं ज्ञानं नाश्नुते न प्राप्नो
ति ननु च एवं सर्वाजितो लोकमीप्सन्तः प्रव्रजंतीत्यादिश्रुतेः संन्यासस्यापि मो
क्षसाधनत्वात्तेनैवार्थसिद्धेः किं कर्मणेत्याशंक्याह न चेति चित्तशुद्धिं विना
कृतात्संन्यसनात्सिद्धिं न समधिगच्छति तस्याः ज्ञानसापेक्षत्वात् श्रुतिरपि य·
जुः संहितायां कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः । एवं त्वयि नान्यथे
तोऽस्ति न कर्म लिप्यते नरे भाष्यं इह मोक्षमार्गे कर्माणि कुर्वन्नेव शतं समाः श·
तं वर्षाणि जिजीविषेत् जीवितुमिच्छेत् कर्माकरणे तु प्रत्यवाय एव अथवा नित्यार्थ
एवकारो अप्रयोगव्यवच्छेदार्थः तेन कर्म कर्तव्यमेवेत्युक्तं एवममुना प्रकारे
ण नरे मनुष्ये देहाभिमानिनि कर्म कृतवति तन्मोक्षप्रापकं कर्म त्वयि न लिप्य सति
ते फलभोगाय न भवति इतः परं अन्यथा मोक्षमार्गो नास्ति ४ ॥

वनमाली ८

तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेनेति
श्रुत्या कर्मणामात्मज्ञाने विनियुक्तानामनारंभादननुष्ठानाच्चित्तशुद्ध्यभावे ह
न ज्ञानायोग्यो बहिर्मुखो नैः कर्म्यं ज्ञाननिष्ठां नाश्नुते न प्राप्नोति ननु तमेव ज्ञा
वा त्वा आत्मानम[illegible]र्थो मुंचयेति श्रुत्या न्यैर्न्यावाहांतरनिवारणात्कर्मत्यागादे
व सिद्धिः स्यादत आह न च संन्यसनादेव चित्तशुद्धिं विना कृतात् सिद्धिं फल
पर्यवसायिनीं ज्ञाननिष्ठां समधिगच्छति प्राप्नोति ४ ॥

ऊसमवैजयन्ती ९

ननु नास्त्यकृतः कृतेनेति श्रुत्या कर्मत्यागं विना नैष्कर्म्यं नैष्कर्म्याभावेनै
व मोक्षस्तदभावे सर्वसाधनकदंबस्य वैयर्थ्यं स्यादतः कर्मत्यागमेव मे
बुद्धिर्निश्चिनोति न तु कर्मकरणं पुनरपि श्रीमतां भवतां कर्मकरणे एवा

ग्रहंदृष्ट्वाममहान्संशयउत्पन्ने,तयन्ममकर्तव्यमलिनान्निश्चयेनवदेति
चेन्नत्राह नकर्मणामनारम्भादित्यादिभिरेवंप्रवर्तितंचक्रमित्यन्तैस्त्रयोद
शभिः नकर्मणामिति कर्मणांतमेतंवेदानुवचनेनब्राह्मणाविविदिषन्ति
यज्ञेनदानेनतपसानाशकेनेतिश्रुत्युविहितानांकर्मणामनारम्भादकर
णात्पुरुषोनैष्कर्म्यंज्ञानंनाश्नुतेनैवप्राप्नोतिसकलकरणक्रियोपरतिपूर्वि
कांज्ञाननिष्ठांनप्राप्नोतीत्यर्थः नचसंन्यसनात्सम्यक्कृत्यसनंत्यागस्तस्मा
देवशास्त्रीयाणांकर्मणामारम्भंकृत्वापुनस्त्यागादेवपुरुषः सिद्धिमात्म
निष्ठांनसमधिगच्छतिनसम्यक्प्राप्नोतिश्रीपुरुषाराधनलक्षणंफलानुसं
धानरहितंतद्रूपंकर्मकरणंविनाऽनादिकालप्रवृत्तकाम्यनिषिद्धकर्मकर
णान्मलिनान्तःकरणशुद्धिर्नास्तिनचशुद्धिंविनानैष्कर्म्यपूर्विकात्मनिष्ठा
नास्तितांविनामुक्तेर्नरांमोक्षोनास्तिअतोममकर्मकरणेएवाग्रहोयथार्थप
वनवत्कर्माकरणेयःआग्रहःसदुराग्रहएवशास्त्रीयस्यस्वधर्मस्यत्यागम
हयुद्धारम्भस्यकर्मणस्त्यागेसतित्वयिमहान्दोषोभविष्यति तस्माद्युद्धरू
पंकर्मकुरुष्वेतिश्रेष्ठत्यभिप्रायः ४ ॥

तत्रकारणाभावेकार्यानुपपत्तेः न कर्मणां तमेतंवेदानुवचनेनब्रा
ह्मणाविविदिषन्ति यज्ञेनदानेनतपसाऽनाशकेनेतिश्रुत्यात्मज्ञानेवि
नियुक्तानामनारंभादननुष्ठानाच्चित्तशुद्ध्यभावेनज्ञानायोग्योबहिर्मुखः
पुरुषोनैष्कर्म्यंसर्वकर्मशून्यत्वंज्ञानयोगेननिष्ठामितियावत् नाश्नुतेन
प्राप्नोतिनन्वेतमेवप्रव्राजिनोलोकमिच्छन्तः प्रव्रजन्तीतिश्रुतेः सर्वकर्म
संन्यासादेवज्ञाननिष्ठोपपत्तेःकृतंकर्मभिरित्यतआह नचसंन्यासनादे
वचित्तशुद्धिविनाकृतात् सिद्धिंज्ञाननिष्ठालक्षणांसम्यक्फलपर्यवसा
यित्वेननाधिगच्छतिनैवप्राप्नोतीत्यर्थः कर्मजन्यांचित्तशुद्धिमन्तरेण
संन्यासएवनसंभवति यथाकथंचिद्दौत्सुक्यमात्रेणकृतोपिनफलप
र्यवसायीतिभावः ४ ॥ ॥

त्मकर्मकर्त्ती

33

शुद्ध्यंतं कर्म कर्तव्यमस्त्यशुद्धधियस्त्विति नकर्मणामनारंभादित्या
रभ्यप्रवक्ष्यते १ मोक्षं सजीवतीत्यत्रैस्तद्योदशभिरेवच विदुषः शुद्ध
बुद्धेरस्य कर्तव्यं नास्ति किंचन २ यस्त्वात्मरतिरित्यादिद्वाभ्यामिमं प्र
वक्ष्यते तस्मादसक्त इत्यादौ बंधहेतोश्च कर्मणः ३ धीशुद्ध्या मोक्ष
हेतुत्वं ज्ञानोत्पत्तिमुखेनच अर्थकेनेतिचोन्याय्यप्रश्नं कामस्य शत्रु
ता ४ वक्ष्यते मोक्षमार्गेऽस्मिंस्त्यागाज्ज्ञानयोगतः मोक्षोस्तीत्येव भग
वानध्यायांते च वक्ष्यति ५ तत्रादौ कारणाभावे कार्याभावः प्रदर्श्यते
नमे तमितिवाक्येन विहितानां हि कर्मणां ६ चित्तशुद्ध्यात्मबोधार्थम
ननुष्ठानतः पुमान् सत्वशुद्धेरभावात्स्याज्ज्ञानायोग्यो बहिर्मुखः ७
ज्ञानयोगेन निष्ठां नावाप्नोत्यात्मन्यवस्थितिं नन्वेतमेव प्रव्राजिनो लो
कमितिवेदतः ८ समस्तकर्मसंन्यासाज्ज्ञाननिष्ठोपपत्तितः कृतं क
र्मभिरित्यत्र प्राह नारायणो हरिः ९ यतः संन्यसनादेव चित्तशुद्धिं वि
नाकृतात् ज्ञाननिष्ठात्मिकां सिद्धिं नैवाप्नोति फलावधिं १० नयीशुद्धि
मतेन्यासः संभवेद्यचेत्कृतः फले पर्यवसायी नो भवेदित्याशयेंहरे

११ ४

नीलकंठी १२

अनयोः प्रकारयोरंगांगिभावमाह नकर्मणामिति कर्मणां यज्ञादी
नां अनारंभात् अननुष्ठानात् नैष्कर्म्यं ज्ञाननिष्ठां नाश्नुते न प्राप्नोति वि
विदिषंति यज्ञेनेति श्रुत्या यज्ञादीनां विद्यांगत्वेन विधानात् ननु सन्न्य
तीय प्राधान्यात्कर्मणां विविदिषांगत्वमवगम्यते तेन विविदिषायां य
ज्ञादिना सिद्धायां एतमेव प्रव्राजिनो लोकमिच्छंतः प्रव्रजंतीति श्रुतेः प्रव्र
ज्यारूपमेव नैष्कर्म्यमिह ज्ञाननिष्ठासाधनं ग्राह्यं न ज्ञानं नैष्कर्म्यसिद्धिपर

मामित्यादाविवात्रनग्राहकस्यपरमत्वविशेषणस्याभावात् नचकर्मयोग मे
जनितचित्तशुद्ध्यभावेकेवलात्संन्यासात्सिद्धिंसमधिगच्छतीतियोजना
यद्यपिप्रकृष्टयोर्ज्ञानकर्मणोः समुच्चयासंभवस्याभीष्टस्यसिद्धेः किमिति
नैष्कर्म्यशब्देननिष्ठाग्रहणात् इतिचेत्सन्यगुणोः कर्मकार्यत्वइतिवाक्यशे
षान्नैर्गुण्यहेतुकंमुख्यंज्ञानमेवेहनैष्कर्म्यपदार्थोनतुप्रव्रज्याविविदिषं
नियत्तेनेत्यत्रापिजिगमिषत्यमेनजिघांसत्यसिनेत्यादाविवत्नीयांतस्यधा
त्वर्थेनैवान्वयात्अश्वादीनांगमनादाविवयत्तादीनांवेदनएवान्वयोत्त
यः एतमेवेतिश्रुतिस्तुविविदिषासंन्यासाभिप्रायेणप्रवृत्ता एतंवैतमात्मा
नंविदित्वाब्राह्मणाः पुत्रैषणायाश्चवित्तैषणायाश्चलोकैषणायाश्चव्युत्था
यायभिक्षाचर्यंचरंतीतिज्ञानपरिपाकार्थस्यजीवन्मुक्तिसुखार्थस्यवाया
ज्ञवल्क्यादिभिरनुष्ठितस्यविद्वत्संन्यासस्यापिप्रशस्तत्वदर्शनात् असंन्यासि
नोज्ञानमेवनोत्पद्यतइतिमाचामाग्रहोविक्षेपककर्मत्यागरूपसंन्यासविष।
योनतुकाषायपरिधानमात्रविषयः गर्गेष्वायवासिष्ठादीनामतथाविधाना
मपिज्ञानोत्पत्त्यवगमादित्यास्तांतावत् कर्मभिरशोधितचित्तस्यमंदबुद्धेःरा
गद्वेषादिग्रस्तस्यात्मानात्मविवेकद्वाराचित्तरोधद्वारावानैष्कर्म्यमाप्तिर्ना
स्तीतिपूर्वार्द्धार्थः नत्वभयंसर्वभूतेभ्योदत्वानैष्कर्म्यमाचरेदितिकेवला
त्कर्मसंन्यासादपिनैष्कर्म्यसिद्धिःस्मर्यते नत्कथमुच्यतेनकर्मणामनारं
भान्नैष्कर्म्यमस्तीतितत्राह नचेति कर्मजचित्तशुद्ध्यभावेकृतादपिसं
न्यासान्नमोक्षसिद्धिः उदाहृतस्मृतिस्तुचित्तशुद्धिपूर्वकसंन्यासाभिप्रा
या नहिरागादिग्रस्तःसर्वभूतेभ्यःसर्वात्मनाभयंदातुमीष्टेऽतोयुक्तमु
क्तंनचसंन्यसनादेवेति ॥ ४ ॥

34

तदेवं ज्ञानकर्मसमुच्चयादेव मुक्तिः न तु सर्वकर्मसंन्यसेयेति प्रतिपादयति

श्रीधरी टी॰

कर्मणः पुण्यापुण्यरूपान्निष्क्रान्तः उपाधिनिष्कर्मा तस्य भावो नैष्कर्म्यं
मुक्तिः पुरुषः कर्मणामनारम्भात् संन्यासात् किं नाश्नुते किन्तु कर्म
णामारम्भादेव तथा संन्यसनादेव न तथापि मरहणादेव न च सि
द्धिं समधिगच्छति किन्तु चित्तशुद्ध्या ज्ञानकर्मसमुच्चयान्मुक्ति
रिति दर्शितानावाच्यश्रुतिस्मृतिनयानामुपपत्तिः प्रथमाध्यायोपो
ह्नाते ४ ॥

रामकंठटीका

+ प्रथमन्यसेयपोक्कलन्त्रणेकार्यावदितवत्ता नमिसुक्ते कर्मेच नानाविषयज्ञानादानरूपव्यापारात्मकं नुदेनयो

+ अगरहीतयथाप्रतिपादितसमुदितसमुच्चयार्थनिश्चयत्वात् सर्व
था कर्मणो ज्ञानविरोधित्वमन्वानस्य तत्पदेन नैष्कर्म्यमनिच्छमान
कर्मत्वसिद्धिहेतुत्वेन प्रतिभाति न सिद्धिकामः पुरुषः कर्मणांस
वैक्रियाणामनारम्भादननुष्ठानान्नाश्नुते प्राप्नोति वक्ष्यमाणयायु
क्त्या शरीरित्वाव्यभिचारिणां शास्त्रीयाणां च कर्मणां दुष्परिहरत्वात् ।
अतो न कर्मणामेषामकरणमात्रमभावत्वेनेह विवक्षितम् किन्तु ब
न्धलक्षणस्वकार्यसम्पादनसामर्थ्यभंगेनैषामभावापादनमिहाभि
प्रेतम् अविहितकर्मानुष्ठानमात्रे कर्मत्यागः सम्यासोऽभिमत
स्तदेवंविधात्संन्यासमात्रादेव केवलात् प्रतिपादितात् न भूमा
त्र पुरुषः सिद्धिमपवर्गलक्षणां सम्यक् समधिगच्छति समासाद
यति परीक्षितानर्हितादिविहितकर्मपरिहारमात्रात्मोक्षलक्षणफ
लावाप्तिः स्यात्सर्वथा प्रमादपोमोक्षात्मकत्वान्नैष्कर्म्यमावहत्वोवस्या
विशेषाः सिद्धिहेतवः स्युः विहितकर्मानारम्भमात्रादेव कर्मणो
रितिपाठोऽनेवहेतुना ४ ॥

कर्मणोः परस्परविरुद्ध
पदेक पुरुषात् स्वैर्य्यत्वका
पद्यत इत्यत्रोच्यते सम्य
थारिना ज्ञानकर्मोपष्टा
तथैवं विघसिद्धिमोक्षका
मतत्वात् नरुह्यमाना
रयेतिमनसिकृत्वाह +

लासिकी [illegible]मीटीका

न च लब्धात्मबोधस्य देहात्मविवेकाधिकारिणः ममाभिमानलक्ष
णज्ञानभावनान्तरस्य मेवमुक्तेः [illegible]न कर्मणोऽनारम्भ आह नेति
कर्मणामनारम्भादननुष्ठानात् पुरुषो नैष्कर्म्यं सर्वकर्मशून्यत्वेनो
पनिष्ठामिति यावत् नाश्नुते न प्राप्नोति ज्ञानक्रियामयत्वात्तस्ते वि
न तस्य भवत्येवं लब्धात्मबोधस्य तत्योगिनः कर्मसंन्यासमपवृ
क्तेः प्रामाण्यस्य प्रामाण्यादिप्रमाणेनाह न च संन्यसनादिति सन्यसना

गी.
टी.
र.

35

देवसर्वकर्मत्यागादेवपुरुषोलब्धात्मबोधोपिसिद्धिमद्वैतलक्षणां
ज्ञाननिष्ठांनाधिगच्छतिनाप्नोति यतोज्ञानंकर्मणारहितंनभवति ।
कर्मवैकौशलोपेतंज्ञानरहितंनभवति इत्येकमेववस्तुज्ञानकर्मणी
तथाचोक्तं नक्रियारहितंज्ञानंनज्ञानरहिताक्रिया ज्ञानक्रियावि।
निष्पन्नस्त्वाचार्यःपक्षपाशेइति ४ ॥

पंचोलीटीका

ज्ञानकर्मनिष्ठयोःपरस्परविरोधात् एकेनपुरुषेणयुगपदनुष्ठातुम
शक्यत्वात्तयोःस्वनिरपेक्षतयोरेवपुरुषार्थहेतुत्वेप्राप्तेकर्मनिष्ठायाज्ञाननि
ष्ठाप्राप्तिहेतुत्वेनपुरुषार्थहेतुत्वंनस्वातंत्र्येणज्ञाननिष्ठातुकर्मनिष्ठोपाय
साध्यासतीस्वातंत्र्येणपुरुषार्थहेतुरितिमनस्मदर्शयिष्यन्नाह नकर्मणामि
पुरुषःकर्मणांयज्ञादीनामनारंभादकरणात् नैष्कर्म्यंज्ञाननिष्ठांनाश्नुते
नप्राप्नोति चपुनःसंन्यसनादेवकेवलात् ज्ञानरहितात्संन्यासादेवसिद्धिंन
समधिगच्छतिनप्राप्नोति ४

रणवीरसमिद्धायिनी ॥

ननुसर्वत्रयात्मनैष्कर्म्यमेवश्रेयस्करमितिप्रसिद्धं तत्कथंक
र्मैवश्रेयःसाधनंभवतोक्तमित्यर्जुनाभिप्रायमाशंक्यनैष्कर्म्य
स्यतावत्कथमप्यसंभवात्सिद्ध्यभावइत्यभिप्रायेणोत्तरयति न
कर्मणामिति कर्मणांस्वधर्मोचारोचितानामनारंभान्नैष्कर्म्य
नप्राप्नोतिअयमभिप्रायः सर्वथाकर्मणामकरणेनैष्कर्म्यंनपु
नःस्वधर्मोचितकर्ममात्रत्यागइति किंच संन्यसनादेव सर्वथासं
न्यस्तमित्येतावन्मात्रेणापिनसिद्धिंसमधिगच्छति प्राप्नोति अ
त्रचायमभिप्रायः नकेवलात्संन्यासात्सिद्धिः किंपुनःकर्मकृ
त्वाफलस्येश्वरार्पणेनसिद्धिरिति तथाचश्रुतिः नकर्मणान
प्रजयाधनेनत्यागेनैकेनामृतत्वमानशुरिति अस्यार्थः एकेन
केवलेनकर्मणाअमृतत्वंश्रेयोनापुः एवंनकेवलयाप्रज
या नकेवलेन धनेन नकेवलेनत्यागेन किंपुनःकर्मकृत्वा

प्रजाउत्पाद्यधनमर्जयित्वातेनचार्थिकामसूत्रणांयागादिव॥
विधायफलंचेश्वरेसमर्प्यमोक्षप्राप्तिरिति ॥४॥

मधुभाष्य

नकर्मणामिति कर्मणांशुद्धादीनांमनारंभेणनैष्कर्म्यं
निष्कर्मतांकाम्यकर्मपरित्यागेनप्राप्यत इतिमोक्षंनाश्नु
ते ज्ञानमेवतत्साधनंनतुकर्माकरणमित्यर्थः अतःपु
रुषत्वात् सर्वदास्थूलेनसूक्ष्मेणवाशरीरेणयुक्तोनरजी
वः यदिकर्माकरणेनमुक्तिःस्यात्स्थावराणांचनुवाकर
णेकर्माभावान्मुक्तिर्भवति प्रतिजन्मकृतानामनंताना
कर्मणामभावात् नचसर्वाणिभुक्तानि एकस्मिन्शरीरेव
हूनिहिकर्माणिकरोति तानिचैकैकानिबहुजन्मफला
निकानिचित् तत्रचैकैकानिकर्माणिमंजन्मामोत्येवषा
षणमात्रुष्य ततश्चबहूनामनेरफलानिकर्माणीत्यसमा
प्तिः तथोक्तं जीवंश्चतदंशाहूर्धंशुकृषानियमेनचस्त्री
वाप्यन्नूनमदृष्टाकंदेहमाश्रयमाजेति चतुर्दंशाोर्ध्वजीवी
निसंसारश्चादिवर्जितः अतोविदित्वापरंदेवमोक्षाणाका
महामुने अति ब्रह्मांडे यदिचमादिस्यात्ससारः पूर्वकर्माभा
वेद तत्प्राप्तिः अबंधकत्वमकामनेनैवभवति तच्चवक्ष्यते
अनिष्टमिष्टमिति ननुनिष्कामकर्मणःफलाभावान्मोक्षः
स्यात्ः निष्कामत्वानपूर्वंतुनिहतमिदंचोच्यते निहतंसे
वमानस्तु ब्रह्माभ्येतिसनातनमिति वामने अतस्तत्सा
ध्यादकरणोपिभवतीत्यतआह नचेति सन्यासःकाम्यक
र्मपरित्यागः काम्यानांकर्मणामिति वक्ष्यमाणत्वात् अका
मकर्मणामतःकरणशुद्ध्याज्ञानान्मोक्षोभवति तथोक्तम् क

र्मभिः शुद्धसत्वस्य वैराग्यं जायते हृदीति भागवते विरक्ता
नामेव च ज्ञानमुक्ती न तत्स्यतत्वग्रहणाय साक्षाद्धरीयसी
रपि वाच: समासतः स्वमेनिरुक्ताष्टदमेधिसोऽयं नयस्य
देयात्तमितं स्वयं स्यादिति न तु फलाभावात्कर्माभावात्
अतो न कर्मत्याग एव मोक्षसाधनम् यत्याश्रमस्वभाव-
त्यर्थो भगवत्तोषणार्थस्य अप्रयतत्वमेवाहिंसायोऽष्टदस्या
दीनामितरकर्मायोगात् अप्रयतानां वनस्थानं तथा हि श्रु
तिः नायं तोनासमाहितस्र्इति मद्राश्च यत्याश्रमे भगवत्तोषः
तथाप्याह यत्याश्रमं तद्वीर्यं तदीक्षा ममह्यताविरणीति ना
रायणग्रह्मणस्यकल्पे प्राधिकारिकात्स्थानस्थापवप्रायत्ये
समर्था: स एव च महान्भगवत्तोषः तत्रोक्तम् देवादी
नामादिराज्ञां महत्योगिपिनो मनः विलोभ्यलाति न ह्योगो
सतीव दत्तिरितोषणामिति पाद्मे न तु कर्माणि सर्वाणि नात्य
क्तुमशक्यानीत्याह ४॥

कर्मणां सत्वशुद्धिप्रयोजकानामनारंभादकरणात्पुरुषो नैष्कर्म्यं निष्क्रिया
त्मस्वरूपेणावस्थानं नाश्नुते न प्राप्नोति । ननु कथं न प्राप्नोति एतमेव प्र·
व्राजिनो लोकमभीप्संतः प्रव्रजंतीति श्रुत्या संन्यासस्य मोक्षसाधनत्वप्र·
तीतेरत आह नचेति विनाकर्मजन्यां चित्तशुद्धिं संन्यास एव तावद्दुर्लभः ६
कृते वा तस्मिन्दंभादिना वांछा ज्ञानासमुत्थितस्य ज्ञानानंदस्य वा मोक्षफ
लकत्वाद्दुरापास्तेति विज्ञानोत्पत्त्यवश्यापेक्षितसत्वशुद्ध्युदयायावश्यम·
नपेक्षणीयं । इहजन्मनि जन्मांतरे कृतं कर्मेति भावः यद्वा कर्मयोगेन यो
गिना निष्ठेत्युक्तं तत्तदिति कर्तव्यताजालपतितस्य मनोमौनसात्मैका
ग्रलक्षणचित्तवशीकाराभावेनात्मज्ञानसागरस्वच्छंदविहाराशक्तत्वमा·
निष्ठाया दुरापास्तत्वादित्याशंका किं कर्ममात्रत्यागं चित्तैकाग्र्यं वा चकास्ति
किंवा विधिवद्गुरूपासनतस्यैव धकर्मसंन्यासमिति विकल्पाद्यो ऽसंभवादेव
न संभवतीति प्रतिज्ञां करोति ॥ अनारंभस्यैवाशक्यत्वादिति भावः ४ ॥

॥ ॥ ॥ ॥ ॥

इससे यह आयाकि सम्पूर्ण चित्तशुद्धि के द्वाराजवतक ज्ञान उत्पन्न न होय तवतक वर्ण कहे जाति औ आश्रम कहे ब्रह्मचर्य गार्हस्थ्य वा नप्रस्थ संन्यास इनमे विहित जो जो कर्मसो सव करना उचितहै न हीतो चित्तशुद्धि के विना ज्ञान कैसे होसके गा यही भगवान कहते हैं कि कर्म्म किये विना पुरुष नैष्कर्म्य जो तत्वज्ञान सो पावता नंही जो कहो कि संन्यासी फेरि सर्व्व कर्म्म परित्याग करि तत्त्वज्ञान कैसे पावते हैं और वेदकी श्रुति कहती है कि संन्यास धारन करनेहीं से मुक्ति मिलती है फेरि कर्म्म करने सेक्या प्रयोजन है इस शङ्का पर कहते हैं कि सोनंही क्यों कि निःकाम कर्म्म करि चित्तशुद्धि किये। विना ज्ञान का अभाव हैं औ ज्ञान के विना मुक्तिप्राप्ति नंही होती॰ यह निश्चय है कुछ संन्यास ही लेने से पुरुष सिद्धि नंही पायजाता है ॥ ४ ॥

दोहा॥

विनाकर्मआरंभसें मोक्षपुरुषनहिपाय केवलएकसन्यासते नहिसिद्धिकोजाय ४॥

38

नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्म्मकृत् का
र्य्यते ह्यवशः कर्म्म सर्व्वः प्रकृतिजैर्गुणैः ५

शाङ्करभाष्य १

कस्मात् पुनः कारणात् कर्म्मसंन्यासमात्रादेव केवलात् ज्ञानरहितात्
सिद्धिं नैष्कर्म्य लक्षणां पुरुषो नाधिगच्छतीति हेत्वाकाङ्क्षायामाह नही
ति। नहि यस्मात् क्षणमपि किश्चित् कालं जातु कदाचिदपि कश्चित्तिष्ठ
त्यकर्म्मकृत् सन् कस्मात् कार्य्यते हि यस्माद् वशएव कर्म्म सर्व्वप्राणी ।
प्रकृतिजैः प्रकृतितो जातैः सत्त्वरजस्तमोभिर्गुणैः अज्ञ इति वाक्यशेषो य
तो वक्ष्यति गुणैर्यो न विचाल्यत इति सांख्यानां पृथक्करणादज्ञानामेव हि क
र्म्मयोगो न ज्ञानिनां ज्ञानिनां तु गुणैरचाल्यमानानां स्वतश्चलनाभावात् क
र्म्मयोगो नोपपद्यते तथा च व्याख्यातं वेदाविनाशिनमित्यत्र ५

आनन्दगिरिकृत टीका २

उक्तेऽर्थे बुभुत्सितं हेतुं वक्तुमुत्तरश्लोकमुत्थापयति कस्मादिति कस्मान्न कर्म्म
संन्यासादेव सिद्धिमधिगच्छतीति पूर्व्वेण सम्बन्धः कदाचित् क्षणमात्रमपि
न कश्चिदकर्म्मकृत्तिष्ठतीत्यत्र हेतुत्वेनोत्तरार्द्धं व्याचष्टे कस्मादिति अवशशब्दा
त् ज्ञानवानपि गुणैरवशः सन् कर्म्म कार्य्यते ततश्च ज्ञानवतः संन्यासवचन
मनवकाशं स्यादित्याशंक्याह अज्ञ इतीति तमेव वाक्यशेषं वाक्यशेषावष्टम्भेन
स्पष्टयति आत्मज्ञानवतो गुणैरविचाल्यतया गुणातीतत्ववचनादज्ञस्यैव स
त्त्वादिगुणैरिच्छाभेदेन कार्य्यकरणसंघातं प्रवर्त्तयितुमशक्तस्याजितकार्य्य
करणसंघातस्य क्रियासु प्रवर्त्तमानत्वमित्यर्थः ज्ञानयोगेनेत्यादिना उक्तव्या
ख्यावाक्यशेषोपपत्तिरित्याह सांख्यानामिति ज्ञानिनो गुणप्रयुक्तचलनाभावे
ऽपि स्वाभाविकचलनवशात् कर्म्मयोगो भविष्यतीत्याशंक्याह ज्ञानिनां त्विति ।
प्रत्यगात्मनि स्वारसिकचलनासम्भवे प्रागुक्तं न्यायं स्मारयति तथा चेति ॥ ५ ॥

कर्मणां च संन्यासस्तेषु नासक्तिमात्रं न तु स्वरूपेण अशक्यत्वादित्याह नहीति कश्चिदिति जातु कस्यांचिदप्यवस्थायां क्षणमात्रमपि कश्चिदपि ज्ञानी अज्ञानी वा कर्मकृत् कर्माण्यकुर्वाणो न तिष्ठति तत्र हेतुः प्रकृतिजैः स्वभावप्रभवै रागद्वेषादिभिर्गुणैः सर्वोपि जनः कर्म कार्यते कर्मणि प्रवर्त्यते अवशः अस्वतंत्रः सन्नित्यर्थः ५

पैशाचभाष्य ४

किंच योगानुष्ठानपूर्वकात्सत्वशुद्धिजनितात्मविज्ञानात्सिद्धिं समधिगच्छति न तु कश्चित्कृतो नैष्कर्म्यं नाश्नुत इति हेत्वाकांक्षायामाह नहीति न हि यस्मात्क्षणमपि जगत्कदाचित्तिष्ठति अकर्मकृत्सक्रियः कस्मात्कार्यते हि यस्मात् अवशएव कर्मण्येव नन्तु सर्वः प्राणी प्रकृतिजैः गुणैः सत्वरजस्तमोभिः अज्ञ इति वाक्यशेषः ५

रामानुजभाष्य ५

एतदेवोपपादयति नहीति नह्यस्मिन् लोके वर्तमानः पुरुषः कश्चित्कदाचिदपि कर्माकुर्वाणस्तिष्ठति नकिंचित्करोमीति व्यवसितोपि सर्वः प्रकृतिसमुद्भवैः सत्वरजस्तमोभिः प्राक्तनकर्मानुगुणप्रवृद्धैर्गुणैः स्वोचितं कर्म प्रतिप्रयुज्यते अतउक्तलक्षणेन कर्मयोगेन प्राचीनं पापसंचयं नाशयित्वा गुणांश्च सत्वादीन्वशीकृत्वा निर्मलांतःकरणेन संपाद्यो ज्ञानयोगः ५

अभिनवगुप्त ६

तथाचोक्तं नक्रियारहितं ज्ञानं न ज्ञानरहिता क्रिया ज्ञानक्रियाविनिष्पन्नत्वाचार्यः पक्षद्वयाद्वेति तस्माज्ज्ञानी नैवर्जितकर्मा परिहार्यं यतः परवश एव कायवाङ्मनसां परिस्पंदात्मकत्वादवश्यं किंचित्करोति ५

परमार्थप्रपा ७

अथ सत्कर्माणि उद्दिश्य चित्तं जनमुपपन्नं बोधयति नहीति कश्चिदपि जातु क

न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्म्मकृत् का
र्य्यते ह्यवशः कर्म्म सर्व्वः प्रकृतिजैर्गुणैः ५

शाङ्करभाष्य १

कस्मात् पुनः कारणात् कर्म्मसंन्यासमात्रादेव केवलात् ज्ञानरहितात्
सिद्धिं नैष्कर्म्यलक्षणां पुरुषो नाधिगच्छतीति हेत्वाकाङ्क्षायामाह नही
ति। न हि यस्मात् क्षणमपि किञ्चित् कालं जातु कदाचिदपि कश्चित्तिष्ठ
त्यकर्म्मकृत् सन् कस्मात् कार्य्यते हि यस्मादवश एव कर्म्म सर्व्वप्राणी।
प्रकृतिजैः प्रकृतितो जातैः सत्त्वरजस्तमोभिर्गुणैः अज्ञ इति वाक्यशेषो य
तो वक्ष्यति गुणैर्यो न विचाल्यत इति सांख्यानां पृथक्करणादज्ञानामेव हि क
र्म्मयोगो न ज्ञानिनां ज्ञानिनां तु गुणैरचाल्यमानानां स्वतश्चलनाभावात् क
र्म्मयोगो नोपपद्यते तथा च व्याख्यातं वेदाविनाशिनमित्यत्र ५

आनन्दगिरिकृत टीका २

उक्तेऽर्थे बुभुत्सितं हेतुं वक्तुमुत्तरश्लोकमुत्थापयति कस्मादिति कस्मान्न कर्म्म
संन्यासादेव सिद्धिमधिगच्छतीति पूर्व्वेण सम्बन्धः कदाचित् क्षणमात्रमपि
न कश्चिदकर्म्मकृत्तिष्ठतीत्यत्र हेतुत्वेनोत्तरार्द्धं व्याचष्टे कस्मादिति सर्व्वशब्दा
त् ज्ञानवानपि गुणैरवशः सन् कर्म्म कार्य्यते ततश्च ज्ञानवतः संन्यासवचन
मनवकाशं स्यादित्याशंक्याह अज्ञ इतीति तमेव वाक्यशेषं वाक्यशेषावष्टम्भेन
स्पष्टयति आत्मज्ञानवतो गुणैरविचाल्यतया गुणातीतत्ववचनादज्ञस्यैव स
त्त्वादिगुणैरिच्छाभेदेन कार्य्यकरणसंघातं प्रवर्त्तयितुमशक्तस्याजितकार्य्य
करणसंघातस्य क्रियासु प्रवर्त्तमानत्वमित्यर्थः ज्ञानयोगेनेत्यादिना उक्तन्या
याच्च वाक्यशेषोपपत्तिरित्याह सांख्यानामिति ज्ञानिनो गुणप्रयुक्तचलनाभावे
ऽपि स्वाभाविकचलनबलात् कर्म्मयोगो भविष्यतीत्याशंक्याह ज्ञानिनां त्विति ।
प्रत्यगात्मनि स्वारसिकचलनासम्भवे प्रागुक्तं न्यायं स्मारयति तथा चेति ॥ ५ ॥

यत इति

दाचिदपिअकर्मकृत्तिष्ठति इतिकिंतु सर्वोपिजनः अवशः अस्वतंत्रः सन्प्र
कृतिजैः स्वभावजैर्गुणैः करचरणचेष्टारूपं चरूपंकर्मणि कर्मणिप्रयोज्य
ते नत्वात्महितः सन्करोत्येव परंतु सत्कर्मणिनप्रवर्तते इत्याशयः ५

वनमाली ८

कर्मणोदुस्त्यजत्वमाह नहीतिहियस्मात्क्षणमपिकालंजातुकदाचित्
कश्चिदजितेन्द्रियः अकर्मकृत्सन्नतिष्ठतिकुतोहि यतः सर्वोप्यशुद्धचित्तो
जीवसमूहः अवशोस्वतंत्रएवसन्प्रकृतिजैः सत्वरजस्तमोभिः स्वप्रभवैर्वा
रागद्वेषादिभिर्गुणैः कर्मलौकिकंवैदिकंवाकार्यते ५

कुसुमवैजयन्ती

नकेवलंत्वामेवाहंकर्मणिप्रेरयाम्यपितुसर्वएवावशः सत्कर्मकरोतिक
र्मरहितः कोपिनास्तीत्याहनहिकश्चिदिति जातुकदाचिद्दिनादिस्थूलरू
पेकालेपित्क्षणंलवनिमेषादिसूक्ष्मरूपेकालेपिकश्चिदपिब्रह्मादिपिपीलि
कान्तानांसर्वेषांमध्येएकः कोपिपुरुषः अकर्मकृत्कर्मकरोतीतिकर्मकृत्नक
र्मकृल्लौकिकवैदिककर्माकुर्वाणः सन्नतिष्ठतिहीतिनिश्चयेनकिंतुप्रकृ
तिजैः प्रकृतिर्मन्मायातस्याः सकाशाज्जातास्तथातैर्गुणैः सत्वरजस्तमोभिः
यद्वाप्रकृतिर्जातिकुलादिजन्यः स्वभावस्तस्माज्जाताः रागद्वेषादयस्तैर्गुणैः
सर्वः ब्रह्मादिपिपीलिकान्तोलौकिकवैदिक शरीरवान्पुरुषः अवशः अस
तन्त्रः सत्कर्मसोचितंकार्यतेप्रवृत्त्यतेतस्माद्धंपनपापादिभयंत्यक्त्वासत्वा।
दीन्गुणान्स्ववशीकृत्वास्ववर्णोचितंधर्मभूतंशुद्धरूपंकर्मत्वंकुरुष्वयद्वि
नात्क्षणमपिकदाचिदपिजनोनतिष्ठतित्वांस्तुतेनत्वत्सप्तागेच्छाकोप्यनु
मतः कथंकरोतीत्येतेनकर्मयोगेनान्तःकरणशुद्धिपूर्विकात्तानिष्ठाभ
वतिनान्यथेतिभावः ५ ॥

गी॰ टी॰
का॰ ५०
कवैदिक॰

तत्कर्मजन्यशुद्ध्यभावेबुद्धिर्मुख्यः मधुसूदनी १०

हि यस्मात्क्षणमपिकालंजातुकदाचित्कश्चिदप्यजितेंद्रियः अकर्मकृत्स
न्तिष्ठतिअपितुलौकिककर्मानुष्ठानव्यग्रएवतिष्ठति तस्मादशुद्धचित्तस्य
संन्यासोनभवतीत्यर्थः कस्मात्पुनरविद्वान्कर्माण्यकुर्वाणोनतिष्ठति हि
यस्मात्सर्वः प्राणीचित्तशुद्धिरहितः अवशोऽस्वतंत्रएवसन्प्रकृतिजैः प्रकृ
तितोजातैरभिव्यक्तैः कार्याकारेण सत्वरजस्तमोभिः स्वभावप्रभवैर्वारागद्वे
षादिभिर्गुणैः कर्मलौकिकंवैदिकंवाकार्यते तः कर्माण्यकुर्वाणोनकश्चि
दपितिष्ठतीत्यर्थः यतः स्वाभाविकागुणाश्चालकाः अतः परवशतयासदाक
र्माणिकुर्वतोऽशुद्धबुद्धेः सर्वकर्मसंन्यासोनसंभवतीतिन संन्यासनिबं
धनाज्ञाननिष्ठासंभवतीत्यर्थः ५ ॥

सदानंदी ११

यतः कश्चिदपिप्राणीक्षणंनापिकदाचन तिष्ठतीहविनाकर्मनातःशुद्धि
म्हतेक्रियः १ यतोऽशुद्धमनाः सर्वैरजसत्वतमोगुणैः स्वभावप्रभवैर्वापि
रागद्वेषादिभिर्गुणैः अस्वतंत्रोखिलंकर्मवैदिकंलौकिकंबलात्कार्य
तेवाविनाशुद्धिंनसंन्यासोपिसंभवेत् २ ५

नीलकंठी १२

एतदेवप्रपंचयति नहीतिअवशः कर्मजशुद्ध्यभावात् अजितचित्तः का
श्चिदपिजातुकदाचित्समाधिकालेपिक्षणमपिअकर्मकृत् कर्माणिदु
र्मनोरथादीनिअकुर्वन्नहिप्रसिद्धं नतिष्ठति हियस्मात्सर्वोपिलोकः प्रकृ
तिजैः गुणैः सत्वरजस्तमोभिः स्वभावप्रभवैः रागद्वेषादिभिर्वाकर्मकायि
कंवाचिकं[illegible]मानसिकंवाकार्यतेऽवशंतत्रप्रवर्त्यते ५

अपि च कर्मणामनारम्भोऽप्यसम्भवप एवेत्याह कश्चिज्ज्ञानी वाज्ञ
ो वा जातु कर्माकृत्वा न तिष्ठति कर्मकरणं विना कदाचित्क्षणोऽपि न ति
ष्ठति हि यस्मात्सर्वो देहधारी प्रकृतिजैः स्वाभाविकैरपरिहरणीयैः गु
णैः सत्त्वरजस्तमोभिः कायकवाचिकमानसिकचेष्टाभिर्वा कर्म
कार्यते अत्र हेतुमाह अवशः प्रकृतेर्वशीभूतः प्रकृतिं त्वं वक्ष्यमाणे
अत्रैव प्रकृतिपुरुषज्ञानमासूत्रितम् ५ ॥

+ न च विहितकर्मानारंभमात्रान्नैष्कर्म्यसि रामकेटीटी· द्धिरिति यदुक्तं तत्र हेतुमाह +

+ हिशब्दो हेतौ यस्मात्कश्चिद्देही जातु कदाचित्तदवस्थाविशिष्टे कस्मिं
श्चिदपि काले तत्क्षणमपि स्वल्पमपि तदवयवमकर्मकृत्तिष्ठति।
कर्म कुर्वाणः स्थितिमनुभवति वर्तते इत्यर्थः तथा च बाल्ययौवन
वार्धक्यलक्षणासु सकलास्ववस्थासु मनोवाक्कायैः सर्वः कश्चिद्देही क
र्म कुर्वन्नास्त इति स्पष्टमेव तदन्तर्गतास्वपि जागरस्वप्नसुषुप्तरू
पसकलास्ववस्थासु न कश्चिदकर्मकृत् यतो जागरावस्थायां शब्दादि
विषयग्रहणव्यवहारेन्द्रियव्यापाररूपायां सर्वस्य तत्कर्मनिष्ठत्वं स्फुटमे
व स्वप्नावस्थायामपि विषयग्रहणविलोपात्र कस्यचिदकर्मतोस्थि
तिः स्वप्नावस्थायां तत्कालव्यतिरिक्तविषयसंवेदनाभावेऽपि प्रति
बोधकाले सुखदुःखमोहरूपानुभूतविषयप्रत्यवमर्शान्यथानुपपत्त्या
मानसकर्मविधान एव यावदपि योगी विषयापन्ना जागरादयोऽवस्थास्ता
स्वप्यैवैव वार्तायतो जागरस्वप्नयोर्ग्राह्यग्राहकादिविकल्पानुपरमात्
सुषुप्तावस्थायामपि तत्कालग्राह्यग्रहणगृहीतृभेदसंवेदनाभावे स
त्यपि व्युत्थाने तथाविधसमाध्यवस्थाप्रत्यवमर्शान्यथानुपपत्तिरिति
तिसृष्वपि योग्यवस्थासु न कश्चिदकर्मकृत् वर्तितुमर्हतीति विहि
तकर्मनारम्भमात्रान्नैष्कर्म्यसिद्धिरिति पूर्वेणास्मन्वयः इत्थं सर्वक
र्माभावस्यानुपपत्तौ हेतुमाह हि शब्दो हेतौ यस्मात्सर्वः कश्चिद्देहभृ
दवशः परतन्त्र एव सन् प्रकृतिजैः प्रधानसंभवैर्गुणैः सत्त्वादिभिः क

गी॰
टी॰
४

41

मेशास्त्रविहितं शरीरित्वाद्यभिचारित्वप्रासनेनुष्ठाप्यते इह हि परमे
श्वरेच्छापरिकल्पितकारणभावं प्रकृत्याख्यं तत्त्वमसोमगुणप्रधानभा
वपरिणतसत्वादिगुणमयं तन्तुक्षरीरमशेषशरीरिणामारभते गु
णाश्रयोमाविनाभावहृभिन्नाद्रजोगुणानुगतत्वे सति सर्वैकविकु
शीरिणां सात्विकादिकर्माधिकृतेकुर्वते इति प्रकृतिजैर्गुणैः सर्वैः ।
कर्मकार्यते इत्यर्थं [illegible]
[illegible]
[illegible]
[illegible]
[illegible] ५ ॥

लासिकी [illegible]लीटीका

अत्र हेतुमाह नहीति हि यस्मात् कश्चिदेकोपि जनः क्षणमपि सर्व्व
त्र कालमपि जातु कस्यांचिदवस्थायां अकर्मकृत्कर्माकुर्वाणो न ति
ष्ठति कायवाङ्मनसां परिस्पन्दात्मकत्वात् तथा हि बाल्ययौवनादि
षु तदन्तर्गतयोर्जाग्रत्स्वप्नयोः कायवाङ्मनोभिर्लौकिकमेव कर्म क्रि
यते सुषुप्तेपि तत्काले व्यतिरिक्तविषयसंवेदनाभावेपि तेनोनिर्ग
तस्य स्वसंवेदयत्नभवप्रत्यवमर्शान्यथानुपपत्त्या मानसं कर्म विधीयते ए
वं बोधयुक्तस्यापि कर्मकरणोपादानमेवेत्याह कार्यतेइति हि यस्मा
त्प्रकृतिजैः प्रधानप्रभवैर्गुणैः सत्वादिभिः सर्व्वो बोधयुक्तोपि जनोऽव
शः परतन्त्रः प्रवसत्कर्म शास्त्रविहितेन शरीरित्वाद्यभिचारित्वकार्यतेऽ
नुष्ठाप्यते ५ ॥

पंचोलीटीका

कस्मात्पुनः कारणात्कर्मसंन्यासमात्रादेवज्ञानरहितात् नैष्कर्म्यलक्षणां।
सिद्धिं नाधिगच्छतीति हेत्वाकांक्षायामाह नहीति हि यस्मात् कश्चिदज्ञः
जातु कदाचित् क्षणमपि अकर्मकृत् न तिष्ठति तस्माद्बुद्धचित्तस्य संन्यासो
न संभवतीत्यर्थः हि यस्मात् सर्व्वोपि प्राणि प्रकृतिजैः गुणैः प्रकृतिगुणगतैः
सत्वरजस्तमोभिः अवशः अस्वतंत्रः कर्म कार्यते ५

ज॰

ननुकथंननैष्कर्म्यं सिध्यतीत्याह नहिकश्चिदिति हियस्मात्
कश्चित्क्षणमात्रमपि कर्माकुर्वन् जातुकदाचिदपि
नतिष्ठतीति कुतइत्याह हियस्मात्प्रकृतिजैर्गुणैः स्वाम्यमा
त्यसुहृत्कोशराष्ट्रदुर्गबलानिच राज्यांगानिप्रकृतयः पौरा
णांश्रेणयोपिचेत्यनुशासनात्प्रजा वा रागजानि तैर्गुणैः सर्वो
जनः अवशः सन् कर्मकार्यते कुर्वन्नुच्यते इति यद्वा प्रकृति
जैः स्वभावोत्पन्नैर्गुणैः सत्वरजस्तमोभिः सर्वोजनोनिच्छन्न
पि अवशोस्वच्छंदः सन् कर्मकार्यते इतिनैष्कर्म्यं नसिध्यतीति
५॥

मधुभाष्य

नहीति तथापिप्राकृतस्यागः कार्यइत्याह ५॥

द्वितीये नैकांतिकत्वं प्रतिजानीते नचेति असंभवं विवृणोति नहीति
प्रकृतिजैरिति [illegible] अविद्याविलासैः सत्वरजस्तमोरूपैर्गुणै
रित्यर्थः अवश इति स्वेच्छाया इत्यर्थः अन्यथा गुणवशत्वादवशत्वानुप
पत्तेः यद्वा अवशः अंतःकरणाधीनः स्ववश्यस्य तु भूमिसमयेंतःकरणं
लयेन गुणोद्भवाभावादेव गुणकारितकर्तृत्वाभाज्ज्ञानस्य कर्मकृदित्यु
क्तिरसंगतास्यात् अतो यावदंतःकरणाधीनः तावन्मानसं कायिकं वाक
र्मकरोत्येवेति श्लिष्टं सर्वइति मुमुक्षुरमुमुक्षुश्चेत्यर्थः अकर्मकृत् स्वकर्म
णा वा अनुष्ठानानर्हविरुद्धकर्मकर्ता [अनैकांतिकत्वं स्फुटयति कर्मेंद्रियाणीति

43

कर्म्म संन्यास इसका यह अर्थ है कि सर्व्व कर्म्म मे आसक्ति रहित हो
ना मात्र नकि एकाएक सब कर्मो का त्याग करना और शरीर रहते
कर्म्मका त्यागभी असाध्य है सोई कहते हैं कदाचित कहे किसी अ
वस्था मेभी क्या ज्ञानी और क्या अज्ञानी क्षणमात्र भी मानसिक वा
चिक कायिक कर्म्म किये बिना रह नहीं सकता है कारण यह
कि प्रकृति जो स्वभाव तिसके प्रभावसे राग द्वेष कहे प्रीति वि·
रोध आदि गुणो मे सब मनुष्य परतंत्र कहे परवश हो कर्म्म क
रते ही है ५

दोहा ॥

बिना कर्म क्षणमात्र भी कबीन तिष्ठत कोय कर्मयोग्य तो
हि करणको मायागुणकृत सोय ५ ॥

44

कर्म्मेन्द्रियाणि संयम्य यआस्ते मनसा स्मरन् इ
न्द्रियार्थान् विमूढात्मा मिथ्याचारः सउच्यते ६

शाङ्करभाष्य १

यस्त्वनात्मज्ञश्चोदितं कर्म्म नारभत इति तदसदेवेत्याह कर्म्मेन्द्रियाणी
ति कर्म्मेन्द्रियाणि हस्तादीनि संयम्य संहृत्य य आस्ते तिष्ठति मनसा स्म
रन्निन्द्रियार्थान् विषयान् विमूढात्मा विमूढान्तःकरणो मिथ्याचारो
मृषाचारः पापाचारः सउच्यते ६

आनंदगिरि कृतटीका २

आत्मज्ञवदनात्मज्ञस्यापि तर्हि कर्म्माकुर्वतोनप्रत्यवायः शरीरेन्द्रियसं
घातं नियन्तुम समर्थस्य मूर्खस्यापि संन्याससम्भवादित्याशंक्याह यस्त्वि
ति तस्यचोदिताकरणं तच्छब्देनपरामृश्यते तदसदिति मिथ्याचारत्वा
दितिभावः मिथ्याचारतामेव वर्णयति कर्म्मेन्द्रियाणीति ६

श्रीधर कृतटीका ३

अतोऽज्ञं कर्म्मत्यागिनं निन्दति कर्म्मेन्द्रियाणीति वाक्पाण्यादीनि कर्म्मे
न्द्रियाणि संयम्य निगृह्य यो मनसा भगवद्ध्यानच्छलेन इन्द्रियार्थान् वि
षयान् स्मरन्नास्ते विशुद्धतया मनसा आत्मनि स्थैर्याभावात्स मिथ्याचारः
कपटाचारो दाम्भिक उच्यते इत्यर्थः ६ ॥

पिशाचभाष्य ४

कर्म्मेन्द्रियाणिवाक्पाणिपादपायूपस्थानि संयम्य निरुध्य य आस्ते उप
विशति मनसा इन्द्रियार्थान्विषयान्स्मरन् विमूढात्माविमूढान्तःकर
णः मिथ्याचारः सउच्यते नासौ सन्न्यासी मानसव्यापारस्यानुपरतत्वादि

त्यभिप्रायः ६

रामानुजभाष्य ५

अन्यथाज्ञानयोगायप्रवृत्तोपिमिथ्याचारोभवतीत्याहअविनष्टपापतयाऽ
जितबाह्येंद्रियकरणआत्मज्ञानायप्रवृत्तोविषयप्रवणतयात्मविमुखीकृत
मनाविषयानूस्मरन्नास्तेयथासंकल्पोन्यथाचरतीतिसमिथ्याचारउच्य
तेआत्मज्ञानायोद्युक्तोविपरीतोविनष्टोभवतीत्यर्थः ६ ॥

अभिनवगुप्त ६

कर्मेंद्रियैर्यन्नकरोतिअवश्यंमनसाचतत्करोति अतस्तन्मिथ्याचारःमा
नसानांकर्मणामत्यंतमपरिहार्यत्वात् ६ ॥

परमार्थप्रपा ६

अथकोयंपुमानहंप्राप्नेनैष्कर्म्यसिद्धिरितिध्यानच्छलेननेत्रेनिमीलयति
इतिसोपिनिगृह्णकर्मेंद्रियाणीतिकर्मेंद्रियाणिवाक्पाणिपादादीनिसंय
म्यनियम्यतूष्णींनि मनसाचइंद्रियार्थानुरूपरसादीन्विषयान्स्मरतिमि
थ्याचारो भिकः सन्नास्तेसविमूढात्मेत्युच्यते स्वहितमजानन्नर्थमा
त्रःपरिकलयतीत्यर्थः ६

भव
न्त

वनमाली २

विनाधिकारंकर्मत्यागीमिथ्याचारोभवतीत्याह कर्मेंद्रियेतियोविमूढा
त्मारागद्वेषादिनादूषितचित्तःबहिरिंद्रियादीनिसंयम्यमनसारागादि
प्रेरितेनेंद्रियार्थान्शब्दादीन्स्मरन्नास्तेननमत्पादारविंदंस्मरन् कृतसंन्या
सोहमित्यभिमानेनमदाराधनरूपकर्मअत्यजत्तिष्ठतिसमिथ्याचारः मि
थ्याचारःपापाचारएवसन्संसारावर्तेपततीतिभावः २ ॥

कुसुमवैजयन्ती ५

ननुयावज्ज्ञानप्राप्तिर्नास्तितावदेवकर्मण्यधिकारोस्तिज्ञानप्राप्त्यनंतरंतुक
र्मकरणंव्यर्थमेवस्यात् कृतभोजनस्यपाककरणवत्प्राप्तफलस्यतदर्थ

हृतारोहनवच्चेत्याशंक्यज्ञानवानपियतिरपिकर्मकरोतियःकश्चिन्नकु
र्यात्समिथ्याचारोभवतीत्याहकर्मेंद्रियाणीतिकर्मेंद्रियाणिवाक्पाणिपा
याद्यस्यानिनियम्यनिगृह्यमौनीभूत्वावाचाभगवन्नामादिकमपिनो
च्चरति रहस्येतुशिष्यादिभिःसहलेखनादिरूपेणसंकेतेनस्वप्रयोजना
दिकंवदतिसंकुचितपाणिर्भूत्वाश्रीभगवदर्चनादिकमपिनकरोति
स्वशरीरादिमलमार्ज्जनादिकंकरोत्येवविजिताशनोभूत्वाभगवदर्चादि
दर्शनार्थंनगच्छतिकिंतुमलमूत्रादित्यागार्थंगच्छत्येव अपमन्वादिकं
भुक्त्वापिजलादिकंपीत्वापिमलमूत्रविसर्जनंनकरोतिलोकेस्वसिद्धिता
विख्यापनायदिवसेमलमूत्रंनकरोतिरात्रौकरोत्येव अपमन्वादिकंभु
क्त्वा इत्थंपरवंचनायैववागादीनीन्द्रियाणिनिगृह्येंद्रियार्थान् ज्ञानेंद्रि
यार्थान्शब्दादीन् विषयान् मनसाकामक्रोधरागद्वेषादियुक्तेनविषय
व्याकुलेनस्मरन्चिंतयन् यःकश्चियतिरास्तेतिष्ठतिसःविमूढात्माविशे
षेणमूढोमोहयुक्तआत्मामनोयस्यसः तथाविषयसन्मुखत्वतयात्मविमुखी
कृतमनामूर्खोमिथ्याचारःअन्यथासंकल्पोऽन्यथाचरतीतिमिथ्याचार
उच्यतेकथ्यते आत्मज्ञानप्राप्तये उद्युक्तोपिविषयविहितममतित्वेनविपरी
तोविनष्टोभवतीतिभावः ६ ॥

यथाकथंचिद्वेदान्सुक्तमावेणकृतसंन्यासस्तस्युद्धवि मधुसूदनी १०

नस्तत्फलभाङ्भवति

योविमूढात्मारागद्वेषादिदूषितांतःकरणःश्रोतस्वकामात्रोणकर्मेंद्रि
याणिवाक्पाण्यादीनिसंयम्यनिगृह्यबहिरिंद्रियैःकर्माण्यकुर्वन्निति
यावत् मनसारागादिप्रेरितेनइंद्रियार्थान्शब्दादीन् तत्वात्मनत्वंस्मरन्ना
स्तेकृतसंन्यासोहमित्यभिमानेनकर्मस्वन्यत्तिष्ठति समिथ्याचारःसत्वशु
द्ध्यभावेनफलायोग्यत्वात्पापाचारउच्यते त्वंपदार्थविवेकायसंन्यासःसर्व
कर्मणांप्रकृत्येहविहितोयस्मात्त्यागात्पतितोभवेदित्यादिधर्मशास्त्रेणत्र
तउपपन्नंनचसंन्यासनादेवाशुद्धांतःकरणःसिद्धिंसमधिगच्छति ६ ॥

46

सदानंदी ११

रागाद्याक्रांतचित्तस्त्वयोक्तवन्बहिरिंद्रियैः कर्माणि मनसा रागद्वेषादिप्रेरितेन च १ शब्दादीन्संस्मरन्नित्यं कर्मत्यक्त्वैव तिष्ठति स सत्वशुद्ध्यभावेन पापाचारः प्रकथ्यते २ त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणां श्रुत्या विधीयते यस्मादन्यथा पतितो भवेत् ३ ६

नीलकंठी १२७

ननु संन्यासपूर्वकं ध्यानेनैव चित्तशुद्धिमपि संपादयिष्यामि किं कर्मभिरित्याशंक्याह कर्मेंद्रियाणीति यो विमूढात्मा रागाद्याक्रांतचित्तः कर्मेंद्रियाणि वागादीनि संयम्य निगृह्य आस्ते एकांते ध्यानोपदेशेनोपविशति स मिथ्याचारः तस्य तदासननियमनादिकं आचरणं मिथ्या अलीकमेव निष्फलत्वात् तत्र हेतुः इंद्रियार्थान्मनसा स्मरन्निति यतः इंद्रियार्थान् शब्दादीन् श्रोत्रादिभिर्गृह्णाति मनसा च स्मरति अतो मिथ्याचारः सविषयान् चिंतयन्योगनिष्ठामात्मनो लोके भिव्यनक्ति यतः कपटी त्यर्थः तस्मात्कर्मव्यतिरिक्तः चित्तशुद्ध्युपायो नास्तीति भावः ६

आनन्दीटी०

एवं कर्मसंन्यासस्यासम्भवाद्यः स्वजातिनियतं कर्मसकामम
नसा तु विषयान्स्मरन्नेव मिथ्याचारः स्यादित्याह कर्मेन्द्रियाणि द
र्शनादिकर्मकरणानि वल्लरादीनि नियम्य स्वव्यापाराद्विरम्य ६

+ एवं च सर्वदेहिनां सर्वावस्थासु सर्वकर्मच्छेदा
नित्यो योगिनः शरीरत्वाव्यभिचारादुच्छरिहरक

रामकण्ठटीका

उपपत्त्योपस्थितायां कर्मणामनारम्भमात्रेणैव नैष्कर्म्याभिमा
नान्तरसद्भावात् कैवल्यलक्षणसिद्धभावः प्रसक्त इति तथा

+ उक्तयोपपत्त्या मुनेः सम्यक् कर्मणामुपरमाभावाद्योगी मनसान्तःक
२ रणेनेन्द्रियार्थाञ्छब्दादीन्स्मरंश्चिन्तयन्नास्ते नैष्कर्म्यबुद्धिमालम्ब्या
वतिष्ठति स मिथ्याचार उच्यते तादृशरूपयोगाचरणं फलविसं
वादीत्यर्थः यतः कर्मेन्द्रियाणि कर्मेन्द्रियशब्देनेह बहि
ष्करणानि श्रोत्रादीनि वागादीनि च गृह्यन्ते तेन शब्दादिग्रहण
व्यापाराधिकृतानि श्रोत्रादीन्यप्याणि नियम्य व्यापारान्निषिध्या
सीकं विकल्पेनयाले नत्वनावनास सर्वात्मस्वैक्यशब्दलेखा
फल कैवल्यप्राप्तिः यत्तु त्यावि भावयसमाप्यवस्थायां पदिपरेक्ष्यशः
प्रसमाभवेयुः येषाम्प्रत्यानेषु नः प्रबोधादत्रस्के दोगमाने यस्मि
[illegible]
[illegible]
[illegible]
[illegible] ६ ॥

यो विषयस्याग्रे योगित्वप्रतिपादनार्थमाह +

स्व० न्य० वि०

लासिकी [illegible]टीका

यस्तु कर्मत्यागी नेति नेति कर्मेन्द्रियेति कर्मेन्द्रियाणि संयम्य स्व
व्यापारान्निषिध्य यो विमूढात्मा विमूढो देहादावध्यस्त आत्मा
स्वस्वभावो यस्य स देहादावात्माभिमानवान् मनसान्तःकरणेन
शब्दादीन् चिन्तयन्नास्ते स मिथ्याचार उच्यते मिथ्याफलविसंवादी
आचारो योगाचरणं यस्य स दाम्भिक इति यावत् ज्ञानमन्तरेण मा
नसानां कर्मणामपरिहार्यत्वात् कर्मेन्द्रियग्रहणं सर्वेन्द्रियोपल
क्षणार्थम् तेन श्रोत्रादीनि च तदुक्तं लाघवे संसारजलधौ मग्नं
ब्रह्मतो मीनिवादिनम् कर्मबन्धो भयग्रस्तं त्यजेदन्यं जपेच्चे
ति ६ ॥

गी.
टी.
५८

पंचोलीटीका

ज्ञानरहितस्य कर्ममार्गे निंदामाह कर्मेंद्रियाणि वाक्पाणिपादा
पायूपस्थानि नियम्य इंद्रियार्थान्विषयान्मनसा स्मरन् ध्यायन्नास्ते ति
ष्ठति स विमूढात्मा मोहितचेताः मिथ्याचारः पापाचार उच्यते ६

रंगवीरसमिछ्योधिनी॥

यश्चोदितं कर्मानतुतिष्ठन् नैष्कर्म्यं मन्यते सोऽत एवेत्याह
कर्मेंद्रियाणीति यः पुमान्कर्मेंद्रियाणि हस्तपादादीनि सं
यम्य स्वस्वकर्मणः सकाशान्न्यावर्त्य मनसा इंद्रियार्थान्विष
यान् कथमहं गुर्वादीन्हत्वा सुखी स्यां पापनिष्कृतिश्च कथं॥
भवेदित्यादिरूपान्स्मरन् आस्ते स विमूढात्मा विमोहितांतः
करणो मिथ्याचारो दांभिकाचारः पापकर्मेत्युच्यते मानसिक
कर्मणां बाह्यकर्मबीजभूतानां सत्वे कथं निष्कर्मा स इति
तात्पर्यं ६॥

मधुभाष्य

कर्मेंद्रियाणीति मनस एव प्रयोजकमिति दर्शयितुमन्व
यव्यतिरेकमाह मनसा स्मरन् मनसा नियम्येति कर्मयो
गं स्ववर्णाश्रमोचितं नत्वष्टस्य कर्मैवेति नियमः स
न्यासादिविधानात् सामान्यवचनाच्च अतो नियतं स्ववर्णा
श्रमोचितं कर्म कुरु कर्मणा बध्यते जंतुरिति कर्मबंधक
त्वं तमित्यत आह ६॥

47

स मिथ्याचारविमूढात्मा उच्यत इति संबंधः चरणं चारः गुरूपसत्तिः
सामान्येन विशेषलक्षणान्मिथ्यादंभादिप्रभवस्माद्गुरूपसत्तिर्यस्य
स विमूढात्मा अविद्यावानुच्यते लोकैः न तु तस्य निष्ठेति भावः सक
इत्यपेक्षायामाह कर्मेंद्रियाणीत्यादि यः कर्मेंद्रियाणि विधिबोधितक
र्मप्रवणानि संयम्य सन्यस्तमिति हेतोरुपसंहृत्याशांतेनाशुद्धेन संकल्प
विकल्पात्मकेन मनसा विषयान्स्मरन्नास्ते अतो दंभेनापि सन्याससंभवान्न
तेनापि निष्ठेति भावः [अतः] कर्मत्यागोऽसंभवित्वान्निष्ठाव्यभिचारित्वा
च्चायुक्त इति ब्रह्मार्पणबुद्ध्याज्ञायशुद्धिफलकर्मावश्यपेक्षितं कुर्वन्नेव श्रे
य इत्यपर्जनं प्रवर्तयितुकाममाह भगवान् यस्त्विति ॥

इसीसे अज्ञान कर्म्मत्यागी की निन्दा करते हैं कि जो आत्मस्वरू
पको स्थिर न करिके वाक पाणि पाद आदि कर्म्म इन्द्रियों को वशी
भूत अर्थात् काबू करि भगवत के ध्यानके ~~(वाक पाणि पाद आदि
कर्म्म इन्द्रियों को)~~ वहाने से मनकी अशुद्धता के कारण से इन्द्री
गण का अर्थरूप विषयों का स्मरण मनसे करता है सोई मूढ
मिथ्याचार अर्थात् नास्तिक कहावता है ६ ॥

दोहा ॥

कर्मइंद्रि को रोकके विषयस्मरें मन माहि जो मूरख ऐसें रह
त वृथाचार कहें ताहि ८॥

यस्त्विंद्रियाणि मनसा नियम्यारभतेर्जुन कर्मेंद्रियैः कर्मयोगमशक्तः स विशिष्यते ७

शांकरभाष्य १

यस्त्विति यस्तु पुनः कर्मण्यधिकृतोऽज्ञो बुद्धींद्रियाणि मनसा नियम्यारभतेऽर्जुन कर्मेंद्रियैर्वाक्पाण्यादिभिः किमारभत इत्याह कर्मयोगमशक्तः सन् फलाभिसंधिवर्जितः स विशिष्यते इतरस्मान्मिथ्याचारात् ७

आनंदगिरिकृत टीका २

अनात्मज्ञस्य चोदितमकुर्वतोऽज्ञानतो विषयान्तरदर्शनद्रोहात् मिथ्याचारत्वेन प्रत्यवायित्वमुक्त्वा विहितमनुतिष्ठतस्तस्यैव फलाभिलाषविकलस्य सदाचारत्वेन वैशिष्ट्यमाचष्टे यस्त्विंद्रियाणीति विहितमनुतिष्ठ[illegible]तो मूर्खान् कर्मत्यजतो वैशिष्ट्यमक्षरयोजनया स्पष्टयति यस्तु पुनरिति ७

श्रीधरी टीका ३

एतद्विपरीतः कर्मकर्त्ता तु श्रेष्ठ इत्याह यस्त्विंद्रियाणीति यस्तु ज्ञानेंद्रियाणि मनसा नियम्य ईश्वरपराणि कृत्वा कर्मेंद्रियैः कर्मरूपं योगमनुपायमारभतेऽनुतिष्ठति अशक्तः फलाभिलाषरहितः स विशिष्यते विशिष्टो भवति चित्तशुद्ध्या ज्ञानवान् भवतीत्यर्थः ७

पिशाचभाष्य ४

तस्मान्मिथ्याचारात् यत एवमतः यस्तु पुनः कर्मण्यधिकृतोऽज्ञो बुद्धींद्रियाणि मनसा नियम्यारभतेऽर्जुन कर्मेंद्रियैः वाक्पाण्यादिभिः किमारभत इत्यत्राह कर्मयोगं कर्म च योगमाराध्याराधकसंबंधरूपकत्वात् असक्तः अफ

लोकांतीसविशिष्यते तस्मान्मिथ्याचारात् ॥

रामानुजभाष्य

ततः सर्वाभ्यस्तविषयसजातीये शास्त्रीये कर्मणीन्द्रियाण्यात्मावलोकनप्रवृत्तेन मनसा नियम्यानेनैव कर्मप्रवणैरिन्द्रियैरसंगपूर्वकं यः कर्मयोगमारभते सोऽसंभाव्यमानप्रमादत्वेन ज्ञाननिष्ठादपि पुरुषाद्विशिष्यते

अभिनवगुप्त

कर्मस्वक्रियमाणेषु न ज्ञानहानिः मनसो व्यापारेयं च पुरुषवत्कर्मणः क्रियमाणत्वात् ॥ परमार्थप्रपा

अथाविमृष्टात्मानं वर्णयति यस्त्विति यस्तु ज्ञानेन्द्रियाण्यात्मप्रवणेन मनसा नियम्यासक्तः फलानपेक्षः सन् कर्मेन्द्रियैः कृत्वा कर्मयोगमारभते स एव विशिष्यते विशिष्टो भवति चित्तशुद्ध्या ज्ञानवान् भवति यस्मात्तथा भवेदिति तात्पर्यं ॥

वनमाली

निःकामं कर्म कुर्वाणं प्रशंसति यस्त्विति यो ज्ञानेन्द्रियाणि श्रोत्रादीनि मनसा सह विवेकयुक्तेन मनसा नियम्य शब्दादिविषयेभ्यो निवर्त्य कर्मेन्द्रियैर्वागादिभिः कर्मयोगमाराधनरूपं निःकामतया कर्मयोगमारभते करोत्यसक्तस्सन् फलेच्छाशून्यः सन् सदृक्षणां स विशिष्यते इंद्रियव्यापारे तुल्येप्ययं महाफलभाग्भवतीतरस्तु सकामस्तुच्छफलभागिति विशेष इत्यर्थः ॥

ऊसमवैजयन्ती

एवं कर्मेन्द्रियनियमनं कुर्वाणस्य मिथ्याचारत्वमुक्त्वेदानीं ज्ञानेन्द्रियनियमनं कुर्वतस्तु विशेषमाह यस्त्विन्द्रियाणीति हे अर्जुन यस्तु पुनः योगी मनसा विवेकयुक्तेन शुद्धेन मनसा बुद्धीन्द्रियाणि ज्ञानेन्द्रियाणि श्रोत्रादीनि नियम्यारभते कर्मेन्द्रियैर्वागादिभिः स्वत एव विषयप्रवणैः स्वयमशक्तो विषयसङ्गः

रहितस्सन्कर्मयोगमारभते करोति सः कर्मफलाभिलाषशून्यो विवेकी पू-
र्वोक्तान्मिथ्याचाराद्विशिष्यते विशिष्टो भवति यद्वा प्रमादरहितत्वेन ज्ञाननि-
ष्ठादपि श्रेष्ठो भवति इंद्रियनियमनत्वेन परिश्रमसाम्येपि फलवैलक्षण्य-
मुभयोरितीदमाश्चर्यं त्वं पश्येति सम्बोधनाभिप्रायः ७

श्रोत्रमुखमात्रेण सर्वकर्मसंन्यासं मधुसूदनी न्यास्यवि १ तच्छुद्धये निष्कामकर्माण्येव यथा शास्त्रं

ऊर्याद्यस्मा त्वशुद्धोऽस्तु शुद्धांतःकरणसंन्यासव्यतिरेकार्थः इंद्रियाणि ज्ञानेंद्रियाणि
ज्ञानेंद्रियाणि श्रोत्रादीनि मनसा सह नियम्य पापहेतुशब्दादिविषयासक्ते- म्य॰
र्निवर्त्य मनसा विवेकयुक्तेन नियम्येति वा कर्मेंद्रियैः वाक्पाण्यादिभिः क-
र्मयोगं शुद्धिहेतुतया विहितं कर्मारभते करोत्यसक्तः फलाभिलाषशून्यः
सन्नो विवेकी स इतरस्मान्मिथ्याचाराद्विशिष्यते परिश्रमसाम्येपि फला-
तिशयभाक्त्वेन श्रेष्ठो भवति हे अर्जुन आश्चर्यमिदं पश्य पश्य एकः कर्मेंद्रिया-
णि निगृह्णन् ज्ञानेंद्रियाणि व्यापारयन् पुरुषार्थशून्योऽपरस्तु ज्ञानेंद्रि-
याणि निगृह्य कर्मेंद्रियाणि व्यापारयन् परमपुरुषार्थभाग्भवतीति ७ ॥

सदानंदी ११

कर्मण्यधिकृतो यस्तु सचित्तानींद्रियाणि च भोगासक्तेर्निवर्त्याथ वाक्पाण्या-
दिभिरिंद्रियैः १ शुद्धिहेतुतया प्रोक्तं कर्मयोगं विवेकवान् फलाभिलाष-
शून्यः सन्करोति स विशिष्यते २ श्रमे साम्येपि पूर्वोक्तान्मिथ्यासंन्यासिनो
नरात् चित्तशुद्ध्यै क्रियाः कुर्वन्श्रेष्ठः स्यात्फलभाग्यतः ३ ७ ॥

नीलकंठी १२

यस्तु पूर्वस्मान्मिथ्याचारात् विलक्षणः पुरुषधौरेयः इंद्रियाणि मनसा स-
ह नियम्य रागद्वेषवियुक्तानि कृत्वा कर्मयोगं आरभते हे अर्जुन सः कर्मफले द्रियैः कर्म॰
स्वर्गादौ ऐहिके वा पुत्रादौ असक्तोऽनासक्तः तो विशिष्यते पूर्वस्मादधिको
भवतीत्यर्थः ७ ॥

आनन्दीटीका

यस्त्वितियतं कर्मनुतिष्ठत्येव स विशिष्ट इत्याह कर्मणो योगे फलस्पृहां विनाकरणम् ७ ॥

+ यस्मिंस्तु समाधौ दग्धबीजकल्पतामापाद्य न स्पृह विवदितस्य योगिनः एवं स्माद्विशे

मानास्तेले क्षयाः सत्पथालंबने प्ररोहसामर्थ्यं न भजन्ते तदधिक योरागद्वेषवियुक्तैस्तु विषयानिंद्रियैश्चरन् इत्यादिना एवं क्रममपि स्मारयन्नाह +

रामकंठीटीका

+ न शास्त्रोक्तव्यतिरेके स पुनरसक्तः संगरहितो योगी पूर्वस्मादयोगिनो विशिष्यते प्रकर्षेण व्यतिरिच्यते कोसौ यो मनसा यथाप्रतिपादितलक्षणसमाधिलक्षणमनुष्ठितवान् सर्वं साम्यदशाधिरूढेनान्तःकरणेन बुद्धा श्रोत्रादीनीन्द्रियाणि रागादिदोषसंस्पर्शात्तु न शब्दादीन् विषयान्प्रतिषिध्य न एवं विधे रागादिस्पर्शशून्यैः कर्मेंद्रि- पा॰ यैः कर्मसु वागादिषु शब्दादिग्रहणरूपेषु व्यक्तिकर्मरतैः कर्मयोगमारभते कर्मणा शास्त्रचोदितशब्दादिग्रहणरूपया क्रियया योगमव्ययमारभते प्राप्नोति [illegible] ७ ॥

लासिकी [illegible]मीटीका

यस्तद्विपरीतकर्मकर्ता श्रेष्ठ इत्याह यस्त्विति न शास्त्रोक्तव्यतिरेके ॰त्म यः प्रवर्तते नेन्द्रियाणि मनसा मननात्मकेन नियम्य रागादिदोषेभ्यः प्रतिषिध्य न च प्रवृत्ता असक्तः फलानभिलाषिणाः लीनचित्तः कर्मेंद्रियैः कर्मयोगं सकललक्षणमारभतेनुतिष्ठति स विशिष्यते ज्ञानकाष्ठाधिरोहणश्रेष्ठो भवति एषश्लोकः कर्मयोगलक्षणप्रतिपादकः प्रकृषोद्देशेनोपदिष्टो भगवतान्येप्रसक्तानुप्रसक्ता सेवापोहलका दृष्टव्याइति ७ ॥

पंचोलीटीका

यस्तद्विपरीतः कर्मकर्ता श्रेष्ठ इत्याह यस्त्विति न पुनः हे अर्जुन यः इंद्रियाणि स॰ श्रोत्रत्वक्चक्षुरसनाघ्राणादि मनसा नियम्य कर्मेंद्रियैः वाक्पाणिपादरूपस्थैः कर्मयोगं परमेश्वरसमर्पितं कर्म समारभते कुरुते स असक्तः फलासक्तिरहितः सविशिष्यते ७

वोदितं कर्मकुर्वन्नेवविमोषजन्मत्याद यात्विति यः पुनरिं
द्रियाणि चक्षुरादीनि मनसा सह नियम्य स्ववशे विधाय
नतुतद्वशो भूत्वा कर्मेंद्रियैर्वाक्पाण्यादिभिः कर्मयोगं कर्म
स्वश्रागच्छत्यिगोभव यथाशक्ति प्रद्दरमहान विषयो भूत्वा
नभविष्यसीत्यादिस्ववीरत्वाख्यापन परतेजोहानि निमित्ती
भूतवचनपूर्वकं प्रास्त्राह्न प्रयोगलक्षणे गुणयोगं कौशलमा
रभते स गुरुवधादिपापासंगरहितो विशिष्यते स वैमान्य
तयाज्ञायते इति ७ ॥

मधुभाष्य

७ ॥

52

इंद्रियाणिनियम्येतिज्ञानेंद्रियाणिपापहेतुत्वस्वविषयासक्तेः ।
कर्मेंद्रियाण्यपिपापहेतु वृथाचेष्टाभ्योनियम्योपसंहृत्यमनसा ऽस
क्तः सन्निष्कामः सन्नन्तदंभेनकर्मेंद्रियैः कर्मयोगंशुद्धिकृतंकर्मारभते
करोतिसविशिष्यते सर्वपुरुषेभ्योपिविशिष्टमुक्तिभाग्भवतीत्यर्थः
अथवामनसेतिसहार्थेतृतीया मनसासहेंद्रियाणिनियम्येति निवृत्तः
स्वदेहमपिजन्मांतरकृतसुकृततः शुकवामदेवादिवत्परित्यक्ताश्रयः
संन्यासपूर्वकश्रवणाद्येवप्रवर्ततेनकिंकर्मणेत्याशंक्याह नियत ... मिति

भाषाअनुवाद

अंब इस के विपरीत कहे उलटा कहते अर्थात् कर्मकारी पुरुष को श्रेष्ठ कहते हैं कि जो फलकी अभिलाष रहित मनुष्य चक्षु श्रोत्र घ्राण आदि ज्ञान इंद्रियो को मनके द्वारा वशीभूत करिके अर्थात् ईश्वरमे तत्पर हो सकल कर्ममे अपनेको अन्तर्यामी भगवान के अधीन जानि कर्म इंद्रियोंसे कर्मरूप योग आरम्भ करते हैं वेई फलाभिलाष रहित चित्तशुद्धिके द्वारा ज्ञानवान होतेहैं और कर्म दोष रहित हो मुक्तिलाभ करते हैं ७

दोहा

मन करइंद्रिरोकके जोहि पुरुष गुडाकेश कर्मजोग हिं कर्म इंद्रिसें करें सो असंगविशेष ७॥

54

नियतंकुरु कर्मत्वं कर्म ज्यायोह्यकर्मणः शरीर
यात्रापि चतेन प्रसिध्येदकर्मणः ॥ ८ ॥

शाङ्करभाष्य १

यतएवमतोनियतं नित्यंशास्त्रोपदिष्टं योयस्मिन् कर्म्मण्यधिकृतः
फलाय चाश्रुतं तन्नियतं कर्म्मतत् कुरुत्वं हे अर्जुन यतःकर्म्म ज्या
योधिकतरं फलतोहि यस्मादकर्मणोऽकरणादनारम्भात् कथंश
रीरयात्रा शरीरस्थितिरपि चतेतवनप्रसिध्येत् प्रसिद्धिं नगच्छेदकर्म
णोऽकरणात् अतोदृष्टःकर्म्माकर्म्मणोर्विशेषोलोके ८

आनंदगिरि २

कर्म्मानुष्ठायिनोवैशिष्ट्यमुपदिष्टमनूद्य तदनुष्ठानमधिकृतेन कर्त्तव्य
मिति निगमयतिनियतइति उक्तमेवहेतुं भगवदनुमति कथनेन स्फु
टयति कर्मेति इतश्चत्वयाकर्त्तव्यं कर्म्मेत्याहशरीरेति तन्नियतंतस्या
धिकृतस्येतिसम्बंधः स्वर्गादिफलेदर्शपौर्णमासादावधिकृतस्य तस्य
तदपिनित्यंस्यादित्याशङ्क्यविशिनष्टि फलायेति नित्यंकर्म्मेतिनियमेन
कर्त्तव्यमित्यत्र हेतुमाहयतइति । हिशब्दोपात्तमुक्तमेव हेतुमनुवदतिय
स्मादिति करणस्याकरणाज्ज्यायस्त्वं प्रश्नपूर्वकं प्रकटयतिकथमित्यादिना
सत्येवकर्म्मणि देहादिचेष्टाद्वाराशरीरंस्यात्तंपारयतितदभावेजीवनमे
वदुर्लभं भवेदितिफलितमाहअतइति ॥ ८

श्रीधरी टीका ३

नियतमिति यस्मादेवतस्मान्नियतं नित्यंकर्म्मसंध्योपासनादिकुरुहि
यस्मादकर्म्मणःसर्वकर्म्मणोऽकरणात् सकाशात् कर्म्मकरणंज्यायोऽ
धिकतरं अन्यथाअकर्म्मणःसर्वकर्म्मशून्यस्य तवशरीरनिर्वाहोऽपिनभ
वेत् ८

पिशाचभाष्य ४

यतएवमतःनियतमिति तस्मान्नियतंनित्यंकर्मत्वंकुरुयतःकर्मज्यायः
श्रेष्ठफलकत्वाद्अकर्मणःअनारंभात् इतश्चज्यायः शरीरयात्राशरीर·
स्थितिरपिचतेनतेनप्रसिध्येत अकर्मणःअकरणात्तस्मात्कर्तव्यमित्यभि
प्रायः ८ ॥

रामानुजभाष्य ५

नियतंव्याप्तंप्रकृतिसंसृष्टेनहिव्याप्तंकर्मप्रकृतिसंसृष्टत्वमनादिवा
सनयानियतत्वेनसुशकत्वाद्असंभावितप्रमादत्वाच्चकर्मणएवकर्मैवकुरुअ
कर्मणोहिज्ञाननिष्ठायाअपिकर्मैवज्यायःनैष्कर्म्यंपुरुषोऽश्नुतइतिप्रक्र
मात् अकर्मशब्देनज्ञाननिष्ठैवोच्यतेज्ञाननिष्ठाधिकारिणोऽप्यनभ्यस्त
पूर्वंतयाचानियतत्वेनदुःशकत्वात्सप्रमादत्वाच्चज्ञाननिष्ठायाःकर्मनि·
ष्ठैवज्यायसीकर्मणिक्रियमाणेत्वात्मयाथात्म्यज्ञानेनात्मनोकर्तृत्वा·
नुसंधानमन्तर्गतमेववक्ष्यतेअतआत्मज्ञानस्यापिकर्मयोगान्तर्गतत्वा·
त्सएवज्यायानित्यर्थःकर्मणोज्ञाननिष्ठायाज्यायस्त्वमवगतंज्ञाननिष्ठा
यामधिकारेसत्येवोपपद्यतेयदिसर्वकर्मपरित्यज्यकेवलज्ञाननिष्ठा
यामधिकरोषितर्ह्यकर्मणस्तेज्ञाननिष्ठोपकारिणीशरीरयात्रापिन
सेत्स्यति यावत्साधनसमाप्तिशरीरधारणंचावश्यकं न्यायार्जितधनेन
महायज्ञादिकंकृत्वातच्छिष्टाशनेनैवशरीरधारणंकार्यं आहारशुद्धौ
सत्वशुद्धिःसत्वशुद्धौध्रुवास्मृतिरितिश्रुतेः तेत्वघंभुंजतेपापाइतिव
क्ष्यति अतोज्ञाननिष्ठस्यापिकर्माकुर्वतोदेहयात्रानसेत्स्यतियतोज्ञान
निष्ठस्यापिध्रियमाणशरीरस्ययावत्साधनसमाप्तिमहायज्ञादिनित्यनैमि
त्तिककर्मावश्यंकार्यंअतश्चकर्मयोगेह्यात्मनोकर्तृत्वभावनयात्मयाथा
त्म्यानुसंधानमन्तर्भूतं अतश्चप्रकृतिसंसृष्टस्यकर्मयोगःसुशकोऽप्रमा

दस्य अतोज्ञाननिष्ठायोग्यस्यापि ज्ञानयोगात्कर्मयोगो ज्यायानतस्मात्त्वं क-
र्मयोगमेव कर्त्तुमर्हसीत्यभिप्रायः ८

अभिनवरामी ६

नियतं शास्त्रीयं कर्म कुरु शरीरयात्रामात्रस्यापि कर्माधीनत्वात् ८ ॥

परमार्थप्रपा ७

एवं वेदविहितं कर्म द्विविधं प्रवृत्तं एकमिहामुत्रफलभोगजनकमपरं नैष्क-
र्म्यजनकं तयोरुभयोर्यद्वोचनेनत्कार्यं यां तूभयपरत्वं माभजेत्याह नियतमिति
नियतमकरणे प्रत्यवायजनकं संध्योपासनादिकुरु हि यस्मात्कारणात्कर्म-
णः कर्माकरणात्सकाशात्कर्म ज्यायः श्रेष्ठं कुतः स्माहस्य कर्मण इत्यपि। कर्म-
शून्यत्वात्तव शरीरयात्रापि न प्रसिद्ध्येत् पुनरेतादृशशरीरप्राप्तिर्न भवेत् अथ मे यो-
निमामोसर्वमपि नपूर्णतीमर्थः ॥ ८ ॥

वनमाली ९

अनस्त्वमपि कर्मैव कर्त्तुमर्ह हि यतो कर्मणः कर्माकरणात् ज्ञानिपिकृतोमु-
मुक्षोः कर्मानुष्ठानं ज्यायः सुकरत्वादप्रमादत्वाच्च अतो ज्ञानात्मतत्त्वोपित्वं
रहस्यास्यमित्वाच्चिष्ठाग्रेसरत्वाच्च नियतं स्ववर्णाश्रमोचितं कर्म यथावद्दास्या-
नुसंधानं कुरु अकर्मणस्तेन तव शरीरयात्रा शरीरनिर्वाहः प्रकर्षेणादात्रहत्या
न सिद्ध्येत् अन्तर्हृतिस्त्वशिष्टाग्रेसरस्य तव नानुचितेति भावः ८

ऊसमवैजयन्ती १०

श्रीश्रीश्रीश्रीशंवश्रीप्रांदहेरोसी इत्यंबारंवारंप्रवदतो मातुलेयस्य सख्युः
सारथेर्मम वचनाच्छुद्धात्मा सोचितं कर्म न करोषि चेत्तर्हि तव शरीरनिर्वाहो-
पि न भवेदन्यस्य तु का कथेत्याह नियतमिति नियतं नित्यं संध्योपासनादिरू-
पं यद्वा नियतं व्याप्तं प्रकृतिसंसृष्टेन व्याप्तं कर्म प्रकृतिसंसृष्टस्त्वं कुरु प्रकृ-
तिसंसृष्टस्य तव प्रकृतिसंसृष्टकर्त्तुं न प्रयासः इत्यर्थः कुतः हि यस्मादकर्म-
णो ज्ञाननिष्ठायाः सकाशात्कर्म निष्कामकर्म ज्यायः श्रेष्ठं भवति किंच अक-

र्मणःकर्मशून्यस्यतेनचशरीरयात्रादेहनिर्वाहोपिनिश्चयेननप्रसिद्ध्येत्प्रकर्षे
णनसेत्स्यतिप्रशब्देनबाह्येंद्रियव्यापारशून्यत्वंस्नानभोजनादिकंकथंकरिष्य
सिद्धपरहस्तेनैवसर्वंसेत्स्यतीतिवाच्यम् परकरेणचर्वणनिगीलनाद्यभावाद
तःकर्मावश्यकंकुर्विति ध्वनितम् । ८

मधुसूदनी १०

यस्मादेवंतस्मात्पूर्वमनसाज्ञानेंद्रियाणिनियम्यकर्मेंद्रियैः त्वंप्रागननुष्ठि

तशुद्धिहेतुकर्मानियतंविधुद्देशेनफलसंबंधशून्यतयानिमित्तेनविहितंक
र्मश्रौतंस्मार्तंचनित्यमितिप्रसिद्धंकुरु कुर्वितिमध्यमपुरुषप्रयोगेनैवत्वमिति
लब्धेत्वमितिपदमर्थांतरेसंक्रमितं कस्मादशुद्धांतःकरणेनकर्मैवकर्तव्यंहि
यस्मात् अकर्मणोऽकरणात्कर्मैवज्यायःप्रशस्ततरंनकेवलंकर्माभावे
नवांतःकरणशुद्धिरेवनसिद्ध्येत् किंत्वकर्मणःकृतादिकर्मरहितस्यतेतव
शरीरयात्राशरीरस्थितिरपिनप्रकर्षेणज्ञातृत्वलक्षणेनसिद्ध्येत्
तथाचप्रागुक्तं अपिचेत्यंतःकरणशुद्धिसमुच्चयार्थः ८

सदानंदी १०

यस्मादेवंततोबुद्ध्यार्थींद्रियाणिनिगृह्यैवफलसंबंधशून्यंयथाविहितंविधि
नैवतत् १ नियतंकर्मनित्यंत्वंश्रौतंस्मार्तंसमाचर अशुद्धबुद्धेःकर्मैवा
करणादधिकंयतः नसिद्ध्येन्मनसःशुद्धिःकर्माभावेनकेवलंकिंतुस्वधर्म
शून्यस्यदेहस्थितिरपीहते ३ नैवसिद्ध्येत्प्रकर्षेणततःकर्मसमाचर ४ ८ ॥

नीलकंठी १२

नियतमिति यस्मादेवंतस्मात्त्वंनियतंसंध्योपासनादिकर्मैवकुरु यद्वानिय
तंनियमेनत्वंकर्मनित्यकाम्यसाधारणंयत्पापनिवर्तकस्वभावंतदेवकुरु
हियस्मात्अकर्मणःसकलकर्मेंद्रियनिग्रहेणतदकरणात्तुचित्तजयप्र
यत्नात्कर्मैवज्यायःप्रशस्ततरं अपिचततेनवक्ष्यतियस्याकर्मणःसंन्यासमपिकिं
प्रेहोसर्वकर्मत्यागिनःशरीरयात्रादेहव्यवहारःनप्रसिध्येत् भैक्ष्याचर्यायाम
नधिकारात्ब्राह्मणाःपुत्रैषणायाश्चवित्तैषणायाश्चलोकैषणायाश्चव्यु

त्थायाथभिक्षाचर्यं चरंतीति संन्यासविधायके वाक्ये राजा राजसूयेन स्वारा
ज्यकामो यजेतेत्यत्र राजपदवद्ब्राह्मणपदस्य विवक्षितस्वार्थत्वात् च
त्वारश्चाश्रमा ब्राह्मणस्य त्रयो राजन्यस्य द्वौ वैश्यस्येति स्मृतेश्च अन्यत्रा
प्युक्तं पारिव्राज्यं प्रकृत्य मुखजानामयं धर्मो वैष्णवं लिंगधारणं बाहु
जातोरुजातानां नायं धर्मो विधीयत इति ८ ॥

आनन्दीटीका

प्रकृतिजगुणानामवश्यानुसरणाद्देहस्थितये भोजनं करणीयमेवेत्याहि नैष्कर्म्यं कर्तुं सिद्धमित्यर्थः नियममवश्यानुष्ठेयं नित्यं यत्तादि शरीरस्य यात्रा स्थितिरप्यकर्मणो निर्व्यापारस्य न ते सिध्येत् ८ ॥

+ रागद्वेषपरिहारः प्रकरणप्रतिपाद्यसि — रामकंठीटीका — द्धिसाधनेन नतु कर्मणामनारंभस्तस्मात् +

+ नियतं वर्णविभागेनाश्रमविभागेन च शास्त्रेण नियमितं कर्म त्वं नित्यं कुरु प्रवृत्तिधर्मा कदाचन मा त्यासीः यतो कर्मणः कर्माभावात् क्रियामात्राकर्म विहितकर्मानुष्ठानं ज्यायः श्रेष्ठं यतः केषांचिदेव कर्मणामनारंभे कर्माभावाश्रमो न सिद्धिहेतुः क्लेशानामनुच्छेदात् यथोक्तेन समाधिना त्वनुष्ठीयमाने कर्मणि ज्ञानहेतुषु विषयेषु सत्स्वपि क्लेशानां तेषामभावाय पर्यवस्यन् प्रशस्यतरं न च शरीरे त्वं सति सर्वकर्माभाव उपपद्यते यतस्त्वाकर्मणः सर्वात्मना कर्मरहितस्य त्यागकल्पस्य शरीरयात्रापि देहस्थितिरपि न प्रसिध्येत् न घटेत न च पानाशनशयनासनगमनाकुंचनकारायनादिक्रियाकलापमन्तरेण केनचिद् हर्तिं न शक्यं [illegible] सर्वं [illegible] [illegible] सिद्धये [illegible] इत्याह) ८ ॥

वल्लभीटीका

यस्मादेवं तस्मात् नियतं वर्णाश्रमविभागेन नियमितं कर्म त्वं बोधयुक्तः कुरु यतोऽकर्मणः क्रियामात्रात्यागरूपाकाशात् कर्मानुष्ठानं ज्यायः श्रेष्ठं सिद्धिहेतुत्वात् न केवलं सिद्धिहेतुत्वं किंत्वकर्मणः सर्वकर्मत्यागस्य ते तव शरीरयात्रापि देहस्थितिरपि न प्रसिद्धेत् न घटेत पानाशनादिक्रियामन्तरेण केन चिदपि वर्तितुमशक्यत्वात् तदुक्तं ऊलाणी । वे तानितोनानितोवापियारेहस्य धारणा तावद्वर्णाश्रमाचारः कर्तव्यः कर्मसुक्तये इति ८ ॥

पंचोलीटीका

यस्मादेवं तस्मादसत्संकल्परहितं कर्मकरणमेवोचितमेवेत्याह नि

गी॰
टी॰
३

नियतंइति हेअर्जुनत्वंनियतंनित्यंविहितंकर्मकुरुनतुफलार्थंहिय।
स्मात्कर्मणः कर्मअकरणात्कर्मकरणंज्यायः श्रेष्ठंवश्नःनेनवअ
कर्मणःकर्मकुर्वतःशरीरयात्राशरीरस्थितिरपिनप्रसिद्ध्येत् नसे।
स्यतिनिर्वाहोनभविष्यतीत्यर्थः ८

58

रणवीरसमिद्धाथिनी॥

यस्मादेवंतस्मात् त्वंनियतं त्वज्जातौ नियमेनचोदितं
कर्मगृह्यादिरूपंकुरुअनुतिष्ठ हियस्मादकर्मणोकरणा
त्सकाशात्कर्मज्यायःश्रेयस्करं किंच अकर्मणः कर्मइत्यनि
र्वर्त्यकर्मरहितस्यतव शारीरयात्रा देह निर्वाहोपिनप्रसि
द्ध्येत् अतस्तन्निर्वाहार्थंकर्मणोवश्यकर्तव्यतायां किमिति
स्वजात्युचितमेवश्रेयस्करत्वात्कर्मकुर्विति तात्पर्यं ८॥

मधुभाष्य॥

८॥

नियतंनैमित्तिकंनियतनिमित्तानिनियतनिमित्तलक्षणंकर्मत्वं
कुरु अत्रकर्मविनियतेनैवपुरुषार्थसिद्धेस्त्वमितिवदन्वासुदेवोऽर्जुनस्य
शोकमोहाद्यभिभूततयाशुकवामदेवादिवैलक्षण्याज्जन्मांतरनार्जित
शुद्धिकृत्कर्मतामाह अतएवहेतुमाह हियस्मात्अकृतकर्मणोज
न्मांतरेऽकृतशोधककर्मणाज्यायोवश्यानुसरणीयं येनानुसृतेनेहजन्म
निजन्मांतरेवामोचकज्ञानसंपन्नोभविष्यतीतिसंबंधः इतश्चावश्यानु
शारीरेति ष्ठेयंनवशुद्धादिकर्मेत्याह अपिचनेतस्त्रियस्यसतोकर्मणःशुद्धादिकर्म
रहितस्यशरीरयात्राशारीरस्थितिर्नप्रकर्षेणप्रसिद्धिकृतत्वलक्षणेन
सिध्येदित्यर्थः यदितुनसर्वकर्मानुष्ठितंबंधहेतुरितिसांख्यमतमनुपा
श्रित्यकर्मकरिष्यसिततःस्मृतिरित्याह यज्ञार्थादिति

जिस हेतु ऐसी व्यवस्था है इससे तुम कर्म करो सोई कहते हैं कि नि
यत कहे नित्यकर्म संध्याउपासन आदि कर्म अनुष्ठान करो जिसलिये क
र्मन करने से कर्म करना हीभला है नहीं तो सब कर्म छोड़ने से एकबा
रगी कर्मशून्य अचेतनकी भांति रहनेसे तुमारी शरीर यात्राभी कैसे नि
र्वहेगी अर्थात् न चलैगी ॥ ८ ॥

दोहा॥

श्रेष्ठ हि कर्म अकर्मते करहुं कर्मको ताहि देहव्यवहारन
होयगो कैं तोहि सों बिन जाहि ८॥

60

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयंकर्मबंधनः तदर्थक
र्मकौंतेयमुक्तसंगः समाचर ९

शांकरभाष्य १

यच्च[illegible]मन्यसे बंधार्थत्वात् कर्म्म न कर्त्तव्यमिति तदसत् कथं यज्ञार्थादि
ति यज्ञोवैविष्णुरितिश्रुतेर्यज्ञ ईश्वरस्तदर्थं यत् क्रियते तद्यज्ञार्थं कर्म्मतस्मा
त्कर्म्मणोऽन्यत्रान्येन कर्म्मणा लोकोयमधिकृतः कर्म्मकृत् कर्म्मबन्धनं य
स्य सोयंकर्म्मबंधनो लोको न तु यज्ञार्थात् तदर्थं यज्ञार्थं कर्म्म कौन्तेय मुक्तसं
गः कर्म्मफलसंगवर्ज्जितः सन् समाचर निर्वर्त्तय ४

आनंदगिरिकृतटीका २

कर्मणा बध्यते जन्तुरिति स्मृतेर्बंधार्थं कर्म्म न तत् तन्मोक्षार्थिना कर्त्तव्यमित्याशं
कामनूद्य दूषयति यच्चेत्यादिना कर्म्माधिकृतस्य तदकरणमयुक्तमिति प्रति
ज्ञातं प्रश्नपूर्वकं विवृणोति कथमित्यादिना फलाभिसन्धिमन्तरेण यज्ञार्थं
कर्म्म कुर्वाणस्य बंधाभावात्तादर्थ्येन कर्म्म कर्त्तव्यमित्याह तदर्थमिति य
ज्ञार्थं कर्मेत्ययुक्तं नहि कर्म्मार्थमेव कर्मेत्याशंक्याचष्टे यज्ञो वै विष्णुरिति
कथं तर्हि कर्म्मणा बध्यते जन्तुरिति स्मृतिस्तत्राह तस्मादिति ईश्वरार्पणबुद्ध्या
कृतस्य कर्म्मणो बन्धार्थत्वाभावे फलितमाह अत इति ९

स्वामिकृतटीका ३

सांख्यास्तु सर्वमपि कर्म्म बन्धकत्वान्न कार्यमित्याहुस्तन्निराकुर्वन्नाह यज्ञा
र्थादिति यज्ञो वै विष्णुरिति श्रुतेः तदाराधनार्थात् कर्म्मणोऽन्यत्र तदेकं वि
ना लोकोऽयं कर्म्मबंधनः कर्म्मभिर्बध्यते न त्वीश्वराराधनार्थेन कर्म्मणा अतस्त
दर्थं विष्णुप्रीत्यर्थं मुक्तसंगो निष्कामः सन् कर्म्म सम्यगाचर ९

पिशाचभाष्य ४

यत्तु मन्यसे बंधहेतुत्वात्कर्म न कर्त्तव्यमिति तदसत् कथं यज्ञार्थात् यज्ञो वि

गी·
टी·

स्वा

ष्णुः यज्ञोवैविष्णुरितिश्रुतेःसोऽर्थःप्रयोजनंयस्यतत्यज्ञार्थंवि[illegible]राधनार्थंत
स्माद्धिष्ण्वाराधनार्थात्कर्मणोऽन्यत्रायंलोकः कर्मबंधनस्तदर्थंविष्ण्वाराधना
र्थं यज्ञादिकर्मकौंतेयमुक्तसंगोयेनसमनुक्तात्सन्ः समाचर अनुतिष्ठ ४

रामानुजभाष्य ५

एवंतर्हिद्रव्यार्जनादिकर्मणोऽहंकारममकारादेःसर्वेंद्रियव्याकुलतागर्भत्वे
नास्यपुरुषस्यकर्मवासनयाबंधनंभविष्यतीत्यतआहयज्ञादिशास्त्रीयक
र्मशेषभूतात्द्रव्यार्जनादेःकर्मणोऽन्यत्रात्मीयप्रयोजनशेषभूतेकर्मणिक्रि
यमाणेऽयंलोकःकर्मबंधनोभवतिअतस्त्वंयज्ञाद्यर्थंद्रव्यार्जनादिकंकर्मस
माचरआत्मप्रयोजनसाधनतयायःसंगस्तस्मात्संगात्मुक्तःस्तंसमाचरएवं
मुक्तसंगेनयज्ञार्थतयाकर्मणिक्रियमाणेयज्ञादिभिःकर्मभिराराधितःप
रमपुरुषोऽस्यानादिकालप्रवृत्तकर्मवासनामुच्छिद्याव्याकुलात्मावलोकनं
ददातीत्यर्थः ९ ॥

अभिनवगुप्त ६

यज्ञार्थादवश्यकरणीयादन्यानिकर्माणिबंधकानि अवश्यकर्तव्यंमुक्तफ
लसंगतयाक्रियमाणंनफलदम् ९

परमार्थप्रपा ७

अथसांख्याःसर्वमपिकर्मबंधकत्वान्नकार्यमित्याहुस्तन्निषेधयति।यज्ञा
र्थादिति यज्ञोवैविष्णुरित्यादिश्रुतेर्यज्ञोविष्णुःसएवार्थःप्रयोजनंयस्यतद्य
ज्ञार्थं तस्माद्यज्ञार्थात्परमेश्वरार्पणत्वेनकृतात्कर्मणःसकाशादन्यत्रबंधकेक
र्मणि कर्मैवबंधनंयस्यसकर्मबंधनोलोकोजनःभजते।त्वंतुतदर्थंपरमे
श्वरार्थंकर्मसमाचर अतएवमुक्तसंगस्त्यक्तफलाभिसंधिःसन् ९

वनमाली· ८

ननुकर्मणाबध्यतेजंतुरितिस्मृतेर्नमुमुक्षूणांकर्मकार्यमितितत्राह ·
यज्ञार्थादिति यज्ञंपरमेश्वरःयज्ञोवैविष्णुरितिश्रुतेः तदाराधनार्थंक्रिय
माणंकर्मयज्ञार्थं तस्मात्कर्मणोऽन्यत्र कर्मणिप्रवृत्तोऽजंतुःकर्माधिकारीव

थने तत्वीश्वराराधनार्थेन तत्तदर्थं कर्म हे कौंतेय त्वमपि परमेश्वर एवांतस्थः कर्म कारयति नाहं कर्म कर्ता न मदीयमिदं कर्म अनेन स एव प्रीयतामिति कर्म तत्फलयोर्मदीयत्वाभिमानेन कर्मणा ममेदं फलं भवत्वित्यभिमानाभिलाषादिरूपो यो मुक्तः संगो येन स तादृशः सन् स्वोचितं कर्म समाचर ९

कुसुमवैजयन्ती ९

ननु कर्मणा बध्यते जन्तुरिति श्रुतेरात्मबंधनभूतस्यानित्यस्य दुःखरूपस्य देहस्य पालनाय स्वबंधनरूपदेहोत्पत्तिहेतुभूतं कर्म विवेकी जनः कोशकारवत्कथं कुर्यादिति चेत्तत्राह यज्ञार्थादिति यज्ञार्थात् अत्र यज्ञो नाम आत्मयज्ञजपयज्ञद्रव्ययज्ञज्ञानयज्ञयोगयज्ञा इति भेदात्पंचयज्ञाः यज्ञ एवार्थः प्रयोजनं यस्य तत् यज्ञार्थं तस्माद्यज्ञार्थात्कर्मणः सकाशादन्यत्र चात्मभोगास्वादिषु सकामेषु अयं लोकः भरतखण्डाश्रितो जनः कर्मबन्धः कर्मणा बध्यते इति तथा संभवति तदर्थं स यज्ञोर्थः प्रयोजनं यस्य कर्मणस्तत्तदर्थं कर्म हे कौंतेय मुक्तसङ्गः फलसम्बन्धेनेन कृत्वाराधितस्यामरराजस्य पुत्रत्वात्त्वैतत्कर्माकरणे महाननर्थो भवेदिति सूचितम् ९

नाभिलाषपूर्वः सन् तं समाचर सम्यक् शास्त्रादृष्टेन शास्त्रमनादृत्य इतरेण वा उत्सृष्टकीर्तिरिति

मधुसूदनी ९

कर्मणा बध्यते जंतुरिति स्मृतेः सर्वकर्म बंधात्मकत्वान्मुमुक्षुणा न कर्तव्यमिति मत्वानस्योत्तरमाह ॥ यज्ञार्थेति ९ यज्ञः परमेश्वरः यज्ञो वै विष्णुरिति श्रुतेः तदाराधनार्थं यत् क्रियते कर्म तद्यज्ञार्थं तस्मात् कर्मणोन्यत्र कर्मणि प्रवृत्तोऽयं लोकः कर्माधिकारी कर्मणा बध्यते न त्वीश्वराराधनार्थेन अतस्तदर्थं यज्ञार्थं कर्म। हे कौंतेय त्वं कर्मण्यधिकृतो मुक्तसंगः सन् समाचर सम्यक् श्रद्धादिपुरःसरमाचर ९

सदानंदि

कर्मणा बध्यते जंतुरिति स्मृत्या मुमुक्षुणा बंधकत्वात्कथं कर्म कर्तव्यमिति चेच्छृणु १ यज्ञो वै विष्णुरिति श्रुत्युक्तस्तदाराधनहेतुकं यत्कर्म क्रियते तस्मात्प्रवृत्तोऽन्यत्र कर्मणि २ कर्माधिकार्ययं लोकः कर्मणा बध्यते तदा नेश्वराराधनार्थेन बध्यते तस्मात्तदर्थकं ३ कर्मण्यधिकृतः संस्त्वं फलसंगविवर्जि

नःसम्यक्श्रद्धादिनाकर्मकौंतेयमुक्तसंगःसमाचर ९ ९

ननुकर्मणाबध्यतेजंतुरितिकर्मणांबंधकत्वस्मृतेःकथंमुमुक्षुंमांतत्र
नियोजयसीत्याशंक्याह यज्ञार्थादिति यज्ञःपरमेश्वराराधनं यजदेव
पूजायामिति धात्वर्थानुगमात् तदर्थं यज्ञोवैविष्णुरितिश्रुतेर्विष्णुर्वा
तदाराधनार्थंयत्कर्मततोन्यत्रकर्मणिस्वर्गाद्यर्थेप्रवृत्तोयंलोकःकर्मबं
धनःकर्मणाबध्यतेनत्वीश्वराराधनार्थेन अतस्तदर्थंईश्वराराधनार्थंक
र्मवर्णाश्रमोचितंहेकौंतेयमुक्तसंगःफलाभिलाषशून्यःसन्समाचरस
म्यक्कुरु ९

आनन्दीटीका

अशनादिकं न शरीरस्थित्यर्थं चेत्कार्यं निमित्तस्य यत्नादेः करणे को।
विमर्शेऽस्त्वित्यर्थः यतदेव प्रपंचयति यत्तशिष्टमेव भोजनं श्रुतिवि
हितमित्यर्थः ९ ॥ रामकंठटीका श्चेन सर्वेनामकर्मानुष्ठीयमानं सिद्धये कल्पत इत्याह +
+ इत्यं च कर्मणः सर्वथाभावानुपपत्तौ स्थिता
+ यतो यजनमुख्येया ह्यमा देवतपूजनं देवनमपि यस्मिन्सर्वमिमा
दिश्लोकव्याख्यातस्वरूपः परमेश्वरः परमात्मैवैकं ततमिहाभि
प्रेतम् तस्य पूजनमपि यथा प्रतिपादितविज्ञानपरिशीलनवि।
शुद्धया संविदा स्वभावत्वेन परामर्शलक्षणमाराधनं सोऽर्थः प्रयोज
नं यस्य तादृशं यत्कर्म तत्स्नानयागादिक्रियात्मकं मगेणो यत्तादृशं कर्मैव।
जैमिनिमतादृशं कर्म कुर्वाणः सर्वोऽयं लोकः कर्मबन्धनो भवति कु
मेशास्त्रचोदितमप्यनुष्ठानेन बन्धनं संसारदायितामारत वहेतु य
स्य सत्तया यथोक्तात्मतत्त्वज्ञानस्वभावतया विधिवदनुष्ठीयमानं शा
स्त्रीयमपि कर्म बन्धनायैव कल्पते यथा प्रतिपादितविज्ञाननिष्ठता। न५
यानुष्ठीयमानेन परमेश्वराराधनलक्षणमुख्ययागहेतुत्वान्मोक्षसि।
द्धिर्भवतीत्यर्थः तथा च वक्ष्यति यतः प्रवृत्तिर्भूतानां येन सर्वमिदं।
ततम् स्वकर्मणा तमेवाभ्यर्च्य सिद्धिं विन्दति मानव इति यत एवं ततस्त
तदर्थं तादृशस्य यज्ञस्य सम्पत्तये कर्म शास्त्रचोदितं क्रियां समाचरस
म्यक्कुर्वित्यर्थः कीदृशस्त्वस्य सम्यक्करणेऽधिकृत इति विशेषणमाह
मुक्तसंग इति मुक्तश्च संकल्पात्परिहृतः संगो रागद्वेषादिदोषहेतु
विषये धृतिमज्जनं तदेकनिमग्नचित्तत्वं येन स तथाविधः सन्नित्य
नेन मुमुक्षोः स्वावत्कर्मानुविभागः प्रतिपादितः इदानीं कथितस्व
नि लक्षणधर्माधिकृतः [illegible]
[illegible]
[illegible]
[illegible] ९ ॥

लासिकी टीका

अयंसर्वोलोकः कर्मबन्धनः कर्मयस्यास्तीयं स्वाभाविकं वा बन्धनं संसारदायित्वा

क

गी.
टी.
९.

ननुकर्मणाबध्यतेजन्तुरितिस्मृतेःकर्मणोबन्धत्वात्कुतः कर्मकरणं
मुमुक्षोः प्रशंसमीमसतआह यज्ञार्थादिति यज्ञो विष्णुः यज्ञो वै वि-
ष्णुरितिश्रुतेः तदर्थात्तस्याराधनात्मनः परमेश्वरार्पणादिनाकृता
त्कर्मणोऽन्यत्रतादृशंकर्मवर्जयित्वाऽसारबन्धहेतुर्यस्मात्यथाकवि
तानिनिष्कामतयाकृतेकर्मपरसिद्धिदंभवतीत्यर्थः तदुक्तं कृतानिवे
क्रियमाणानिकर्माणिज्ञानप्राप्तेरनन्तरम् नसंस्पृशन्तितत्त्वज्ञं ज।
लंपद्मदलंयथा नत्वनिष्कामकर्माणिपुण्यपापानिसंतयंतप्रया।
ल्लिनैवलिम्पन्तिक्रियमाणानिवापुनारिति यतएवंततस्त्वंमुक्तसं-
गः मुक्तस्त्यक्तः संगः फलाभिलाषेण तदेकनिमग्नचित्तत्वंयेनसः

तौ

तदर्थमीश्वरप्राप्त्यर्थंमुमुक्षुणाकर्मसमाचरसम्यक्कुर्वित्यर्थः अतो
नमुमुक्षोः कर्मपरित्यागः ९॥

पंडोलीटीका

कर्मणोबंधकत्वमाशंक्ययथास्मात्कर्मबंधकंनभवतितंप्रकारमाह
यज्ञार्थादिति यज्ञोवैविष्णुः तदर्थंकर्मयज्ञार्थंतस्मात्यज्ञार्थात्कर्मणः
अन्यत्रअनेनकर्मणाअयंलोकः कर्मबंधनः कर्मैवबंधनंयस्यसक-
र्मबंधनः हेकौन्तेयमुक्तसंगः फलकांक्षारहितः सन्तदर्थंविष्ण्वर्थं
कर्मसमाचर [illegible] ९

रणवीरसमिद्धोधिनी॥

ननुकर्मभिर्बध्यतेनैष्कर्म्यान्मोक्षइति यदुच्यते तत्कथंसंग-
च्छतइत्यतआह यज्ञार्थादिति यज्ञोवैविष्णुरितिश्रुतेर्यज्ञश-
ब्देनपरमेश्वरउच्यते तदर्थात्तत्प्रीणनार्थाद् वर्णधर्मकर्तव्या
इतियावत् कर्मणः ब्राह्मणादिजात्युचिताध्ययनादिलक्षणाद् अन्य-
त्रब्राह्मणादिजात्यनुचिते भिक्षाचरणादौनिषिद्धेचउत्पन्नादिल-
क्षणोलोकः कर्मबंधनः कर्मभिर्बध्यतइति अतस्तदर्थं
तस्येश्वरस्यप्रीणनार्थंकर्म अवश्यमविधेयं प्रारब्धप्रयोग

रिकुरु कथमित्याह मुक्तस्त्यक्तः संगश्चाचार्यशिष्यादिलक्ष
णः संबंधो येनेति प्रथमश्चाभिप्रायः यथा राज्ञा पित्रादिव
धं प्रत्यप्याज्ञप्तो भवत्तच्छासनं संपाद्य प्रसादविषयोन्य
थादंडश्च भवत्येवं परमेश्वरेण यथावर्णं चोदितानि कर्मा
णि यो निर्वर्तयति स तदाज्ञापालनात्तस्य प्रीतिभाजनम
न्यथाऽकुर्वन्बंधनीयश्च भवति तस्मात्तदनुष्ठितं कर्म यद्यपि
घोरं तथापि तदाज्ञापालने न तत्प्रीत्युत्पादनार्थमेव प्रथम
विचार्यैव विधेयमिति अत एव यज्ञार्थपदस्यावश्यकर्तव्य
तार्थपरता सिद्धा परोक्षमपि महद्वचनमनुपालयंतो महा
त्मानः सर्वैः कर्मबंधनैर्मुच्यंते किं प्रत्यक्षं महद्वचनमनुपा
लयन्कथं बध्यस इति गूढाभिप्रायः ९॥

मधुभाष्य॥

यज्ञार्थादिति कर्मबंधनं यस्य लोकस्य स कर्मबंधनः य
ज्ञो विष्णुः यज्ञार्थं संगरहितं कर्म न बंधकमित्यर्थः मुक्तसं
ग इति विशेषणात् कामान्यः कामयत इति श्रुतेश्च अनि
ष्टमिष्टमिति वक्ष्यमाणत्वाच्च एतान्यपि तु कर्माणीति वचनत्
स्मान्नैष्ठिया जनकः स्यादिति च विशेषवचनत्वे समेपि विशे
षणं पतिशिष्यते अर्थवादमाह ९॥

64

यज्ञो विष्णुः यज्ञो वै विष्णुरिति श्रुतेः अतो विष्णुप्रीत्यर्थं कृतं कर्म ततोऽ
न्यत्र कर्मणि प्रवर्तमानोऽयं लोकः कर्मनिबंधनो भवति कर्मबंधनम
स्य तादृशो भवतीत्यर्थः अतस्तदर्थं कर्म समाचरन्यायाच मुक्तसंगः सं
सारातीतो भविष्यसीत्यर्थः [illegible] सह यज्ञा इति चतुर्थः

अन्ये तु यज्ञादित्यस्य श्लोकस्यैव मायातनिका माहुः ननु यदि शरीरयात्रामात्रसिद्ध्यर्थं
मया कर्म कर्तव्यं तर्हि यावता यात्रा भवति तत्क्षत्रियविजयार्जित युद्धादिना तदर्थं
युद्धं भूपालनं वा करिष्यामि नियतानियतनिमित्त कर्मकरणे पुनः फलेच्छाप्युत्पद्ये
तेति किमिति मां नियोजयसीत्याशंका तस्मिन्क्रियमाने तव फलेच्छा भविष्यतीति
कयापि भंग्या ह यज्ञस्यार्थः यज्ञार्थः फलं यस्य कर्मणो दान होम जपादेस्ततोऽन्य
त्र कर्मणि प्रवृत्तोऽयं लोकः कर्मवन्धनो भवति कर्मबंधनं ऐहिक फलार्थं प्रवृत्तिप्रति
बंधकं यस्यैवं विधो भवतीत्यर्थः ब्रह्मार्पण बुद्ध्या क्रियमाणं तत्त्व महिम्नैवाशु यच्छुद्धिं जन
यन् कामं मनोदुष्टरूपं शोधयिष्यतीति भावः अतस्तदर्थं तादृशबंधार्थं कर्म समाचर
मुक्तसंग इति स्वर्गकामादीनां संगं विकारहेतुं परित्यजेति भावः ९ ॥

65

सांख्यमतवालेकहते हैंकिबंन्धनकेकारणभूतकर्महैं इस सेसम्पूर्ण कर्म्मनकरनांही भलाहै उसी को निर्णय करि के कहते हैं कि य ज्ञ शब्दका अर्थ विष्णु है यह श्रुतिमे कहा है सो यज्ञ जो विष्णु भगवान तिनके आराधनार्थ जो कर्म्म तिसको छाडिकरि और स ब कर्म्म अलवता लोगों को संसार बंधन करते हैं परन्तु ईश्वर । आराधन रूप कर्म्म नैसे नही हैं इससे विष्णु प्रीत्यर्थ निःकाम मानस हो सब कर्म्म अच्छीतरह से करो का डरहे ९

दोहा ॥

यज्ञकर्मसें औरसभकर्म जीवको बंध पार्थकर्मकर यज्ञ हि त बिना संग निर्गंध ९ ॥

66

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाचप्रजापतिः अनेन
प्रसविष्यध्वमेषवोस्त्विष्टकामधुक १०

शांकरभाष्य १०

इतश्चाधिकृतेन कर्म्म कर्त्तव्यं सहेति यज्ञसहिताः प्रजास्त्र
योवर्णास्ताः सृष्ट्वोत्पाद्य पुरापूर्वं सर्गादावुवाचोक्तवान्प्रजापतिः प्रजानां
स्रष्टा अनेन यज्ञेन प्रसविष्यध्वं प्रसवोवृद्धिरुत्पत्तिस्तां कुरुध्वमेषवो
यज्ञः युष्माकमस्तु भवतु इष्टकामधुक इष्टानभिप्रेतान्कामान्फल
विशेषान् दोग्धीतीष्टकामधुक १०

आनंदगिरिकृतटीका २

नित्यस्य कर्म्मणोनैमित्तिकसहितस्याधिकृतेन कर्त्तव्यत्वे द्वैतवत्त्वं त्वरपरत्वेना
नन्तरश्लोकमवतारयति इतश्चेति कथंपुनरनेन यज्ञेनवृद्धिरस्माभिः
प्राप्या कर्त्तुमित्याशंक्याह एषइति १०

श्रीधरी टीका ३

प्रजापतिवचनादपिकर्म्मकर्त्तैव श्रेष्ठइत्याह सहयज्ञाइति चर्तुर्भिः। यज्ञेन
सहवर्त्तन्तइतिसहयज्ञायज्ञाधिकृताब्राह्मणाद्याः प्रजाः पुरासर्गादौ सृ
ष्ट्वेदमुवाचब्रह्मा अनेन यज्ञेनप्रसविष्यध्वं प्रसवोवृद्धिः उत्तरोत्तराभिवृ
द्धिं लभध्वमित्यर्थः तत्रहेतुः एषयज्ञोवोयुष्माकमिष्टकामधुक इष्टान्का
मान् दोग्धीतितथा अभीष्टभोगप्रदोऽस्त्वित्यर्थः अत्रच यज्ञग्रहणमाव
श्यककर्म्मोपलक्षणार्थं काम्यकर्म्मप्रशंसा तु प्रकरणेऽसङ्गतापिसामा
न्यतोऽकर्म्मणः कर्म्म श्रेष्ठमित्येतदर्थमित्यदोषः १०

पिशाचभाष्य

इतश्चाधिकृतेनकर्त्तव्यंकर्म सहयज्ञाः यज्ञसहिताः प्रजाः प्राणिनः ब्रा

नान्

गी॰ ह्मणायान्यज्ञाधिकारिणः स्रष्ट्वा पुरा सर्वसर्गादौ उवाच प्रजापतिः प्रजापतिः

टी॰ का॰ स्रष्टेरनंतरं कथमुवाच अनेन यज्ञेनोत्पादं प्रधंयध्वं एष यज्ञः वो युष्माकमस्तु भवतु इष्टकामान् अभिमतान्फलविशेषान्दोग्धीति इष्टकामधुक् १०

रामनुजभाष्य ५

पार्थलक्षणसाधननिष्ठानाय रीरधारणं कर्तव्यमयज्ञशिष्टेन रीरधारणं कुर्वतो दोषमाह यति म्यस्य

67

यज्ञशिष्टेनैव सर्वपुरुषार्थादिस्वतेन निरुपाधिकः प्रजापतिशब्दः स सर्वेश्वरं विश्वस्रष्टारं विश्वात्मानं परायणं नारायणमाह पुरा सर्गकाले स भगवान्प्रजापतिरनादिकालप्रवृत्ताचित्संसर्गविवशा उपसंहृतनामरूपविभागाः स्वस्मिन्प्रलीना सकलपुरुषार्थानर्हाश्चेतनेतरकल्पाः प्रजाः समालोक्य परमकारुणिकः स्वाराधनभूतयज्ञनिर्वृत्तये यज्ञैः सह ताः सृष्ट्वैवमुवाच अनेन यज्ञेन प्रसविष्यध्वमात्मनो वृद्धिं कुरुध्वं एवं वो यज्ञः परमपुरुषार्थलक्षणमोक्षाख्यस्य कामस्य तदनुगुणानां च कामानां पूरयिता भवत्वित्यर्थः १०

भा५ द५

अभिनवगुप्तटीका ६

प्रजापतिः परमात्मा प्रजाः सहैव कर्मभिः ससर्ज उक्तं च तेन प्रजानां कर्मभिः एवं प्रसवः संतानः एतान्येव चेष्टं संसारं मोक्षं वा दास्यंति संगात्संसारं मुक्तसंगत्वान्मोक्षं यत्र येषां मोक्षप्राधान्यं तैरेव विषयाः सेव्या इत्युच्यते १०

परमार्थप्रपा ७

एवमनुष्ठेयरहस्यमुक्त्वाधुना कर्मनिबंधनानां लोकानां ब्रह्मवाक्योक्तां गतिं दर्शयति सहयज्ञा इति पुरा सृष्ट्यादौ प्रजापतिर्ब्रह्मा यज्ञेन सह वर्तंते ताः सहयज्ञास्तदधिकारिणः प्रजाः ब्राह्मणादयः सृष्ट्वा निर्माय इदमुवाच तत्किं भो प्रजाः अनेन यज्ञेन कृत्वा यूयं प्रसविष्यध्वं पुत्रपौत्रादिफलनरोत्तराभिवृद्धिं भजध्वं तत्र हेतुः एष यज्ञो वो युष्माकं इष्टकामधुक् अभीष्टभोगप्रदोऽस्तु १०

वनमाली ८

स्वोचितकर्मकर्तव्यत्वे प्रजापतिवचनं प्रमाणयति सहेति यज्ञेन वर्तमानाः सहयज्ञाः वा उपसर्जनस्येति पदेन स देशाभावः प्रजाः अनर्वणीन्

पुराकल्पादौसृष्ट्वोवाचप्रजानांपतिःकिमुवाचतत्राह अनेनयज्ञेन
स्ववर्णाश्रमोचितधर्मेणप्रसविष्यध्वंवर्द्धध्वंतदेवाहएषस्वधर्माख्यो
यज्ञोयुष्माकंइष्टकामधुक्इष्टानभिलषितान्भोगान्दोग्धिप्रापयतीतित
था १० ॥ उत्समवैजयंतीटीका ४

ननुत्वंतुममहितकारीसखाअतःकृष्णासितवचनात्सर्वंमनुचितमपि
कर्मकरिष्यामस्तत्राहममसंदेहः परंत्विदंयज्ञाख्यंकर्मपुराकेभ्यश्चित्पुरु
षेःकस्मैचित्पुरुषायोक्तंभवेदथचेदानीमेवमांवदसीत्याशंकायदादी
नांसर्वेषामपिजगतांपितामहादीनामपिपितामहेनजगत्कर्त्रानारा
यणमूर्तिनासर्वेश्वरेणप्रजापतिनामयैवपुराप्रजाभ्यःप्रोक्तंनकेवल
मिदानीमेवत्वांवदामीत्याहसहयज्ञैरितियज्ञैःपंचयज्ञैःसहप्रलयस
मयेस्वप्रकृतिलीनाःसद्रूपाःप्रकर्षेणजायंतेपरमेश्वरेणस्वप्रकृतितः
प्रकृष्यंतेइतिप्रजाःतेवर्णाःस्रष्टानामरूपादिविभागेनप्रादुर्भावंकृत्वाताः
प्रजाःप्रतिप्रजापतिःपतिंविश्वस्येत्यादिश्रुतिसम्मतात्प्रजापतिशब्दवा
च्यःश्रीविष्णुःपुरुषोत्तमउवाचकथितवान्किमुवाचेत्यतआह अनेनय
ज्ञरूपेणकर्मणाप्रसविष्यध्वंयूयंप्रसूयध्वं अत्रप्रसवशब्दोवृद्धिवाचकः
उत्तरोत्तरंस्वस्ववृद्धिंकुरुध्वमित्यर्थः वोयुष्माकमेषोयज्ञइष्टकामधुक्इष्टा
न्वांछितान्कामान्काम्यानिफलानिदोग्धिप्रपूरयतीतीष्टकामधुक्वांछि
तप्रदःअस्तुभवतुएषपरमपुरुषाराधनरूपोयज्ञःपरमपुरुषार्थलक्षण
रूपस्यमोक्षस्यांतरंगसाधननिदिध्यासनादिरूपाणांकामानांपरिपूरको
स्त्वित्यर्थः १० मधुसूदनी

प्रजापतिवचनादपिअधिकृतेनकर्मकर्तव्यमित्याह सहयज्ञाइत्यादिचतुर्भिः
सहयज्ञेनविहितकर्मकलापेनवर्ततेइतिसहयज्ञाःकर्माधिकृताइति
यावत्तेषामुपसर्जनस्येतिपक्षेसादेशाभावःप्रजाःत्रीन्वर्णान्पुराकल्पा
दौसृष्ट्वोवाचप्रजापतिःस्रष्टाकिमुवाचेत्याह अनेनयज्ञेनस्वाश्रमोचित

गी॰ टी॰ का॰

पत्र ५८

68

धर्मेणप्रसविष्यध्वंप्रसवध्वंप्रसवोवृद्धिः उत्तरोत्तरामभिवृद्धिं लभध्वमित्य
र्थः कथमनेनवृद्धिःस्यादतआह एषयज्ञाख्योधर्मःवोयुष्माकंइष्टका
मधुक् इष्टानभिमतान्काम्यानिफलानिदोग्धिप्रापयतीतितथाऽभी
ष्टभोगप्रदोऽस्त्वित्यर्थः अत्रयद्यपिब्रह्मणावश्यककर्मोपलक्षणार्थ
मकरणेप्रत्यवायस्याग्रेकथनात् काम्यकर्मणांचप्रकृतेप्रस्तावोनास्त्येव

धर्मेणप्रसविष्यध्वंप्रसवध्वंप्रसवोवृद्धिःउत्तरोत्तरामभिवृद्धिंलभध्व
मित्यर्थःकथमनेनवृद्धिःस्यादतआह एषयज्ञाख्योधर्मःवोयुष्माकं
इष्टकामधुक्इष्टानभिमतान्काम्यानिफलानिदोग्धिप्रापयतीतित
थाऽभीष्टभोगप्रदोऽस्त्वित्यर्थः अत्रयद्यपिब्रह्मणावश्यककर्मो
पलक्षणार्थमकरणेप्रत्यवायस्याग्रेकथनात् काम्यकर्मणांचप्रकृते
प्रस्तावोनास्त्येव

माकर्मफलहेतुर्भूरित्यनेननिराकृतत्वात् तथापिनित्य
कर्मणामप्यानुषंगिकफलसंभवादेषवोऽस्त्विष्टकामधुगित्युपपद्यते त
थाचापस्तंबःस्मरति तद्यथाम्रेफलार्थेनिर्मितेछायागंधौअनूत्पद्ये
ते एवंधर्मंचर्यमाणमर्थाअनूत्पद्यंतेनोचेदनूत्पद्यंतेनधर्महानिर्भव
ति फलसद्भावेऽपितदभिसंध्यनभिसंधिभ्यांकाम्यनित्ययोर्विशेषः
अनभिसंहितस्यापिवस्तुस्वभावादुत्पत्तेर्नविशेषः विस्तरेणचाग्रेप्र
तिपादयिष्यते १०

सदानंदी ११

प्रजापतिगिराह्येवंकर्मकर्तव्यमादरात् सृष्ट्वाकर्मकलापेनसहव
र्णत्रयात्मिकाः १ प्रजाःसृष्ट्वासकल्पादावुवाचाधिकृतान्जनान् स्वा
श्रमोचितधर्मेणाभिवृद्धिमुत्तरोत्तरां २ लभध्वंप्रथमेतस्मात्कुरुध्वंयत्न
मादरात् युष्माकमेषयज्ञोऽस्तुसर्वाभीष्टफलप्रदः ३ यद्यप्यावश्यकंक
र्मयज्ञशब्देनलक्ष्यते निंदितत्वान्नचात्रास्तिप्रस्तावःकाम्यकर्मणां ४
तथापिफलसद्भावोनित्यानामपिकर्मणां अनुषंगिकएवोक्तएषवोऽस्त्वि
ष्टकामधुक् ५ १०

एतदेवार्थवादेनद्रढयति सहेतियज्ञैःसहेतिसहयज्ञाः वोपसर्ज
नस्येतिपक्षेसादेशाभावः कर्माधिकृताइतियावत् प्रजास्त्रैवर्णिकाः
अनेनयज्ञेनप्रसविष्यध्वंप्रसवोवृद्धिस्तांलभध्वं एषयज्ञःवःयुष्माकंइष्ट
कामधुक्इष्टार्थप्रदकोस्तु ॥ १० ॥

दोहा ॥

यज्ञ सहित विधि रच प्रजा कह्यो पूर्व हि वैन वृद्धि पावहु याहि
सों यह तुमको दे सरधेन १० ॥

आनन्दीटीका

तदेतद्देवविशेषणेनोलक्षयति प्रसविष्यध्वमेषवोस्त्विष्टकामधुक् १०

रामकंठीटीका

इदानीं कश्चिन्निवृत्तिलक्षणधर्माधिकृतः कश्चित्प्रवृत्तिलक्षणधर्माधिकृत इति द्विविधः शास्त्रोपदेशविषयस्तेन लोकेन कस्यचिद्वृपिकर्मपरित्याग उपपद्यते इतिक्रमेण प्रतिपादयितुं प्रवृत्तिधर्माधिकृतस्यैव तावत् आगमोपन्यासपूर्वकं कर्मपरित्यागनुपपादयितुमाह+

+प्रजाशब्देनात्र कर्मप्रभिजन्मानः परज्ञानरहिताः स्वर्गादिभोगार्थिनो मनुष्या एव गृह्यन्ते तेषामेव प्रक्रान्तप्रजापत्युपदेशविषयत्वोपपत्तेः तेन प्रजापतिः परमेश्वरेच्छाकल्पितस्वर्गलक्षणाकर्माधिकारी देवताविशेषः यथोक्तः प्रजाः सहयज्ञा यज्ञेन तानादेवतायजनात्मकेन विधिविशेषेण सह सार्धं सृष्ट्वा निर्मायोवाचोपदिदेश। किमुवाचेत्याह १०

अ। अनेन सहजन्मना यज्ञेन क्रियमाणेन यूयं प्रसविष्यध्वं प्रसवं सन्तानमवाप्स्यथ वृद्धिं गमिष्यथेत्यर्थः प्रसविष्यध्वमिति प्रयोगश्छान्दसोऽन्यत्रापि एवंद्र एष व उष्माकमनुष्ठीयमानः सन्निष्टकामधुगभवतु क्रियाफलत्वेनाभिमतान्कामान्स्वर्गादिभोगान्दुग्धान्ददयतु+१०॥

वसुगमीटीका

एवं निवृत्तिधर्माधिकृतस्य प्रवृत्त्यापि कर्म कर्तव्यं प्रवृत्तिधर्माधिकृतस्यापि ज्ञस्यागमोपन्यासपूर्वं कर्मानुष्ठेयतामाह सहेति यतः प्रतिबलाश्रमभावशक्यकं कर्म तेन सवर्तनेऽरति सहयज्ञाः प्रजावासनायाः सृष्ट्वा पुरा सर्गादौ प्रजापतिर्वेदस्मुवाच अनेनावश्यककर्मणा प्रसविष्यध्वम् प्रसवो वृद्धिरुत्तरोत्तराभिवृद्धिं लभध्वमित्यर्थः प्रसविष्यध्वमिति प्रयोगश्छान्दसः एष यज्ञो वो युष्माकमिष्टकामधुक् अभीष्टभोगप्रदोस्तु १०॥

पंचोलीटीका

प्रजापतिवचनादपि कर्मकरणमेव श्रेय इत्याह

सहयज्ञाइति चतुर्भिः श्लोकैः प्रजापतिः पुरा सर्गादौ सहयज्ञाः यज्ञैः सहिताः प्रजाः ब्राह्मणक्षत्रियविशः त्रीन्वर्णान्सृष्ट्वा उवाच अनेन यज्ञेन हे प्रजाः यूयं प्रसविष्यध्वं वृद्धिं कुरुध्वं एष यज्ञः वः युष्माकं इष्टकामधुक् अभिलषितकामप्रदो भवेत् १०

मधुभाष्य

सहयज्ञाइति १०॥

अथ कर्मणां कर्तव्यतायां परमेश्वराज्ञां दर्शयति सहयज्ञा इ
ति यज्ञाः परमेश्वरप्रीणनप्रयोजनानि यथावर्णाश्रमं तत्र
नुष्ठितानि कर्माणि तैः सह वर्तन्ते यास्तायज्ञाधिकृताः प्र
जास्त्रीन्वर्णान्सृष्ट्वा उत्पाद्य प्रजापतिः परमेश्वर इदमुवाच॥
किमुवाचेत्यपेक्षायामाह हे यज्ञाधिकृताः प्रजाः यूयमने
नेश्वरप्रीणनार्थेन यथावर्णं चोदितेन धर्मेण प्रसविष्य
ध्वं प्रसूयध्वमुत्तरोत्तरामभिवृद्धिं लभध्वं कथमनेन वृद्धिः स्या
दित्यत आह एष यज्ञाख्यो धर्मो वो युष्माकं इष्टकामधुक्
इष्टानभिमतान्कामान्दोग्धीत्यभिमतार्थप्रदो भवतु १०॥

मधुभाष्य

सहयज्ञा इति १०

अन्येनयज्ञार्थादितस्यलोकस्येवसाधनमित्यर्थमाहुः तदुपदिशतीदम
नामाक्रमिथत्वंपशुकर्मकर्तव्यंचार्हियावत्साधनमपवर्गादितिवित्यविज:
यार्थिन्यतुपादिनानदर्शितुंभूपाकृतंवादारिव्यापितिपानितयनि
मित्तकर्मकारणेतुमःमलेच्छाकुपकेतितिकानितिमांनियोजयतिइत्या
ह्नपातालौवैचनाहोनिवफलेच्छाभविष्यतीतिक्रयापिजन्याह यस्त्वा
र्थन्यर्थःफलंयस्यकर्मणोदानहोमजपादेस्तेनोपस्वर्गादिप्रवृत्तेरुपकारो
कः कर्मबंधनोभवतिकर्मदंधनंयेनसेष्टकफलार्थप्रवृत्तिर्भवतिबंधनंयस्मैदंदि
योनवतीत्यर्थः ईश्वरार्पणबुद्ध्याक्रियमाणंतुनास्त्यसहितैवासापशुद्धिंजनय
त्यातंसंगतोदेसमत्वेनाभ्यस्तिबद्धतीतिभावः अतस्तदर्थंतादर्थ्यंयापिकर्म
समाचर मुक्तसंगःसन्फलसंकल्पवीतंसंगविकारहेतुंपरित्यक्तेति ॥ ९ ॥
तस्यवाकोर्थोयदर्थमन्यत्कर्मभवेदितिशंकांनिराकुर्वन्नर्जुनस्यप्रवृत्तिविघ्नलोक
प्रदकाम्यकर्मपरित्यागे तद्व्यतिरिक्तकर्मस्वप्यर्थकर्मप्रवृत्तिसिद्धयेका
म्यकर्मणोतिगर्हितत्वंदर्शयन् ब्रह्मोक्तंयज्ञस्यार्थमाह पुराकल्पादौय
ज्ञेनसहप्रजाःमन्वाद्यावोपसर्जनस्येतिपदेसमासेदेशाभावः सृष्ट्वाप्रजापति
रुवाचेतिसंबंधः यज्ञस्यसृष्टत्वंप्रजापतिरात्मनोवपामुदखिददित्यर्थवादोक्तं
क्लेशात्मकमनुसंधेयं। तथाचमन्वादिप्रजासर्गेप्यात्मानमेवद्वेधापातय
तनःपतिःपत्नीचाभवतामितिश्रुत्युक्तःक्लेशात्मकएवानुसंधेयः प्रजाप
तिरितिसंततिपालनासक्तत्वात्तस्यापिसंसारित्वमाह अतएवब्रह्मविघ्या
सहनलोकाःसृष्टाःकिमर्थाचेत्यतउक्तं अनेनयज्ञेनपुत्रेष्ट्यादिरूपेणप्र
सविष्यध्वमितिपुत्रदत्वमुक्तं एवाभावःव्कादसः एषयज्ञोश्मिनादिरूपः
इष्टानिरमणीयानिकाम्यमानानिपश्वादीनिधनानितेषांदातास्तु अनेनवि
नरत्वमुक्तंइदानींपरलोकत्वंतावदाह १० ॥

+ ब्रह्मवचनोक्तं इति कर्म कर्तव्यमित्याह सह यज्ञा इति चतुर्भिः

अनेनेति

ब्रह्माकी वाक्यसे भी कर्म्म की कर्त्तव्यता ही श्रेष्ठ आवती है सोइ चारि श्लोक से कहते हैं कि यज्ञके साथ सहयज्ञ अर्थात् यज्ञके अधिकारी ब्राह्मण आदि सब प्रजा को सृष्टिके आदिमे उत्पन्न करने के बादि ब्रह्माने यही बात कही थी कि इसी यज्ञके द्वारा तुमारी वृद्धि होय इहां प्रसव शब्दका अर्थ वृद्धि है अर्थात् उत्तर २ वृद्धि होती जाय कारण यह कि यज्ञ तुमारी इष्ट कामना की दाताहे इस जगह यज्ञ शब्द नित्य कर्म्म का उपलक्षण है अर्थात् यज्ञ कहने से नित्य कर्म्म भी सब आवते हैं और इहां काम्य कर्म्म की प्रशंसा करना असङ्गत भी है तोभी स्वाभाविक कोई कर्म्म नकर नेसे काम्य कर्म्म करना ही उत्तम है इसी से कहा कि उस मे कोई दोष नहीं है १०

देवान्भावयतानेन ते देवा भावयन्तु वः परस्परं
भावयन्तः श्रेयः परमवाप्स्यथ ॥११॥

शांकरभाष्यं १

कथं देवानिति देवानिन्द्रादीन् भावयत वर्द्धयतानेन यज्ञेन ते देवाभा
वयन्तु आप्याययन्तु वृष्ट्यादिना वो युष्मानेवं परस्परमन्योन्यं भावयंतः श्रेयः
परमपि मोक्षलक्षणं ज्ञानप्राप्तिं क्रमेणावाप्स्यथ स्वर्गं वा परं श्रेयो वावाप्स्यथ ॥ ११

आनंदगिरिकृतटीका २

कथं पुनरभीष्टफलविशेषहेतुत्वं यज्ञस्य विज्ञायते नहि देवताप्रसादाद्धे
तोः स्वर्गादिरभ्युदयो लभ्यते नापि सम्यग्दर्शनमन्तरेण निःश्रेयसं सेद्धुं पा
रयतीति शंकते कथमिति तत्र श्लोकेनोत्तरमाह देवानिति मुमुक्षुत्वबुभु
क्षुत्वविभागेन श्रेयसि विकल्पः ११

श्रीधरी टीका ३

कथमिष्टकामदोग्धा यज्ञो भवेदित्यत्राह देवानिति अनेन यज्ञेन यूयं देवा
न् भावयत हविर्भागैः संवर्द्धयत ते च देवा वो युष्मान् संवर्द्धयन्तु वृष्ट्यादिनाऽ
न्नोत्पत्तिद्वारेण एवमन्योन्यं संवर्द्धयन्तो देवाश्च यूयं च परस्परं श्रेयोऽभीष्टमर्थं
प्राप्स्यथ ११ पिशाचभाष्य ४

कथमिष्टाकामधुक्यज्ञ इत्यत्राह देवान्भावयतानेनेत्यादि देवानिंद्रादीन्
भावयत वर्धयत अनेन यज्ञेन ते देवा वर्द्धिता युष्मान्भावयंतु परस्परं भावयंतः
श्रेयः परं विज्ञानप्राप्तिक्रमेणावाप्स्यथ ११

रामानुजभाष्य ५

अनेन देवाराधनभूतेन देवान्मच्छरीरभूतान्मदात्मकानाराधयत अहं हि स
र्वयज्ञानां भोक्तेति वक्ष्यते यज्ञेनाराधितास्ते देवा मदात्मकाः स्वाराधिता अपे
क्षितान्नपानाद्यैर्युष्मान्संतर्पयन्तु एवं परस्परं भावयंतः परं श्रेयो मोक्षाख्यम
वाप्स्यथ ११

३

गी॰टी॰का॰

13

अभिनवगुप्ती ६

देवाः क्रीडनशीला इंद्रियवृत्तयः करणेष्वधिदेवतारहस्यशास्त्रप्रसिद्धाः। तानमेन कर्मणा तर्पयत यथासंभवं विषयानर्पयतेत्यर्थः ते स्मात्मसत्प बोधकानात्मन एव स्वरूपमात्रोचितान एव वर्गान्भावयंतु स्वात्मस्थिति योग्यत्वात् एवमनवरतं अर्थानं समाधिसमयपरंपरामिंद्रियतर्पणेन दात्मसद्भावलक्षणे परस्परभावने सति शीघ्रमेव परमं श्रेयः परस्परभेद गेलितवीचीभेदविगलनलक्षणं ब्रह्म प्राप्स्यथ ११ ॥

तां:

यां

परमार्थप्रपा ७

अथ भोगदत्वहेतुमाह देवानिति भो प्रजाः अनेन यज्ञेन देवान्भावयत संवर्धयत अथ संतुष्टास्ते देवाः वः युष्मान् भावयंतु फलदानेन कृत्वा संवर्धयंतु एवं परस्परभावनेन परमुत्कृष्टं श्रेयो भीष्टमर्थं प्राप्स्यथ ११

वनमाली ८

तदेवाह देवानिति अनेन यूयं यजमाना देवानिंद्रादीन् भावयंतः तर्पयंतः ते देवा युष्माभिर्भाविताः संतो युष्मान् भावयंतु वृष्ट्यादिनान्नोत्पत्तिद्वारेण वर्द्धयंतु एवमन्योन्यं संवर्द्धयंतो देवा यूयं च परं श्रेयो भिमतमर्थं देवास्तत्स्थितिं यूयं च स्वर्गादिकं प्राप्स्यथेत्यर्थः ११

कुसुमवैजयंती ९

ननु चेतनस्य दातृत्वादिको धर्मो घटते यज्ञाख्यं कर्म त्वचेतनं भवति तस्य तु कथमिष्टकामधुक्त्वमिति चेत् तत्राह देवानिति अनेन यज्ञरूपेण कर्मणा देवानिंद्रादीन् मदात्मकान् मच्छरीररूपान् मदृष्टयकसिद्धिस्थितिप्रवृत्तिकान् यं मदधीनस्थितिप्रवृत्तिकाः भावयत वयमीश्वरार्चनं कुर्म इति आराधयत ये युष्माभिर्भावितास्ते देवा वो युष्मान् देवाराधकान् भावयंतु युसंतु एवं परस्परमन्योन्यं युष्माभिर्देवा देवैर्यूयं भावयन्तो वर्द्धयन्तः सन्तः परमुत्कृष्टं श्रेयो मोक्षमवाप्स्यथ भगवद्भावलक्षणं मोक्षमवाप्स्यथ यूयं प्राप्स्यथ ११

मधुसूदनी १०

कथमिष्टकामदोग्धृत्वं यज्ञस्येति तदाह ॥ अनेन यज्ञेन यूयं यजमाना दे
वानिंद्रादीन् भावयत हविर्भागैः संवर्धयत तर्पयतेत्यर्थः ते देवा युष्मा
भिर्भाविताः संतो वो युष्मान् भावयंतु वृष्ट्यादिनाऽन्नोत्पत्तिद्वारेण संवर्ध
यंतु एवमन्योन्यं संवर्धयंतो देवाश्च यूयं च परं श्रेयोऽभिमतमर्थं प्राप्स्यथ
देवास्तृप्तिं प्राप्स्यंति यूयं च स्वर्गाख्यं परं श्रेयः प्राप्स्यथेत्यर्थः ॥ ११

सदानंदी ॥ ११

कामदोग्धृत्वमप्याह यज्ञस्य भगवानिति यजमानतया यूयं देवानिंद्रमु
खान्सदा १ तर्पयध्वं हविर्भागैर्यज्ञेनानेन शास्त्रतः युष्माभिस्तर्पिता देवा
युष्मान्वृष्ट्यादिभिर्हितैः २ संवर्द्धयंतु यूयं ते देवाश्चैवं परस्परं संवर्द्धयंतः
संततं प्राप्स्यथाभिमतं फलं ३ प्राप्स्यंति देवतास्तृप्तिं यूयं स्वर्गफलं तथा ४ ॥ ११

नीलकंठी ॥ ११

[illegible] इष्टार्थप्रदत्वमेवाह देवा
निति भावयत तर्पयत अनेन देवताप्रजात्मकेन यज्ञेन वः युष्मान् भाव
यंतु वृष्ट्यादिदानेन परस्परं भावयंतो देवाश्च यूयं च श्रेयः परं प्राप्स्यथ ॥ ११

॥ ॥ ॥ ॥

14

आनन्दीटीका

इष्टकामप्राप्त्युपायमाह देवानित्यादिना अनेन यज्ञेन यूयं यज
माना भावयत यज्ञभागैस्तर्पयत ते देवा वो भावयन्तु इष्टदानेन त
र्पयन्तु ॥११॥

रामकंठीटीका ।

७८ ([illegible]
[illegible]
[illegible]
[illegible]) किमने
न कर्मणेत्यत आह अनेनेति देवानिन्द्रप्रभृतीन् भावयत शास्त्रोपदिष्टेन क
र्मणा तान् विशिष्टेन यज्ञेन [illegible]
[illegible] देवाः सन्तोष्टा भावयन्तु वर्धयन्तु नरका
तिर्यक्त्वादिपतनलक्षणादभावादुत्तारयन्तु वा एवमन्योन्यभावनया
शः सन्तः परं श्रेयोऽपवर्गाभिमतमभ्युदयमवाप्स्यथ ॥

लासिकी [illegible]टीका

कथमिष्टदोग्धृत्वं यज्ञस्येत्यत आह देवानिति अनेन सहयज्ञेन यज्ञेन
देवान् यूयं भावयत हविर्भागैः संवर्धयत ते च देवा वो युष्मान् भाव
यन्तु अभीष्टदानेन वर्धयन्तु एवमन्योन्यं संवर्धयन्तो देवाश्च यूयं च
परं श्रेयोऽभिमतमर्थमवाप्स्यथ [illegible] प्राप्स्यथ देवास्तर्पिताः सन्तः स्वर्गा
दिपरं श्रेयो दास्यन्तीति ॥

पंचोलीटीका

कथं इष्टकामदोग्धा यज्ञो भवेदित्यत आह देवानिति हे प्रजाः यूयं अनेन
यज्ञेन देवान् भावयत वर्धयत ते देवा यज्ञभाविताः सन्तः वः युष्मान्
वृष्टिद्वारेणान्नोत्पत्तिं भावयन्तु परस्परं भावयन्तः वर्धयन्तः परं श्रेयः
मोक्षं स्वर्गं वा अवाप्स्यथ ॥

75

कथमिष्टफलदायित्वं कर्मणामित्यतआह देवानिति दे
प्रजाः अनेनयज्ञार्थेनयथावर्णाश्रमाचारोचितेनधर्मेण दे
वान्भावयतसंवर्धयत तेचदेवायज्ञार्थकर्मणाभाविताः सं
तो वोयुष्मान्भावयंतु इत्थंचपरस्परमन्योन्यंभावयंतोयूयं
परंश्रेयःकल्याणमवाप्स्यथ अत्रवर्णाश्रमीप्रतिपृथक्पृथ
क्फलादनेकेनैवपद्येनप्रतिपादिता तत्रब्राह्मणान्प्रतीत्थंबो
धनायज्ञेनाग्निहोत्रादिनादेवानिंद्रादीन्तर्पयत तेचतस्मायुष्मा
न्भावयंतुवर्धयंतु इत्थंचान्योन्यंभावयंतोयूयंपरंश्रेयःप्राप्स्य
थेति क्षत्रियान्प्रतितुयज्ञेनयुद्धयज्ञेनदेवान्विजिगीषुत्राणोभा
वयतसंभावयत तेचयुष्मान्भावयंतुसंभावयंतु इत्थंचपरस्प
रसंभावनेन प्रवृत्तेयुद्धेपरंश्रेयस्तपस्यायज्ञादिभिरप्यप्राप्यं
कल्याणंप्राप्स्यथ जित्वास्मिंल्लोकेराज्यसुखमनुभूयांतेविश
यामप्राप्तेःसंमुखमरणेनस्वर्गादिभोगंविधायप्रलयेविष्णुलो
कप्राप्स्यथेति तदुक्तं योगयागैर्या तपस्विभिर्यास्तुविशेषलभ्यते
प्रयत्नतःसत्रिभिरिष्यतेचया प्रयांतितामाशुगतिंमनस्विनो
रणाश्वमेधेपशुतामुपागताःइति युद्धयज्ञेनपृथ्वींविजित्याश्वमे
धादिनायज्ञार्थेनकर्मणादेवानिंद्रादीन्तर्पयत तेचसंतर्पिताः
संतो युष्मान्भावयंतुयथाकालेवृष्ट्याद्युत्सर्जनेन संवर्धयंतु
एवमन्योन्यंभावयंतोयूयंपरंश्रेयस्त्वमितिनिरुपद्रवतालक्षणं
मंगलंप्राप्स्यथेति चानुशिष्टिः वैश्यान्प्रतिच अनेनस्ववर्णो
चितेनयज्ञेन कृष्यादिकर्मणा देवान्राज्ञोभावयत स्वांशस
मर्पणेन प्रीणयत तेचदेवाराजानोयुष्मान्भावयंतुचोरादि
भ्योरक्षंतु इत्थंचपरस्परभावनेन परश्रेयोवाप्स्यथेति निर्दे
शः ॥११॥

यज्ञ इष्ट कामना की दाता कैसे होगी सो कहते हैं इसी यज्ञके द्वारा तुम सब देवतावों को घृत आहुति देकर बढ़ावो औरवे देवता सब भी तुमारी वृद्धि करैं अर्थात् जल बरसाय अन्न उपजाय तुमको सन्तुष्ट करैं इसी तरह तुमारा दोनो का परस्पर करके एकसे एक का अभीष्ट अर्थ सिद्ध होय ११

दोहा ॥

यज्ञकर हमहूं देवको तुमको द्रवें सो देव इनत ऐसें परस्पर परम श्रेय लहो सेव ११॥

इष्टान भोगान हि वो देवा दास्यन्ते यज्ञभाविताः
तैर्दत्तान प्रदायैभ्यो यो भुंक्ते स्तेन एव सः १२

शांकरभाष्य १ (भोगान्)

किञ्च इष्टान् भोगानिति। इष्टानभिप्रेतान् हि वो युष्मभ्यं देवा दास्यन्ते। वितरिष्यन्ति स्त्रीपशुपुत्रादीन् यज्ञभाविता यज्ञैर्वर्द्धितास्तोषिता इत्यर्थः तैर्देवैर्दत्तान् भोगानप्रदायादत्वा आनृणमकृत्वेत्यर्थः एभ्यो देवेभ्यो यो भुंक्ते स्वदेहेन्द्रियाण्येव तर्पयति स्तेन एव तस्कर एव स देवादिस्वापहारी १२

आनन्दगिरिकृतटीका २

इतश्चाधिकृतेन कर्म कर्तव्यमित्याह किंचेति कथमस्माभिर्भाविताः सन्तो देवा भावयिष्यन्ति अस्मानिति तदाह इष्टानिति यज्ञानुष्ठानेन पूर्वो-क्तरीत्या स्वर्गापवर्गयोर्भावेपि कथं स्त्रीपशुपुत्रादिसिद्धिरित्याशंक्य पूर्वा-र्द्धं व्याकरोति इष्टानभिप्रेतानिति पश्वादिभिश्च यज्ञानुष्ठानद्वारा भोगो नि-र्वर्त्तनीयोऽन्यथा प्रत्यवायप्रसंगादित्युत्तरार्द्धं व्याचष्टे तैरिति आनृणमकृ-त्वेत्ययमर्थः देवानामृषीणां पितृणाञ्च यज्ञेन ब्रह्मचर्येण प्रजया च सन्तोष-मनापाद्य स्वकीयं कार्यकारणसंघातमेव पोष्टुं भुञ्जानस्तस्करो भवतीति १२

श्रीधरी टीका ३

एतदेव स्पष्टीकुर्वन् कर्माकरणे दोषमाह इष्टानिति यज्ञैर्भाविता देवा वृ-ष्ट्यादिद्वारेण वो युष्मभ्यं भोगान् दास्यन्ति हि अतो देवैर्दत्तानन्नादीनेभ्यो देवे-भ्यः पञ्चयज्ञादिभिरदत्वा यो भुंक्ते स तु चोर एव ज्ञेयः १२

पैशाचभाष्यं ४

किंच इष्टान् भोगान् अभिमतान् स्वर्गपुत्रादीन् वः युष्मभ्यं देवा इन्द्रादयः दास्यन्ते यज्ञभाविताः अतस्तैर्देवैर्दत्तान् परिग्रहस्य प्रदाय च तु गुरोर्ब्राह्मणा-दिरूपेणादत्वा यः भुंक्ते स स्तेन एव सः आनृण्यमकृत्वा तैर्दत्तानां भोगादीनां

इष्टानिति

गी॰ मित्यभिप्रायः १२

टी॰ अभिनवगुप्त ६ २ पीछे

नकेवलमिष्टमपवर्गेयावत्सिद्धिलाभेपिअयंमार्गइत्याह ॥ यज्ञतर्पितानिरिं
द्रियाणिस्थितिंवर्धंतियत्रक्वापिध्येयादाताविति अतएवतद्व्यापारेसतितेषांवि
षयणांस्ट्तिसंकल्पध्यानादिनाभावाविषयाइंद्रियैरेवदत्तायदितेषामेवो।
पभोगायनदीयंतेतर्हितेनतत्त्वंचौर्यंस्यात् व्य द्भिचारित्वात् उक्तंहिपूर्व
मेवभगवता मिथ्याचारःसउच्यतेइति अतोयंवाक्यार्थः यःसुरर्वैषायंसिद्धि
मपवर्गंवाप्रेप्सतितेनेंद्रियकौतुकनिर्हरणमात्रफलतयैवभोगायथोपनत
मासेव्याइति १२

१ रामानुजभाष्य ७ १ पेला

यज्ञभाविताःयज्ञेनाराधितामदात्मकादेवाइष्टान्भोगान्वोदास्यंतेपरमपुरु
षार्थलक्षणंमोक्षंसाधयतांइष्टान्भोगांस्तान्पूर्वमेवयज्ञभावितादेवादास्यंते
उत्तरोत्तराराधनायेतितान्सर्वान्वोदास्यंतइत्यर्थः स्वाराधनायैतैर्दत्तान्भोगां
स्तेभ्योनप्रदाययोभुंक्तेचौरएवसःचौर्यंहिनामान्येनस्वप्रयोजनायैवक्लृप्तमेवस्तुनि
तत् स्वकीयताबुद्धिंकृत्वातेनस्वात्मपोषणंअतोस्यनपरमपुरुषार्थानर्हतामात्रम
पितुनिरयगामित्वंचभवतीत्यर्थः १२

परमार्थप्रपा ८

एवंफलनिष्ठंयंनिरूपयन् अकरणेदोषमाह ॥ इष्टानिति यज्ञभाविता
देवाःवोयुष्माकंइष्टान्भोगान्दास्यंति ॥ अथदेवदत्तैर्भोगैःप्रसन्नत्वेनकर्म
त्यागपरान् निंदति तैरिति तैर्देवैर्दत्तान् अन्नादिभोगानेभ्योदेवेभ्यःअप्रदा
यअदत्वायोभुंक्तेसस्तेनश्चोरएवतत्तेयः १२

वनमाली

तदेवाहइष्टानिति इष्टान्भोगान्पश्वन्नहिरण्यादीन्वोयुष्मभ्यंदेवादास्यंते
हियतोयज्ञेर्भाविताःतोषितास्ते यतस्तैःऋणवद्भवद्भ्योदत्ताभोगास्तस्मात्तेभ्यो
देवेभ्योप्रदाययज्ञादौदेवोद्देशेनाहुत्यादिकमदत्त्वायोभुंक्तेदेहेंद्रियाण्येवतर्प
यतिस्तेनएवसःदेवस्वापहारीदेवऋणानपाकरणात् १२

ननु यद्यस्माभिर्दत्तमन्नादिकमस्मभ्यमदत्वा देवा भुंजीरन् तथा दैवैर्दत्तमे
(हितन् ५) भ्यः प्रदायैव वयं भुंजीमहि को वा दोषः स्यादिति चेन्नत्राह इष्टानिति हि यस्
मात् यज्ञभाविता यज्ञैस्तोषितास्तस्माद्देवा द्युतिमंतो निर्मला भ्यंतरवाह्यकर
णत्वेन कपटरहिता वो युष्मभ्यमिष्टानभिलषितानत्र स्वर्गादीन् इहान्न
(वाभोगान् ५) पानादीन् दास्यंते वितरिष्यन्ति अत्र न मम संशयो नास्ति किंतु युष्माकमध्ये
यस्तैर्दैवैर्दत्तान् हस्त्यादिद्वारेण वितीर्णान् भोगानेभ्यो देवेभ्योऽप्रदाय अदत्वा
भुंक्ते स स्तेन एव तस्कर एव भवति इंद्रादिदेवस्वरूपेण मयैव दत्तान् भोगान्
इंद्रादिदेवात्मने मह्यमदत्वा यो भुंक्ते स ममागिशायदंडभागी भवतीत्यर्थः १२

मधुसूदनी टीका १०

(फ ५) न केवलं पारत्रिकमेव फलं यज्ञात् किं त्वैहिकमपीत्याह ॥ इष्टानभिलषि
तान् भोगान् पशु अन्न हिरण्यादीन् वो युष्मभ्यं देवा दास्यंते वितरिष्यंति हि
यस्मात् यज्ञैर्भाविताः तोषितास्ते यस्मात्तैः ऋणवद्भवद्भ्यो दत्तान् भोगांस्त
स्मात्तैर्दैवैर्दत्तान् भोगानेभ्यो देवेभ्यः प्रदाय पंचयज्ञदेवोद्देशेनाहुतीरसंपाद्य
यो भुंक्ते देहेंद्रियाण्येव तर्पयंति स्तेन एव तस्कर एव सः देवस्वापहारी देवऋ
णापाकरणात् १२

सदानंदी टीका ११

न केवलं परत्रैव फलं किं त्वैहिकानपि हिरण्यपशुधान्यादीन्देवा भोगांस्त्ववां
छितान् १ वितरिष्यंति युष्मभ्यं यज्ञैस्तेतोषिता यतः भोगास्तैर्ऋणवद्दत्ता भ
वद्भ्यस्त्वयतो मेरे: २ तस्माद्दैवैः प्रदत्तांस्तान्भोगानेभ्योऽध्वरेषु च असंपाद्याहु
तीर्देवोद्देशेनात्मंभरिस्तु यः ३ देहप्राणेंद्रियाण्येव तर्पयत्येष तस्करः दे
वर्णस्यानपाकृत्या देवस्वापहरोऽधमः ४ १२

नीलकं टी० १२

किं च इष्टान् पुत्रपश्वादीन् वः युष्मभ्यं यभ्यो देवेभ्यस्तद्दत्तानेव व्रीहियवाज्या
दीन् अप्रदाय अदत्वा देवतोद्देशेन द्रव्यत्यागात्मकं यागं नित्यनैमित्तिकरूपं
वैश्वदेवाग्निहोत्रजातेष्ट्यादिरूपं अकृत्वेत्यर्थः अदत्वा यो भुंक्ते स स्तेन एव १२

18

आनन्दीटीका

यो नैष्कर्म्याभिमानी नियतं कर्म संन्यस्यति शरीरयात्रार्थमेव यथा आ
हारादिकमिन्द्रियव्यापारं च करोति स उक्तवक्ष्यमाणप्रकारेण देवैर्दे
यमाहारादत्तमश्नाति किं हविर्यज्ञे भुते भ्यो प्रदाय यो ऽश्नाति स एव तस्मान्निय
तं कर्मावश्यं कार्यमित्यर्थः अनेन शरीरयात्रार्थमत्रापि यत्नमकु
र्वाणस्संन्यासी निषिद्धः इमेतदन्तं प्रजापतिप्रवचनम् अतःपरन्तु
भगवद्वचनमिति गुरवः १२ ॥

रामकंठीटीका

यस्माद्यज्ञेन यागेन भाविताः सन्तो देवा इष्टानभिप्रेतान्कामान्भोगान्
युष्मभ्यं दास्यन्ति प्रतिपादयिष्यन्ति एवं तैर्देवैर्दत्तान्भोगानेभ्यो देवेभ्यो
यज्ञविधिना प्रदायानुपहृत्य यस्तान्कामानश्नाति स स्तेनश्चौर एव दे
वद्रव्यापहारित्वादेव तेन भुज्यते एतदन्तं प्रजापतिवचनम् १२ ॥

लासिकी ~~[illegible]~~टीका

न केवलं पारत्रिकमेव फलं यज्ञात् किन्त्वैहिकमपीत्याह इष्टानि
ति यज्ञभाविता यज्ञेन तोषिता देवा हि यस्मात् इष्टान्भोगानन्नवस्त्र
हिरण्यादीन्वो भवद्भ्यो दास्यन्ते अतस्तैर्देवैर्दत्तान् भोगानेभ्यो देवेभ्य उ
त्तमर्णेभ्यः पञ्चयज्ञादिभिरदत्त्वा ऋणमकृत्वा यो भुङ्क्ते स चौर एव दे
वस्वापहारित्वात् एतदन्तं प्रजापतिवचनम् अतःपरं भगवद्वाक्यं १२

पंचोलीटीका

एतदेव स्पष्टं कर्माकरणे दोषमाह इष्टानिति हि यस्माद्देवा यज्ञ
भाविता यज्ञेन तोषिताः वो युष्मभ्यं इष्टान्वाञ्छितान्भोगान्दास्यन्ति ते
र्दत्तान्भोगान् एभ्यो देवेभ्यो ऽप्रदाय यो भुङ्क्ते सः स्तेन एव स्वापहारी १२

19

किंच इष्टानिति देवा यज्ञेनाग्निहोत्रादिना भाविताः संतर्पिता वो
युष्मभ्यमिष्टान्भोगान् पशुपुत्रहिरण्यादीन् दास्यंते वितरिष्यं
ति तैर्देवैः एवं दत्तान्भोगान् एभ्यो देवेभ्यो प्रदाय आहुतिदा
नमकृत्वेति यावत् यः स्वयमेव भुंक्ते स स्तेन एव चौर एव देव
स्वापहारी देवऋणानपाकरणात्प्रायश्चित्तार्ह इति श्रीस्वरणानु
तिषिष्टिः यज्ञेन युद्धयज्ञेन भाविताः प्रीणिता देवा राजानो वो
युष्मभ्यमिष्टान्भोगान्कांक्षितान्देशाधिकारान्वितरिष्यंति तैश्च
दत्तान् एभ्यो राजभ्यो दत्वा तदधिकारोत्पन्नं वित्तमसमर्प्य यः
स्वयमेव भुंक्ते स चौर एव बंधनार्हः इति यज्ञेनाश्वमेधादि
नातर्पिता देवा युष्मभ्यमिष्टान्भोगान् भेज्यंते इति भोगादेशा
त्तान्दास्यंते यथाकालं हृष्टा युत्सर्गानवदिष्यंति देइ. स्वर्गे
अत्यस्य रूपं तैश्च दत्तान् एभ्यो देवेभ्यः अप्रदाय पुनर्यज्ञमवि
धाय यो भुंक्ते स चौर एवाप्रत्यय इति यावदिति वहत्क्रियाव्याख्याति
निर्देशः यज्ञेन कृष्यादिकर्मणा भाविताः संतोषिता देवा राजा
नो युष्मभ्यमिष्टान्भोगान्पशुपुत्रहिरण्यादीन्दास्यंते रक्षिष्यंति
चौरादिभ्य इति शेषः तैश्च रक्षितानेभ्यो दत्वा यो भुंक्ते स स्तेन एव
दंड्य इति वैष्णवानुमतिभाष्यं एतेन चामरणांतं शिवर्णाश्र
माश्रमस्वं कर्म सम्प्रवर्तितव्यमन्यथा प्रत्यवायदर्शनादिति दर्शि
तं ततश्च न पोनः कृत्यमिति भावः १२॥ १२॥

मधुभाष्य॥

इहलोकदत्त्वमाह इष्टानिति

दत्तेष्वपि देवैर्भोगेभुनस्वाच्छ्रेयं किं तु महान्निबंध इत्याह तैर्दत्तानिति

१२ तैर्दत्तान्भोगान्दधिदुग्धघृततंडुलयवादीनेनेभ्यो दत्त्वा यज्ञेषु देवोद्देशेना

हुतीरसंपाद्येत्यर्थः स्तेन एवेति देवर्णानपाकरणादिति भावः १२ न केव

लमर्थमात्रम एव धर्मः किं तु देवेनं दिनानर्थनिवृत्तयेपीत्याह यज्ञशिष्टाशिन इति

इस को अच्छी तरह विचार करि कहते हैं कि कर्म न करने से
दोष होता है देखो यज्ञसे सन्तुष्ट देवता जलवृष्टि करिके तुम
सबके अर्थ अन्न आदि नाना प्रकार के भोग देयंगे तो जो पञ्चयज्ञ
के द्वारा देवदत्त अन्नादि वस्तु उनको न देकर आपही भोग क
रि लेय सो चोर औ कृतघ्न हैं यह जानो १२ ॥

दोहा ॥

यज्ञ तृप्त देव तुम्ह देवेंगे प्रियभोग ले तिनसों बिन
देय तिन भोगे चोर सो लोग १२ ॥

यज्ञशिष्टाशिनः सन्तो मुच्यंते सर्वकिल्बिषैः
ते भुंजते ते त्वघं पापा ये पचंत्यात्मकारणात् १३

शांकरभाष्यं १

येपुनः देवयज्ञादीन्निर्वर्त्य तच्छिष्टमशनममृताख्यमशितुं शीलं
येषां ते यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः सर्वैः पापैश्चुल्ल्या
दिपञ्चसूनाकृतैः प्रमादकृतहिंसादिजनितैश्चान्यैर्ये त्वात्मम्भरयो भुञ्ज
ते ते त्वघं पापं स्वयमपि पापाः ये पचन्ति पाकं निर्वर्तयन्ति आत्मकारणा
दात्महेतोः १३

आनंदगिरि टीका २

देवादिभ्यः सम्विभागमकृत्वा भुंजानानां प्रत्यवायित्वमुक्त्वा तदन्येषां स
र्वदोषराहित्यं दर्शयति येपुनरिति यज्ञशिष्टाशिनो ये पुनस्ते तादृशाः
सन्तः सर्वकिल्बिषैर्मुच्यन्त इति योजना तैर्दत्तानित्यादिनोक्तं निगमय
ति भुंजत इति देवयज्ञादीनित्यादिशब्देन पितृयज्ञो मनुष्ययज्ञो भूतय
ज्ञो ब्रह्मयज्ञश्चेति चत्वारो यज्ञाः गृह्यन्ते चुल्लीशब्देन पिठरधारणार्थक्रि
यां कुर्वन्तो विन्यासविशेषवन्तस्त्रयो ग्रावाणो विवक्ष्यन्ते आदिशब्देन क
ण्डनी पेषणी मार्जन्युदककुम्भश्चेत्येते हिंसाहेतवो गृहीतास्तान्येतानि
पञ्च प्राणिनां प्रसूना स्थानानि हिंसाकारणानि तत्प्रयुक्तैः सर्वैरपि बुद्धि
पूर्वकैर्दुरितैर्मुच्यन्त इति सम्बन्धः प्रमादो विचारव्यतिरेकेणाबुद्धिपूर्व
कमुपनतं पादपातादि कार्यं तेन प्राणिनां हिंसा सम्भाव्यते आदिशब्दे
नाशुचिसंस्पर्शादिगृहीतं तदुत्थैश्च पापैर्महायज्ञकारिणो मुच्यन्ते उ
क्तं हि कण्डनं पेषणं चुल्ली उदकुम्भश्च मार्जनं । पंच सूना गृहस्थस्य पंच
यज्ञात्प्रणश्यतीति पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः कण्ड
नी चैवकुम्भश्च वध्यते यास्तु वाहयन्निति च अस्यायमर्थः पापयोक्ताः प

५ तेनप्राणिनोबुद्धिपूर्वकंचवधस्तो
तत्प्रयुक्तंसर्वमपिपापंमहायज्ञानुष्ठा
नात्प्रणश्यतीति

ञ्चसंख्याकागृहस्थस्यसूनाख्यायोवाहृयत्नापादयन् वर्त्ततेसमहायज्ञानु
ष्ठानलक्षणंपर्थ्य तदनुष्ठानविमुखान्निन्दतियेत्विति आत्मंभरित्वमेवस्फो
रयन्तियेपचन्तीति स्वदेहेन्द्रियपोषणार्थमेवपाकंकुर्वतांदेवयज्ञादिप
राङ्मुखानांपापभूयस्त्वंदर्शयतिभुंजतइति पाठक्रमस्त्वर्थक्रमादपवाध
नीयः १३

श्रीधरी टीका ३

इतश्चयजनएवश्रेष्ठानेतरइत्याहयज्ञशिष्टाशिनइति वैश्वदेवादियज्ञा
वशिष्टंयेऽश्नन्ति ते पंचसूनादिकृतैःसर्वैःकिल्बिषैर्मुच्यन्तेपंचसूनाश्चस्मृ
तावुक्ताःकण्डनीपेषणीचुल्लीउदकुम्भीचमार्ज्जनी पञ्चसूनागृहस्थस्यता
भिःस्वर्गंनगच्छतियेत्वात्मनोभोजनार्थमेवपचंतिनतुवैश्वदेवाद्यर्थंतेपा
पादुराचाराअघमेवभुंजते १३

पिशार्चभाष्य ४

यज्ञाःपंचमहायज्ञादेवयज्ञःपितृयज्ञोभूतयज्ञोमनुष्ययज्ञोब्रह्मयज्ञ
इतिएतेपंचमहायज्ञाःतेषांशिष्टंयज्ञशिष्टंदेवयज्ञादीन्निर्वर्त्यतच्छिष्ट
मशनममृताख्यमशितुंशीलंयेषांतेयज्ञशिष्टाशिनःसर्वकिल्बिषैःसर्वपा
पैर्मुच्यंतेशिष्टाशिनः चुल्लीपेषण्युपस्कारीकंडिनीकुंभलक्षणा चुल्या
दिपंचसूनाकृतैःप्रमादकृतहिंसाजनितैश्चकिल्बिषैर्मुच्यते येत्वात्मका
रणात्पचंतितेतुपापाःपापस्वरूपाःअघंपापमेवभुंजतेतस्मादवश्यंपंच
महायज्ञाःकर्त्तव्याः १३

रामानुजभाष्य ५

तदेवविवृणोतिइंद्राद्यात्मनावस्थितपरमपुरुषाराधनार्थतयैवद्रव्याण्युत्पा
द्यविपच्यंते तथावस्थितपरमपुरुषमाराध्यतच्छिष्टाशनेनयेशरीरयात्रां
कुर्वतेते त्वनादिकालोपचितकिल्बिषैरात्मयाथात्म्यावलोकनविरोधि
भिःसर्वैर्विमुच्यंतेयेतुपरमपुरुषेणेंद्राद्यात्मनास्वाराधनायदत्तानात्मा
र्थतयोपादायविपचंतितेपापात्मानोघमेवभुंजते अघपरिणामित्वा
दघमित्युच्यतेआत्मावलोकनविमुखानरकायैवपच्यंते १३

अभिनवगुप्ती ९

अवश्यकर्त्तव्यतानुग्रहशासनमहिमायातान्भोगान्ये भुंजते अवांतरव्यापारमा·
त्रतयातएवचष्टघकफलत्वाभावांगतया अधचेंद्रियात्मकदेवगणलक्षण
यज्ञादवशिष्टंमंत्रःसारस्वात्मस्थित्यानंदलक्षणविद्य संयेश्नंतितत्रानुष्ठाभ·
वंति नमुयाथेयोयायनयात्तविषयभोगंवाछंतितेसर्वकिल्बिषैःशुभाशुभै
र्मुच्यंते येत्वात्मकारणादित्यविद्यावशात्स्थूलमेवविषयभोगं परत्वेनमन्वा·
नाश्चात्मार्थमिदंवयंकुर्मइतिकुर्वते तएवाद्यंशुभाशुभात्मकंफलभंजते १३

परमार्थप्रपा ८

अथसाधुंस्तौति यज्ञशिष्टाशिनइति १३ वैश्वदेवादियज्ञावशिष्टं येऽश्नंति
अतएवसंतःसाधवस्तेपिदैनंदिनैःपंचसूनादिसर्वकिल्बिषैर्मुच्यंतेअथयेपा
पाःपातकिनःपुरुषाआत्मकारणात्केवलंपिंडपोषणार्थंपचंतितेअघमेव
भुंजतेनाकस्मात्खीयस्मृतिरपि मोघमन्नंविंदतेअप्रचेताःसत्यंब्रवीमिवधइ
त्सतस्य नार्यमणंपुष्यतिनोसखायंकेवलाघोभवतिकेवलादीभाष्यं नप्रकृ
ष्टंचेतोयस्यासावप्रचेताःमूर्खाः मोघंनिष्फलमन्नंविंदतेसंपादयतिसतस्य
वधइत्यवधएवआत्मघातकएवेत्यर्थः सकःयदिवावैश्वदेवेनअर्यमणंसूर्यं
नपुष्यतिनसंतर्पयतिसखायंचसखायमुपकारकमग्निंनसंतर्पयतिएवंयः
केवलंअत्तीतिकेवलादीपिंडपोषणार्थमेवभक्षयतिसकेवलाघोभवतिपा
पमेवमत्तयतीतिसत्यंब्रवीमितेवैश्वदेवाद्यर्थवादमित्यर्थः प्राणपर्यंति न
सपापान्नोव्यावर्ततइति १३

पाकंकुर्वंति

ति

वनमाली ५

श्रीविष्णवेनैवेद्यशेषेणयज्ञेवैश्वदेवादौचविष्णुदेशेनहव्यं दत्त्वा देवपित्रा
दीन्विप्रादींश्चसंतर्प्य शिष्टाशिनःसंसारबीजैःसर्वकिल्बिषैःपंचसूनादि
पापैश्चमुच्यंतेकंडनीपेषणीचुल्लीउदकुंभीचमार्जनी पंचसूनागृहस्थस्य
तेभ्यःस्वर्गंनविंदतीतिस्मृतेः येत्वात्मनोभोजनार्थमेवपचंतिनतुविष्णवे·

स्तवएजार्थं ते पापा दुराचारा अयं तन्निमित्तमेव भुंजते १३

कुसुमवैजयन्ती ४

ये देवदत्तान्नादीन् यज्ञकाले भ्यो दत्वा भुंजते ते मुच्यन्ते ये तु नरा आत्महेतोः पचन्ति
ते पापमेव भुञ्जत इत्याह यज्ञशिष्टाशिन इति ये यज्ञशिष्टाशिनः यज्ञस्य शिष्टं
परिशेषमन्नादिकमशितुमत्तुं शीलं येषां ते तथा यज्ञावशेषभोगिनः अन्ना
दिकं संपाद्य परिपक्वं कृत्वा ईश्वरायात्मानं सर्वेश्वरं विलंमां समर्प्य तदवशेषस्य
भोक्तार इत्यर्थः संतो भगवद्भक्ताः सर्वकिल्बिषैरनादिकालप्रवृत्तैः संचितक्रिय
माणप्रारब्धरूपैरात्मानुभवप्रतिबंधकैर्भवहेतुभूतैः पञ्चसूनादिरूपैर्निखिलैः
पापैर्मुच्यंते मुक्ता भवंति ये तु आत्मकारणात् ममातिकष्टेन संपादितं मम व
लवैकर्षेण भाग्ययोगादिदं प्राप्तमन्नं देवतातिथ्यादीनां किमर्थं तत्तुल्यं पाय सदास्यः
सादिरूपकमन्नादिकं परिपच्याहमेव भोक्ष्यामीत्येवमादिना स्वस्वभावेना
त्र भवप्रतिबंधकेनेहामुत्र स्वरूपेणाव्यवसायेनात्मनो देहस्य कारणात् नि
मित्तात्स्वस्यैवोदरभरणनिमित्तात् पचंति पापसाध्यं स्वतमन्नं परिपक्वं कुर्वंति
ते पापा देवादिभ्योऽन्नानर्पणेन पापा अथवा पापभूता महिम्नुत्वामदभक्ताज
ना अघं पापं भुञ्जते भक्षंति किं तु स्वदेवानिवेदितान्नादिभक्षणेन पापमुत्पाद्य ते
ऽतः पापं पापरूपं परन्तु भगवदनिवेदितान्नपानादिकं विष्ठामूत्रतुल्यं भवति
तदस्य विष्ठाहारादिविने नरेन रादयो न भवंतीत्यर्थः १३

मधुसूदनी १

येतु वैश्वदेवादियज्ञावशिष्टममृतं तंये ऽश्नंति ते संतः शिष्टा वेदोक्तकारि
त्वेन देवाद्यृणापाकरणात् अतस्ते मुच्यंते सर्वैर्विहिताकरणनिमित्तैः पूर्व
कृतैश्च पंचसूनानिमित्तैः किल्बिषैः भूतभाविपातकाऽसंसर्गिणस्ते भवंती धि
त्यर्थः एवमन्वये भूतभाविपापाभावमुक्त्वा व्यतिरेके दोषमाह भुंजते ते
वैश्वदेवाद्यकारिणः त्वघं पापमेव तु शब्दोऽवधारणे ये पापाः पंचसूनानि
मित्तं प्रमादकृतहिंसानिमित्तं च कृतपापाः संतः आत्मकारणादेव पचंति
नतु वैश्वदेवाद्यर्थं तथा च पंचसूनादिकृतपापे विद्यमान एव वैश्वदेवा
दिनित्यकर्मा करणनिमित्तमपरं पापमाप्नुवंतीति भुंजते ते त्वघं पापा इ

त्युक्तं तथा च स्मृतिः खंडनी पेषणी चुल्ली उदकुंभी च मार्जनी पंचसूना गृ-
हस्थस्य ताभिः स्वर्गं न विंदतीति पंचसूनाकृतं पापं पंचयज्ञैर्व्यपोहतीति पं॰
स्मृतिर्वा श्रुतिश्च इदमेवास्य तत्साधारणमन्नं यदिदमद्यते स य एतदुपा-
स्ते न स पाप्मनो व्यावर्त्तते मिश्रं ह्येतदिति मंत्रवर्णोपि मोघमन्नं विंदते ऽप्रचे-
ताः सत्यं ब्रवीमि वध इत्स तस्य नार्यमणं पुष्यति नो सखायं केवलाघो भवति के-
वलादीति इदं चोपलक्षणं पंचमहायज्ञानां स्मार्त्तानां श्रौतानां च नित्यकर्म-
णां अधिकृतेन नित्यानि कर्माण्यवश्यमनुष्ठेयानीति प्रजापतिवचनार्थः ५

सदानंदी ११

वैश्वदेवादियज्ञानामवशिष्टं सदामृतं येऽन्नं निशिष्टा वेदोक्तकारित्वेनैव ते-
त्तमाः १ पंचसूनानिमित्तैश्च प्रमादकृतैः किल्बिषैरपि नित्याकरणजैस्ते तो
मुच्यंते सर्वकिल्बिषैः २ संत्यसंसर्गिणस्तैर्भूतैरागामिभिर्मलैः ये त्वनेव मै॰
मकुर्वंति तान्प्रत्याहानिदूषणं ३ भुंजते पापमेवाघं वैश्वदेवाद्यकारिणः पं-
चसूनानिमित्तं च प्रमादादिनिबंधनं ४ पापं कृत्वा पचंत्यात्मकारणादेव ये ध-
माः प्राचीने सत्यहे चान्यन्मयांत्यकरणाकृतोः ५ अतो ह्यघं भुंजते पापास्तथोक्तं
स्मृतिकर्तृभिः खंडिनी पेषणी चुल्ली उदकुंभी प्रमार्जिनी ६ पंचसूना गृह-
स्थस्य ताभिः स्वर्गं न विंदति पंचसूनाकृतं पापं पंचयज्ञैर्व्यपोहति ७ ब्रह्म- पं॰
देवमनुष्याणां पितृणां भूतसंज्ञिनां यज्ञाः संति जपो होमो दानं वै तर्पणं बलिः ८
अनुष्ठेयानि कर्माणि कर्मण्यधिकृतैर्जनैः प्रजापतिगिरामर्थः समासोयं प्रय।
यातयं ४ १३ नीलकंठी १२

येत्वयज्ञशिष्टाशिनः संतः पापमेव भुंजते तथा च स्मृतिः कंडनी पेषणी चु-
ल्ली उदकुंभी च मार्जनी पंचसूना गृहस्थस्य ताभिः स्वर्गं न विंदतीति पंचसू-
नाकृतं पापं पंचयज्ञैर्व्यपोहतीति च श्रुतिश्च इदमेवास्य तत्साधारणमन्नं य-
दिदमद्यते स य एतदुपास्ते न स पाप्मनो व्यावर्त्तते मिश्रं ह्येतदिति मंत्रवर्णोपि
मोघमन्नं विंदते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य नार्यमणं पुष्यति नो स-
खायं केवलाघो भवति केवलादीति १३

वैश्वदेवादिपू
र्वान्नभोजनश्री
लाः सन्तः त्रएण
कस्मात् तेमुच्य
ते सर्वकिल्बिषैः
प्रमादकृतैः विहि
ताकरणनिमित्तैः
त्वात्मकारणात्वा
मेव पचन्ति त
च महायज्ञार्थं
पापाः स्वयं पा
द्रूपापर

आनन्दीटीका

सष्टमिदं पूर्वेंगतार्थम् १३॥

रामकंठीटीका

इमं प्रजापतिनियममनतिक्रमन्तो ये पञ्चमहायज्ञादनुष्ठितान् हविः
विवसेतमन्नमश्नन्तो भुंजानाः सर्वैः समस्तैर्निमादियज्ञानन्
ष्ठानसम्भवैः किल्बिषैः पापैर्मुच्यन्ते मुच्यन्ते ततस्तेनाभवन्तीत्यर्थः
ये पुनः पापाः पातकिनो वृं पापमेव भुंजन्ते ये आत्मकारणात्स्वहेतो
र्न तु देवाद्यर्थं पचन्ति पाकं साधयन्ति ते स्वकशास्त्रीय क्रियाः सन्तो
निरयमेव प्राप्नुवन्तीत्यर्थः (इत्यादि [illegible] भुंजते
[illegible] प्रवृत्तमननिक्रमणीयमेवेतिकृत्वाह) १३॥

लासिकी [illegible]टीका

अतो यज्ञस्य श्रेष्ठत्वेन तदेवमाह यज्ञशिष्टाशिन इति ये सन्तः शि
ष्टा वैश्वदेवादियज्ञादवशिष्टममृतनूपमन्नमश्नन्ति ते पञ्चसूनाभि
तैरवेश्वविहिताकरणादिभिः प्रवृत्तैः सर्वैः पापैर्मुच्यन्ते पंचसू
नाः स्मृतावुक्ताः खण्डनी पेषणी चुल्ली उदकुम्भी प्रमार्जनी पंच
सूना गृहस्थस्य ताभिः स्वर्गं न विन्दति इति पंचसूनाकृतपापैः
वयज्ञैर्व्यपोहतीति व्यतिरेके दोषमाह तरवयारणे ये आत्मनो
भोजनार्थमेव पचन्ति न तु पञ्चयज्ञाद्यर्थम् ते पंचसूनोद्भवाप्रा
यत्यापापव वैश्वदेवाद्यकरणात्पापमेव भुंजते १३॥

पंचोलीटीका

इतश्च यज्ञं तपवश्रेष्ठानेतरञ्चमाह यज्ञशिष्टाशिनः देवयज्ञादीन्नि
र्वर्त्यान्तः शेषभोजिनः सन्तः साधवः सर्वकिल्बिषैः मुच्यन्ते न तु पुनः
ये पापा आत्मकारणात् पचन्ति ते अघं भुंजते १३।

[illegible]॥

अथैस्वराज्ञापालनतत्प्रत्याख्यानयोः फलमाह यज्ञशिष्टा
शिनइति यज्ञायथावत्प्रियुक्तलक्षणास्तान्विधाय यच्छिष्ट
मवशिष्टमाहुतिशेषादिकमश्नंतःसर्वैःप्राग्भवीयैर्वर्तमान
जन्मार्जितैश्चकिल्बिषैर्मुच्यते येचात्मार्थमेवभोगदातॄन्देव
ताराजाडीनसंतर्प्यस्वयमेवतानुपभुंजते तेपापाः पापक
र्माणोघंपापमेवभुंजते पापफलभूतामधोगतिं व्रजंतीति
भावः १३॥

मधुभाष्य॥

१३॥

सर्वकिल्बिषैः स्नापंचकजनितैः पापैरित्यर्थः किंबहुनाभोजनमपिकाम
कामानांनस्वं किंत्वंतसंकटमित्याह। भुंजतइति मोचमत्नंविंदतइतिस्रु
तेरितिभावः आत्मकरणात्तुदेवातिथिस्तुहृदादिहेतोरितिभावः आत्म
करणादित्यंतः प्रजापत्यनुवादः इदानींप्रजापतिनाक्षादितएवप्रजानामेवं
शिष्टित्वात् वेदबोधितेष्वसस्वपिनिष्कामेषुकर्मसुलोकः सर्वंवेदंकाम्य
परमेवमन्यतइतिभगवानर्जुनंप्रत्याह अत्रा [illegible] वन्तीति

इस हेतु से यज्ञ करने वाले मनुष्य श्रेष्ठ हैं और जो देव अतिथि अग्नि गो ग्रासवलि वैश्वदेव ये पंचयज्ञ नहीं करते केवल अपने वास्ते पाक कर के खाते हैं वेई लोभी पापाचारी हैं सोई कहते हैं कि जो देवादि कों को देकर आप भोजन करते उनको पञ्चसूना का पाप नहीं लगता है सूना कहे हत्या के स्थान गृहस्थों के घरमे रोज रोज हत्या होने की पांच जगह हैं घर भारते चुल्हे मे आग वारते जलके पात्रसे उखलमे कूटते चक्की पीसते अनेक जीवहिंसा होतीहै सो पाप पञ्चयज्ञ नक रने वाले को लगते हैं और वे स्वर्गवास नहीं पावते १३

दोहा॥

जो भोगें यज्ञशेष को सभे पाप नशजाय पापीभोगहिं पाप सो आपहिं को जु पकाय १३

81

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः य-
ज्ञाद्भवति पर्जन्यो यज्ञः कर्म्मसमुद्भवः १४

शांकरभाष्य १

इतश्चाधिकृतेन कर्म्म कर्त्तव्यं जगच्चक्रप्रवृत्तिहेतुर्हि कर्म्म कथमित्युच्यते
अन्नाद्भवन्तीति अन्नाद्भुक्ताल्लोहितरेतःपरिणतात् प्रत्यक्षं भवन्ति जायन्ते भू-
तानि पर्ज्जन्याद्वृष्टेरन्नस्य सम्भवः अन्नसम्भवः यज्ञाद्भवति पर्जन्यः अग्नौ प्रास्ता-
हुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति य-
ज्ञोऽपूर्वं स च यज्ञः कर्म्मसमुद्भवः ऋत्विग्यजमानयोश्च व्यापारः कर्म्म तत् समु-
द्भवो यस्य यज्ञस्यापूर्वस्य स यज्ञः कर्म्मसमुद्भवः १४

आनंदगिरिकृतटीका २

देवयज्ञादिकं कर्म्माधिकृतेन कर्त्तव्यमित्यत्र हेत्वन्तरमितःशब्दोपात्तमेव दर्शय-
ति जगदिति ननु भुक्तमन्नं रेतोलोहितपरिणतिक्रमेण प्रजारूपेण जायते तथा-
^त न्नं वृष्टिसम्भवं प्रत्यक्षदृष्टं तत् कथं कर्म्मणो जगच्चक्रप्रवर्त्तकत्वमिति शङ्कते क-
थमिति पारम्पर्येण कर्म्मणस्तद्धेतुत्वं साधयति उच्यत इति उक्तेऽर्थे स्मृत्यन्तरं
संवादयति अग्नाविति तत्र हि देवताभिध्यानपूर्वकं तदुद्देशेन प्रहिताहुतिर-
पूर्वतां गता रश्मिद्वारेणादित्यमारुह्य वृष्ट्यात्मना पृथिवीं प्राप्य व्रीहियवाद्यात्मना संसृ- ^न्नभावमापाद्य
तो भूत्वा शुक्रशोणितरूपेण परिणता प्रजाभावं प्राप्नोतीत्यर्थः यज्ञः कर्म्मसमु-
द्भव इत्ययुक्तं तस्यैव तदुद्भवे कारणत्वायोगादित्याशंक्याह ऋत्विगिति द्वयादेव
नयोः संग्राहकश्चकारः १४

श्रीधरटीका ३

जगच्चक्रप्रवृत्तिहेतुत्वादपि कर्म्म कर्त्तव्यमित्याह अन्नादिति त्रिभिः अन्नाच्छु-
क्रशोणितरूपेण परिणताद्भूतान्युत्पद्यन्ते अन्नस्य च सम्भवः पर्ज्जन्याद्वृष्टेः स च
पर्ज्जन्यो यज्ञाद्भवति स च यज्ञः कर्म्मसमुद्भवः कर्म्मणा यजमानादिव्यापारेण स-
म्यक् संपाद्यत इत्यर्थः अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जा-
यते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति स्मृतेः १४

गी·टी· अन्नाद्भवंतिजायंतेभूतानिकार्यकरणसंघातात्मकानि पर्जन्यात्वृष्टेरन्नसंभवः
यज्ञाद्भवतिपर्जन्यः अग्नौप्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते।
वृष्टिर्वृष्टेरन्नंततः प्रजाइतिस्मृतेः यज्ञाद्यागक्रियासमुद्भवाद्यज्ञाद्भवतिपर्जन्यः
यज्ञः कर्मसमुद्भवोयागक्रियासमुद्भवोधर्मः कर्मसमुद्भवः कर्मऋत्विग्यजमा
नव्यापारात्मकोयागः समुद्भवः कारणंयस्यअसौकर्मसमुद्भवः यागक्रिया
समुद्भवइत्यर्थः १४

रामानुजभाष्य २

पुनरपिलोकदृष्ट्याचसर्वस्ययज्ञमूलत्वं दर्शयित्वायज्ञानुवर्तनस्यावश्यकार्य
तामननुवर्तनेचदोषमाह अन्ना अन्नादिति अन्नात्सर्वाणिभूतानिभवंति
पर्जन्यादन्नसंभवइतिसर्वलोकसाक्षिक यज्ञात्पर्जन्योभवतीतिशास्त्रेणावा
गम्यते अग्नौप्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेर
न्नंततःप्रजेत्यादिना यज्ञश्चद्रव्यार्जनादिकर्तृपुरुषव्यापाररूपकर्मसमुद्भवः १५

अभिनवगुप्त ६

अन्नादविभागभोग्यस्वभावात्कथंचिन्मायावि[illegible]द्यामकृतिकालाद्यनेकापर
पर्यायाद्भूतानिविविधानिभवंतितच्चान्नंपर्जन्याद्विच्छिन्नसंवित्स्वभावादात्म
नः भोक्तृतंत्रात्मलाभत्वाद्भोग्यतायाः सचपर्जन्योभोक्तायज्ञाद्भोगक्रियायज्ञ
स्याद्भोक्तृत्वस्य भोगक्रियाचकर्मणः क्रियाशक्तिस्वातंत्र्यवलात् तच्चस्वातंत्र्य
मविच्छिन्नमप्यनवच्छिन्नानंतसातंत्र्यपूर्णसमुच्छलन्महेश्वरभावपरमात्म
ब्रह्मसंस्पर्शावष्टंभात् तच्चउच्छलदच्छानाच्छादितैश्वर्यंब्रह्मअक्षरात्प्रशां
ताशेषेश्वर्यतरंगात्संविन्मात्रात् इत्येवंमध्यस्थितोयंयज्ञः षट्चक्रंवाह
यन् तत्त्वरात्रयसंधानादपवर्गं अपरात्रयतंत्रणाच्चव्यवहारमातन्वयतीतिवि
द्याविद्योल्लासतरंगस्वभंगब्रह्मयज्ञएवप्रतिष्ठितम् अन्येतुअन्नंतावद्वीर्यलो
हितक्रमेणभूतकारणं अन्नंचवृष्टिद्वारेणपर्जन्यात् सोप्यग्नौप्रास्ताहुतिस
म्यगित्यादि[illegible] ततोवृष्टिर्यज्ञात् यज्ञःक्रियातः

परमार्थप्रपा ७

अथविश्वोपकारार्थमपिकर्मकर्तव्यमित्याह अन्नादिति अन्नादेतोरूपेणपरि
णताभूतानिभवंतिअन्नंभवतीत्यनेनअन्नादेवजीवंतिवर्धंतइत्यपिद्रष्टव्यं अ

तिरपित्रस्तवल्पां। अन्नाद्येवखल्विमानिभूतानिजायंतेजातान्यन्नेनजीवंती त्यादि अथान्नंकस्मात् पर्जन्यात् सचयज्ञात् पर्जन्योपि[illegible]तः यज्ञश्चकस्मात् सचकर्मसमुद्भवः कर्मयजमानस्यसदर्थव्यापारं [illegible]

[illegible] वेदोपिकल्पादिस्वाह [illegible]

[illegible]

[illegible] २४

वनमाली २

पुनरपिकर्मकर्तव्यतामाह अन्नादितित्रिभिः अन्नाद्भूतानि [illegible] च पर्जन्याद्भवतिवृष्टिद्वारा यज्ञात्परिपक्वहविरादेः पर्जन्यः अग्नौप्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइतिस्मृतेः सयज्ञोदेवतोद्देशेन द्रव्यत्यागरूपकर्त्विग्यजमानादिकर्मणाजायते १४

कुसुमवैजयंती ४

एवंप्रजापतिवचनात्कर्मणः कर्तव्यतामुक्त्वेदानींकर्मणैवजगतश्चक्रंवर्तमानं भवतिनान्यथेत्याह स्वयमेवत्रिभिः अन्नाद्भवंतीति अत्रान्नशब्दस्य [illegible]

[illegible]

[illegible]

[illegible] भ्रान्यधान्यचराणांशारीराणांधान्यमात्राद्[illegible] भवो ... न्यादेर्भूतानिजरायुजाण्डजस्वेदजोद्भिज्जाकाराणिशरीराणि पंचभूतारब्धत्वाद्भूतसंज्ञकानिभवंति उत्पद्यंतेअन्नस्यसंभवोजन्मान्नसंभवः सतुपर्जन्याद्वृष्टेरेतच्चप्रत्यक्षसिद्धमेवसपर्जन्योयज्ञाद्भवतितच्चशास्त्रादवगम्य तेशास्त्रंचमनुनोक्तं अग्नौप्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जा यतेवृष्टिर्वृष्टेरन्नंततःप्रजेतियज्ञश्चकर्मसमुद्भवोद्रव्योपार्जनादिरूपकर्त्विग्य

नकेवलंप्रजापतिवचनादेवकर्मकर्तव्यमपितुजगच्चक्रप्रवृत्तिहेतुत्वादपीत्याह अन्नादितित्रिभिः ।।

जमानादिव्यापारात्मकात्कर्मणःसकाशात्सम्यगुद्भवतीतितथाकर्मणोयज्ञः
सिद्ध्यतीत्यर्थः १४ मधुसूदनी १०

अन्नाद्भुक्ताद्रेतोलोहितरूपेणपरिणताद्भूतानिप्राणिशरीराणिभवंतिजा
यंते अन्नस्यसंभवोजन्मअन्नसंभवःपर्जन्याद्वृष्टेःप्रत्यक्षसिद्धमेवैतत् अत्र
कर्मोपयोगमाह यज्ञात्कारीर्यादेरग्निहोत्रादेश्चापूर्वाख्याद्धर्माद्भवतिपर्जन्यः
यथाचाग्निहोत्राहुतेर्वृष्टिजनकत्वं तथाव्याख्यातमष्टाध्यायीकांडे जनकयाज्ञव
ल्क्यसंवादरूपायांषट्प्रश्न्यांमनुनाचोक्तं अग्नौप्रास्ताहुतिःसम्यगादित्यमु
पतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइति सचयज्ञोधर्माख्यःसूक्ष्मः
कर्मसमुद्भवःऋत्विग्यजमानव्यापारसाध्यःयज्ञस्यहिअपूर्वस्यविहितंकर्मका
रणं १४ ।।

सदानंदी ११

नकेवलंविधेर्वाक्यादेवकर्तव्यमस्तितत् कर्मकिंतुजगच्चक्रप्रवृत्तेःकारणा
दपि १ शुक्रशोणितरूपेणह्यन्नात्परिणतात्किल शरीराणिप्रजायंतेवृष्टे
रन्नस्यजन्मच २ यज्ञाद्धर्मादपूर्वाख्याज्जायतेवृष्टिरर्कतः अग्नौप्रास्ताहुतिःसम्य
ज्जा गादित्यमुपतिष्ठते ३ आदित्यायतेवृष्टिरन्नंततःप्रजाःसूक्ष्मोयज्ञःसुधर्माख्योऽत्र वृष्टे
त्विगादेश्चकर्मणः अपूर्वाख्यस्ययज्ञस्यविहितंकर्मकारणं १४

नीलकंठी १२

जगच्चक्रप्रवृत्तिहेतुत्वादपिकर्मकर्तव्यमित्याह अन्नादिति अन्नाद्रेतोरूपे
णपरिणताद्भूतानिप्राणिशरीराणिभवंति अन्नंचपर्जन्यात् प्रत्यक्षसिद्ध
मेव यज्ञाद्भवतिपर्जन्यःअग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते आदित्याज्जा
यतेवृष्टिर्वृष्टेरन्नंततःप्रजाइतिस्मृतेः यज्ञोदेवताराधनजोधर्मः कर्मभ्योयागहो
मदानादिभ्यः समुद्भवतीतिकर्मसमुद्भवः १४

89

आनन्दटीका

नेदं ज्ञानप्रदायेभ्य इति भावः स्यान्नस्य स्थूलमायज्ञादेरमो साधारमाह
अन्नादन्नीयणाद्व्रीह्यादेः शुक्रादिबीजरूपेण परिणताद्भूतानि चराच
राणि जरायुजाण्डजस्वेदजोद्भिज्जादीनि भवन्ति जायन्ते अन्नस्य हि स
म्भवो मेघात् मेघस्य यज्ञात्सम्भवः यज्ञः कर्मसमुद्भवः कर्मसमुद्भ
वः यजमानक्रियोद्भवः १४ ॥

+यस्मात्सर्वमेतदन्नादि संज्ञात्परस्माद्ब्रह्मणः प्र **रामकंठटीका** वृत्तमनतिक्रमणीयमेवेति क्रममाह +

+ अन्नात्प्राणसन्धारणहेतोरोदनादेरभ्यवहार्याद्भूतानि सर्वप्राणभृ
तो भवन्ति सत्तां लभन्ते प्राणहृति निबध्यन्ते हि भूतानां जीवितमन्न
निबन्धनाव प्राणाहृतिस्तदेवं वि यस्मान्नस्य पर्जन्यात्सम्भवः
सचैवंविधः पर्जन्यो यज्ञात्सोमाकाग्नीन्द्रादिदेवतायजनात्मिकाद्वि
धिविशेषाद्भवति यज्ञैर्हि तर्पिता देवता व्रीह्यादिसम्पत्तये पर्जन्य
ति पर्जन्ये सर्वकाले वर्षाद्विना व्रीहीन्सम्पादयति यथोक्तम् अग्नौ
प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं
ततः प्रजा इति ईदृशश्च यज्ञः कर्मसमुद्भवः कर्मणा विशिष्टेति
कर्तव्यतारूपाद्विधानात्सम्भवो यस्य तथाविधः १४ ॥

लासिकी [illegible]टीका

नकेवलं प्रजापतिवचनादेव कर्म कर्तव्यं किन्तु जगच्चक्रप्रवृत्ति
हेतुत्वादपीत्याह अन्नादिति अन्नाच्छुक्रशोणितरूपेण परिण
ताद्भूतानि प्राणिशरीराण्युत्पद्यन्ते पर्जन्याद्वृष्टेरन्नस्य सम्भवः
यज्ञात्कारीर्यादेरग्निहोत्रादेश्चापूर्वाख्याद्धर्मात्पर्जन्यो भवति यज्ञोऽपू
र्वाख्यः सूक्ष्मो धर्मः कर्मसमुद्भवः विहितयजमानादिव्यापारसाध्यः
यज्ञस्य सूक्ष्मस्य विहितं कर्म कारणं न त्वपूर्वोत्पादकम् तथा च
स्मृतिः अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते
वृष्टिर्वृष्टेरन्नं ततः प्रजा इति [illegible]
[illegible] १४ ॥

पंचोलीटीका

जगच्चक्रप्रवृत्तिहेतुत्वादपि कर्म कर्तव्यमित्याह अन्नाद्भवंतीति
त्रिभिः अन्नाद्भुक्तात् अन्नात् लोहितरेतःपरिणतात् भूतानि जायंते प
र्जन्यात् वृष्टेः अन्नसंभवः अन्नोत्पत्तिः यज्ञात् पर्जन्यो भवति यज्ञः कर्म
लक्षणः कर्मसमुद्भवः ऋत्विग्यजमानयोः व्यापारः हवनादिलक्ष
णं कर्म तत्समुद्भवः १४ ॥

श्रणवीरसमिद्धोधिनी ॥

न केवलमीश्वराज्ञयैव प्रवृत्तिरूपं स्वस्ववर्णोचितं कर्म कर्त
व्यतां गाहते यावज्जगच्चक्रप्रवृत्तिहेतुत्वादपीत्याह अन्नाद्भ
वंतीति द्वाभ्यां अन्नेन तन्नेन रसस्य पूर्वं पूर्वं प्रति कारणत्वं तथा च
कारणस्य ज्ञाने कार्यज्ञानमिति न्यायात् कारणव्याख्यानमेवा
दौ क्रियते वेदस्तत्त्वं तपो ब्रह्मेत्यनुशासनाद् ब्रह्मशब्देन प्रको
तत्वाद् यजुर्वेद उच्यते तथा च ब्रह्म यजुर्वेदः अक्षरादक्षरात्
परमेश्वरात् समुद्भवः प्राकट्यं यस्य तत् परमेश्वरेण ज्ञात्वा
ति यजुर्वेदोक्तं कर्तव्यतया प्रयोज्यतया वा च दृष्टमिति भावः १४

मधुभाष्य ॥

देवं तत्र माह अन्नादिति यत्तः पर्जन्यान्न वा तत्कारणत
मुच्यते सर्वयज्ञविवक्षायां च तस्य चक्रके प्रवेशो न संभव
ति तस्यापापि कर्मविषयेन तत्साम्यमात्रेणेदानीं कार्यमे
व वक्ताभिमानी च पर्जन्यः तद्वयज्ञाद्भवति अग्नौ प्रस्ताहु
तिः सम्यगादित्यमुपतिष्ठति आदित्याज्जायते वृष्टिर्वृष्टेर
न्नं ततः प्रजा इति स्मृतेः उभयवचनाद् आदित्यास्तवृष्ट्या
विरोधः अतः संति हि बहुमारीरफलानि कर्माणि यज्ञात्पर्ज

स्योद्भवः संभवति यतो देवताबुद्धियत्रस्वत्यागः कर्मेत्यकि
याकमिव ब्रह्मयो जायते एषह्येव साधुकर्म कारयति बुद्धि
त्तान्नमित्यादिभ्यः नवमत्र्यक्ष्ये संभाव्यमाने पार्थेयथे लोपप
चारिकं कल्प्यं नवजडानो स्वतः प्रवृत्तिसंभवति यतस्ये
वाद्वरस्येति सर्वनियमनश्रुतेश्च द्रव्यं कर्म च कालश्चेत्या
देश्च अचिन्त्यशक्तिश्चोक्ता जीवस्य च प्रतिबिंबस्य एवं च
श्च नकर्तृत्वमित्यादिनिषेधाच्च अन्तर्यामिप्रसिद्धाविति ते
भ्योस्याभिव्यन्त्येपरं ब्रह्म अन्यथा अनादिनियमनमवि
त्यं परिहृत्यामपि ब्रह्मको जानाति न च बुद्धिं विना योगा
गोकारो युक्तः पराम्यर्थाच्चतस्मात्सर्वगतं ब्रह्मेति न चैक
माहेन भेदश्रुतिविनावरहूर्धंजवविदूष्यते नानि वाक्
यानि नित्यानि वा चाविरूपनित्ययाह ब्रह्माचोदयस्वरूढ इति
अनादिनियतानित्या वाग्नस्त्रष्टा स्वयंभुवा अतएव नित्य
त्वमित्यादिश्रुतिस्मृतिभगवद्वचनेभ्यः दोषश्चोक्तः सकर्तृ
कत्वेन चाबुद्धिपूर्वं तस्य त्वानितत्प्रमाणाभावात् निश्वसि
तश्रह्मस्व लक्ष्यणाभिप्रियोनापबुद्धिपूर्वोभिप्रायः सोकाम
यतेत्यादेश्च अहंकृतमित्यादिरूपप्रपंचेन महदभिधानाच्च
महातात्पर्यविरोधाच्च न चोक्तं उरस्मात् नसत्वात्तं चेणो
त्पत्तिकर्तुः प्राधान्यं अस्वातंत्र्येच तद्भूतिसर्वकत्वेन भव
ति यथा रोगादीनां पुरुषस्य तज्जन्यत्वेपि उत्पत्तिवचनानु
भिव्यक्तपाण्यान्यभिमानि देवताविषयानि च नित्यत्वप्रको
त्स्येति वचनात् अभिव्यंजके कर्तृत्ववचनं वास्ति हेनस्य
तपवर्णं च कृपति कथमादित्यस्याः वेदास्तेने च क्रियते च च
नमाचाच्चनिर्णियात्मकश्शरीरकोक्तं बलवत् प्रामाण्योति
यस्येति हमायत्वयोनित्व जन्माद्यस्यत्युक्ते प्रमाणान्तरवा पे

ज्ञितम् न ब्रह्मणस्सनातनत्वं वेदकारणत्वं वा नहि वेदकारण
त्वे जगत्कारणत्वे हेतुः नहि विविधजगत्सृष्टेः वेदस्य हि र
णकस्यासम्भवे यदि वेदस्य ष्टा सर्वज्ञः किमिति न जगत्स्र
ष्टा सर्वज्ञः तस्माद्वेदप्रमाणकत्वमेवात्र विवक्षितं अतो नि
त्यान्यक्षराणि यत एवं परं परायत्ताभिव्याप्य ब्रह्म तस्मा
त् नित्यं यज्ञे प्रतिष्ठितं तानि चाक्षराणि भूताभिव्यंग्यानीति
चक्रं न रेतज्जगच्चक्रं यो नानुवर्तयति स तद्विनाशकत्वा
दघायुः पापनिमित्तमेव यस्यायुः सोऽघायुः न सन्तीव म
नसमाधानमपि न कार्यमित्यत आह ॥ १४ ॥

91

भूतानिप्राणिशरीराणिअन्नादिशुक्रशोणितरूपेणपरिणतादित्यर्थः
यज्ञात्कारीर्यादेरित्यर्थः अग्नौप्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आ म्य
दित्याज्जायतेवृष्टिर्वृष्टेरन्नंततः प्रजाइतिस्मृतेः यज्ञस्यांतःसंकल्पात्मक
त्वात् तत्फलानुकूलत्वस्ययजमानादिबहिःश्रेष्टात्रूपकर्मसाध्यत्वाद्यज्ञः
कर्मसमुद्भवइत्युक्तः समुद्भवः १४ फलानुकूलत्वम् १४ ॥

संसारचक्रमेप्रवृत्त न होनेका हेतु जो कर्म्म सो कर्त्तव्य है यह तीन श्लोकसे क
हते हैं कि अन्न ही उदरमे जायकर रसरूप होय शुक्र कहे बीज औ शोणितक
हे रुधिर होता जिससे भूतक हे प्राणी उत्पन्न होते हैं और सो अन्न मेघ बरसनेसे
होता है और मेघ यज्ञ धूम से होते और वह यज्ञ फेरि यज्ञ करने वा
लों के व्यापारसे पूरी होती है यही बात श्रुति कहती हैं कि अग्निमे दी
हुई आहुति सूर्य लोकमे रहती इसीसे सूर्य्य से वृष्टि होती औ वृष्टिसे
अन्न होता फेरि उस अन्नसे सब प्रजा जन्म लेती हैं १४

दोहा ॥

जीव जु होत है अन्नसें अन्न मेघ सों होय मेघ यज्ञकर होत
हैं यज्ञकर्मसें सोय १४

93

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवं त
स्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितं १५

शांकरभाष्य १

तच्च एवम्विधं कर्म्म कुतो जातमित्याह कर्म्मेति तच्च कर्म्म ब्रह्मोद्भवं ब्रह्म
वेदः स उद्भवो यस्य तत् कर्म ब्रह्मोद्भवं विद्धि विजानीहि ब्रह्म पुनर्वेदाख्यम
क्षरसमुद्भवं अक्षरं ब्रह्म परमात्मा समुद्भवो यस्य तदक्षरसमुद्भवं ब्रह्म वेद
इत्यर्थः यस्मात् साक्षात्परमात्माख्यादक्षरात् पुरुषनिश्वासवत् समुद्भवं ब्र
ह्म तस्मात् सर्वार्थप्रकाशकत्वात् सर्वगतमपि सत् नित्यं सदा यज्ञविधिप्रधा
नत्वाद्यज्ञे प्रतिष्ठितं १५

आनंदगिरिकृतटीका २

यद्पूर्वं हेतुत्वेन कर्मोक्तं तत् किं चैत्यवन्दनादि किम्वाग्निहोत्रादि इति सन्दि
हानं प्रत्याह कर्म्मेति किमिति कर्म्मणो ब्रह्मोद्भवत्वमुच्यते सर्वस्य तदुद्भवत्वा
विशेषादित्याशंक्याह ब्रह्म वेद इति ब्रह्म तर्हि वेदाख्यमनादिनिधनमिति तत्रा
ह ब्रह्म पुनरिति अक्षरात्मनो वेदस्य पुनरक्षरेभ्यः सकाशादेव समुद्भवो न संभ
वतीत्याशंक्याह अक्षरमिति ब्रह्मैवाक्षरमेवोक्तं तत् कथं तस्मादेवोद्भवतीत्याशं
क्य ब्रह्मशब्दार्थमुक्तमेव स्मारयति ब्रह्म वेद इति ननु ब्रह्मप्राप्ति तस्य वेदस्या
पि पौरुषेयत्वात् प्रामाण्यसन्देहात् कथं तदुक्तमग्निहोत्रादिकं कर्म निर्द्धारयितुं
शक्यते तत्राह यस्मादिति कथं तर्हि तस्य यज्ञे प्रतिष्ठितत्वं सर्वगतत्वे विशेषायो
गादित्याशङ्क्याह सर्वगतमपीति १५

श्रीधरी टीका ३

तथा कर्मेति तच्च यजमानादिव्यापाररूपं कर्म ब्रह्मोद्भवं विद्धि ब्रह्म वेदस्तस्मा
त् प्रवृत्तं जानीहि तच्च वेदाख्यं ब्रह्म अक्षरात् परब्रह्मणः समुद्भूतं जानीहि अस्य
महतो भूतस्य निश्वसितमेतद् ऋग्वेदो यजुर्वेदः सामवेद इति श्रुतेः यत एवमक्षरा
देव यज्ञप्रवृत्तेरत्यन्तमभिप्रेतो यज्ञस्तस्मात् सर्वगतमप्यक्षरं ब्रह्म नित्यं सर्वदा

यज्ञेप्रतिष्ठितंयज्ञेनोपायभूतेनप्राप्यतइतियज्ञेप्रतिष्ठितमुच्यतइति उद्यमस्थास्
दालक्ष्मीरितिवत् यद्वायस्माज्जगच्चक्रस्यमूलंकर्मतस्मात्सर्वगतंमन्त्रार्थवादैः
सर्वेषु भूतार्थाख्यानादिषुगतंस्थितमपिवेदाख्यंब्रह्मसर्वदायज्ञेतात्पर्येणप्रति
ष्ठितंअतोयज्ञादिकर्मकर्त्तव्यमित्यर्थः १५

पैशाचभाष्य ४

कर्मब्रह्मोद्भवंब्रह्मवेदःप्रकाशकंयस्यतत्कर्मब्रह्मोद्भवंविद्धिविजानीहिब्र
ह्मपुनःवेदाख्यंअक्षरसमुद्भवंविद्धिअक्षरःपरमात्मासमुद्भवंकारणंयस्यब्रह्म
णस्तदक्षरसमुद्भवं अक्षरात्पुरुषनिश्वासवत्समुद्भूतंब्रह्मतस्मात्सर्वार्थप्रकाश
कत्वात्सर्वगतंब्रह्मवेदःयज्ञप्रकाशकत्वात्यज्ञेप्रतिष्ठितं १५

रामानुजभाष्य ५

कर्मचब्रह्मोद्भवंअत्रचब्रह्मशब्दनिर्दिष्टंप्रकृतिपरिणामरूपंशरीरंतदेतंब्र
ह्मनामरूपमन्नंचजायतेइतिब्रह्मशब्देनप्रकृतिर्निर्दिष्टा इहापिममयोनिर्म
हद्ब्रह्मेतिवक्ष्यते अतःकर्मब्रह्मोद्भवमितिप्रकृतिपरिणामरूपशरीरोद्भवंक
र्मेत्युक्तंभवतिब्रह्माक्षरसमुद्भवमित्यत्राक्षरशब्दनिर्दिष्टोजीवात्मा अन्नपानादि
नाप्यायिताक्षराधिष्ठितंशरीरंकर्मणेप्रभवतिकर्मसाधनभूतशरीरमक्षरसमु
द्भवंतस्मात्सर्वगतंब्रह्मसर्वाधिकारगतंशरीरंनित्यंयज्ञेप्रतिष्ठितंयज्ञमूल
मित्यर्थः ॥ १५ ॥

अभिनवगुप्त ६

साचज्ञानपूर्विकाज्ञानमक्षरादिति अपरेत्वन्नमद्यमानंविषयपंचकमाश्रि
त्यभूतानीन्द्रियाणिविषयास्तान्मनःस्फुरितत्वपो अतश्चात्मैवविषयोपभोगेन
पोष्यते अतस्त्रसर्वगतंब्रह्मकर्मणिप्रतिष्ठितंतन्मयत्वान्नस्य १५

परमार्थप्रपा ७

ननुसर्वतोपिब्रह्मामुख्योकर्मणोगतिमपहाययोगिणीकिमुपदिष्टवानित्या
शंक्योपसंहारेपरमप्रयोजनमपिदर्शयन्नाह ॥ तस्मादिति १५ तस्मात्कार
णात्सर्वगतमिन्द्रसूर्यादिसर्वदेवेष्वन्तर्यामित्वेनस्थितंब्रह्मनित्यमनश्वरफलरू

कर्मचब्रह्मोद्भवं ब्रह्ममंत्रात्मकं वा ब्रह्मवेदस्तस्मात् अथवेदोपि कस्मादित्याह अक्षरेति नक्षरतीत्य
क्षरं वैराजं ब्रह्म तस्मादुद्भूतः श्रुतिरपि शातपथी यथा इन्धाग्नेरभ्याहितस्य पृथग्धूमा विनिश्चरन्त्य
वेस्य महतो भूतस्य निःश्वसितं यदृग्वेदो यजुर्वेदः सामवेदोऽथर्व इत्यादि भाष्यं यथा यद्वदभितः समन्ततः
आहितस्य नानाप्रविष्टस्य आर्द्रस्याग्नेः आर्द्रेन्धनैः काष्ठैः तत्रत्याग्नेः पृथग्भूता नानाकारा धूमा विश्चरन्ति
अरे मैत्रेयि तद्वदस्य महतो भूतस्य महाभूताख्यस्य वैराजस्येत्यर्थः निःश्वसितं निःश्वासरूपमेतद् ऋग्वेद इत्यादि

\+ मेत

यं यज्ञे प्रतिष्ठितं प्रतिष्ठां प्राप्तं यज्ञोपायेन लभ्यं यज्ञेन यज्ञमयजन्त देवा इति·
श्रुतेः अथवाऽनश्वरफलदत्वेन श्रुतिरप्यग्निरहस्ये स य आत्मानमेवैल्लोकमुपा
स्तेन हास्य कर्म क्षीयत इत्यादि ॥१५॥

वनमाली ८

कर्म च परब्रह्मोद्भवं एष ह्येव साधु कर्म कारयति एष एवासाधु कर्म कारय
तीत्यादिश्रुतेः कीदृशं ब्रह्माक्षरसमुद्भवं वेदाभिप्रायं वैदिकप्रमाणकं शास्त्र
योनित्वादिति सूत्रात् यश्छन्दसामृषभो विश्वरूपः छन्दोभ्योऽध्यमृतात्संबभू
वेत्यादिश्रुतेश्च शास्त्रयोनिरभिव्यक्तिकारणं यस्य तदित्यर्थः यस्मादेवं परं
परया यज्ञपर्जन्याद्भूतवेदद्वारा यज्ञाभिव्यंग्यं ब्रह्म तस्मात् सर्वगतमपि ब्र
ह्म नित्यं यज्ञे विशेषतो भोक्तृत्वादिरूपेण सन्निहितम् ॥१५॥

ऊर्मिवैजयन्ती ४

किंच कर्म च ब्रह्मोद्भवं ब्रह्म शरीरं तस्मादुद्भवो जन्म यस्य तत्तथा ब्रह्मशब्दवा
च्या प्रकृतिस्तस्याः कार्यत्वेन शरीरस्यापि ब्रह्मेति कथनमविरुद्धं कार्यकारण
योरभेदत्वात् कनककार्येषु कुंडलादिषु कनकव्यवहारवत् तदेतद्ब्रह्म नाम
रूपमन्नं च जायत इति श्रुतेः इहापि मम योनिर्महद्ब्रह्मेति शब्देन प्रकृतिर्निर्दिष्टा
तस्माद्ब्रह्मसंज्ञकाच्छरीरात्कर्मोद्भवं विद्धि त्वं जानीहि ब्रह्मशरीरं त्वक्षरस
मुद्भवं अक्षरशब्दवाच्यो जीवात्मा तस्मादुद्भवं त्वं विद्धि जीवाधिष्ठितो तेन विना
शरीरस्य स्थितिप्रवृत्त्यनर्हत्वेन कर्मकरणायोगात् तस्मात्कर्मसाधनरूपं·
शरीरमक्षरसमुद्भवं त्वं जानीहीत्यर्थः यस्मादेवं तस्मात्सर्वगतं सर्वेषु क
र्माधिकारेषु गतं प्राप्तमिति सर्वगतं ब्रह्मशरीरं नित्यं सर्वदा यज्ञे कर्मणि·
प्रतिष्ठितं संस्थितं यज्ञमूलशरीरेणैव पुनर्यज्ञोपि प्राप्यत इत्यर्थः द्वितीयोप्य
स्यार्थः तच्च कर्म ब्रह्मोद्भवं ब्रह्म वेदस्तस्मादुद्भवं प्रवृत्तं त्वं विद्धि जानीहि तच्च
वेदाख्यं ब्रह्माक्षरात्परमेश्वरात्समुद्भवं प्रकटं विद्धि अस्य महतो भूतस्य निश्व
सितमेतदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासपुराणं विद्या उपनि
षदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निःश्वसि

मद्रूपोद्घटः कनकाद्रूपं कुं
डलमित्यादिवत् ४

४ तिवद्यतेष प्रवृत्तं ब्रह्म +

तानीतिश्रुतिप्रमाणाद्वेदरूपेब्रह्माक्षरदूपात्परमेश्वराद्भवतीतित्वंविद्धिजा
नीहीत्यर्थः यस्मादेवंतस्मात्सर्वगतंनिखिलधर्मकर्मादिप्रकाशकंवेदाख्यं
ब्रह्मनित्यंविनाशशून्यंयज्ञेधर्माख्येऽदृष्टरूपेप्रतिष्ठितंसंस्थितंयज्ञरूपेण
साधनेनप्राप्यतेऽतोयज्ञेप्रतिष्ठितमुच्यतेऽतइहामुत्रभोगार्थंमुक्तयेचय
ज्ञार्थंयत्नंकुर्वित्यर्थः+यद्वायस्मात्कर्मणोयज्ञमूलत्वमतितस्माद्वेदाख्यंब्र
ह्मसर्वगतमपिमन्त्रार्थवादाद्येस्सर्वेषुनानाख्याख्यादिषुस्थितमपियज्ञादि
कंकर्मकर्तव्यमितितात्पर्येणसदाप्रतिष्ठितंस्थितमित्यभिप्रायः १५

उद्यमस्यासदालक्ष्मीतिवचनात् +

95

मधुसूदनी १०

तच्चापूर्वोत्पादकं॥ ब्रह्मोद्भवंब्रह्मवेदःसएवोद्भवः प्रमाणंयस्यतत्तथा
वेदविहितमेवकर्मापूर्वसाधनंजानीहि नत्वन्यत्पाषंडप्रतिपादितमित्य
र्थः ननुपाषंडशास्त्रापेक्षयावेदस्यकिंवैलक्षण्यं यतोवेदप्रतिपादितए
वधर्मोनान्यइत्यतआह ब्रह्मवेदाख्यंअक्षरसमुद्भवं अक्षरात्परमात्मनोनिर्दो
षात्पुरुषनिःश्वासन्यायेनाबुद्धिपूर्वंसमुद्भवः आविर्भावोयस्यतदक्षरस
मुद्भवं तथाचापौरुषेयत्वेननिरस्तसमस्तदोषाशंकंवेदवाक्यंप्रमितिज
नकंतथाप्रमाणमतीन्द्रियेर्थे नतुभ्रमप्रमादकरणापाटवविप्रलिप्सादिदो
षवत्प्रणीतंपाषंडवाक्यंप्रमितिजनकमितिभावः तथाचश्रुतिः अस्यमहतोभू
तस्यनिःश्वसितमेतद्यदृग्वेदोयजुर्वेदःसामवेदोथर्वांगिरसः इतिहासपुरा
णंविद्याउपनिषदःश्लोकाःसूत्राणि अनुव्याख्यानानिव्याख्यानान्यस्यैवैतानि
निश्वसितानीतितस्मात्साक्षात्परमात्मसमुद्भवतया सर्वगतंसर्वप्रकाशकं
नित्यमविनाशिचब्रह्मवेदाख्यंयज्ञेधर्माख्येऽतीन्द्रियेप्रतिष्ठितंतात्पर्येण अ
तःपाषंडप्रतिपादितोपिधर्मपरित्यागेनवेदबोधितएवधर्मोनुष्ठेयइत्यर्थः १५

सदानंदी ११

वेदप्रमाणकंकर्मापूर्वस्योत्पादकंभवेत् नतुपाषंडसंसिद्धंधर्मस्योत्पादकंभ
वेत् ननुपाखंडशास्त्रात्किंवैलक्षण्यंश्रुतेर्यतःश्रुतिप्रमाणकोधर्मोनान्यो
स्तीतिमत्रआह अक्षरं २ आविर्भावोपिवेदस्यअक्षरात्परमात्मनः तथाचापौरुषे

यत्वाज्ञिरस्ताखिलसंशयः २ अर्थेष्वतींद्रियेवेदः प्रमाणंस्वतएवसः नतु
प्रमादमायादिदोषवद्वचितंहितत् पाषंडवाक्यंप्रामाण्यजनकंस्यादतीं
द्रिये तस्मात्साक्षात्परब्रह्मदेहत्वात्सर्वभासकं ५ अविनाशित्ववेदाख्यं
ब्रह्मयज्ञे प्रतिष्ठितं अतोप्यतींद्रियोधर्मोनुष्ठेयोवेदबोधितः नत्वोपधर्मं
पाषंडबोधितंसर्वथाजनैः १५

कर्मब्रह्मोद्भवंवेदोद्भवं वेदएवधर्मेप्रमाणंनतुपाखंडादिप्रणीतागमः ब्रह्म
वेदोप्यक्षरसमुद्भवं अस्यमहतोभूतस्यनिःश्वसितमेतद्यदृग्वेदोयजुर्वे
द इत्यादिश्रुतेः साक्षात्परमेश्वरादेवउत्पन्नः अतोनतुभ्रमविप्रलंभकरणा
दिदोषाक्रांतपाखंडादिवाक्यवदप्रामाण्यशंकाकलंकितइतिभावः यस्मादेवंत
स्मात्सर्वस्मिन्देशेकालेचवर्त्तमानंब्रह्मवेदः एतेनवेदस्यनित्यत्वंव्याप्तत्वस
र्वभूतवर्धकत्वं नित्यंनियमेनयज्ञेप्रतिष्ठितंतात्पर्येणपर्यवसन्नं १५

आनन्दीटीका

कर्मयज्ञस्येति कर्तव्यता ब्रह्मणो वेदादुद्भूतं विद्धि ब्रह्म वेदो महतो भू
तस्य निश्वसितमेव ऋग्वेदो यजुर्वेदोऽथर्ववेदः स्मादि श्रवणात् तदक्षरा
त्परब्रह्मण उद्भूतं जानीहि यस्मादित्थंभूतो यः प्रकारस्तस्मात् सर्वगं
तं सर्वत्र कार्यकारणत्वेनावस्थितं नित्यं ब्रह्म परमात्मा यज्ञे प्रतिष्ठि
तम् तथा च याज्ञवल्क्यः विराड्रूपेण यज्ञात्मत्वमुपगच्छति
योऽश्वदेवतामार्गात्संभूतो रसउत्तमः देवान्सन्तर्प्य स रसो यज
मानं फलेन च संयोज्य वायुना सोममेनीयते रश्मिभिस्ततः ऋग्यजु
स्सामविहितं सौरं धामोपनीयते तन्मण्डलमसौ स्वयं स्रजत्यमृ
तं तस्मात्मम् यज्ञस्य सर्वभूतानामशनानशनात्मनाम् एवमेत
द्भूतायक्षेचक्रं संपरिवर्तते इमं त्रैवेश्वरस्य जगत्कर्तृत्वमास्थित
म् १५॥

रामकंठीटीका

तद्वेदशं कर्म ब्रह्मोद्भवं ब्रह्मणः शास्त्ररूपादुद्भवो यस्य तत्तथाविधं।
सपरेण शब्दात्मकेन वेदादिशास्त्ररूपेण ब्रह्मणा यज्ञसंपादनसाध
नं कर्मोपदिश्यते तच्चेत्थंभूतं शब्दात्मकं ब्रह्माक्षरसमुद्भवं तत्स्यति
संवलितं तत्स्वरूपाच्छादनेश्ममत्तरपरब्रह्मपरमकारणं तस्मादुद्भ
वो यस्य तत्तादृशं परस्माद्धि ब्रह्मणः परमकारणस्वरूपमजहत
एव शान्तं वृत्तस्थिमा चित्स्वरूपतामत्यभिचरन्मयीदिव प्रकाशाव्य
पदेशमात्रभिन्नस्वरूपं प्रसरति अतएव तदपि ब्रह्मशब्देनोक्तम् य
तएवं विधेये प्रक्रिया प्रवृत्ता ततः परं ब्रह्म सर्वगतत्वेन समस्तव
स्तुव्यापकत्वेन व्यवस्थितं सन्नित्यं सदैव यथोक्तस्वरूपे यज्ञे प्रतिष्ठि
तम् [illegible]
[illegible]: १५॥

लाक्षिकी टीका

तत्पाषाणशास्त्राद्युद्भवं तच्च ब्रह्म वेदाख्यं अक्षरात् परं ब्रह्मणो उ
द्भूतं समुद्भवं आविर्भावो यस्य तत् तथा च श्रुतिः अस्य महतो भूत
स्य निःश्वसितमेतत् यदृग्वेदो यजुर्वेदः सामवेद इति तत उद्भूतं

कर्म यजमानव्यापारेति कर्तव्यतारूपम् ब्रह्मवेदस्तदुद्भूतं विद्धि प्रमाणं जानीहि

केनचित्पाषाणादिना निर्मितं तस्मात्सर्वगतमप्यक्षरं ब्रह्म नित्यं सर्व
दा यज्ञे प्रतिष्ठितम् यत्तेनोपायेन प्राप्यत इत्यर्थः उपमन्यासस्तु
लक्ष्मीरितिवत् यद्वा यदर्थमेवं प्रसूते तस्यार्थे सा किल यज्ञे प्रति
ष्ठास्थितिरित्यर्थः १५॥

पंचोलीटीका

कर्म ब्रह्मोद्भवं विद्धि जानीहि ब्रह्म वेदं तदक्षरसमुद्भवं परं ब्रह्म समुद्भ
वं जानीहि यस्मादक्षरब्रह्मसमुद्भवो वेदस्तस्मात्सर्वगतः सर्वव्यापकः
नित्यं यज्ञे प्रतिष्ठितं सर्वदा यज्ञविधिपरायणः १५॥

रणवीरसमिद्धोधिनी॥

कार्यद्वारेणानुष्ठानमनप्रयोजनमाहकर्मेति ब्रह्मणो यत्तु वे
दाध्ययनात्तदर्थभूतं कर्म कर्मेन्द्रियव्यापाररूपमुत्पन्नः प्रवृत्तिवि
षयीभूत इति कर्मणाश्च कर्मेन्द्रियव्यापाराय यज्ञो वृष्ट्या वरणी
योद्बुद्ध्यादिलक्षणो धर्मः सिद्ध इति यज्ञाच्च बुद्ध्यादिलक्षणात्पर्ज
न्यो भवति कोऽर्थः बुद्धेर्नोपद्रवनिमित्तीभूतपापाचारतया भूमा
वभूतानुष्ठानान्निरस्य पर्जन्यस्य मेघस्य कार्यकारणोपचारात्
यथाकालं वृष्टेश्चोत्पत्तिरिति यद्वा प्राहूतोऽननिवर्तनपूतायच
रणायचेति स्मृतेर्बुद्ध्यर्थमाहूयकान्वीरञ्जरुषान्मृति यो धर्म
धर्मपालनादीति नाशो पर्जन्योत्पत्तिरिति यद्वा प्रतिवाक्ये बुद्धेन
विजित्याश्वमेधादियज्ञैर्न्यायेन प्रजासंरक्षणाच्चोपद्रवनाशाद्य
थाकालं सवृष्ट्यादिसिद्धिरिति पर्जन्यादुक्तलक्षणात्सवर्षणा
दन्नं ब्रीह्यादिकमुत्पद्यते अन्नाच्च भुक्ताद्वीर्यरूपेण परिणताद्रू
तमगीइति यद्वान्नाद्ब्रीह्यादेर्भूतानि प्राणिनः प्राणन्तीति अनेन

प्राणा इति श्रुतेः इत्थंच क्षत्रियो हि प्रजारक्षाऽस्त्रशस्त्रपाणिः
प्रदंडयन् निर्जित्य परसैन्यानि क्षितिं धर्मेण पालयेदिति प
राशरेण समोत्तमाधमै राजा त्वाहूतः पालयन्प्रजाः नानिवर्ते
त संग्रामात्क्षात्रं धर्ममनुस्मरन्निति संग्रामेष्वनिवर्तित्वं प्रजा
नां चैव पालनं शुश्रूषा ब्राह्मणानां च राज्ञः श्रेयस्करं परमि
ति मनुना च स्मृतं क्षात्रधर्मं प्रजापालनप्रधानं धनुर्वेदेन च
संपाद्यते यस्मादेवं तस्माद्ब्रह्म सधनुर्वेदः सर्वगतं सर्वं च कर्मा
दि प्रापकं तेन च केन गतं कारणत्वसामान्यरूपेण याचप्राप्तं यत्ते यु
द्धयज्ञे नित्यं प्रतिष्ठितं लब्धस्वार्थविश्रांतिकमिति यावत्
एवं च युद्धयज्ञ एव सर्वप्राणनहेतुः तत्रस्य मृत्युतया कर्त
व्य इति तात्पर्यं १५॥

मधुभाष्य

१५॥

ब्रह्मोद्भवमितिवेदप्रतिपादितमित्यर्थः अक्षरसमु
द्भवमिति अक्षरात्वाभिमतात्प्रजापतेः पूर्वोक्तेनप्रकारेणप्रजानामुपदेष्टुःसका
शादाविर्भूतं तेनैवमुपदेष्टासमभवत्तन्यायेनयस्मात्प्रकाशितंतस्मात् सर्व
गतंकर्मब्रह्ममार्गसाधारणंब्रह्मवेदरूपंनित्यंनियमेनयज्ञे पूर्वोक्तप्रजादिफ
लेप्रतिष्ठितंतात्पर्यवत् प्रजामन्यन इतिशेषः [ननुतर्हिप्रजापतेरुपदिष्टत्वादिद
मेवकाम्यंकर्मविहायकिमितिनियतंकुरुकर्मत्वमितिमामफलेकर्मणिप्रव
र्तयसीत्याशंक्यतादृशकर्मणोनुष्ठातारंनिंदति एवमिति

99

ऐसे अपूर्व हेतुवों से कर्म्म की श्रेष्ठता औ कर्त्तव्यता किसलिये कहा औ कर्म्म क्या वस्तु है सोई विवरन करते हैं कि यज्ञकारी पुरुषोंका व्यापार रूप जो कर्म्म सो ब्रह्म कहे वेदसे उत्पन्न भया औ ब्रह्म जो अक्षर जो परब्रह्म जिससे प्रगट भया हैं वह जानो और श्रुतिने भी कहा है कि परब्रह्म की निःश्वास से ऋक् यजुर और साम वेद प्रगटे हैं इससे सर्वव्यापी परब्रह्म सर्वदा यज्ञमे प्रतीत हैं अर्थात् यज्ञरूप उपाय से ब्रह्मप्राप्ति होती हैं जैसे उद्योग करनेसे लक्ष्मीका लाभ होता है अथवा जगतमे मूल कर्म्म हैं इसमे मन्त्र और अर्थके द्वारा सब मनुष्यो मे प्राप्त अनादि कालसे स्थित जो वेद ब्रह्म सो तात्पर्यके द्वारा प्रतिष्ठित है इससे यज्ञादि कर्म्म अवश्य कर्त्तव्य है १५

वेदसे ३

दोहा॥

कर्म उदोत हैं ब्रह्मसें ब्रह्म अक्षरसों जान ताते सर्वगत ब्रह्म है मखमें नित स्थित जान १५॥

100

एवं प्रवर्त्तितं चक्रं नानुवर्त्तयतीह यः अघायु
रिन्द्रियारामो मोघं पार्थ स जीवति १६

शांकरभाष्य १

एवमिति एवमीश्वरेण वेदयज्ञपूर्वकं जगच्चक्रं प्रवर्त्तितं नानुवर्त्तयतीह लो
के यः कर्मण्यधिकृतः सन्नघायुरघं पापमायुर्जीवनं यस्य सोऽघायुः पा
पजीवन इति यावत् इन्द्रियाराम इन्द्रियैरारमणमाक्रीडा विषयेषु यस्य सइं
द्रियारामो मोघं वृथा हे पार्थ स जीवति तस्मादज्ञेनाधिकृतेन कर्त्तव्यमेव
कर्मेति प्रकरणार्थः प्रागात्मज्ञाननिष्ठायोग्यताप्राप्तेस्तादर्थ्येन कर्मयोगानु
ष्ठानमधिकृतेनानात्मज्ञेन कर्त्तव्यमित्येतत् न कर्मणामनारम्भादित्यत आरभ्य
शरीरयात्रापि च ते न प्रसिध्येदकर्मण इत्येवमन्तेन प्रतिपाद्य यज्ञार्थात् कर्म
णोऽन्यत्रेत्यादिना मोघं पार्थ सजीवतीत्येवमन्तेनापि ग्रन्थेन प्रासङ्गिकं
मधिकृतस्यानात्मविदः कर्मानुष्ठाने बहुकारणमुक्तं तदकरणे च दोषसंकी
र्त्तनं कृतं १६

आनंदगिरिकृतटीका २

अधिकृतेनाध्ययनादिद्वारा जगच्चक्रमनुवर्त्तनीयमन्यथेश्वराज्ञातिलंघि
नस्तस्य प्रत्यवायः स्यादित्याह एवमिति न कर्मणामनारम्भादित्यादिनोक्त
मुपसंहरति तस्मादिति जगच्चक्रस्य प्रागुक्तप्रकारेणाननुवर्त्तने हेत्वाजी
वनमघसाधनं यस्मात्तस्माज्जीवता नियतं कर्म कर्त्तव्यमित्यर्थः यद्यधि
कृतेन कर्त्तव्यमेव कर्म तर्हि किमित्यज्ञेनेति विशिष्यते ज्ञाननिष्ठेनापि तत्
कर्त्तव्यमेवाधिकृतत्वाविशेषादित्याशंक्य पूर्वोक्तमनुवदति प्रागिति नहि ज्ञा
नकर्मणोर्विरोधात् ज्ञाननिष्ठेन कर्म कर्त्तुं शक्यते तथा चानात्मज्ञेनैव चि
त्तशुद्ध्यादि परम्परया ज्ञानार्थं कर्मानुष्ठेयमिति प्रतिपादितमित्यर्थः तर्हि
यज्ञार्थादित्यादि किमर्थं नहि तत्र ज्ञाननिष्ठा प्रतिपाद्यते कर्मनिष्ठा तु पूर्वमेवो
क्तत्वान्नात्र वक्तव्येत्याशंक्याह तत्र मर्थान्तरमनुवदति प्रतिपाद्येति । प्रासङ्गिक

मत्तस्यकर्म्मकर्त्तव्यतोक्तिप्रसङ्गागतमिति यावत् वहुकारणमीश्वरप्रसादोदे
वतामीतिश्लोक्यादिदोषसंकीर्त्तनंतैर्दत्तान प्रदायेत्यादि १६

श्रीधरीटीका ३

यस्मादेवंपरमेश्वरेणैवभूतानांपुरुषार्थसिद्धये कर्म्मादिचक्रंप्रवर्त्तितंत
स्मात्तदकुर्वतोव्यर्थैवजीवितमित्याह एवमिति परमेश्वरवाक्यभूताद्वेदाख्या
ब्रह्मणः पुरुषाणां कर्म्म — प्रवृत्तिस्ततः कर्म्मनिष्पत्तिस्ततः पर्जन्यस्ततोऽ
न्नं ततोभूतानिभूतानांपुनस्तथैव कर्म्मप्रवृत्तिरित्येवंप्रवर्त्तितंचक्रंयोनानुव
र्त्तयतिनानुतिष्ठतिअघंपापरूपमायुर्यस्यसः यतइंद्रियैर्विषयेष्वेवारमतिन
त्वीश्वराराधनार्थेकर्म्मणिअतोमोघंव्यर्थंसजीवति १६

पिशाचभाष्य टीका ४

एवमनुपूर्वकंप्रवर्त्तितंचक्रंनिष्पादितंक्रमणशीलं[illegible]यतिनानुवर्त
यतिनानुतिष्ठतियः अघायुरघमात्मनइच्छतीत्यघायुः इंद्रियाणामाराम इंद्रिय
क्रीडास्थानंमोघंहेपार्थसजीवतिसप्राणंधारयतितस्मादुक्तेनकर्मणाविधि
कृतेनयज्ञाःकर्त्तव्या इत्यभिप्रायः १६

रामानुजभाष्य ५

एवंपरमपुरुषेणप्रवर्त्तितमिदंचक्रंअन्नभूतशब्दनिर्दिष्टानिसजीवानिश
रीराणिपर्जन्यादन्नंयज्ञात्पर्जन्यः यज्ञश्चकर्तृव्यापारानुरूपात्कर्म[illegible]सजीवा ण: कर्मण: शरी
च्छरीरंचपुनरन्नादित्यन्योन्यकार्यकारणभावेनचक्रवत्परिवर्त्तमानमिहसाधने त्य
वर्त्तमानोयःकर्मयोगाधिकारंज्ञानयोगाधिकारंवानानुवर्त्ततिनप्रवर्त्तयतिसो य र्त्तय
घायुर्भवतिअघारंभायैवास्यायुरघपरिणतंवाउभयरूपंवासोघायुः अत
एवेंद्रियारामोभवति अनात्मारामः इंद्रियाण्येवास्योद्यानानिभवंतियज्ञशिष्टेन
वर्द्धितदेहमनस्तेनोद्रिक्तरजस्तमस्कआत्मावलोकविमुखत्वयाविषयभो
गैकरतिर्भवति अतोज्ञानयोगादौयतमानोपिनिष्फलप्रयत्नतयामोघंपार्थ
सजीवति १६ अभिनवगुप्ती

यस्त्वेवंनांगीकरोतिसपापमयः अतःसइंद्रियेष्वेवरमतेनात्मनि १६

परमार्थप्रपा ७

अथपर्यवसितमर्थमाह ॥ एवमिति १६ एवमुक्तप्रकारेण प्रवर्तितं प्रह
तिद्वयेषु यथादितं इहामुष्मिकफलभोगरूपं तथाचक्रं चक्रवत्तिर्गतिकर्मा
परमगतिरूपमन्नादिकार्यजातस्यात्यंतिकं कारणमहत्वं यः नानुवर्तयति ता
रतम्यभावेन पुनः पुनर्नपरिशीलयति ज्ञात्वापि पुनरिन्द्रियसंतर्पणेनिमि
नफलभोगमयेहते स अघायुरित्यादिपदैर्निंद्यत अघायुःपापेक्षावान् इंद्रिया
रामो विषयसुखलंपटः १६

वनमाली ८

आदौ परमेश्वरप्रेरितभूतेः कर्महस्तादिव्यापाररूपं ततो यज्ञस्ततः पर्जन्य
स्ततोन्नं ततो भूतानि जीवमीश्वरेण प्रवर्तितं चक्रं यो नानुवर्तयति नानुतिष्ठति
सअघायुः पापजीवनः मोघं व्यर्थमेव जीवति तज्जीवनान्मरणमेव वरमित्यर्थः
वस्तविर्द्वैर्व्याप्तं यतींद्रियाराम इति यत इंद्रियैर्विषयेष्वारामो रामो यस्य सः १६

ऊसमवैजयंती

यज्ञादिकर्माकरणे दोषमाह एवमितिएवमुक्तप्रकारेणतत्प्रकारं दर्शयति
परमपुरुषाद्वेदाविर्भावस्तस्मात्कर्मप्रतिबोधकाद्यज्ञस्ततः पर्जन्यस्ततोऽन्नं ततो
भूतशब्दनिर्दिष्टनिसजीवानिशरीराणि पुनस्तथैव भूतानां कर्मप्रवृत्तिरित्येव
मन्योन्यकार्यकारणभावेन परमपुरुषेण प्रवर्तितमिदं चक्रं चक्रवत्परिवर्तमा
नमिहास्मिंश्चक्रवत्परिवर्तमाने लोके यो जनो नानुवर्तयति न प्रवर्तयति सोऽघा
युर्भवति अघायपापायायुर्यस्य सतथापापकर्मकरणायैवायुरित्यर्थः यद्वा
अघात्पापादायुर्यस्य सतथा पापप्रूपोपादानादुत्पन्नायुरित्यर्थः यद्वा अघमेवा
युर्यस्य सतथापापायुरित्यर्थः यतो ऽतः पुनरत इंद्रियारामः इन्द्रियेष्वारामस्त्वेव
यस्य सतथेंद्रियारामो भवति हे पार्थ स पुरुषो मोघं व्यर्थं जीवति विषयप्रव
ग^ णेन्द्रियत्वेन भवं हि मुख्यत्वात्तस्य विफलदेहधारणमित्यर्थः यस्त्वेतज्जग
च्चक्रमनुवर्तयति स जगदुपकारको धन्य इति भावः तथा च श्रुतिः अथो अयं
वा आत्मा सर्वेषां भूतानां लोकः स यज्जुहोति यद्यजते तेन देवानां लोको य

दनुब्रूतेतेनऋषीणामथयत्पितृभ्योनिपृणातियत्प्रजामिच्छतितेनपितृणाम
थयत्समनुष्याणामथयत्पशुभ्यस्तृणोदकंविंदतितेनपशूनांयदस्यगृहेषु
श्वापदावयांस्यापिपीलिकाभ्यउपजीवंतितेनतेषांलोकइतिजगच्चक्रप्रव·
र्त्तनायैवपुरातनायत्पुराज्ञयायातिव्रताख्याःमरराजमाराध्यवंशवर्द्धकं
त्वामजनयत्यदित्वंकर्मकृत्वादेवर्षिपितृणांतृप्तिंनकरिष्यसितर्हिमाता
पित्रोराज्ञाछेदिनःपरमापराधिनस्तवापिजन्मतयोःकेवलंकष्टप्रदत्वेन
विफलमेवस्यादतश्शास्त्रदृष्टंयदुचितंतत्कुरुष्वेतिसंबोधनाभिप्रायः १६

102

मधुसूदनी १०

भवत्येवंततःकिंफलितमित्याह ॥ आदौपरमेश्वरात्सर्वावभासकनित्यनि
र्दोषवेदाविर्भावःततःकर्मपरिज्ञानंततोनुष्ठानाद्धर्मोत्पादःततःपर्जन्यः
ततोभूतानिपुनस्तथैवभूतानांकर्मप्रवृत्तिरित्येवंपरमेश्वरेणप्रवर्तितंचक्रंस
र्वजगन्निर्वाहकंयोनानुवर्तयतिनानुतिष्ठतिसअघायुःपापजीवनोमोघंव्य
र्थमेवजीवति हेपार्थतस्यजीवनान्मरणमेववरंजन्मांतरेधर्मानुष्ठानसं·
भवादित्यर्थः तथा चश्रुतिः अथोयंवाआत्मासर्वेषांभूतानांलोकः सयज्जु
होतियद्यजतेतेन देवानांलोकोथयदनुब्रूतेतेनऋषीणामथयत्पितृभ्यो
निपृणातियत्प्रजामिच्छतितेनपितृणामथयन्मनुष्यान्वासयतेयदेभ्योऽश
नंददातितेनमनुष्याणामथयत्पशुभ्यस्तृणोदकंविंदतेतेनपशूनांयदस्य
गृहेषुश्वापदावयांस्यापिपीलिकादयः उपजीवंतितेनतेषांलोकइति·
ब्रह्मविदंव्यावर्त्तयति इंद्रियारामइति यतइंद्रियैर्विषयेष्वारमति अतः
कर्माधिकारीसंस्तदकरणात्पापमेवाचिन्वन्व्यर्थमेवजीवतीत्यभिप्रायः १६

सदानंदी ११

आदौसर्वेश्वराद्वेदःकर्मज्ञानंततोभवेत् ततोनुष्ठानतोधर्मस्ततोवृष्टिस्ततः
परम् १ अन्नमन्नाच्छरीराणिपुनस्तेषांतथैवच कर्मप्रवृत्तिरित्येवमीश्वरे
णप्रवर्तितं २ जगन्निर्वाहकंचक्रंयोमूढोनानुतिष्ठति सपापजीवितोव्य
र्थमेवजीवतिकेवलं ३ यतोसाविंद्रियैर्भोगैरमतेहिस्वभावतः सक
र्माधिकृतोभूत्वाऽकुर्वन्कर्मप्रयात्यघं ४ १६

कर्मतातंततः
[illegible]

भवत्वेवं ततः किं फलितमित्यत आह एवमिति भूतानामादौ वेदाधिगमस्त
तः कर्मानुष्ठानं ततो देवानां तृप्तिस्ततो वृष्टिस्ततोऽन्नं ततो भूतानि तेषां वेदाधि
गम इत्येवं रूपं चक्रमिव चक्रं निरंतरमावर्त्तमानं जगद्यात्रानिर्वाहकं नानुवर्त्त
यति नानुतिष्ठति सः अघायुः पापजीवनः इंद्रियारामो न तु धर्मारामः आत्मारा
मो वा मोघं व्यर्थं दंशमशकादिवत् जीवति यस्त्वेतदनुवर्त्तयति स जगदु
पकारको धन्य इति भावः तथा च श्रुतिः अथो अयं वा आत्मा सर्वेषां भूतानां
लोकः स यज्जुहोति यद्यजते तेन देवानां लोकोऽथ यदनुब्रूते तेन ऋषीणाम
थ यत् पितृभ्यो निपृणाति यत्प्रजामिच्छति तेन पितॄणामथ यन्मनुष्यान्वा
सयते यदेभ्योऽशनं ददाति तेन मनुष्याणामथ यत्पशुभ्यस्तृणोदकं विंदति
तेन पशूनां यदस्य गृहेषु श्वापदा वयांस्यापिपीलिकाभ्य उपजीवंति तेन ते
षां लोक इति १६

आनन्दीटीका

तदस्यचक्रस्यकर्मैवमूलंतत्त्यागेजीवनंव्यर्थमित्याह सुगमोर्थः १६

रामकंठीटीका

यत एवमतः एवंयथोक्तेनप्रकारेणपरब्रह्मस्वरूपेणपरमेश्वरेणैवजगच्चक्रंप्रवर्ति
तंयःप्रवर्तितंप्रवृत्तिलक्षणधर्मनिष्ठतया आविष्कृतंचक्रंशास्त्रादि
पदार्थसमूहंयइहलोकेनानुवर्तयतिस्वयंयथाशास्त्रमननुवर्त
मानोऽन्यानपितज्ज्ञानाद्यनुष्ठापयतिसतादृशःपरमेश्वरप्रवर्तितपरक्रिया १६
नुष्ठापकत्वादघायुर्जीवितंयस्यसतादृशःसन्मोघंनिष्फलंजीवति।
तादृशस्यहितत्त्वज्ञानस्यमध्यादपवर्गलक्षणोत्तमफलाभावादीश्वर
व्यवस्थापितनियमातिक्रमाच्चस्वर्गादिभोगलक्षणावरफलाभावा
दपिनिष्फलमेवजीवितम् [illegible]
[illegible]
[illegible] १६

लासिकी टीका

भवत्वेवंततःकिंफलितमित्याह एवमिति एवमत्राद्यवन्नीत्यादि
क्रमेणेश्वरेणजगत्स्थितयेप्रवर्तितं प्रवृत्तिधर्मात्मकतयाविष्कृतं
चक्रंयइहलोकेस्वयमपियथाशास्त्रमननुवर्तमानोऽन्यानपिनानु
वर्तयति सोघायुर्नरकनिमित्तपापायुर्जीवितंयस्यसइन्द्रि
येविषयेष्वसमारामोमोघंव्यर्थंस्वर्गादिभोगमेवयाभावाद्व्यर्थं
जीवति प्रारब्धकर्मक्षयपर्यन्तमित्यर्थः १६

पंचोलीटीका

तस्मादेवंपरमेश्वरेणैवभूतानांपरमार्थसिद्धयेकर्मादिचक्रंप्रवर्ति
तंतस्मादवश्यंकर्तव्यमेवतदकरणेवृथैवजीवितमित्याह एवमि
ति यःकर्माधिकारीइहअस्मिन्लोके एवंपरमेश्वरेणदेवयज्ञपूर्व
कंप्रवर्तितंजगच्चक्रंनानुवर्तयतिनाऽनुतिष्ठतिहेपार्थसअघायुः पा
पजीवनः इन्द्रियारामविषयेषुइन्द्रियैःआरामःआक्रीडायस्यसः
मोघंवृथाजीवति १६

रणवीरसमिद्धोधिनी ॥

फलितमाह एवमिति एवमुक्तेन प्रकारेण प्रवर्तितं इह ति·
विषयतां नीतं चक्रं यज्ञवेदादिभूतं तं यो नानुवर्तयति नानुति
ष्ठति सोघायुः पापार्जननिमित्तजीवनो मोघं व्यर्थं जीवति
तस्य मरणमेव जीवनाद्वरं जन्मांतरे कदाचिद्धर्मानुष्ठानसंभ
वादिति भावः इंद्रियाराम इति इंद्रियैस्त्वक्चगादिभिरारमंता
द्रमत इति केवलं विषयानेव भुंक्ते न पुनर्धर्मार्जनं करोतीति
भावः १६॥

मधुभाष्य॥

१६॥

एवमनेनयज्ञाद्युपदेशेनप्रजापतिनाप्रवर्तितंएतत्संसारचक्रंयोनपुरुषः
अनुवर्तयत्यभ्यस्यतिइहपार्थमोघंनिष्फलंयथातथाजीवति निरतिशया
नंदंविनाभूतसमस्तदुःखापगमलक्षणफलानवाप्तेरितिभावः अघायुः
पापरूपायुः तत्रहेतुरिंद्रियारामइतिकामैकवशइत्यर्थः यद्वाप्रजापत्यु
क्तवेदाध्ययनंतत्तदर्थभूतकर्मज्ञानंततस्तत्कर्मानुष्ठानंतदनुष्ठानात्प
र्जन्यलाभःतेनान्ननिष्पत्तिस्ततोभूतानितेषांपुनर्वेदाध्ययनादिरित्येतच्च·
क्रशब्दार्थइतिव्याख्येयं ॥१६॥ तत्किमिदंकर्मप्रजापत्युक्तंनकर्तव्यमेवनक्रिय
तएवपरमफलार्थिनेत्याह यस्त्वात्मरतिरे[illegible]वेति

जिस हेतु ईश्वर की प्रेरणासे मनुष्य सकल पुरुषार्थ सिद्ध होने के अर्थ इस संसार चक्रमे आय उक्त कर्म रूप चक्रमे प्रवृत्त हैं इससे कर्म न करने से मनुष्य जन्म ही व्यर्थ हैं यह कहते हैं किं ईश्वर की आज्ञा रूपवेदसे पुरुष यज्ञ कर्ममे प्रवृत्त होते जिससे मेघ और मेघसे। अन्न अन्नसे प्राणी और प्राणियों से फेरि कर्म की प्रवृत्ति होती यह चक्र हैं अतएव जो ईश्वर साधर्न कर्म्म नहीं करते केवल इन्द्रियों से विषय भोगमात्र करते उनका वृथा जीवन हैं १६

दोहा॥

ऐसें वर्तित चक्रको वर्तत है नहि जोय अघआयु इंद्रि बाग है वृथाजीवति सोय १६॥

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः आ
त्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते १७

शांकरभाष्यं

एवं स्थिते किमेवं प्रवर्तितं चक्रं सर्वेणानुवर्त्तनीयमाहोस्वित् पूर्वोक्त
कर्म्मयोगानुष्ठानोपायप्राप्यामात्मविदां ज्ञानयोगेनैव निष्ठामात्मविद्भिः
सांख्यैरनुष्ठेयामप्राप्तेनैवेत्येवमर्थमर्ज्जुनस्य प्रश्नमाशंक्य स्वयमेव।
वा शास्त्रार्थस्य विवेकप्रतिपत्त्यर्थमेव चैतमात्मानं विदित्वा निवृत्तमिथ्या
ज्ञानाः सन्तो ब्राह्मणा मिथ्याज्ञानवद्भिरवश्यं कर्त्तव्येभ्यः पुत्रैषणादिभ्यो व्यु
त्थायाथ भिक्षाचर्यं शरीरस्थितिमात्रप्रयुक्तं चरन्ति न तेषामात्मज्ञान।
निष्ठाव्यतिरेकेणान्यत्कार्यमस्ति इत्येवं श्रुत्यर्थमिह गीताशास्त्रे प्रतिपाद
यिषितमाविष्कुर्वन्नाह भगवान् यस्त्विति यस्तु सांख्य आत्मज्ञाननिष्ठ आ
त्मरतिः आत्मन्येव रतिर्न विषयेषु यस्य स आत्मरतिरेव स्याद्भवेत् आ
त्मतृप्तश्च आत्मनैव तृप्तो नान्नरसादिना स मानवो मनुष्यः संन्यासी आ
त्मन्येव च सन्तुष्टः सन्तोषो हि बाह्यार्थलाभेन सर्वस्य भवति तमनपेक्ष्या
त्मन्येव च सन्तुष्टः सर्वतो वीततृष्ण इत्येतत् य ईदृश आत्मवित्तस्य का
र्यं करणीयं न विद्यते नास्तीत्यर्थः १७

आनंदगिरिकृतटीका २

वृत्तमर्थमेवं विभज्यानन्तरश्लोकमाशंकोत्तरत्वेनावतारयति एवमि
ति अर्ज्जुनस्य प्रश्नमित्येवमर्थमाशंक्याह भगवानिति सम्बन्धः ननु तेषां
शङ्कानावकाशमासादयता नात्मज्ञेन कर्तव्यं कर्मेति बहुशो विशेषितत्वा
दित्याशंक्याह स्वयमेवेति किमर्थं श्रुत्यर्थः स्वयमेव भगवाननुप्रतिपाद
यति इत्याशंक्याह शास्त्रार्थस्येति गीताशास्त्रस्य ससंन्यासं ज्ञानमेव मुक्ति
साधनमर्थो नार्थान्तरमिति विवेकार्थमिह श्रुत्यर्थं संक्षिपति कीर्त्तयतीत्य

र्थः तमेवव्युत्पत्त्यर्थं संक्षिपति यज्ञमिति सिद्धत्वेदात्मवेदनमनर्थकं नहि
व्युत्थानादीन्याशंक्यापातिकविज्ञानफलमाह निहृतेति ब्राह्मणग्रहणं
तेषामेवव्युत्थानेमुख्यमधिकारित्वमितिज्ञापनार्थं क्लेशात्मकत्वादेषणा
नांताभ्योव्युत्थानंसर्वेषां स्वाभाविकत्वादविधित्सितमित्याशंक्याहमिथ्येति
भिक्षाचर्यंचरन्तीतिवचनंव्युत्थानविरुद्धमित्याशंक्याह शरीरेति नहितद्व
देवतेषामग्निहोत्राद्यपिकर्तव्यमापद्येतेत्याशंक्याव्युत्थायिनामाश्रमधर्म
वदग्निहोत्रादेरनुष्ठापकभावान्नैवमित्याह नतेषामिति यथोक्तंव्युत्पत्त्यर्थ
मस्मिन् गीताशास्त्रेपौर्वापर्येण पर्यालोच्यमानेप्रतिपादयितुमिष्टंप्रकटी
कुर्वन्कर्तव्यमेवकर्मजीवनेतिनियमेज्ञानयोगेनसांख्यानामितिचोपप
रिहारमुपदर्शयतिशस्त्वमिति आत्मनिष्ठस्यविषयसंगराहित्यंदृष्टंतद
नात्मज्ञेनजिज्ञासुनाकर्तव्यमितिमत्वाह यस्त्वात्मरतिरिति किंचात्मज्ञस्य
ज्ञानेनात्मनैव परितृप्तत्वान्नान्नपानादिनासाध्यातृप्तिरिष्टानेनविद्यार्थि
नासंन्यासिनापिनान्नरसादावासक्तिर्भोक्ताकर्तव्येत्याह आत्मतृप्तइति कि
ञ्चात्मविदः सर्वतोवैतृष्ण्यंदृष्टंतदनात्मविदाविद्यार्थिनाकर्तव्यमित्याह
आत्मन्येवेति रतितृप्तिसन्तोषाणांमोदप्रमोदानन्दवदवान्तरभेदः अथवा
रतिर्विषयासक्तिः तृप्तिर्विषयविशेषसम्पर्कजंसुखंसन्तोषोऽभीष्टविष
यमात्रलाभाधीनंसुखसामान्यमितिभेदः नन्वात्मरतेरात्मतृप्तस्यात्म
न्येवसन्तुष्टस्यापिकिंचित्कर्तव्यंमुक्तये भविष्यतीति नेत्याह यईदृशइति १७

श्रीधरी टीका २

तदेवं न कर्मणामनारम्भादित्यादिना अज्ञस्यान्तःकरणशुद्ध्यर्थं कर्म
योगमुक्त्वाज्ञानिनः कर्मानुपयोगमाह यस्त्विति द्वाभ्यां आत्मन्येवरतिः
प्रीतिर्यस्य सः ततश्चात्मन्येवतृप्तः स्वानन्दानुभवेन निर्वृतः अतएवात्म
न्येव संतुष्टो भोगापेक्षारहितोयस्तस्य कर्तव्यंकर्मनास्तीति १७

पिशाचभाष्य ६

कर्म्मण्यनधिकृतस्यज्ञानिनःकर्मनकर्तव्यमित्याहयस्त्विति सांख्यआत्मज्ञा
ननिष्ठःआत्मरतिःआत्मनिरतिर्यस्यसआत्मरतिः आत्मन्येवतृप्तःनान्नरसादि
ना आत्मन्येवचसंतुष्टःसंतुष्टोवास्यादर्थलाभेभवतिनमनपेक्ष्यआत्मन्येवच
संतुष्टःआत्मविदस्तस्यकार्यंकरणीयंनविद्यते १७

रामानुज्यभाष्य ५

असाधनायत्तात्मदर्शनस्यमुक्तस्यैवमहायज्ञादिवर्णाश्रमोचितकर्मण्यनारंभइ
त्याह यस्तुज्ञानयोगकर्मयोगसाधननिरपेक्षः सएवात्मरतिरात्माभिमुख आ
त्मनैवतृप्तोनान्नपानादिभिरात्मव्यतिरिक्तैःआत्मन्येवसंतुष्टोनान्यत्रव्यंजनगी
तवादित्रनृत्यादौधारणपोषणभोगादिकंसर्वमात्मैवयस्यतस्यात्मदर्शनायक
र्तव्यंनविद्यतेस्वतएवसर्वदादृष्टात्मरूपत्वात् १७

अभिनवगुप्त ९

आत्मरतेस्तुकर्मेन्द्रियव्यापारतयैवकुर्वतःकरणाकरणेतुसमता १७

परमार्थप्रपा ७

एवंब्रह्मस्वमतेनिरूप्येदानीमनुत्पन्नज्ञानंभवंतंप्रत्येवायंकर्मोपदेशोनोत्पन्नज्ञा
नंप्रतीत्याह यस्त्विति १७ यस्तुत्वात्मरतिःआत्मन्येवरतिःप्रीतिर्यस्यतथाआत्म
न्येवतृप्तः[अवाप्त]सकलकामत्वात् अतएवआत्मन्येवसंतुष्टःभोगापेक्षारहितःतस्ये
हकार्यंकर्तव्यंनविद्यते १७

वनमाली ८

असंप्रज्ञातसमाधिनिष्ठोवाव्युत्थानुसंधानशून्यःसएवंभूतंचक्रमननुतिष्ठन्नपिन
प्रत्यवैतीत्याह यइतिरतिर्दर्शनादिहेतुस्तृप्तिरलंधीःतृप्तिजनकंसुखंसंतो
षःआत्मनःसकाशाद्रतिर्यस्यसःआत्मदर्शनसुखवानित्यर्थःएवशब्देनान्यस्मा
त्स्रक्चवनितादितोरतिर्निरस्यतेआत्मतृप्तःआत्मनापरमात्मनाभक्त्यादिनाप्रसादिते
नतृप्तःकृतोस्यतृप्तिरलंबुद्धिस्तत्राह आत्मन्येवचसंतुष्टःनान्यदेतस्यसंतोषहे
तुरित्यर्थःभगवदपरोक्षज्ञानितयैवासंप्रज्ञातसमाधिर्भवतीतिज्ञापयितुमान

वइत्युक्तं मनुअवबोधने इति धातोर्भावे वप्रत्ययः ततो मत्वर्थीयो ऽर्शआदित्वात्
चूनतः प्रज्ञादित्वात्स्वार्थेण तथैवासंप्रज्ञातसमाधिस्थस्य कार्यं न विद्यते भक्त्या
दिनेश्वरप्रसादस्ततः परमाह्लादिकायाजीवानंदाह्लादिकायाश्चाविद्यायानिवृ
त्तिः ततश्चाविर्भूतपूर्णानंदस्य जीवस्य स्वरूपानंदातिरिक्ते स्रक्वनितादिसंगोत्प
न्नेवैषयिके तुच्छानंदे नेच्छादिकं न वा तत्प्राप्त्यर्थे किंचिल्लौकिकं वैदिकं वा कर्तव्यं वि
द्यत इति भावः १७

ऊतस्मैवैजयन्ती ५

एवमज्ञानिनो ममन्दोऽन्तःकरणशुद्ध्यर्थं कर्मण्यधिकारो भवतीत्युक्त्वा यस्त्वंद्वि
यारामः कर्म न करोति स महाज्ञानी नित्यसंसारी भवतीत्युक्तमिदानीं योमुक्तो
लब्धात्मदर्शनो भवति तस्य वर्णाश्रमोचितमहायज्ञाधिकर्मकरणे प्रेरणाना ।
स्तीत्याह द्वाभ्याम् यस्त्विति तु शब्देन विशुद्धेन गरुडजयध्वजयादीनां नित्यमु
क्तमुक्तानां कर्माधिकारो नास्ति यदि ते यत्किंचित् लीलाविग्रहादिधारणादिरूप
कं कर्म कुर्वन्ति तत्तु भगवदिच्छायत्तात्मेच्छाधीनेनैव न तु शास्त्रकृतगुणकर्मादि
वशेनेति सूचितम् मुक्तत्वधर्मावच्छिन्ने नैकवचनं न विरुद्धं यः कश्चिदनिर्दि
ष्टः मानवो मनुवंशोद्भवो मनुष्यः स्यात् तस्य कार्यं कर्म न विद्यते नास्ति ननु धर्मावना
यावतीर्णस्य मनोः कुले जातः सन्नपि यदि कर्म न करिष्यति तर्हि जगत्सु क्रमभव
र्तनं न स्यादिति चेत्तत्र यदि त्वसौ ऽयं कर्माधिकारी भूत्वा न कुर्यात्तर्हि वैयंतव शं
कास्यात्त तु नास्त्येवेत्याह इहेतुगर्भितविशेषणत्रयेण यस्त्वात्मरतिः आत्मनि मपि
परमेश्वरे रतिः प्रीतिर्यस्य न तु देहादौ तथा सः सर्वमेव प्राप्तज्ञान इत्यर्थः अतो हे
तोर्ज्ञानप्राप्त्यर्थं मंतःकरणशुद्धिनिमित्तं कर्म न करोतीति भावः ननु केवलमा
त्म विषयिण्या प्रीत्येवास्य कर्मानधिकारता न स्यात् किं तु तदानद्विषयिणी तृप्तिर्भ
वेत्तदेवतदर्थं कर्म कर्तव्यमेव यथा भोजनादौ प्रीतिर्जाता पि तृप्तिं विना सुखं न
स्यात्तथैवेति चेत्तत्राह आत्मतृप्त इति आत्मनि तृप्त आत्मातृप्तः आत्मव्यतिरिक्तेष
ड्रसयुक्तेन्नपानादिरूपे भोजने न तृप्तः किं तु केवलमात्मन्येव तृप्तः आत्मतृप्त
त्वादपि कर्मास्य न कर्तव्यमस्तीत्याशयः नन्वात्मतृप्तस्यापीतरविषयाभिलाषो
जातस्ते त्तल्लब्धये स कथं न कर्म कुर्यादिति चेत्तत्राह आत्मन्येव च संतुष्ट इति आ

ऽरुष्टो मानवो मनोरपत्यं

धर्मनाशेन

यत्कृष्टोऽसामान्यवाचकानिषेधात्तुकेःपवनादृष्टे
+कर्माधिकारानधिकारि प्रकरणसात् ५

यद्वा य एवात्मरति रात्मना सह रतिः क्रीडा यस्य नान्येन स आत्म
रतिः स्यात् पतन् क्रीडन्सह बलेणेत्यादि श्रुतेः स एव नरात्मना त्र
लेण सहतृप्तः स्यात् आत्मन्येव च सन्तुष्टः स्यात् स एव मानवः स्यात्
न नवा अनवा मा रमा अनवा यस्य सः यथा प्राकृत पुरुषो वृद्धां स्त्रियं
प्राप्यानन्दं न प्राप्नोति तथा सोप्यणिमादिषडैश्वर्यदात्रीमपि रमां
प्राप्य नाह्लादं प्राप्नोति यतस्तस्या अप्यष्टसिद्ध्यादिप्रापकत्वेन बन्ध
कत्वमित्यर्थात् तस्यैव मानवस्य कार्यं कर्म न विद्यते नास्ति य आत्म
तृप्तो मानवः स्यात्तस्यैवात्मरतिः स्यात्त्र पुनस्तस्यैवात्मनि विषये कार्यं न
विद्यते यतः सन्तुष्टः सम्यक् तुष्टो ज्ञानादिसाधनसंपन्नत्वेन तत्साध
नकर्माभिलाषशून्यो मुक्त इत्यर्थ एवमन्वयो ज्ञेयः ननु अस्मिन्पद्ये मु
क्त इति पदं भगवता नोक्तं प्रत्युत मानव इति विशेषणपदेन प्राकृतदे
हवान्मनुष्य एवोक्तो भवता मुक्त इति पदं कुतो ज्ञायते यतस्त्वदैरेवं व्या
ख्या क्रियत इति चेन्न निरुक्तिद्वारेण चतुर्णामपि पदानां मुक्तार्थपरत्वा
त्तत्रात्मरति मानवयोः पदयोः कतिचिदपि निरुक्तीरहं वक्ष्यामि त्वं शृ
णु मानं गर्वं वधितवानिति मानवः अन्येष्वपि दृश्यत इति ड प्रत्यया
न्तो गर्वशून्य इत्यर्थः यद्वा मानं प्रमाणं वहति प्राप्नोतीति मानवो ड प्र
त्ययान्तः प्राप्त प्रमाण इत्यर्थः यद्वा मानेन प्रमाणेन वाति गच्छ
तीति मानवः शास्त्रमार्गगामीत्यर्थः यद्वा मीयते अनेनेति मानं प्रमा
णरूपं वेदं परिस्थापयतीति मानव आचार्यादिस्वरूपेण वेदमार्गप्रवर्त
क इत्यर्थः यद्वा मायामातो मायातो न वो यः स मानवः अष्टधाभिन्नाया
अचेतनरूपाया अपराख्यायाः प्रकृतेर्न वः नवमः पराख्यानश्चेतनरू
पः प्रकृतिसंबंधरहितो मुक्तजीव इत्यर्थः यद्वा अनितिप्राणानेकरोती
ति अनः एवायच मायारमायाया अनो जीवनः श्रीकृष्णं लवाति ज्ञाना
ति गच्छति वा मानवः प्राप्तभगवत्स्वरूपो मुक्त इत्यर्थः यद्वा मन्यते ऽने
नेति मानं ज्ञानं वहति प्राप्नोतीति मानवो ज्ञानीत्यर्थः यद्वा मानं संमानं
वहति प्राप्नोतीति मानवः सर्वैर्ब्रह्मादिदेवैरप्यादरणीय इत्यर्थः आ
त्मरतिः आत्मने भगवदर्थं रतिः क्रीडा यस्य सः यानासनपादुकातु
यभूषणांबरमालाद्याकारो धारणरूपक्रीडायानित्यर्थः प्रकृति

मेडेलेपिभगवद्दिव्ययानतद्रूपधारणमितित्तेयं यद्वा आत्मनःपर॰
मात्मनोरतिःप्रीतिर्यस्मिन्सः यद्वा आत्मनःक्रीडायस्मिन्नरमायाम
पितथानान्येषुकावार्तेत्यर्थः यद्वा आत्मनःसकाशाद्रतिःप्रीतिः
क्रीडावायस्यनान्यस्मात्सः यद्वा आत्मनःपरमात्मनोरतिःप्रीतिर्य
स्मिन्सः यद्वा आत्मनःक्रीडायस्मिन्नरमायामपितथानान्येषुकावा
र्तेत्यर्थः यद्वा आत्मनःसकाशाद्रतिःप्रीतिःक्रीडावायस्यनान्यस्मा
त्सः यद्वा आत्मनःपरमात्मनोरतिःक्रीडायस्मैसः भगवतोविविधा
क्रीडाभक्तार्थमेवनान्यप्रयोजनायेत्यर्थः यद्वा आत्मनःक्रीडायस्मा
त्सःनान्यस्मादित्यर्थः यद्वा आत्मनोरतिःप्रीतिर्यस्मैयस्माद्वासभ
गवान्प्रीतिहेतुरित्यर्थः एवंविधाभिर्निरुक्तिभिर्युक्तएवबोध्यते
तथा आत्मत्वमोपि आत्मनात्वम आत्मनित्वम आत्मनेत्वम आत्मा
त्मेत्येवनयस्मैयस्माद्यस्मिन्वाइत्यादिभिःसिद्ध्यति आत्मन्येवचस
त्वप्रत्ययस्यतुभिन्नपदत्वेननिरुक्त्यभावात्सत्वप्रत्ययेनैवयुक्तत्वं
सिद्ध्यतिननिरुक्तपदेतिभावः ९५ ॥ इतिजन्मैवजयन्तीश्रुतिः

त्मनिपरमपुरुषेएवसंतुष्टस्सम्यक्तुष्टः कदाचिदपिकस्मिंश्चिदपिवस्तुन्य
भिलाषोस्यनोत्पद्यतेऽभिलाषोत्पत्त्यभावेकर्मकरणस्याप्यभावइतिभावः १७

मधुसूदनी १७

यस्त्विंद्रियारामोनभवति परमार्थदर्शीस एवंजगच्चक्रप्रवृत्तिहेतुभूतंकर्मान
नुतिष्ठन्नपिनप्रत्यवैतिकृतकृत्यत्वादित्याहद्वाभ्यां ॥ इंद्रियारामोहिस्रक्चंदन
वनितादिषुरतिमनुभवति मनोज्ञान्नपानादिषुतुष्टिंच पुत्रहिरण्यादिलाभे
नरोगाद्यभावेनचतुष्टिं उक्तविषयाभावेरागिणामरत्यतुष्टिदर्शनात्
रतितुष्टियोर्मनोहरविशेषाः सापिसिद्धाः लब्धपरमानंदस्तुद्वैतदर्शनाभा
वादतिफल्गुत्वाच्चविषयसुखंनकामयते युक्तंयावानर्थउदपाने इत्यत्र अ
तोनात्मविषयकरतितुष्टिसंतुष्ट्यभावादात्मानंदमद्वयंसाक्षात्कुर्वन्नुपचारा
देवमुच्यते आत्मरतिरात्मतृप्तश्चात्मसंतुष्टइति तथाचश्रुतिः आत्म
क्रीडआत्मरतिक्रियावानेषब्रह्मविदांवरिष्ठइति आत्मतृप्तश्चेतिचकारएवकारा
नुकर्षणार्थः मानवइतियःकश्चिदपिमनुष्यएवंभूतःसकृत्यो नतुब्राह्मणत्वादि
प्रकर्षेणेतिकथयितुं आत्मन्येवचसंतुष्टइत्यत्रचकारःसमुच्चयार्थः यएवं
भूतस्तस्याधिकारहेत्वभावात् किमपिकार्यंवैदिकंलौकिकंवानविद्यते १७

सदानंदी

यस्तुनात्मींद्रियारामस्तत्त्वदर्शीसकर्मतत् अकुर्वन्नपिनैवासौप्रत्यवैतिकथंच
न १ रतिंयातींद्रियारामःस्रग्गंधवनितादिषुतुष्टिंयात्यन्नपानादौतुष्टिंपुत्रादि
लाभतः २ विषयाणांयथोक्तानामभावेदुःखमेतिच साक्षात्कृतनिजानंदो
द्वैतदृष्टेरभावतः ३ अतितुच्छतयाभोग्यसुखंनेच्छतितत्त्ववित् तथोक्तंश्री
वसिष्ठेननिर्वाणस्योत्तरेदले ४ स्वभावोदृश्यवैरस्यमेवंतत्त्वविदोनिजः दृश्यास्प
दनमेवाहुरनंततत्त्वमुत्तमाः ५ अनुत्तमाप्येवविषयाःस्वदंतेनतुतत्त्ववित् नहि
पीतामृतास्वादःस्वदतेकटुकांजिकं ६ मनोहरविशेषाहिस्यूरतितुष्टितुष्ट
यः सापिसिद्धाअतोनात्मधर्मास्तेषुकथंबुधः ७ सम्यगात्मसुखेमग्नोगलितानात्म
धीःस्वतः आत्मन्येवसुखांभोधौस्वभावादेवतत्त्ववित् ८ रतिंतुष्टिंचतुष्टिंच
यात्यसौसुखसागरः अतोनात्मनिरत्यादेरभावादात्मतत्त्ववित् ९ साक्षात्कुर्व
न्यदानंदमुपचारतयोच्यते आत्मरतिरात्मतृप्तश्चात्मसंतुष्टइत्यपि १० एवंभूतो

मनुष्योयःकृतकृत्यःसएवहि वर्णादिनियमोर्नत्रफलेमानवशात्मनः ॥
पंभूतस्यकर्तव्यंवैदिकंलौकिकंमनाक् नविद्यतेभ्रांतिनाशात्स्थितस्यात्मन्यव
स्थिति १२ २७ नीलकंठी १२

एवमीश्वरेणवेदयज्ञपूर्वकंजगच्चक्रंप्रवर्तितमच्चैरधिकृतैरनुवर्तितव्य
मित्युक्तं अस्याननुवर्तनेचमहान्प्रत्यवायउक्तः सब्रह्मविदमपिस्पृशेदि
तिसंभावितामाशंकांपरिहरति यस्त्विति आत्मन्येवरतिःप्रीतिर्यस्यनतु ।
स्त्र्यादौसतथाननुआत्मनिप्रीतिःप्राणिमात्रस्यानौपाधिकीअस्तिअतस्तदर्थ
त्वेनैवस्त्र्यादिष्वपिप्रीतिर्भवतीत्यतउक्तं आत्मतृप्तइति आत्मनैवपरमानंदरू
पेणतृप्तोनमिष्टान्नादिना ननुमंदाग्निरपिस्त्र्यादौनरमतेनापिमिष्टान्नेनतृप्य
ति अतउक्तंआत्मन्येवचसंतुष्टइति मंदाग्निर्हिधातुवृद्धिजाठरोद्दीपनेचका
मयमानऔषधाद्यर्थमितस्ततोधावतिनत्वात्मन्येवतुष्यति विद्वांस्तुरतितृ
प्तितुष्टीरात्मनैवानुभवतिनस्त्र्यन्नधनादिभिरितितस्यकार्यंकर्तव्यंकिमपिना
स्तिक्रियाप्राप्यस्यकस्यचिदप्यर्थस्याभावात् १७ ॥

आनन्दीटीका

स्फुटीकृतात्मतत्त्वस्य जीवन्मुक्तस्य तावत्कर्माणि यावच्छरीरयात्रानु
वर्तन्ते आत्मैकप्रतिष्ठस्य त्वभ्यर्णे शरीरपातस्य परित्यागसर्वकर्म
णस्तानि भ्रश्यन्त एवेति प्रमाणप्रमितमुपदेशमाह इह खलु यस्य
कस्यचिज्जन्तोरात्मेव स्वात्मानुमिच्छतः तस्मायेनेरतिर्जायते ततः
आत्मस्य तस्य भोगेन तृप्तिः तृप्तौ तु जातायां सन्तोषः सेष्टायां निवृत्तिः
त्मा॰ परशृंगतस्य तस्य सदा सन्निहिते स्वात्मन्येव यस्य रतिस्तृप्तिस्सन्तोषः तस्य
विदितवेद्यस्यात्मतत्त्वस्य किमप्यन्यत्करणीयं श्रेयो नास्ति तस्मै
वेभूतस्य परमात्माभेदात्मनस्य कार्यमतः परं किमप्यवशिष्टं करणी
यं नास्ति इयमेव फलावस्था ज्ञानकर्मसमुच्चयानुष्ठानस्य १७॥

एवं सहृतिलक्षणधर्माधिकृतस्योपदेष्टुपस्यसंसा निवृत्तिलक्षणस्य माज्ञस्य तिष्ठिमवदेर

रामकण्ठीटीका

विण: आत्मैकनिष्ठाकर्मपरित्यागरूपपक्षं प्रतिपादयेदानीं पिशुद्धात्मानां प्रतिपादयितुमाह +

\+ इह सर्वस्य कस्यचिज्जन्तोरात्मेव स्वयमात्मानुमिच्छतस्तस्मायनभूतत्वशो
ह्यादौ विषये रतिः रागो अभिलाषो जायते ततः श्रयत्वविशेषेणतस्मि
न्नात्मे सति तृप्तिः सम्पूर्णेच्छतान्ततः सन्तोषोऽभिकेत्वानिवृत्तिरिष्ये
ते रतितृप्तिसन्तोषाः सदासन्निहिते निरुत्तरानन्दनिर्भरस्वात्मन्येव
प्रतिष्ठिताः तस्य तद्व्यतिरिक्तप्रापणीयवस्त्वन्तरनिरपेक्षणीयस्या
त्मस्वार्थसाधनभूते कार्यं करणीयं न विद्यते न सम्भवति १७॥

लासिकी [illegible]टीका

तनु कस्य विदुषो विदो पितान्तोकर्षेणक्षीणसंकल्पत्वाच्छास्त्रीयक
र्मो: कर्तृणाम्यावाप्रहसक्तिनेत्याह यस्त्विति आत्मैकग्राम्यमिष्टेऽभि
लाषो रतिः आत्मेष्टसम्पूर्णोच्छतानृप्तिः अभिकांक्षानिवृत्तिः सन्तोषः
यस्यैते रतितृप्तिसन्तोषाः सदासन्निहिते स्वात्मन्येव प्रतिष्ठिता न वि
षयेषु तस्य ब्रह्मविदो वरिष्ठस्य कार्यमवश्यकर्तव्यं न विद्यते ईदृशेऽव
स्थापाकतनतत्कृत्यं तेन तु ब्राह्मणत्वादिनेमतोमानवधर्मकमम् यतुक्त
मागमे [illegible] जलेहिमवृत्तो वेदशास्त्रवज्ञागमास्त्रिये नास्मे वतस्य
कर्तव्यं तस्यापक्षिमजन्मतेति तथा च कुलार्णवे उत्पन्नसहृज्ञानेन
स्तत्त्वज्ञानरतः प्रिये सर्वसंकल्पसन्न्यासी सविद्वान्कर्म सन्त्यजेत्।
इति १७॥

नकर्मणामनारंभादिमादिनाश्रुतस्यांतःकरणशुद्ध्यर्थं कर्मयोग।
मुक्त्वाज्ञानिनः कर्मानुपयोगमाह यस्त्विति तुपुनः यः आत्मज्ञा
ननिष्ठोमानवः आत्मरतिरेवस्यात् आत्मन्येवरतिः आत्मरतिःउ
तपुनः आत्मतृप्तः स्वात्मप्रबोधेनैवतृप्तः नतुअन्नरसादिनाचपुनःआ
त्मन्येवात्मलाभेनैवसंतुष्टः नवाह्यैर्धनवर्णरत्नादिना तस्यपर
मार्थरतेः कार्यंकर्माधिकारोनविद्यते १७

रणवीरसमिद्बोधिनी॥

एवंपरमेश्वराज्ञामकुर्वतः प्रत्यवायप्रसक्तात्तदनुपालकस्यमा
हात्म्यमाह यस्त्विति तुशब्दोविशेषेयः पुनर्मानवः मनुजांत
त्वादस्वज्ञातिकः आत्मनिनिश्चयात्मिकायांबुद्धौरतिःप्रीतिर्य
स्यसतादृशएवस्यात् आत्मनार्थेयःतृप्तःसिद्धासिद्धिविषयवि
क्षेपाभावेनैवतृप्तश्चस्यात् आत्मनियत्नेकर्मेंद्रियव्यापारेएव
संतुष्टश्चस्यात् आत्मायत्तोधृतिबुद्धिःस्वभावोब्रह्मवर्ष्मचेत्यम
रः तस्यवीरस्यकार्यंकर्तव्यजातंनकेनापिविद्यते विचार्यंते
विदविचारणेअस्यधातोः कर्मणितङ्रूपं प्रविश्यकार्यंवा
ध्यैरलब्धंभोग्यंवानविजेष्यतीतिभावः यद्वातस्यकार्यंकर्त
व्यंयत्तदनीदृशोनशाकृतेनकेनापिनविद्यतेनप्राप्यते क
र्तुंनशक्यंयत्तदनीदृशोनशाकृतेनकेनापिनविद्यतेनप्राप्यते
कर्तुंनशक्यतइति विद्लृलाभेअस्यस्मात्कर्मणितङ् यद्वा तस्य
कार्यंपरैर्नविद्यतेज्ञायते तद्वास्यप्रभवः सुजेयइति वि
दज्ञानेअस्यकर्मणिरूपं यद्वा तस्यकार्यंहिंसादिजन्यंपापं
नविद्यतेनास्तिईश्वराज्ञयैवकर्मणिप्रवृत्तेरिति विदसत्तायां

मित्यस्यकर्तरिरूपं बुद्धिपूर्वकर्मारंभधैर्येणाविक्षेपेनिवार्य
प्रारब्धप्रज्ञावादोसावथानः कर्मयोगी प्रवर्षपंविजयभागी
परलोकेपापसंबंधाभावाच्चसुखभोगीभवेदित्युभयलोक
सिद्धेरचिंत्यमाहात्म्योयमितिभावः तथाचश्रुतिः आत्मक्री
ड आत्मरतिः क्रियावानेषब्रह्मविदांवरिष्ठइति आत्मनिनि
भृयात्मिकायांबुद्धौक्रीडतिवारंवारमभ्यासात् आत्मरतिर्धै
र्येत्मः क्रियावान्युद्धादिकर्मानुतिष्ठन् ब्रह्मविदांयत्नर्वेदत
त्वज्ञानांमध्येवरिष्ठः श्रेष्ठइतिश्रुत्यर्थः १७॥

मधुभाष्य॥

यस्त्विति रमणंपरदर्शनादिनिमित्तंसुखं रतिरन्यथालं
बुद्धिः संतोषस्तज्जनकंसुखं संतोषस्यनिकारणमित्यभि
धानात् परमात्मदर्शनादिनिमित्तंसुखंप्राप्तः प्रत्यक्षसंवी
त्मनालंबुद्धिः मदृच्छालब्ध तेनैवान्यथालंबुद्धिरितिदर्शि
यति आत्मन्येवचसंतुष्टइति तस्यएवसन्संतुष्टइत्यर्थः ना
न्यत्किमपिसंतोषकारणमित्यवधारणं आत्मनात्मनः न
आत्मन्यलंबुद्धिरुक्ता तदुक्तंविवेकचवयंतनविलक्षणमञ्ज
मंश्लोकविकमैरिनादिप्रयोगात्सिद्धं अध्यात्मरत्त्वगतिकारा
तिः आत्मरतिरेवेत्यवधारणादसंप्रज्ञातसमाधिस्थस्येव
कार्यंनविद्यते स्थितप्रज्ञस्यापिकार्यादेहादिर्स्मयते यदा स्व
यमीममनुष्यः स्वादिसवैरपेवितनेतिवचनाच्चपुंवरतेय अ
न्यदान्यरतिरपिईश्वरस्वयम्भवति नचतथालंबुद्धिमात्रमस्मिं

प्रात्मन्यस्मद्रतिरित्यागभिधानात् कस्मिन् प्रहः कालावच्छेदेऽपि
वाच्यं प्रसिद्धः यो भुंक्ते स्तेन एवेत्यादित्याद्रो अतो संप्रज्ञात स
माधावेवैतत् मानव इतिस्तानि न पुंवा संप्रज्ञात समाधिर्भ
वतीति दर्शयति मनुष्य वबोधन इतिधातोः परमात्मरति
श्चात्र विवक्षिता विस्त्रावेव रतिर्यस्य क्रियात स्येव नास्तीदी
तिवचनात् तस्य कर्मकालेवक्तव्योदमिति के विरुद्धत्वका
तत्सुतावान्मरत्यथिक समोवार्थो नास्ति नच संध्याघटकृते
कश्चिद्दोषोस्ति नचैतस्य सर्वभूतेषु कश्चिदर्थयोजना
श्रयः अर्थो येन दर्शनादिना भवति सोर्थव्यपाश्रयः ज्ञान
मात्रेणाप्ययथाप्रियत्यवायो न भवति तदर्जुनस्यापि समसि
ति न तस्य कर्मोपदेशोपयोगोत्पन्न इवति ईषत्सारव्यानच्छ
सूवकेव भवति मदध्येद्वहत्यादिवत् यतो संप्रज्ञात स
माधेरेव कार्याभावः तस्मात्सर्वकर्मसमाचर १०॥

रतिर्नामांतःकरणस्थोन्यानासक्त्यापादको देवादिविषयो भावापरपर्यायश्शां
तिरसः कांताविषयश्शृंगाररसयोर्बीजभूतो मनोधर्मविशेष श्शांतदुक्तमलंका
रकैः रतिर्देवादिविषया व्यभिचारी तथांचितः भावः प्रोक्त इति देवादिवि
षया रतिः कारणकार्यसहकारिभिरंचितस्पर्यमाणवस्त्वंगतो भावो भ
क्तिःशांतिरिति च व्यपदिश्यते कांतादिविषयात्वेतेरेवांचितैर्व्यक्तः शृंगा
रः ततश्चात्मनि भावभक्तिशांत्यपरपर्यायस्थैत्यात्मरतिः अनेन बाह्यलाभ
निमित्तौ मनःशोकमोहौ निराकृतौ अभ्यासवाभावौ चैवकारेण स्फुटी
कृतः तथात्मतृप्त इति तृप्तिर्नामोदरावच्छिन्नाकाशसंचरणशीलप्रा।
णपेतिततदाकाशदेशपूरणजन्यो मनःपरिणामविशेषः एवं चात्मैवय
स्यतृप्तिर्नान्नपानाभ्यामित्यशनापिपासे निराकृते तथात्मन्येव च संतुष्टो
न शरीरस्य नारुण्यवादीर्घजीवितेवेतिजरामृत्युनिक्रम उक्तः। एवंभूतो यः
आत्मदर्शी तस्य कार्यकर्म न विद्यते न किंचित्करोतीत्यर्थः ननु विधिनिषेध
निषेधनेन कर्मकरणकरणे भविष्यत इत्याशंक्याह नैव तस्येति १८

113

कर्म्मणामनारम्भादित्यादि श्लोकसे अज्ञानी पुरुषके अन्तःकरण शु
द्धिके हेतु कर्म्म योग कहि अब ज्ञानी को कर्म्म नकरना दो श्लोकसे क
हते हैं कि जिसकी आत्मामे रतिकहे प्रीति औ आत्म आनन्द मे मगन त·
था आत्मासे सन्तुष्ट हैं और भोगादि से रहित हैं ऐसे जो तत्वज्ञानी उनको
कोई कर्म्मभी करना नहीं है १७

दोहा॥

आत्मरति मे रत सदा आत्मतृप्त नर जोय आत्महि मे संतुष्ट
है तिह कर्म न जाने कोय १७॥

नैवस्य कृतेनार्थो नाकृतेनेह कश्चन नचास्य
सर्वभूतेषु कश्चिदर्थव्यपाश्रयः १८

शांकरभाष्य १

किंचनैवेति नैवतस्य परमात्मरतेः कृतेन कर्म्मणार्थः प्रयोजनमस्ति अस्तु
तर्ह्यकृतेनाकरणेन प्रत्यवायाख्योनर्थो नाकृतेनेह लोके कश्चन कश्चिदपिप्र
त्यवायप्राप्तिरूपः आत्महानिलक्षणो वा नैवास्ति नचास्य सर्वभूतेषु ब्रह्मा
दिस्थावरान्तेषु कश्चिदर्थव्यपाश्रयः प्रयोजननिमित्तक्रियासाध्यो व्यपाश्रयः व्य
पाश्रयणं आलम्बनं कंचिद्भूतविशेषमाश्रित्य नसाध्यः कश्चिदर्थोऽस्ति येन त
दर्था क्रियानुष्ठेया स्यान्नत्वंएतस्मिन् सर्वतः संप्लुतोदकस्थानीये सम्यग्दर्श
ने वर्त्तसे १८

आनंदगिरिकृतटीका २

इतस्यात्मविदो न किंचित् कर्त्तव्यमित्याह किंचेति । अभ्युदयनिःश्रेयसयो
रन्यतरत् प्रयोजनं कृतेन सुकृतेनात्मविदो भविष्यतीत्याशंक्याह नैवेति प्र
त्यवायनिवृत्तये स्वरूपप्रच्युतिप्रत्याख्यानाय वा कर्म्म स्यादित्याशंक्याह नेत्या
दिना ब्रह्मादिषु स्थावरान्तेषु भूतेषु कंचिद्भूतविशेषमाश्रित्य क
श्चिदर्थो विदुषः साध्यो भविष्यति तदर्थं तेन कर्त्तव्यं कर्म्मेत्याशंक्याह नचेति
तत्राद्यं पदमादत्ते नैवेति तं व्याचष्टे नतस्येति आत्मविदः स्वर्गाद्यभ्युदयाना
यित्वं निःश्रेयसस्य च मामन्वान्नकृतं कर्म्मार्थवदित्यर्थः । आत्मविदा चेत् क
र्म्म न क्रियते तर्हि तेनाकृतेन तस्यानर्थो भविष्यतीति तत् प्रत्याख्यानार्थं तस्य
कर्त्तव्यं कर्म्मेति शङ्कितं तन्नेति द्वितीयपादेनोत्तरमाह नेत्यादिना अतो न त
त्रिहत्यर्थं कृतमर्थवदिति शेषः द्वितीयं भागं विभजते नचास्येति व्यपाश्रय
णमालम्बनं नेति सम्बन्धः पदार्थमुक्त्वा वाक्यार्थमाह किंचिदिति भूतवि
शेषस्याश्रितस्यापि क्रियाद्वारा प्रयोजनप्रसवहेतुत्वमिति मत्वाह येनेति त
र्हि मयापि ययोक्तं तत्त्वमाश्रित्य त्याज्यमेव कर्म्मेत्यर्जुनस्य मतमाशंक्याह न
त्वमिति १८ ॥

२
गी॰टी॰
का॰

115

श्रीधरीटीका ३

तत्रहेतुमाह नैवेति कृतेनकर्म्मणातस्यार्थःपुण्यंनैवास्ति नचाकृतेनकश्चनकोऽपिप्रत्यवायोऽस्ति निरहङ्कारत्वेन विधिनिषेधातीतत्वात् तथापितद्दोषां नमियंयदेतन्मनुष्या विदुरितिश्रुतेर्मोक्षे देवकृतविघ्नसम्भवात्तत्परिहारार्थं कर्मभिर्देवाःसेव्याइत्याशंक्योक्तंसर्वभूतेषुब्रह्मादिस्थावरान्तेषुकश्चिदप्यर्थव्यपाश्रयःआश्रयएवव्यपाश्रयःअर्थोमोक्षेआश्रयणीयोऽस्यनास्तीत्यर्थःविघ्नाभावस्यश्रुत्यैवोक्तत्वात् तथाचश्रुतिःतस्यहनदेवाश्चनाभूत्याईशतेआत्माह्येषांसम्भवतीतिह नेत्यर्थयमप्यर्थेदेवाश्चपितस्यात्मनत्त्वतस्य अभूत्यैब्रह्मभावप्रतिबन्धाय नेशक्नुवन्तीतिश्रुतेरर्थः देवकृतास्तुविघ्नाःसम्यग्ज्ञानोत्पत्तेःप्रागेव यदेतद्ब्रह्ममनुष्याविदुस्तद्देवेषांदेवानांनप्रियमितिश्रुत्याब्रह्मज्ञानेसेवाप्रियत्वोक्त्या तत्रैवविघ्नकर्तृत्वस्य सूचितत्वात् १८

पैशाचभाष्य ४

नैवतस्येति तस्यात्मरतेःकृतेनकरणेननार्थःप्रयोजनं एवंनाप्यकृतेनाकरणेनकश्चित्प्रत्यवायःनचास्यविदुषःकश्चिद्ब्रह्मादिस्थावरान्तेषुअर्थव्यपाश्रयःकार्यमाश्रयणीयंत्वतुकर्मण्यधिकृतः १८

रामानुजभाष्य ५

अतएवतस्यात्मदर्शनायकृतेनतत्साधनेननार्थः नकिंचित्प्रयोजनंअकृतेनात्मदर्शनासाधनेननकश्चिदनर्थःअसाधनायज्ञानात्मपूर्णनदर्शनत्वात् स्वतएवात्मव्यतिरिक्तसकलाचिद्वस्तुविमुखस्यास्यसर्वेषुभूतेषुप्रकृतिपरिणामविशेषेषुकायादिभूतेषुसकार्येषुनकश्चित्प्रयोजनतयासाधनतयावाव्यपाश्रयः एतत्तद्धिमुखीकरणायसाधनारंभःतद्धिमुक्तएव १८ ॥

अभिनवगुप्ती ६

अतएवनासौभूतेषु किंचिदात्मप्रयोजनमपेक्ष्यनिग्रहानुग्रहौकरोति १८

परमार्थप्रपा ७

तत्रहेतुमाह॥ ॥नैवेति॥ १८ तस्यात्मनिष्ठस्यकृतेनकर्मणाअर्थः

सुकृतेन तत्त्वाख्येनैव तथाकृतेन प्रत्यवायेनापि नैव निरहंकारत्वेन विधि
निषेधातीतत्वात् अत्र मन्त्रान्निरूपयति तदेतदृचाभ्युक्तं एष नित्यो महिमा ब्रा
ह्मणस्य न कर्मणा वर्धते नो कनीयान् तस्यैव स्यात्पदवित्तं विदित्वा न क
र्मणा लिप्यते पापकेनेति भाष्यं तत्र बृहदारण्यक निरूपणार्थं ऋक्कश्रा
त्वीयां कृतिसंमतित्वेन दर्शयति तदेतदिति तदेतत्प्रमेयं ऋचा ऋग्वे
दनाभ्युक्तमभिनिरूपितमस्ति तत्किं ब्राह्मणस्य ब्रह्मज्ञस्य त्यक्तैषणस्य एष
एष नित्यो महिमा शाश्वतं सामर्थ्यं तत्किं कृतेन कर्मणा न वर्द्धते उत्कृ
ष्टत्वं न प्राप्नोति नापि अकृतेन कनीयान् कनिष्ठो भवति एवं विधाय
तस्यैव पदवित्पदमात्मस्वरूपं तस्य वित् ज्ञानी भवति एवं तत्पदमा
त्मानं विदित्वा सत्कर्मणः पापकेन वा लिप्यते अथोपक्रांतं ऋक्कश्रा
त्वायामपि हृदा तष्टेषु मनसो जवेषु यद्ब्राह्मणः संयजन्ते सखायः
अत्राह त्वं विजहुर्वेद्याभिरोहब्राह्मणो विचरंत्युत्वे इमे ये नार्वाङ् परं
श्चरंति न ब्राह्मणासः न सुतेकरासः ते एते वाचमभिपद्य पापया सिरी
स्तंत्रं तन्वते अप्रजज्ञयः इति ऋग्वेदस्य रावणभाष्यं हृदा बुद्धिरूपेण म
नसा तष्टेषु निराकृतेषु मनसो जवेषु वृत्तिरूपेषु मनोवेगेषु मतस्य
यस्मात्कारणात् ब्राह्मणात् ब्राह्मणाः ब्रह्मज्ञाः सखायः सर्वभूतसुहृ
त्तमाः सन्तः सम्यक्प्रकारेण यजन्ते अत्र तयोर्योगं कुर्वते तत्रातस्तयोर्योगं क्रि
यमाणे किं भवतीत्याह अत्रेति अत्र अह त्वमिति पदविभागः अहेत्य
त्रानुस्वारलोपः छांदसः अह त्वं विजहुः अत्र योगेन भेदभावं नात्य
कुर्वंतः किंभूताः वेद्याभिर्विद्याभिर्ज्ञानवृत्तिभिरभ्यूहं ब्रह्मैवेत्येतत्प
दार्थप्रतीतिरूपेण ज्ञानब्राह्मणः सन्तः गतिनिर्धारणात्त्वेपकत्वे वि
चरंति अन्ये तु कर्मसक्तत्वेन ध्यानं न व्यवहरंति तदुक्तमागमेपि स्वाधि
ष्ठानगतं ज्ञात्वा शिवरूपं वह्निवज्ज्वलत् तत्कृत्यात्मरणेवनाद्यत्वमर्हतो
निवेदयेत् १ आत्मन्यात्मानमर्हंते भूत्वा सच्चित्सुखात्मकः स्थी
यते यत्किं यत्किं यत्काले सो तयोगः स्वतोस्वतोभुवेतीति इमे ये इ
ति इमे ये उक्तलक्षणाः कुरूपात्ते अर्वाङ् मनुष्यलोके न चरंति न
संभवंति न परः परश्चेति सकारांतमव्ययं परस्मिन्नु देवलोकेपि
नोत्पद्यंते कृताकृतैः कर्मभिः कृतपापलोके न गच्छंति किंत्वेतेव

अस्तीश्वतास्तिष्ठंतीत्यर्थः नतस्याप्राणउत्क्रामंत्यत्रैवसमवनीयं
नइतिश्रुतेः परेत्वब्राह्मणाःजातिमात्रविप्राः तथाहुतेषामंप्रभि
क्षतेऊर्वंतीतिकत्वकरणस्यपूर्वहेतुकरणासोयाज्ञिकास्तथानसंभ
वंति किंत्वतेउत्तमाधमगतिप्राप्नुवंत्येवेत्यर्थः अत्रैहृत्वमाह त
पतइति तस्यैतेनिरूपितप्रकाराब्राह्मणाःहुतेकरास्त्वावाचफल
प्रतिपादिकांवेदवाणीमभिपद्यज्ञात्वासिरीःसारणेःकाषिकतीर
इवभूत्वापापपाफलाशयातत्रयज्ञादिकंतन्वतेविस्तारयंति अत
एवश्रमजह्नयः नप्रहत्वाजगमिज्ञानेयघोते अपकृष्टजन्मानइ
त्यर्थः अथप्रकृततमनुसरामः तथाभूतरूपस्यसर्वभूतेषुब्रह्मा
दिस्थावरांतेषुकश्चिदर्थव्यपाश्रयाअर्थः प्रयोजनंतस्यव्यपाश्रयः
आश्रयःकश्चिदपिनदृश्यते परमार्थसाधनेभगवत्कृपापात्रस्य
तस्यविघ्नोपशांत्यर्थंकोप्याश्रयणीयोनास्तीत्यर्थः अतिरपित
स्यहननेदेवाश्चनासूत्याईशात आत्मास्येषांसभवतीति भाष्य तस्य
उरूपस्यअभूत्यैप्रनेस्वर्गायअपकारायदेवाईश्वराः नईशानेस
मर्थानभवंति ह्रियस्मात्कारणात्तदूरूपापषांदेवानांआत्मांत
र्यामीप्रयोजकोभवतिनहिप्रयोजकमंतराविघ्नकरणार्थेप्र०
हत्तिरित्यर्थः १८ ॥

116

[illegible]

॥४८॥ ॥

वनमाली ८

एतादृशस्याभ्युदयार्थं निःश्रेयसार्थं प्रत्यवायपरिहारार्थं वा कर्मनापेक्ष्य
त इत्याह तस्यात्मरतेः कृतेन कर्मणाभ्युदयरूपो निःश्रेयसरूपो वार्थः प्रयोजनं
नास्ति तस्य स्वर्गाद्यभ्युदयानर्थित्वात् ननु माऽस्तु यज्ञादौ प्रवृत्तिर्यज्ञादिफले
षु तस्येच्छाभावात् अस्तु फलाभावः प्रत्यवायपरिहारार्थं संध्योपासनादिकं नि
त्यनैमित्तिकं कर्मावश्यकं तत्राह नाकृतेनेति भावे निष्ठा अकृतेन नित्यनैमि
त्तिककर्माकरणेन कश्चन इह लोके गर्हितत्वरूपः प्रत्यवायरूपो वार्थो ना
स्ति तस्यात्मविदः सर्वेषु भूतेषु ब्रह्मादिस्थावरान्तेषु कोऽप्यर्थव्यपाश्रयः प्रयो
जनसंबंधो नास्ति किं विघ्नमाशंक्य कोऽपि क्रियासाध्योऽर्थो नास्तीत्यर्थः कृताकृ
तेनिःप्रयोजनेनैव कृतेन यत इति श्रुतेः तस्य ह न देवाश्च नाभूत्या ईशते आ
त्मा ह्येषां स भवतीति श्रुतेः देवा अपि मोक्षप्रतिबंधाय समर्था न भवं त्यतो नि
र्विघ्नत्वायापि देवाराधनरूपं कर्म नानुष्ठेयं हि यत एषां देवानामात्मा तत्पदा
नां कांक्षितत्वादात्मवत्प्रियो भवति अत इहामुत्र क्रियासाध्यप्रयोजनाभावान्न
तस्य किंचित् कार्यमिति भावः यद्वा तादृशोक्तानां भूमिकासप्तकभेदेन निरू
पितो वसिष्ठेन [illegible] ज्ञानभूमिः शुभेच्छा
ख्या प्रथमा परिकीर्तिता विचारणा द्वितीया स्यात्तृतीया तनुमानसा सत्त्वाप
त्तिश्चतुर्थी स्यात्ततो संसक्तिनामिका पदार्थाभाविनी षष्ठी सप्तमी तुर्यगा स्मृतेति
तत्र नित्यानित्यवस्तुविवेकादिपूर्वकफलपर्यन्तस्थायिनी मोक्षेच्छा प्रथमा
ततः श्रवणमननात्मिका द्वितीया ततो निदिध्यासनात्मिका तृतीया एतत्त्रित
यं साधनरूपं जाग्रदवस्थोच्यते जगतो भेदेन दर्शनात् ततो वेदान्तवाक्या

निर्विकल्पोब्रह्मात्मैक्यसाक्षात्कारश्चतुर्थीसत्वापावस्थोच्यते सर्वस्यापिमिथ्यात्वेन
स्फुरणात् अन्यामिंस्तोजीवन्मुक्तेरेव अभ्यासपरिपाकेनचिरकालावस्थायि
नीसापदार्थाभावनीगाढसुषुप्तिरित्युच्यते सापंचमी यतःस्वयमेवव्युत्थानंप
रप्रयत्नेनव्युत्थानंयोगिनःसाषष्ठी यतःस्वतःपरतोवानव्युत्थानंसासप्त
मीतितत्रचवसिष्ठनामकग्रंथस्यापौरुषेयस्यत्वन्मतेऽकल्पत्वेनाप्रामाणि
कत्वात् निर्विशेषवादिनस्तवजीवन्मुक्तस्यावस्थात्रयोक्तेरतिव्या
प्तेः ब्रह्मापरोक्षस्यचतुर्थ्यामेवजातत्वात्तदाधिकस्याज्ञेयस्यासत्वात् त्वन्मतेज
गदधिष्ठानतयाब्रह्मणःसदाभानात्तदधिकस्यचित्तेसत्यप्यभानात्समा
धेरपिवैयर्थ्यात् चतुर्थ्यामेववेदांतजन्यस्यत्वदभिमतनिर्विकल्पस्यब्रह्म
ज्ञानस्यब्रह्माज्ञाननिवर्तकस्यजातत्वात् तदभिवर्तिताज्ञानस्यतदतिरिक्ते
नानधिकविषयकेननिवृत्त्यसंभवाच्च निवृत्ताविद्यस्यगुणानयमूलस्य
जीवन्मुक्तस्यसुषुप्त्यवस्थापात्तासमस्याप्यसंभवाच्च चतुर्थ्याभानात् स्व
रूपभानादधिकस्यपंचम्यादौभानंयोगयस्यैक्यादेरभावेनपंचम्यवस्थादेर्नि
रूपणस्य [illegible] नवकाकदंतपरीक्षातुल्यत्वाच्च नहिवेदांतैरबोधितस्य
ध्यानादौभानंसंभवति वेदांतैःस्वरूपाधिकबोधनेसाखंडार्थकत्वायत्तेः
सर्वप्रत्ययवेद्यपरैर्ब्रह्मणिव्यवस्थितश्रुतिवदतांब्रह्मणःसर्वप्रत्ययवेद्य
त्वस्वीकारेणश्रवणस्यब्रह्मणिविशेषानंगीकारेणमननिदिध्यासनयो
श्चवैयर्थ्यात् मनोनिवृत्तिरूपज्ञानमात्रस्यत्वन्मतेब्रह्मविषयकत्वाद्विषये
भ्यःप्रत्याहृत्यमनसएकाग्रकरणस्यनिरर्थकत्वाच्च अतःसप्तभूमिकाए
वंवर्णनीयाःप्रथमायांमोक्षेच्छाद्वितीयायांगुरुमुखाद्वेदांतश्रवणंतृतीया
यांयुक्तिभिश्चिंतनंमननंचचतुर्थ्यांसजातीयप्रत्ययप्रवाहरूपंनिदिध्यास
नंपंचम्यां [illegible] संभवं [illegible] नाविपरीतभावनानिवृत्तिपूर्विकाभगवदेकाकारपरो
क्षज्ञानधारायाःप्रथमविच्छिन्नमेवप्रवाहःषष्ठ्यांभगवदपरोक्षेणेशावष्टंभा
द्गुरुत्वाश्चेश्वरेच्छादिकायाश्चविद्यायानिवृत्तिःसप्तम्यामीश्वरप्रसादेनजी
वाच्छादिकायाश्चविद्यायानिवृत्तिःपरमानंदाविर्भावश्च तन्नातिमावस्था

117

इत्ये सर्वकर्मानधिकारः अन्यास्तु कर्माधिकारः तत्राप्यन्तरंगोन्तरं भगवन्नि
ष्ठाधिको कर्मण्योद्भासः १८ ॥

ऊसमवैजयन्ती ४

वलोकनसाधनभूते

किंच तस्य मुक्तस्य कृतेन कर्मणेहास्मिँल्लोके कश्चनार्थः प्रयोजनं फ
लं वा नैवास्ति यतस्तेन पूर्वमेवात्मदर्शनं प्राप्तं पुनस्तस्य कृतेनानुष्ठितेन
कर्मणेह कश्चनार्थ आत्मदर्शनस्य विघ्नरूपो वा [illegible] वा [illegible] नास्त्येव यतः।
आत्मावलोकनात्प्रागेव विघ्नादयस्तस्य भवन्ति आत्मदर्शने कृते सति स्वयमे
व नश्यन्ति यथा सूर्योदयेऽन्धकारो नश्यति तस्य ह न देवाश्च नाभूत्या ईशते
आत्मा ह्येषां स भवतीति श्रुतेः हेत्यर्थे निपातः देवा अपि तस्यात्मदर्शि
नोऽभूत्यै आत्मदर्शनहननाय नेशते न शक्नुवन्ति यस्मादेषां देवानां स आत्मद
[illegible] र्शी आत्मा आत्मवत्प्रियो भवतीति श्रुत्यर्थः ननु तदेषां देवानां न
प्रियं यदेतन्मनुष्या विदुरिति श्रुतिर्देवकृतं विघ्नं मुक्तावपि वक्ति अतो देव
प्रसादार्थं कर्म कर्तव्यमेवेति चेत्तत्राह न चास्येति च पुनः अस्यात्मदर्शि
नः सर्वभूतेषु ब्रह्मादिस्थावरान्तेषु चेतनाचेतनवर्गेषु मध्ये कश्चिदर्थ
व्यपाश्रयः कश्चिदपि अर्थाय मोक्षाय नैर्विघ्न्याय वा व्यपाश्रयः कर्मभिराराध
नीयो न भवति मोक्षात्प्रागेव देवा विघ्नं कुर्वन्ति मोक्षे प्राप्ते तु स देवानां पूज्यो भ
वतीति भावः १८

तत्त्वात्मदर्शिनाद्या

पापप्राप्तिर्वा प्रत्यवायरूपो दो

नद्यैवेत्यर्थः

मधुसूदनी १०

नन्वात्मविदोऽप्यभ्युदयार्थं निःश्रेयसार्थं प्रत्यवायपरिहारार्थं वा कर्मास्त्वि
त्यत आह ॥ तस्यात्मरतेः कृतेन कर्मणाभ्युदयलक्षणेन निःश्रेयसलक्ष
णेन वार्थः प्रयोजनं नैवास्ति तस्य स्वर्गाद्यभ्युदयानर्थित्वात् निःश्रेयसस्य च क
र्मासाध्यत्वात् तथा च श्रुतिः परीक्ष्य लोकान्कर्मचितान् ब्राह्मणो निर्वे
दमायान्नास्त्यकृतः कृतेनेति अकृतो नित्यो मोक्षः कृतेन कर्मणा नास्तीत्य
र्थः ज्ञानसाध्यस्यापि व्यावृत्तिरेवकारेण सूचिता आत्मरूपस्य हि निःश्रेयस
स्य नित्यप्राप्तस्याज्ञानमात्रमप्राप्तिः तच्च तत्त्वज्ञानमात्रापनोद्यं तस्मिंस्तत्त्वज्ञा
नेनापनुन्ने तस्यात्मविदो न किंचित्कर्मसाध्यं ज्ञानसाध्यं वा प्रयोजनमस्तीत्य

नैः

र्थः एवंतर्हितेनापिप्रत्यवायपरिहारार्थंकर्माण्यनुष्ठेयान्येवेत्यतआह नाकृ
तेनेतिभावेनिष्ठा नित्यकर्माकरणेनेहलोकेगर्हितत्वरूपः प्रत्यवायप्रा
प्तिरूपोवाकश्चनास्ति सर्वत्रोपपत्तिमाहोत्तरार्धेनचोहेतौयस्मादस्यात्म
विदः सर्वेषुभूतेषुब्रह्मादिस्थावरांतेषुकोपिअर्थव्यपाश्रयः प्रयोजन
संबंधोनास्ति कंचिद्भूतविशेषमाश्रित्यकोपिक्रियासाध्योर्थोनास्तीतिवा
क्यार्थः अतोस्यकृताकृतेनिष्प्रयोजनेनैनंकृताकृतेतपतइतिश्रुतेः तस्य
हनदेवाश्चनाभूत्याईशतआत्माह्येषांसभवतीतिश्रुतेर्देवाअपितस्यमोक्षा
भावायनसमर्थाइत्युक्तेर्नविघ्नाभावार्थमपिदेवाराधनरूपंकर्मानुष्ठानमि
त्यभिप्रायः एतादृशोब्रह्मविद्भूमिकासप्तकभेदेननिरूपितोवसिष्ठेन ज्ञा
नभूमिः शुभेच्छाख्याप्रथमापरिकीर्तिता विचारणाद्वितीयास्यात्तृतीयात
नुमानसा सत्त्वापत्तिश्चतुर्थीस्यात्ततोऽसंसक्तिनामिका पदार्थाभाविनी
षष्ठीसप्तमीतुर्यगास्मृतेति तत्रनित्यानित्यवस्तुविवेकादिपुरःसराफल
पर्यवसायिनीमोक्षेच्छाप्रथमा ततोगुरुमुपसृत्यवेदांतवाक्यविचारःश्र
वणमननात्मिकाद्वितीया ततोनिदिध्यासनाभ्यासेनमनसएकाग्रतयासूक्ष्म
वस्तुग्रहणयोग्यत्वंतृतीया एतद्भूमिकात्रयंसाधनरूपंजाग्रदवस्थोच्य
तेयोगिभिः भेदेनजगतोभानात् तदुक्तंभूमिकात्रितयंत्वेतद्रामजाग्रदि
तिस्थितं यथावद्भेदबुद्ध्येदंजगज्जाग्रतिदृश्यतेइति ततोवेदांतवाक्यान्नि
र्विकल्पकोब्रह्मात्मैक्यसाक्षात्कारः चतुर्थीभूमिकाफलरूपासत्त्वापत्तिः स्व
प्नावस्थोच्यते सर्वस्यापिजगतोमिथ्यात्वेनस्फुरणात् तदुक्तं अद्वैतेस्थै
र्यमायातेद्वैतेप्रशममागते पश्यंतिस्वप्नवल्लोकंचतुर्थींभूमिकामिताः इति
सोयंचतुर्थींभूमिंप्राप्तोयोगीब्रह्मविदित्युच्यते पंचमीषष्ठीसप्तम्यस्तुभूमि
काजीवन्मुक्तेरेवावांतरभेदाः तत्रसविकल्पकसमाध्यभ्यासेननिरुद्धे
मनसियानिर्विकल्पकसमाध्यवस्थासाऽसंसक्तिरितिसुषुप्तिरि
त्युच्यते ततःस्वयमेवव्युत्थानात्सोयंयोगीब्रह्मविद्वरः ततस्तदभ्यासपरि
पाकेनयाचिरकालाव स्थायिनीसाप
दार्थाभावनीतिगाढसुषुप्तिरितिचोच्यते ततःस्वयमनुत्थितस्ययोगिनः प

रमयन्तैनैव कुत्स्यानात्मायं ब्रह्मविद्वरीयान् उक्तं हि पंचमीं भूमिकामे
त्य सुषुप्तिपदनामिकां षष्ठीं गाढसुप्ताख्यां क्रमात्पतति भूमिकामिति
स्या यस्तु समाध्यवस्थायां न स्वतो न वा परतो व्युत्थितो भवति सर्वथा भेददर्श
नाभावात् किंतु सर्वदा तन्मय एव स्वप्रयत्नमंतरेणैव परमेश्वरप्रेरितप्रा
णवायुवशादन्यैर्निर्वाह्यमानदैहिकव्यवहारः परिपूर्णपरमानंदघन ए
व सर्वतस्तिष्ठति सा सप्तमी तुरीयावस्था तां प्राप्तो ब्रह्मविद्वरिष्ठ इत्युच्यते उ
क्तं हि षष्ठ्यां भूम्यामसौ स्थित्वा सप्तमीं भूमिमाप्नुयात् किंचिदेवैष संपन्नस्त्व
थवैष न किंचन विदेहमुक्तताऽत्रोक्ता सप्तमी योगभूमिका अगम्या वचसां
शांता सा सीमा योगभूमिष्विति यामधिकृत्य श्रीभागवते स्मर्यते देहं च न
श्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपं दैवादुपेतम
थ दैववशादपेतं वासो यथा परिकृतं मदिरामदांधः देहोपि दैववशगः
खलु कर्म यावत्स्वारंभकं प्रतिसमीक्षत एव सासुः तं सप्रपंचमधिरूढस
माधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुरिति श्रुतिश्च तद्यथाहि नि
र्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेतेऽथायमशरी
रोऽमृतः प्राणो ब्रह्मैव तेज एवेति तत्रायं संग्रहः चतस्रो भूमिर्ज्ञानं तिस्रः का
स्युः साधनं परा जीवन्मुक्तेरवस्थास्तु परास्तिस्रः प्रकीर्तिताः अत्र प्रथमभू
मिकात्रयमारूढोऽज्ञोपि न कर्माधिकारी किं पुनस्तत्त्वज्ञानी न हि शिष्टो जी
वन्मुक्तो वेत्यभिप्रायः १८

सदानंदी ११

ननु तत्त्वात्मविदः कर्माभ्युदयादिनिबंधनं प्रत्यवायस्तयार्थ्यैवाकोदोष
इति चेच्छृणु १ कृतेन कर्मणा तस्य न स्वर्गादिप्रयोजनं प्राप्यं तस्य तु सर्व
त्र स्वर्गादौ तुच्छतामतिः २ कर्मसाध्यतया मुक्तेः स्वात्मत्वाच्चात्मवेदिनः तद
र्थमपि नो कार्यं नित्यप्राप्ततया मुनेः ३ स्वात्मावस्थानमोक्षस्य नित्यप्राप्त
स्य केवलं अज्ञानमात्रमप्राप्तिस्तद्बाधः स्वात्मबोधतः ४ अज्ञाने ज्ञानतो न
ष्टे सकार्ये तत्त्ववेदिनः न किंचित्कर्मणा साध्यं ज्ञानसाध्यं न किंचन ५ न
कर्माकरणेनास्य प्रत्यवायोपि कश्चन ॥ यस्मादात्मविदः सर्वभूतेष्वहं हि

णादिषु ९ न प्रयोजनसंबंधः कोप्यस्त्यात्मरतेर्मुनेः अतः कृताकृतेनास्ति
फले इति निर्णयः मुमुक्षोरपि नैवास्ति कर्मकर्तव्यताग्रहात् भूमिकात्र
यसंस्थस्य किंतु कर्तव्यता नितो मुनेः ८ भूमिसप्तकभेदेन ब्रह्मवित्सं निरूपितः
वासिष्ठे ज्ञानकांडार्थसंग्रहे होकृतस्तद्विदा ९ ज्ञानभूमिः शुभेच्छाख्या प्रथ
मा परिकीर्तिता विचारणा द्वितीया स्यात्तृतीया तनुमानसा १० भूमिकात्रित
यं त्वेतद्रामजाग्रदिति स्थितं यथावद्भेदबुद्ध्येदं जगज्जाग्रति दृश्यते ११ अद्वै
ते स्थैर्यमायाते द्वैते च प्रशमं गते पश्यंति स्वप्नवल्लोकं चतुर्थीं भूमिकामिताः १२
पंचमीं भूमिकामेत्य सुषुप्तिपदनामिकां षष्ठीं गाढसुषुप्त्याख्यां क्रमात्पतति भू
मिकां १३ षष्ठ्यां भूम्यामसौ स्थित्वा सप्तमीं भूमिमाप्नुयात् किंचिदेवैष संपन्न
स्त्वथवैष न किंचन १४ अगम्या वचसां शांता सा सप्तमी योगभूमिषु एवं वसि
ष्ठमुनिना राघवेंद्रः प्रबोधितः १५ चतुर्थीं भूमिमारभ्य ब्रह्मविज्ञानकर्मणोः
न साध्यमीक्ष्यते किंचित्कृताकृत्यतयात्मनः साध्याभावादितो ब्रह्मविदः कार्यं
न विद्यते १६ १८

नीलकंठी १७

यत्तदेवाह नैवेति तस्यात्मरतेः कृतेन कर्मणा अर्थः प्रयोजनं नास्ति स्वर्गादे
लिप्साभावात् मोक्षस्य चाक्रियासाध्यत्वात् नास्त्यकृतः कृतेनेति श्रुतेः अकृतो
मोक्षः कृतेन कर्मणा नास्तीति श्रुत्यर्थः अकृतेन विरुद्धकर्मणापि अर्थो नर
कादिरस्य नास्ति अत्र कृताकृतशब्दौ मित्रामित्रपदवत् परस्परविरुद्धार्थवा
चितया पुण्यपापवचनौ यत्तु अकृतेनेति भावे निष्ठा नित्याकरणात् गर्हितं
त्वरूपो वा प्रत्यवायप्राप्तिरूपो वा कश्चनार्थो विदुषो नास्तीति व्याचक्षते तेषाम
प्यभावात् भावोत्पत्तेरनभ्युपगमात् नित्यानां काले यद्विहितं क्रियते तेन तत्प
वमत्यवायोत्पादो वक्तव्यः इति च दूष्यं प्रभातवृत्तांत आपद्यते अत्रोपप
त्तिमाह न चेति चो हेतौ यस्मात् आत्मरतेः सर्वभूतेषु चेतनाचेतनेषु
न मम मध्ये माधवेषु कश्चिदपि अर्थव्यपाश्रयः सुखभोगात्मकप्रयोजनाभिसंबं
धो नास्ति आत्मरतित्वादेव निष्कामत्वाद्विदुषां पुण्यपापफलसंबंधो नास्तीत्यर्थः

आनंदीटीका

अस्यामेवावस्थायां प्रतिकारहेतु[illegible]भावात्कर्मत्यागो न त्वर्वागिति स्प
ष्टयति तस्येत्यादिना तस्य कृतेन कर्मणार्थः प्रयोजनं नास्ति
अकृतेनैव कर्मणार्थः प्रत्यवायाख्यो भावो न च सम्भवति निर्वाणात्
न चास्य सर्वभूतेषु ब्रह्मादिस्थावरान्तेषु कश्चिदर्थस्य प्रयोजनस्य व्यपा
श्रय आलम्बनमस्ति कोप्यस्य स्पृहणीयो नास्तीत्यर्थः १८ ॥

रामकंठीटीका

यतः सर्वाकृतकृत्यत्वात्तस्य नैव कश्चित्कृतेन प्रागकृतत्वादुपादेयत्
येष्टानिनिवृत्तिर्वा नार्थः प्रयोजनम् नाप्यकृतेनेह प्रत्यवायपरिहारेण कश्चि
दर्थः प्रयोजनम् न प्रत्यवायस्यैवैविषयस्यात्मप्रतिष्ठितबुद्धेर्योगिनः सर्व
भूतेषु समस्तेषु स्थावरेषु जंगमेषु च समस्तेषु मध्ये न कश्चिदर्थव्यपाश्र
यः अर्थस्य प्राप्यस्य वस्तुनो व्यपाश्रय आलम्बनम् इदमत्र नास्त्यर्थम् १८

लासिकी ~~[illegible]~~टीका

अत्र हेतुमाह नैवेति तस्य तादृशस्य ब्रह्मविदः कृतेन कर्मणार्थः स्वर्गा
दिलक्षणं प्रयोजनं नास्ति न चाकृतेन कर्माकरणेन कश्चन प्रत्यवाया
निरयादिप्राप्तिलक्षणोस्ति निरहंकारत्वाद्विधिनिषेधातीतत्वात् न
नु मा तं देवं विघ्नसंभवात्तत्परिहारार्थं कर्मभिर्देवाः सेव्या इत्याशंक्याह (कृत)
सर्वभूतेषु ब्रह्मादिस्थावरान्तेषु कश्चिदर्थव्यपाश्रयो ऽर्थमात्रे आश्रय
णीयो नास्तीत्यर्थः विघ्नाभावस्य श्रुत्यैवोक्तत्वात् तथा च श्रुतिः तस्य
ह न देवाश्चनाभूत्या ईशत आत्मा ह्येषां स भवतीति ह नेत्यव्ययमप्यर्थे देवा
अपि तस्यात्मत्वं तस्याभूत्यै ब्रह्मभावप्रतिबन्धाय नेशते न शक्नुवन्तीति
श्रुतेरर्थः देवकृतास्तु विघ्नाः सम्यग्ज्ञानोत्पत्तेः प्रागेव तथा च श्रुतिः य
देतद्ब्रह्म मनुष्या विदुस्तदेषां देवानां न प्रियमिति ब्रह्मज्ञानस्येवाप्रिय
लोकत्वात्तेनैव विघ्नकर्तृत्वस्य सम्भावितत्वात् ~~[illegible]~~
~~[illegible]~~ १८

पंचोलीटीका

तत्र हेतुमाह नैवेति तस्य परमार्थरतेः इह लोके कृतेन कर्मणा अर्थो
नैव अकृतेनाऽनर्थः प्रत्यवायरूपो नास्तीति च पुनः अस्य परमार्थरतेः स
र्वेषु ब्रह्मादिस्थावरान्तेषु कोपि अर्थः मोक्षसाध्येप्याश्रयणीयो नास्ति १८ ॥

किंचनैवेति इहेनाकृतेनकृतंकरणंभावेक्तः नकृतमकृतम
करणमितियावत् नविद्यते अकृतमकरणंयेषांतेनाकृताः
नसमासः कर्मस्वप्रवृत्तिमंतः तेषामिनप्रभोदेशेन तस्योक्तल
क्षणस्यकर्माधिकारिणः क्षत्रियप्रवरस्येश्वरचोदितंयुद्धादि
लक्षणंकर्माननुपालयतः कृतेसति यथावर्णेविते हिंसाप्राय
युद्धादिलक्षणेकर्मणीतिशेषः कश्चनार्थः पुरुषार्थः नस्यादि
तिनैव किंतुसर्वोपिधर्मार्थकाममोक्षाख्यश्चतुर्वर्गोभवत्येवे
ति अतश्चतस्येच्छायामाह नचेति चशब्दोहेतौ यतोस्यात्मरत्या
दिविशेषणविशिष्टस्यकर्मयोगिनः सर्वभूतेषुस्वकीयेषुपर
कीयेषुवाकश्चिदर्थव्यपाश्रयः प्रयोजनसंबंधोनास्ति रागद्वे
षविरहेणेश्वरप्रीणनार्थमेवतच्चोदितावश्यकर्तव्यकर्मस्वप्र
वृत्तेः रागादिसर्वेप्रवृत्तेरेवबंधहेतुत्वादिति १८ ॥

मधुभाष्य ॥

१८ ॥

कृतेनकर्मणानर्थः स्वकृताप्रत्यवायजनितलक्षणः अकृतेनापिकश्चिद्दुरिता
पूर्वलक्षणः विधिष्वनधिकारादितिभावः वेति किंच अस्यविदुषः सर्वभू
तेषुप्राणिषुपृथिव्यादिषुचविषयभूतेषुकश्चित्प्राणाधारोपृथिव्याद्याधा
रोवाअर्थव्यपाश्रयइति अर्थत्वव्यपाश्रयोअर्थत्वेनस्वीकरणमस्तीतिभा
वप्रधानमर्थशाहमंगीकृत्यव्याख्येयं विद्वानात्मतत्त्वापरोक्षसाक्षात्कारवा
नभिधीयते तत्रमुक्तिसाक्षात्कारवतास्तत्त्वंयथानार्थत्वेनाश्रीयते तथा
त्मसाक्षात्कारवतातत्राध्यस्ताः प्राणिषुधर्मपश्चाद्योनार्थत्वेनाश्रीयंते पृ
थिव्यादिषुनाश्रयोनस्तुवस्तुवादयोपीतिकथमस्यकर्मप्राप्तिरितिकश्चि·
दाहत्याख्येयं कश्चिदितिपारमार्थिकव्यावहारिकोवेति तदेवंयत्तस्याज्ञो
रसंसारहेतुत्वंप्रदर्श्यतत्त्वल्पफलानामप्यर्थनस्नाहेतुत्वंसिद्धवत्कृत्यतद्व्यति
रिक्तेकर्मणिफलेच्छानिवर्तकेतदर्थमपिकौन्तेयेत्यनेनयाप्रवृत्तिरुक्तातां
प्रयोजनप्रतिपादनायसारयेतिवासुदेवः तस्मादसक्तः सततमिति

मर्थभावः

तं

121

जो तत्त्वज्ञानी कहे आत्मज्ञानी पुरुष है उसको कोई भी कर्म्म करना न
ही सोई कहते हैं कि न ज्ञानी को कर्म्म करने से पुन्य है औरकर्म्म न करने
से प्रत्यवाय कहे पाप भी नहीं है क्योंकि ज्ञानी जो निरहङ्कार है इससे उ
औ॰ सको किसी कर्म्म का विधि निषेध नहीं हैं वह सबसे अलग हैं-जो कहो॰
कि श्रुति कहती हैं कि देवतों की इच्छा नहीं हैं कि मनुष्य ब्रह्म को जा
ने औ ब्रह्मज्ञानी हो मोक्ष पावेतो निश्चय हैं कि मोक्ष होनेमे देवता विघ्न
करेंगे इसवास्ते विघ्न वारण के अर्थ देवतों की सेवा रूप कर्म जरूर ही॰
करना पड़ेगा इस पर कहते हैं कि ब्रह्मासे लेकर और स्थावर पर्य्यन्त कि
सी की सहाय ज्ञानी को दरकार नहीं हैं क्यों कि ज्ञानमार्गमे विघ्नका अ
भाव है यह श्रुतिसे कहि चुके है इससे आत्म दर्शी को प्राणीमात्र की आ
श्रय कहे अवलम्ब का कुछ काम नहीं हैं १८

दोहा॥

नहि प्रयोजन ताहिको करण अकर मे कोय नहि ताको स
भ भूतमें कछु प्रयोजन होय १८॥

122

तस्मादसक्तः सततं कार्यं कर्म समाचर असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः १९ ॥

शंकरभाष्यं

यत एवं तस्मादिति तस्मादसक्तः संगवर्जितः सततं सर्वदा कार्यं कर्तव्यं नित्यं कर्म समाचर निर्वर्तय असक्तो हि यस्मात्समाचरन्नीश्वरार्थं कर्म कुर्वन् परमाप्नोति पूरुषः मोक्षमाप्नोति पूरुषः सत्वशुद्धिद्वारेणेत्यर्थः १९ ॥

आनंदगिरिकृतटीका

सम्यग्ज्ञाननिष्ठत्वाभावे कर्मानुष्ठानमावश्यकमित्याह यत इति तस्मात् ज्ञाननिष्ठारहितत्वादिति यावत् मोक्षमेवापेक्षमाणस्य कथं कर्मणि फलांतरवति नियोगः स्यादित्याशंक्याह असक्तो हीति १९

स्वामिकृतटीका

यस्मादेवंभूतस्य ज्ञानिन एव कर्मानुपयोगो नान्यस्य तस्मात्त्वं कर्म कुर्वित्याह तस्मादिति असक्तः फलसंगरहितः सन् कार्यमवश्यं कर्तव्यतया विहितं नित्यनैमित्तिकं कर्म सम्यगाचर हि यस्मादसक्तः कर्माचरन्पुरुषः परं मोक्षं चित्तशुद्धिज्ञानद्वारा प्राप्नोति १९ ॥

पैशाचभाष्यं ॥

तस्मादसक्तः फलसंगवर्जितः सततं सदा कार्यं कर्तव्यं कर्म युद्धादि समाचर प्रवर्तितिष्ठ किं तत इति चेत् असक्तः संगवर्जितः हि यस्मादाचरन्ननुतिष्ठन्कर्म परं परमात्मानमाप्नोति पूरुषस्तस्मात्त्वं कर्म कुर्विति संबंधः १९ ॥

रामानुजभाष्यटीका ॥

यस्मादसाधनायत्तात्मदर्शनस्यैव साधनाप्रवृत्तिः यस्माच्च तत्साधने प्रवृत्तस्यापि सुशकत्वादप्रमादत्वादंतर्गतात्मयाथात्म्यानुसंधानत्वात् ज्ञानयोगिनोऽपि याचायाः कर्मानुवृत्त्यपेक्षत्वाच्च कर्मयोग एवात्मदर्शनप्रवृत्तौ श्रेयान् तस्मादसंगपूर्वकं कार्यमित्येव सततं यावदात्मप्राप्ति कर्मैव समाचर असक्तः कर्म कार्यमिति वक्ष्यमाणाकर्तृत्वानुसंधानपूर्वकं च क

मोत्तु चरन्पुरुषः कर्मयोगेनैव परमाप्नोत्यात्मानं प्राप्नोतीत्यर्थः ।१९

अभिनवगुप्तकृतटी॰

स्पष्टार्थः ।१९

परमार्थप्रपाटीका ॥

यस्मादेवंभूतस्यैव ज्ञानस्य कर्मोपरमो नान्यस्य तस्मात्त्वं कर्म कुर्वित्याह तस्मादिति असक्तः फलसंगरहितः सन् कार्यं कर्म नित्यं नैमित्तिकं सततं निरंतरं समाचर हि यस्मादसक्तः सन्पुरुषः परं ब्रह्माप्नोति ।१९ ॥

वनमाली टीका

षष्ठ्यां भूमिकायामसंप्रज्ञातासंप्रज्ञातभेदेन समाधिद्वैविध्यं तत्रासंप्रज्ञाते सर्वकर्मानधिकारः ततो व्युत्थाने सम्यक्समाध्यर्थं सम्यक्फलब्रह्मसमाधानस्य लोकसंग्रहार्थं च स्वोचितं कर्म कार्यमतः त्वमपि व्युत्थित इति स्वोचितं कर्म कुर्वित्याह तस्मादिति असक्तः फलकामनारहितः सततं सर्वदा न तु कदाचिदेव कार्यमवश्यकर्तव्यत्वेन वेदबोधितं तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेति ज्ञानोद्देशेन विहितं नित्यमेव यज्ञादिकं तदेव कुरु असक्तो हि यस्मादाचरन्नीश्वराराधनरूपं निःकामं कुर्वन्सत्त्वशुद्धिज्ञानहरिप्रसादद्वारा परं स्वरूपाविर्भावरूपं मोक्षं प्राप्नोति ।१९ ॥

ऊत्तमवैजयंतीटी॰

यस्मात्कर्मकरणं विना बहुशुभत्वमंतःकरणशुद्धिर्न स्यादिह त्वयाऽपि तत्सिद्धं तु देवकृतविघ्नस्यापि शान्तिर्न भवेज्जगद्गुरुकानुवर्तनेन दोषभाक्त्वमपि स्यात् तस्मात्त्वमशक्तः फलाभिलाषशून्यः सन् सततमवश्यकर्तव्यतया विहितकार्यं स्ववर्णोचितं नित्यनैमित्तादिरूपं कर्म समाचर सम्यगाचर कुरु सावधानेन कुरु न प्रमादेनेति समर्थः हि यस्मात्कर्माचरन्नपोऽसक्तो निष्कामो भवति स मनुष्यः परं परमेश्वरमाप्नोति न तु सकाममयतः सद्धियुक्तः पश्चादित्यर्थः ।१९

मधुसूदनीटी॰

यस्मात्त्वमेवंभूतो ज्ञानी किं तु कर्माधिकृत एव मुमुक्षुः असक्तः फलकामनारहितः सततं सर्वदा न तु कदाचित्कार्यमवश्यकर्तव्यं

यावज्जीवादिश्रुतिचोदितं तमेतं वेदानुवचनेन ब्राह्म
णाविविदिषंतियज्ञेनदानेनतपसानाशकेनेतिश्रु
त्याज्ञानेविनियुक्तं कर्मनित्यनैमित्तिकलक्षणंसम्य
गाचरयथाशास्त्रंनिर्वर्तय असक्तोहियस्मादाचरन्
ईश्वरार्थंकर्मकुर्वन्सत्वशुद्धिज्ञानप्राप्तिद्वारेणपरमा
त्मानमाप्नोतिपूरुषः पूरुषएवसत्पूरुषोनान्यइत्यभि
प्रायः १९ ॥

सदानंदी टीका

यस्मात्त्वेवंत्वमात्मज्ञः किंतुकर्माधिकारवान् तस्मा
न्नित्यफलासंगशून्यः कर्मयथाविधि १ तमेतमि
तिवाक्येनविहितंसम्यगाचर यस्मात्समाचरन्नीशा
राधनेसंगवर्जितः २ धीशुद्ध्याज्ञानसंप्राप्तिद्वारेण
परमंपदं पूरुषोमोक्षमाप्नोतिसएवपूरुषोत्तमः ३ १९

नीलकंठी टी॰

यस्मान्निष्कामस्यकर्मलोपोनास्तितस्मात्त्वमपिअ
सक्तः फलासक्तिशून्यः सततंसर्वदाकार्यंअवश्य
कर्तव्यंकर्मनित्यनैमित्तिकंसमाचर हियस्मादस
सक्तः कर्माचरन्परंमोक्षंसत्वशुद्धिद्वारेणाप्नोति १९

आनंदी टी॰ ॥

अतः प्राक्तकर्मत्यागानुपपत्तिमाह फलेष्वनासक्तः का
र्यमवश्यानुष्ठेयं स्वजातिविहितं नित्यं समाचरन्परं प्र
कृष्टमपवर्गाख्यं वस्तु प्राप्नोति ॥

रामकंठी टी॰ ॥

प्राक्प्रतिपादितस्थिरबुद्धित्वदशामधिरूढस्य योगिनः
फललिप्सया ममेवेदमित्यसाधारणतया कार्यं साध्यं व
स्तु न किंचन विद्यते सर्ववर्णाश्रमसाधारणं च शास्त्र
चोदितं कार्यं तत्तत्रियत करणीयं प्रतिपादितविज्ञान
निष्ठस्य विद्यत एव यत एवं तस्मात्कारणात्त्वमतः स
त्कार्यं कर्म शास्त्रविहितत्वादवश्यानुष्ठेयं युद्धादि व्या
पारमसक्तः क्षणिकस्वर्गलवसाधनभूतेषु विषयेषु
निमग्नचित्तवृत्तिः सन्समाचर सम्यग्यथा प्रतिपादिता
त्मतत्त्वप्रतिष्ठितबुद्धित्वमनागमप्रमत्ततया चरानु
तिष्ठ यस्मात्पुरुषो मुमुक्षुः संसारासक्तो मुक्तसंगः स
ञ्शास्त्रनियमितं कर्माचरन् कुर्वन्परं प्रकृष्टमपवर्ग
लक्षणं प्राप्यं वस्त्वाप्नोति लभते न तु कर्मत्यागात्सि
द्धिः कस्यचिदस्ति सर्वकर्मत्यागानुपपत्तेः प्रागेव प्र
तिपादितत्वात्कस्यचिद्व्याकर्मणस्त्यागे सर्वकर्मत्या
गाभिमान ॥

यत एवंभूतस्यैव ज्ञानिनः कर्मानुपयोगो नान्यस्य बोधयुक्तस्य वेत्याह

ग्रहात् रागद्वेषदोषाविर्भावस्य दुर्निवारत्वात् (...) १९

नासिकी [illegible]टीका

तस्मादिति तस्मात्कारणात्त्वं बोधयुक्तोऽपि मुमुक्षुः सन्नसक्तः फला-
भिलाषेण तदतिमग्नचित्तवृत्तिः सन् सततं नित्यं कार्यमवश्यकर्तव्य-
तया चोदितं कर्म समाचर सम्यगात्मतत्त्वप्रतिष्ठितत्वेन मनागप्यप्र-
मत्ततया वर्तानुतिष्ठ हि यस्मात् असक्तः पुरुषो बोधयुक्तः कर्म कुर्व-
न्नेव परमात्मानं उत्कृष्टमाप्नोति बोधयुक्तस्यैव हि पुरुषो मे पशुसंज्ञाः
शास्त्रेषु प्रबोधिताः तदुक्तं कुलार्णवे निद्रादिमैथुनाहाराः सर्वेषां प्रा-
णिनां समाः ज्ञानवान्मानवः प्रोक्तो ज्ञानहीनः पशुः प्रिये इति अन्य-
त्रापि आहारनिद्राभयमैथुनानि समानि चैतानि नृणां पशूनाम्
नरस्यैव कस्त्वधिको विवेकस्तेनैव हीनः पशुभिः समान इति १९॥

पंडोलीटीका

यस्मादेवं तस्मात्त्वं कर्म कुर्वित्याह तस्मादिति असक्तः संगवर्जितः
सततं सर्वदा कार्यं कर्म समाचर हि यस्मादसक्तः फलसंगवर्जितः पु-
रुषः ईश्वरार्थं कर्म आचरन्कुर्वन्परं मोक्षमाप्नोति १९

महावीरसमिद्बोधिनी॥

उपसंहरति तस्मादिति यस्मादेवं तस्मात्त्वमसक्तः सिद्ध्यसि-
द्ध्योः समः रागद्वेषादिरहितो वा सन् कार्यमवश्यकर्तव्यं आव-
श्यके एव तत् कर्म प्रक्रान्तं युद्धलक्षणं कर्मेंद्रियव्यापारं कुरु हि
यस्मादसक्तः पुरुषः पौरुषलक्षणविशिष्टः यद्वा रुषति हि-
नस्ति रुषहिंसायामित्युपपद्यते इति कः रुषः हिंसकः पुरां मधुरा-
क्षसानां रुषः पुरुषः त्रिपुरनगरजेतेति यावत् यद्वा उषति दहती-
ति उषो दाहकः पुरामुषः पुरुषः क्षत्रियप्रवरः कर्मावश्यक-
रणीयमाचरन् परं प्रधानं संबंधि राज्यादि प्राप्नोति व्याप्नोति

किंच परं सर्वोत्कृष्टं परमेश्वरमाप्नोति विष्णुशिवादिमूर्तिधरं तं साक्षात्करोति स्वर्गादीन्भुक्त्वा क्रमेणा तत्तल्लोकप्राप्तिमेतीति तथा चोक्तं द्वाविमावित्यादि अथैवं सति जये ऐहिकपार त्रिको भयंफलं प्रसतिव तस्मिन्नसंभवे मरणेन पारत्रिकमेवेति सर्वथा युद्धं त्वयावश्याचरणीयमिति भावः ॥१९॥

125

मधुभाष्य

१९॥

इससे हे अर्जुन ज्ञानी पुरुष ही कोकर्म कर्तव्य नहीं है
और मनुष को जो कर्म करनाही उचित हैं सोतुम कर्म
करो यही कहते हैं कि तस्मात् करो तिससे असक्त हो क
र्तव्य कर्म निरन्तर समाचर करे करो असक्त हो पुरुष कर्म
करते पर मोक्षकि उसको प्राप्त होताहै अर्थात् फल कामना
रहित होकर अवश्य कर्म जो नित्य नैमित्तिक हैं सोसब क
रो जिस हेत आशक्ति रहित कर्म कारी मनुष्य परम मो
क्षकि उसको चित्त शुद्धिके द्वारा पावताहै नित्य कर्म सन्ध्या
वन्दनादिक हैं और नैमित्तिक जो निमित्त पायकर किये
जांय जैसे पुत्रजन्ममे जात कर्मादिक हैं इससे यह जना
या कि तुमको युद्ध भी नैमित्तिक कर्म करना आवश्यक
है १९ ॥

दोहा ॥

तातें नित्य असंग होय करन योग्यकरकर्म हो असंग करें
कर्म जो लहें पुरुष गति पर्म १९ ॥

कर्म्मणैवहिसंसिद्धिमास्थिताजनकाद
यः लोकसंग्रहमेवापिसंपश्यन्कर्त्तुम
र्हसि २० ॥

शंकरभाष्यटीका

यस्माच्च कर्म्मणैवेति कर्म्मणैव हि तस्मात् पूर्व्वे क्षत्रियाः । विद्वांसः संसिद्धिं मोक्षं गंतुमास्थिताः प्रवृत्ता जनकादयो जनकाश्वपतिप्रभृतयो यदि ते प्राप्तसम्यग्दर्शनास्ततो लोकसंग्रहार्थं प्रारब्धकर्मत्वात् कर्म्मणा सहैवासंन्यस्यैव कर्म्म संसिद्धिमास्थिता इत्यर्थः अथाप्राप्तसम्यग्दर्शना जनकादयस्तदा कर्म्मणा सत्त्वशुद्धिसाधनभूतेन क्रमेण संसिद्धिमास्थिता इति व्याख्येयः श्लोकोऽथ मन्यसे पूर्व्वैरपि जनकादिभिरजानद्भिरेव कर्त्तव्यं कृतं कर्म्म तावता नावश्यमन्येन कर्त्तव्यं सम्यग्दर्शनवता कृतार्थेनेति तथापि प्रारब्धकर्म्मायत्तस्त्वं लोकसंग्रहमेवापि लोकस्योन्मार्गप्रवृत्तिनिवारणं लोकसंग्रहस्तमेवापि प्रयोजनं संपश्यन् कर्त्तुमर्हसि २०

आनन्दगिरिकृतटीका

यद्यपि निर्विद्योऽपि विवेकी श्रवणादिभिरनलसो ब्रह्मणि निष्ठातुं शक्नोति तथापि क्षत्रियेण तथाविहितं कर्म न त्याज्यमित्याह यस्माच्चेति तस्मात्त्वमपि कर्म कर्त्तुमर्हसीति संबंधः इतोऽपि त्वया विहितं कर्म कर्त्तव्यमित्याह लोकेति पूर्वार्द्धं विभजते कर्म्मणैवेति कथं जनकादीनां कर्म्मणा संसिद्धिरासि

गी॰
टी॰
टी॰

127

कथ्यते कर्मणास्वज्ञा हि सम्यग्दर्शनवन्तो प्रसिद्धा संसिद्धिरिति तत्र
किं जनकादयोपि प्राप्तसम्यग्दर्शनाः स्युः उत अप्राप्तसम्यग्दर्श-
ना भवेयुरिति विकल्प प्रथमे प्रत्याह यद्येति लोकसंग्रहार्थं क-
र्मणा सहैव संसिद्धिमास्थिताः इति संबंधः कर्मणा सहैवेममत
न्याकरोति प्रसंगसैव कर्मेति तत्र हेतुमाह प्रारब्धेति ज-
नकादीनां सत्यपि ज्ञानित्वे प्रारब्धकर्मवशात् कर्मापरित्यज्यै-
व लोकसंग्रहार्थं प्रवर्तमानानां ज्ञानमाहात्म्यादुपपन्ना संसि-
द्धिरित्यर्थः द्वितीय मनूद्य स्वीकृतेनोत्तरमाह अथेत्यादिना द्वि-
तीयाद्यावर्त्यामाशंकामनुत्थापयति अथेति अत्तेनाकृतार्थेन
कृते कर्मण्येतावता ज्ञानवता कृतकृत्येन न तत्कर्तव्य मित्यंगी-
करोति तथापीति नहि मयापि ज्ञानवताकृतार्थेन कर्म
न कर्तव्य मित्याशंकास्वेनस्य कर्तव्यमेव कर्मत्युत्तराह वा-
क्योनेन कथयति प्रारब्धेति २० ॥

स्वामिकृतटीका

अत्र सदाचारं प्रमाणयति कर्मणैवेति कर्मणैव शुद्धसत्वाः सं-
तः संसिद्धिं सम्यग्ज्ञानं प्राप्ताः स्युः यद्यपि त्वं सम्यग्ज्ञानिनमे-
वात्मानं मन्यसे तथापि कर्माचरणं भद्रमेवेत्याह लोकसंग्रह-
मिति लोकसंग्रहः स्वधर्मे प्रवर्तनं मया कर्मणि कृते जनः सर्वो-
पि करिष्यति अन्यथा ज्ञानिदृष्टांतेनाज्ञः कर्म त्यजन् पतेदित्ये-
वं लोकरक्षणमपि तावत्प्रयोजनं संपश्यन् कर्म कर्तुमर्हसि ना-
न्यत्कर्तुमित्यर्थः २०

पिशाचभाष्यटीका

इतस्य कर्मणो वहिः पूर्वे जनकादयः जनकप्रभृतयः संसिद्धिं मोक्षे

आस्थप्रवृत्ताः यदितेप्राप्तसम्यग्दर्शनाः केवललोकसंग्रहार्थंकर्माणि
प्रवृत्तास्त्वमपिलोकसंग्रहं लोकस्यधर्मपरिसंग्रहंपश्यन्ततदर्थमेव
कर्तुमर्हसि २० ॥

रामानुजभाष्यटी॰

यतेज्ञानयोगाधिकारिणोपिकर्मयोगएवात्मदर्शनेश्रेयान्अत
एवजनकादयोराजर्षयोज्ञानिनामग्रेसराः कर्मयोगेनैवसंसिद्धिमाः
स्थिताः आत्मानमाप्तवन्तः एवंप्रथमंमुमुक्षोर्ज्ञानयोगानर्हतया
कर्मयोगाधिकारिणः कर्मयोगएवकार्यइत्युक्त्वाज्ञानयोगाधिका
रिणोपिज्ञानयोगात्कर्मयोगएवश्रेयानित्युक्तं २० ॥

अभिनवगुप्तकृतटी॰

स्पष्टोर्थः २० ॥

परमार्थप्रपाटी॰

अत्रार्थेसदाचारंप्रमाणयति कर्मणैवेति जनकादयोराजानोः
ऽपिवर्णाश्रमोचितेनकर्मणैवकृत्स्नांसिद्धिंनैष्कर्म्यसिद्धिंतत्त्वज्ञान
रूपिणीमापुः अथतत्त्वज्ञानोत्पत्तावपिकर्मनत्याज्यमित्याहलो
कसंग्रहमिति लोकसंग्रहमपिपश्यन्कर्मकर्तुमर्हसि केऽप्यल्प
ज्ञावयमपितत्त्वज्ञानिनइतिमत्वाकर्मत्यक्ष्यन्ति तदर्थमपिकर्मा
चरतदुक्तं सर्पिर्यथासर्वपयसीद्धगोरवस्थितंलभ्यतेतिलमध्यएवत
त् लभ्यतेमथनेंयत्रकर्मणाकर्मणाहृदिगतात्तथैवचित् २० ॥

वनमाली टीका ॥

तमेवविदित्वातिमृत्युमेतिनान्यःपन्थाविद्यतेऽयनाय इत्येवंश्रुः
त्यतइतिकृत्याज्ञानादेवमोक्षः कथमसक्तः कर्माचरन्नेवपर
माप्नोतीत्युक्तमित्याशंक्यनिष्कामत्वेनविहितस्यकर्मणः कर्तव्य
तायांशिष्टाचारंप्रमाणमाह कर्मणैवेतिजनकादयः क्षत्रिया
विद्वांसोपिकर्मणैवसहसंसिद्धिंश्रवणादिसाध्यांज्ञाननिष्ठामाः
स्थिताः प्राप्ताइत्यस्मादेवंतस्मात्त्वमपिक्षत्रियोविद्वान्कर्मकर्तुम
र्हसीत्यनुषंगः ब्राह्मणाः पुत्रैषणायाश्चवित्तैषणायाश्चव्युत्थाः
यायभिक्षाचर्यंचरंतीतिसंन्यासविधायकेवाक्येब्राह्मणत्वंविहितविव
क्षितंस्वाराज्यकामोराजाराजसूयेनयजेतेत्यत्रक्षत्रियत्ववत् च
त्वारआश्रमाब्राह्मणस्यत्रयोराजन्यस्यद्वौवैश्यस्येतिचस्मृतेरिति

ब्राह्मणस्यैवसंन्यासेत्वंतुक्षत्रियोसीतिसंन्यासाधिकाराभावात्कर्मै
वकुर्विति भावः नचोक्तःश्रुतिविरोधः ऋतेज्ञानाभावेमोक्षाभा
वश्रुतेस्तत्परत्वात् वर्णाश्रमधर्मप्रवर्तकत्वेनापिक्षत्रियोयधर्मम
र्यादापालकोवश्यंकर्मकुर्यादित्याह लोकेति लोकानांस्वस्वक
र्मप्रवृत्तेनस्तुन्मार्गान्निवर्तनंचलोकसंग्रहस्तस्यपश्यन्नपिशिष्टाज्ज
नकादिदृष्टाचारमपिकर्मकर्तुमर्हसीत्यन्वयः क्षत्रियदेहस्या
पकेणकर्मणारब्धशरीरस्त्वंजीवन्मुक्तोपिजनकादिवत्प्रार
ब्धकर्मशेषेनलोकसंग्रहार्थंकर्मकर्तुंयोग्योभवसीतिभावः २०॥

उत्तमवैजयंतीटी॰

ननुमलिनांतःकरणशुध्यर्थंज्ञानोपलब्धयेचकर्मकर्तव्यमस्ति
येतुशुद्धांतःकरणलब्धात्मज्ञानास्तथाभूतस्तूणान्नापिष्टपेषण
वद्व्यर्थमेवकर्माचरणंयतःकर्मानुपयोगइतिचेत् अनासक्ति
पूर्वकेकर्माचरणेमात्रआसिद्धिर्जायतेइत्यत्रदृष्टान्तमानयतिभग
वान् कर्मणैवेति जनकादयः आदिपदेनजडभरतादीनांसंग्रहः
राजर्षयोज्ञानिनामग्रेसराःह पार्थजनकादयोपिकर्मणैवपरवैरा
ग्ययोगेव्यवस्थिताइति पार्थएवधनुर्धरोनान्यःकौरवइतिवत् ना
न्येनतथाज्ञानादिनासंसिद्धिमात्मानमास्थिताःप्राप्तवन्त ननुअना
सक्तत्वेनकर्मकरणेमुक्तिर्जायतेतिभवतोक्तंमयास्वीकृतंप्रा
चीनानांजनकादीनांतथैवमुक्तेर्दर्शनेनचतथापिनाहंमुक्ति
मिच्छामीत्यतःस्वकुलोचितमपियुद्धंनकरिष्यामीत्यतआह य
दित्वंस्ववर्णोचितंकर्मकरिष्यसितर्हित्वदनुसारभाविनोलोकाज्ञ
नात्त्वत्तुल्याद्यथोवाकरिष्यंतीतिसंग्रहः महतांस्ववर्णोचितक
र्माकरणेअनुसारभाविनोज्ञादीनांभ्रंशनेवेदाज्ञाभंगस्तस्मिन्स
तीश्वरस्याकोपस्ततस्तेषांप्रत्यवायगतिरितिभावः तथाचैतत्व
करणस्याशयः यदित्वंपितामहादीनांभाविवधविचारदोषेण
कर्मकरणाद्विरक्तः अथापिविवेकपूर्वकंशुद्धाशयःसन्विर
क्तःउभयथापिकर्माकरणेतवसर्वथाअकुशलंनास्तीति यदि
ज्ञानित्वाभिमानेनात्मानंज्ञानिनंमत्वाजनकाद्याचरणंनांगी
करोषितथापि लोकसंग्रहमिति लोकानांजनानांसंग्रहंस्वस्व

वर्णाश्रमोचितधर्म्मप्रवर्त्तने यद्यहं कर्म्म न करिष्यामि तर्हि इमे लो
का अपि करिष्यंति नो चेत्स्वधर्म्मनिष्ठत्वेन नश्येयुरित्येवमेवापि नि
श्चयेन संपश्यन्नप्यकर्त्तावधानेनावलोकयन्नु सन्कर्त्तुमर्हसि
कर्म्मकर्त्तुं योग्यो भवसि येन ज्ञानाधिकारिणस्तेऽपि कर्म्म कुर्वन्ति
त्वं तु कर्म्माधिकारी भूत्वा कर्म्म न करिष्यसि चेत्तर्हि महद्दोषभाग्भ
सीत्यभिप्रायः अस्य द्वितीयोऽप्यर्थः हि यतः ज्ञानिनामग्रेसरा ज
नकादयः कर्म्मणैव संसिद्धिमास्थिताः अतस्तेषां जनकादीनां
कर्म्माचरणं संपश्यन् अथार्थेऽपवकारः चार्थेऽपि अथ लोकसंग्र
हं च संपश्यन्कर्म्मकर्त्तुमर्हसीति २० ॥

मधुसूदनी टी॰

ननु विविदिषोरपि ज्ञाननिष्ठाप्राप्त्यर्थं श्रवणमनननिदिध्यास
नानुष्ठाय सर्वकर्म्मत्यागलक्षणः संन्यासो विहितः तथा च न केवलं
ज्ञानिन एव कर्म्मानधिकारः किंतु ज्ञानार्थिनोऽपि विरक्तस्य तथा च
मयापि विरक्तेन ज्ञानार्थिनो विरक्तस्य तथापि विरक्तेन ज्ञानार्थि
ना कर्म्माणि हेयान्येवेत्यर्जुनाशंकां क्षत्रियस्य संन्यासानधिकार
प्रतिपादनेनापनुदति भगवान् जनकादयो जनकजातशत्रुप्रभृ
तयः श्रुतिस्मृतिप्रसिद्धाः क्षत्रिया विद्वांसोऽपि कर्म्मणैव सह न तु क
र्म्मत्यागेन सह संसिद्धिं श्रवणादिमाध्यां ज्ञाननिष्ठामास्थिताः आप्ताः
क्षत्रियस्यादेवं तस्मात्त्वमपि क्षत्रियो विविदिषुर्विद्वान्वा कर्म्म कर्त्तु
मर्हसीत्यत्र ब्राह्मणाः पुत्रैषणायाश्च लोकैषणायाश्च व्युत्था
यार्थभिक्षाचर्यं चरंतीति संन्यासविधायके वाक्ये ब्राह्मणत्वस्य वि
वक्षितत्वात् स्वाराज्यकामो राजा राजसूयेन यजेतेत्यत्र क्षत्रियत्वव
त् चत्वार आश्रमा ब्राह्मणस्य त्रयो राजन्यस्य द्वौ वैश्यस्येति च स्मृतेः
पुराणेऽपि मुखजानामयं धर्म्मो यद्विष्णोर्लिंगधारणं बाहुजातोः
रुजातानां नायं धर्म्मः प्रशस्यते इति क्षत्रियवैश्ययोः संन्यासाभाव
उक्तः तस्माद्युक्तमुक्तं भगवता कर्म्मणैव हि संसिद्धिमास्थिता जन
कादय इति सर्वै राजाश्रिता धर्म्मा राजा धर्म्मस्य धारकः इत्यादिस्मृतेः
वर्णाश्रमधर्म्मप्रवर्त्तकत्वेनापि क्षत्रियेणावश्यं कर्म्म कर्त्तव्यमित्याह
लोकेति लोकानां स्वस्वधर्म्मप्रवर्त्तनमुन्मार्गान्निवर्त्तनं च लोकसं

ग्रहः तेनपश्यन्नपिशक्तोजनकादिशिष्टाचारमपिपश्यन् कर्मकर्तुम
र्हस्येवेत्यन्वयः क्षत्रियजन्मप्रापकेनकर्मणाब्रह्मशरीरस्त्वंविद्वान
पिजनकादिवत् प्रारब्धकर्मबलेनलोकसंग्रहार्थंकर्मकर्तुंयोग्यो
भवसि नतुत्वंब्राह्मणजन्मालाभादित्यभिप्रायः एतादृशभगव
दभिप्रायविद्भगवताभाष्यकृताब्राह्मणस्यैवसंन्यासोनान्यस्येति
निर्णीतं वार्तिककृतातुप्रौढवादमात्रेणक्षत्रियवैश्ययोरपिसंन्या
सोस्तीत्युक्तमितिद्रष्टव्यं २० ॥

सदानंदी टी०

ननुमेब्रह्मजिज्ञासोर्ज्ञाननिष्ठाप्रियासदा श्रवणाद्येवकर्तव्यंक
र्मत्यागपुरःसरं यथातत्त्वविदःकर्मसंन्यासोस्तितथाममबुभु०
त्सोरपिसंन्यासःकिंनस्यादितिचेच्छृणु २ श्रुतिस्मृतिप्रसिद्धाये
क्षत्रियाजनकादयः मुमुक्षवोवाविद्वांसःस्वधर्मेणसहैवते ३
धीशुद्धिंज्ञाननिष्ठांवाप्राप्तानन्यागतोयतः ततोपित्वंमुमुक्षुर्वा
विद्वान्वाक्षत्रियस्ततः ४ स्वधर्माचरणंसम्यक्कर्तुमेवसदार्ह
सि संन्यासविधिवाक्येहिब्राह्मणत्वंविवक्षितं ५ संन्यासाभावएवा
स्तियतःक्षत्रियवैश्ययोः चत्वारआश्रमाःविप्रराजन्यस्यत्रयःस्मृ
ताः ६ द्वौवैश्यस्यस्मृतौसिद्धौपुराणेभारतेतथा शुद्धज्ञानामपि
धर्मोयद्धिस्मोलिङ्गधारणं ७ बाहुजातोरुजातानांनायंधर्मःप्र०
शस्यते जनकादिसमाचारंपश्यंस्त्वंकर्मसाधय ८ स्वस्वधर्मेव
लोकानामुन्मार्गाद्धिनिवर्त्यत् स्थापनेप्राप्तेलोकसंग्रहस्त
त्वमाश्रय ९ सर्वेराजाश्रितायस्माद्राज्ञाधर्मस्यधारकः १० ॥ २०

नीलकंठी टीका

ब्रह्मशिष्टाचारंप्रमाणयति कर्मणेति कर्मणैवसहसंसि
द्धिंश्रवणादिसाध्यांज्ञाननिष्ठांगतेप्राप्तिताः महान्तः ।
जनकादयस्तादृशाः क्षत्रियाः नतु संन्यासेन नतस्तु
ह्यवित्तस्यममनास्तिकर्मापे । । ।

संन्यासमाह लोकेति लोकस्य संग्रहः स्वधर्मे प्रवर्त्तनं नतु स्वप्रयोज
नाभावे पि केवलं लोकसंग्रहार्थं च कर्म कर्त्तव्यं न दा विदुषां ब्राह्मण
नामपि संन्यासो न स्यात् यतो नैव संन्यासधर्मान् शाह्यपितं तेषां संन्या
स इति चेत् अन्ने नैपितदृष्टं वाचितमस्ति न तु क्षत्रियस्य संन्यासे धिका
रो नास्तीति चेन्न लिंगधारणरूपो विकाराभावे पि भवतस्तथ भाद्विवहि
तकर्मत्यागमात्रे धिकारात् वार्त्तिके सर्वाधिकारविवेकदत्तानि च द
र्शयते कृताधिकारनियमो भृत्यानेक्रियते वलादिति विद्वत्
संन्यासे त्व क्षत्रियादेरपि अधिकारस्य साधितत्वात् अतो लोकसंग्र
हाननुखे कर्मप्रयोजनमिति चेत् न मे पार्थास्ति कर्त्तव्यमिति
सदृष्टांते नाधिकारिकवादर्शनय वैव नियोज्यते न क्षत्रियमात्र
मिति तत्र भवान् २० ॥

आनंदटीका

तथात्वमेवाजन्न नियुक्तः किं त्वमपीत्याह संसिद्धोर्थः अत्रैवेति हा
सत्त्वमोक्षधर्मे अश्वशांतिपर्वणि शुकोपाख्यानेच्चावगम्यः तत्र विदे
पिकर्मापरित्यागे हेत्वंतरमाह लोकसंग्रहमेवापि संपश्यन्
कर्तुमार्गे प्रवर्त्तनं मर्यादायां स्थापनम् २० ॥

अत्रैवोदाहरणमाह ॥ रामकंठटीका

इह लोके जनकादयो राजर्षयः श्रुतिस्मृतीतिहासपुराणादिप्रसिद्धाः
कर्मणैव स्ववर्णाश्रमनियतेन क्रियाविशेषेण प्रजापालनादिना संसि
द्धिं निरुत्तरपुरुषार्थप्राप्तिलक्षणां फलमास्थिताः स्वीकृतवन्तस्तथा च
मोक्षधर्मेषु एकस्मिन्नप्युपाख्याने संवादः श्रूयतामयम् शास्त्रादिषु च
शुकस्य शुकाचार्यस्य विदेहक इत्युपकान्ते सुलभाजनकसंवादे जनक
वाक्यानि सर्वाःसोऽहमवाप्यार्थः समलोष्टाश्मकांचनः मुक्तसंगः
स्थितो राज्ये विशिष्टोऽन्यैस्त्रिदण्डिभिर्मोक्षे हि त्रिविधा निष्ठा दृष्टा पूर्वैर्मह
र्षिभिः ज्ञानं लोकोत्तरं यच्च सर्वत्यागश्च कर्मणाम् ज्ञाननिष्ठां वदन्त्ये
के मोक्षशास्त्रविदो जनाः कर्मनिष्ठां तथैवान्ये यतयः सूक्ष्मदर्शिनः प्र

ज्ञायभयमथ्येनज्ञानेकर्मचकेवलम् तृतीयेऽध्यायेसमाख्यातानिष्ठातेन
महात्मना तृतीयासमुच्चयरूपेत्यर्थः तथात्मज्ञ आकिंचनेनमो।
क्षोस्तिकैवल्यमेनास्तिबन्धनम् कैवल्यमेवेतरेणैवजन्तर्वतीनेनमुच्यतेइ
ति [illegible] २०॥

लासिकी [illegible]टीका

अत्रोदाहरणमाह कर्मणैवेति हियस्माज्जनकादयोराजर्षयः क
र्मणैववर्णाश्रमोचितेनप्रजापालनादिनासंसिद्धिंसम्यग्ज्ञानेनाक्ष।
यं [illegible]प्राप्तिताःस्वीकृतवन्तः तत्रविशेषमं
कर्मापरित्यागहेतुमाह लोकसंग्रहमिति लोकस्यत्रिवर्गाधिकारि
जनस्यसंग्रहंस्वधर्मेप्रवर्तनंमयाकर्मणिकृतेसर्वोजनःकरिष्य।
ति अन्यथाज्ञानिदृष्टान्तेन अज्ञःकर्मत्यजमनेदित्येवंलोकरक्षणम
कर्मिक पितावन्प्रयोजनेपश्यन्कर्तुमर्हसिनत्यक्तुमित्यर्थः २०॥

पंचोलीटीका

अत्रसदाचारंप्रमाणीकुर्वन् उत्तराद्धेनज्ञानिनोपिकर्मकरणमुचित
मित्याह कर्मणैवेति हियस्माज्जनकादयोविद्वांसःकर्मणैवपत्ताटि।
नासंसिद्धिमास्थितामोक्षंगतास्तथत्वमापिअर्जुनलोकसंग्रहमपिसंपश्य
न्तुमर्गेश्चहतिनिराकरणेलोकस्यसंग्रहःलोकसंग्रहस्तमपिप्रयो
जनंपश्यन् कर्तुमर्हसि २०

रणवीरसमिद्धायिनी॥

अत्रार्थेसदाचारंप्रमाणयन् क्षत्रियस्यसन्न्यासानधिकारितांध्व
नति कर्मणैवेति हियस्मात् जनकादयोराजर्षयःकर्मणैवप्र
वृत्तिरूपेणनतुनिवृत्तिप्रधानेनसंन्यासेनसंसिद्धिंमभ्युदयंभोग
मोक्षलक्षणमास्थिताः एवशब्दोभिन्नक्रमः सचकर्तुमित्यने
नान्वेति तस्मात्त्वमपिक्षत्रियप्रवरः कर्मकर्तुमेवार्हसि नतु

त्यक्तमित्यन्वयः॥ एतेनचममत्तानार्थिनोविरक्तस्यकर्माणिरे
यान्येवेत्यर्जुनाभिप्रायापनोदनार्थंक्षत्रियस्यसन्न्यासाभावो
ध्वनितः॥ तथाचस्मृतिः॥ चत्वारआश्रमाब्राह्मणस्यत्रयोराजन्य
स्यद्वौवैश्यस्येति॥ पुराणेच॥ मुखजानामयंधर्मोयद्विष्णोर्लिंगधा
रणं॥ बाहुजातोरुजातानांनायंधर्मःप्रशस्यतइति॥ लोकेति॥
लोकानांजनानांस्वेस्वेधर्मेप्रवर्तनमुन्मार्गान्निवर्तनंचलोकसं
ग्रहः॥ अपिशब्दःशिष्टाचारंसमुच्चिनोति॥ नकेवलंशिष्टाचारमे
वपश्यन् किंतुलोकसंग्रहमपिपश्यन् कर्मकर्तुमेवार्हसि
नतुत्यक्तुं॥ अन्यथावर्णाश्रमधर्मोच्छेदात् राज्ञएवतत्प्रवर्त
कत्वादितिभावः॥ तथाचस्मृतिः॥ सर्वेराजाश्रिताधर्माराजाध
र्मस्यधारकइत्यादि॥ यद्वा लोकानांसैन्यानामनेकेषांराज्ञांसंग्र
हः सम्यग्ग्रहः॥ निर्वैरोपरागाकीदयोग्रहाइत्यनुशासनात्स्व
धर्मवरणनिश्चयरूपोनिर्वैरत्वमपि पश्यन्कर्मकर्तुमर्हसी
ति अयमभिप्रायः॥ यदिराज्ञांभवतांचपरस्परविरोधदृष्टौ
काप्रवृत्तिः॥ अमीषांपुनर्धर्मयुद्धार्थमाहूतानां आहूतोननिवर्ते
तद्यूतायवरणायचेति॥ समोत्तमाधमैरित्यादिनाचमन्वादि
भिःस्मृतत्वाद्धर्मानुपालनार्थमेवास्मिन्संदिग्धजीवनेरणे
प्रवृत्तिरिति संग्रामार्थमाहूताएते आप्तास्त्वयमपिकथंतस्मा
न्निवर्तयेतेऽत्यपि विचारयेत्त्वंकर्मैवकुर्विति॥ ॥

प्रावारोप्यस्तीत्याह कर्मणैवेति कर्मणा सह कर्मकृत्वैवेतप
वेत्यर्थः कर्मकृत्वैव ततो ज्ञानं प्राप्योति वा ननु ज्ञानं विना प्र
सिद्धं हि तेषां ज्ञानित्वमारुणादिषु तमेवं विद्वानमृत इह भव
तीत्यादिश्रुतिभ्यश्च तथापि कर्मणां ज्ञानसाधनत्वोक्तेश्च बु
द्धिशुद्धाद्यतिगत्यंतरं च नास्य: यथाऽत्यस्य नास्ति अतएषां ज्ञान
द्वाराप्यविरोधः यत्र च तीर्थादेव मुक्तिसाधनमुच्यते ब्रह्मज्ञा
नेन वा मुक्तिः प्रयागमरणेन वा अथवा स्नानमात्रेण गोमत्यां
कृष्णसन्निधावित्यादौ तत्रापापादिमुक्तिः स्तुतिपरता वा तत्रा
पि हि कुर्वविद्धब्रह्मज्ञानसाधनत्वमेवोच्यते अन्यथा मुक्तिं निषि
ध्य ब्रह्मज्ञानं विना मुक्तिर्न कथंचिदपीष्यते प्रयागादेस्तु या
मुक्तिर्ज्ञानोपायत्वमेव हीत्यादौ न च तीर्थास्तुतिवाक्यानि तत
प्रस्तावेष्णुक्तं ज्ञाननियमं होति यथा कश्चिद्दन्तं भृत्यं प्रयुक्तामि
प्रथमेवा राजा किं राजेत्यादीति यथाह भगवान् यानि तीर्था
दिवाक्यानि कर्मादिविषयाणि च स्तावकान्येव तानि स्युः स्ना
नो मोहकानि च भवेन्मो तत्त्वमहं इष्टेनोन्यत्तस्य कथंचनेति
नारदीये अतोऽपरोक्षज्ञानादेव मोक्षः कर्म तत्साधनमेव
सर्वद्वाक्याक्य प्रमाणकं तेनैकप्रकारेणानिष्टमित्यर्थः वि
हृद्विदुषोः कर्मभेदमाह ॥ २०॥

भाषा अनुवाद

अब इस विषय मे ज्ञानीयों के आचरण को प्रमाण देतेहैं कि दे
खो परम ज्ञानी जनक राजा कर्म्मके आचरण करने से शुद्धसत्व
होकर अच्छी तरह ज्ञानको प्राप्तभयेथे और जो तुम समझो।
ज्ञानी अपने को जानो तोभी कर्म्म करनाही श्रेय कहै कल्या।
णहै यह कहते हैं किसब मनुष्यों को धर्म मे प्रवृत्ति केअर्थ।
अर्थात् हमारे कर्म्म करने सेसब लोग कर्म्म करैगे नहीं तो
ज्ञानी का व्यवहार देखि अज्ञानी भी लोग व्यवहार छोड़ि बैठे
गेइस हेतु लोक की रक्षा के अर्थ कर्म करना प्रयोजन है य
ह विचारि कर्म करना योग्यहै सोतुमभूल के भी कर्म न त्या
गना २० ॥

दोहा ॥

कर्महिंसे जनकादिक सिद्धिप्राप्त भयजोय लोकमर्यादा
समझके करनयोग्यतुंसोय २० ॥

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः स यत्
प्रमाणं कुरुते लोकस्तदनुवर्तते २१

शांकरभाष्यटीका

लोकसंग्रहः किमर्थं इत्युच्यते यद्यदिति यद्यत् कर्म आचरति श्रे
ष्ठः प्रधानस्तत्तदेव कर्माचरति इतरो जनः तदनुगतः किंच
श्रेष्ठो यत् प्रमाणं कुरुते लौकिकं वैदिकं वा लोकस्तदनुवर्तते ।
तदेव प्रमाणीकरोतीत्यर्थः २१ ॥

आनंदगिरिकृतटीका

ज्ञानवता कृतार्थेन लोकसंग्रहार्थमपि न प्रवर्तितव्यमित्याशंका
मुत्थाप्य परिहरति लोकेत्यादिना कृताध्ययनसम्पन्नत्वेनाभि
मतो यद्विहितं प्रतिषिद्धं वा कर्मानुतिष्ठति तत्तदेव प्राकृतो ज
नोऽनुवर्तते तेन विद्यावतापि लोकमर्यादास्थापनार्थं विहितं
कर्तव्यमित्यर्थः श्रेष्ठानुसारित्वमितरेषामाचारे दर्शयित्वा प्र
तिपत्तावपि दर्शयति किंचेति २१ ॥

स्वामिकृतटीका

कर्मकरणे लोकसंग्रहो यथा स्यात् तथाह यद्यदिति इतरः प्राकृतो
जनोऽपि तत्तदेवाचरति स श्रेष्ठो जनः कर्मशास्त्रं वा निवृत्तिशास्त्रं वा य
त्प्रमाणं मन्यते तदेव लोकोऽप्यनुसरति २१ ॥ त

पिशाचभाष्यटीका

लोकसंग्रहार्थं किं कर्तव्यमित्युच्यते यद्यदेति यद्यत्कर्माचरति श्रेष्ठः
प्रधानस्तत्तदेव कर्माचरति इतरो जनस्तदनुगतः किंच स श्रेष्ठः ।
वैदिकं यल्लौकिकं वा प्रमाणं कुरुते प्रमन्येति लोकस्तदनुवर्तते तदेव प्रमा
णीकरोतीत्यर्थः २१ ॥ व

गी॰
टी॰
त्र॰ ८१

रामानुजभाष्यटीका

इदानींशिक्षितयाप्यपदेश्यस्य सर्वथाकर्मयोग एव कार्य इत्यमुनेलो-
कमेत्यहंप्रपश्यन्नपि कर्मैकृतं मदंमिति श्रेष्ठः कृत्स्नशास्त्रज्ञतानुतयानु-
ष्ठानतयाच प्रथितो यद्यदाचरति तत्तदेवाकृत्स्नविज्जनोप्याचरति अ-
नुष्ठीयमानमपि कर्म श्रेष्ठो यत्प्रमाणं यदंगयुक्तमनुतिष्ठति तदं-
गयुक्तमेवाकृत्स्नविल्लोकोनुतिष्ठति अतो लोकरक्षार्थं शिष्टत-
या [illegible] प्रथितेन स्ववर्णाश्रमोचितं कर्म सकलं सर्वदानुष्ठे-
यं अन्यथा लोकनाशजनितं पापं ज्ञानयोगादप्येनं प्रच्यावयेत् २१

अभिनवगुप्तटीका

स्पष्टार्थं ॥ २१

परमार्थप्रपाटीका

दि

अथैतदेव प्रकटयन्नाह यद्यदिति श्रेष्ठः संभावितो जनः यद्यदाचर-
तीतरः प्राकृतोपि जनः तत्तदेवाचरति तथा च स श्रेष्ठो जनो वे-
दशास्त्रादिकं प्रमाणं कुरुते प्रमाणत्वेन मनुते लोकोपि तद-
नुवर्तीक्रममवर्तते २१ ॥

वनमालीटीका

ननु मया कर्मणि क्रियमाणे लोकः कथं तत्सदृशो भावीत्यत आह ।
यद्यदिति श्रेष्ठो राजादिर्यद्यदाचरति शुभमशुभं वा इतरस्तद्गतो
जनस्तत्तदेवाचरति ननु शास्त्रमेव लोकानां ग्राह्यं श्रेष्ठाचारं परि-
त्यज्य शास्त्रीयमेव कृत्वा नाचरति लोक इत्यत आह स यदिति स श्रे-
ष्ठो यल्लौकिकं वैदिकं वा प्रमाणं कुरुते प्रमाणत्वेन मनुते तदेव
लोकोप्यनुवर्तते प्रमाणं कुरुते प्रमाणत्वेन मनुते तथा च प्रधा-
नभूतेन त्वया गता लोकरक्षणार्थं कर्तव्यमेवेति भावः २१ ॥

क्रममैवजयंतीटीका

नतु महतां एव धीरेण दृष्ट्वा सर्वे लोकाः कर्म किं न करिष्यन्ति मम कस्यैवाचरणेनैव करिष्यन्तीति चेत्तत्राह १

[illegible]

ह यद्यदिति यो महत्कुलप्रसूतः शास्त्रार्थज्ञः शास्त्रविहितानुष्ठा
नकर्ता स श्रेष्ठः स यद्यत्कर्माचरति करोति इतरस्तदितरः प्राकृतो
लोकस्तत्तदेव कर्माचरति स श्रेष्ठो यत्प्रमाणं यद्यत्प्रमाणं यस्मिन्
यस्मिन्कर्मणि यद्यच्छास्त्रं प्रमाणं कुरुते लोकस्तदनुयायी तदनु
वर्तते तेन तत्कर्म तच्छास्त्रं च अनुगच्छति स्वाचरणे यत्प्रमाणं त्वं न
स्वीकरोति अतः त्वमपि महतो राजर्षेर्भरतस्य कुले जातत्वेन [illegible]
स्मि अतः अतस्तव श्रेष्ठस्य लोचितकर्माकरणेन योग्यतेति भावः नतु
बलाद्युक्तो हितः पथाहमने विस्मृतापत्यविधिरूपेण विधि धि
रेकेदने वैरेण गुरुपत्नीहरणे च कृतं [illegible]
[illegible]

मेतत्सर्वं कर्मेतरो जनः कथं न करोति यतो ब्रह्मादयः श्रे

नतु महाकर्माणि क्रियमाणेपि लोकः किमि

मधुसूदनीटीका

ति नत् संग्रहणीयादित्याशंक्य श्रेष्ठाचारानुविधायित्वा दित्याह

श्रेष्ठः प्रधानभूतो राजादिर्यत्कर्माचरति शुभं वा नत्तदेवाचरतीतर
रः प्राकृतस्तदनुगतो जनः ननु स्वमनस्यानं श्रेणोस्पर्धः ननु शास्त्रम
व लोका शास्त्रीये शिष्टाचारे परित्यज्य शास्त्रीयमेव कुतो नाचरन्ति लो
कस्मा शंकाचारवसति यमाव पिश्रेष्ठानुमारिता मितरस्य दर्शयति
स यदिति स श्रेष्ठो लौकिकं वैदिकं वा यत्प्रमाणं कुरुते प्रमाणत्वेन मन्य
ते तदेव लोकोप्यनुवर्तते प्रमाणं कुरुते न तु स्वातंत्र्येण किंचिदित्यर्थः
तथा च प्रधानभूतेन त्वया राज्ञा लोकसंरक्षणार्थं कर्म कर्तव्यमेव प्र
धानानुयायिनो जना व्यवहारा भवन्तीति न्यायादित्यभिप्रायः [illegible]
[illegible] २१ ॥

सदानंदीटीका

कर्माणि क्रियमाणेपि मया कथमयं जनः संग्रहणीयादिति शंकानिवा
रणायाह माधवः १ प्रधानभूतो राजादिर्यद्यदेव शुभाशुभं कर्माचरति
सामान्यस्तत्तदाचरतीतरः २ ननु शास्त्रमप्यालोच्य श्रेष्ठशास्त्रीयमाद
रात् आचारस्वयमेवाय: कुतो नाचरन्तीति चेत् ३ मेवं श्रेष्ठो जनो यद्य
द्वैदिकं लौकिकं वा प्रमाणत्वेन लोकेस्मिन्मन्यते मानजनोपि च ४

गी·
टी·
२

तदेवकुरुतेमानेनस्वानेश्रेणकिंचन त्वयाप्रधानभूतेनलोकसंरक्ष
णायच ५ शास्त्रीयंकर्मकर्तव्यंतस्मादित्याशयेनाहद्वे: ९ २१॥

नीलकंठीटी· स्पष्टार्थं २१

आनंदीटीका

अवश्यंलोकमर्यादारक्षणार्थंत्वयास्वोचितमवश्यमेवकर्मणिवर्तितव्य त१
मित्याह श्रेष्ठ:नामादिश्रेणीरुत्तमः २१॥

रामकंठीटीका + अथतत्त्वविदोप्यन्यकर्मापरित्यागेहेतुमाह +

+ लोकशाहेनत्रिवर्गमात्रोपदेशविषयभूतोजनोविवक्षितःतस्य
श्रेष्ठ: शास्त्रार्थानुष्ठानलक्षणस्वपरलोकार: नेवरूपमाणहेतना
वश्यकरणीयतयासम्यक्परत्वमपगुणमानस्वेशिष्टपुरस्तातिष्ठत्कर्ते
शास्त्रविषयानिकर्माण्याचरितमर्हसि अतः श्रेष्ठ: कुलविद्याहंमा
मू१ दिभिर्योग्योजनोयद्यत्किंचिदाचरतिकर्मानुतिष्ठतितत्तदेवनामयत्
इतरोजन: स्वयंकार्याकार्यविवेकसमर्थमतिर्लोकोनुतिष्ठति यत:
सश्रेष्ठोजनोयदस्तुप्रमाणंकुरुते स्वयमनुष्ठानानुरूपपत्रत्वेनव्यवस्था न१
पयति तेलोकोनुवर्तते अनुसरति [illegible]
[illegible]
[illegible] २१॥

लासिकी [illegible]टीका

तथाहि यद्यदिति श्रेष्ठ:कुलविद्यादिभिस्तादिविशिष्टोजनोयद्यत्किंचि
त्कर्मानुतिष्ठते इतरोजन:कार्याकार्यविवेकसमर्थमतिस्तत्तदेवा
नुतिष्ठतिनान्यत् सश्रेष्ठोजन:प्रवृत्तिशास्त्रंनिवृत्तिशास्त्रंवायत्प्र
माणंकुरुते तदेवलोकोप्यनुसरति [illegible] २१

पंडोलीटीका

लोकसंग्रहंयः कुर्यात्तथाचकुर्यादित्यभप्रमाह यद्यदेतिश्रेष्ठ:यद्यत्क
र्माचरतिइतरोजनस्तत्तदेवआचरतिसयत्प्रमाणंकुरुतेयलौकिकंवै
दिकंवाप्रमाणंकरोतिलोकस्तत्कर्मानुवर्तते २२

ननु कथं लोको मत्कृतं पश्यन् कर्मणि प्रवर्त्ततामित्याशंक्याह
यद्यदिति श्रेष्ठः प्रधानभूतो राजादिर्यद्यच्छुभमशुभं वा कर्म
करोति इतरस्तदनुगतः प्राकृतोपि जनस्तत्तदेवाचरति न
तु स्वातंत्र्येणान्यत्करोति ननु शास्त्रीयं विहाय किमित्यशास्त्री
यं शिष्टाचारं कुर्यादित्याशंक्याह स इति स श्रेष्ठो यल्लौकिकं
वैदिकं वा कर्म प्रमाणं कुरुते तदेव लोकोप्यनुवर्त्तते प्रमा
णतया मन्यते एतेन च शिष्टाचार एव शास्त्रस्य प्रमाणतां
द्रढयतीति प्रतिपादितं तस्मात्त्वमपि प्रधानभूतो लोकसंग्र
हार्थमेव कर्म कुर्विति भावः यद्वा श्रेष्ठो मुख्यो राजा सेनानी
र्वा यद्यदाचरति इतरस्तदनुयायी सैनिकजनोपि तत्तदेवाचर
ति स च यदेव प्रमाणं कुरुते नियमयति तदेव लोकोप्यनुव
र्त्तते न तु तदुल्लंघ्य स्वातंत्र्येण वर्त्तते इति अयं भावः भवानेव स
र्वनायकत्वात्सर्वेषां ससैन्यानां राज्ञां स्वधर्मे प्रवर्त्तक इति सर्वे
एव ससैन्या राजानः सर्वनायकस्य भवतः प्रवृत्तिरूपामेवाज्ञां
प्रतीक्षंतीति मा त्वमकरणेन तेषां स्वधर्माचरणविघ्नकर्ता भू
रिति २१॥

भाषा अनुवाद

और तुमारे कर्म्म करनेसे सब लोगों की कर्म्म मे रुचि होयगी य
ह कहते हैं कि श्रेष्ठ कहे बडे लोग निवृत्तिया प्रवृत्ति कर्म जो
प्रमाण मानते और करते हैं सोई साधारण मनुष्य भी आच
रण करते हैं अर्थात् उनके अनुसार सब व्यवहारके अनुगा
मी होते हैं २१॥

दोहा॥

जो जो करैं महंतजन औरपुरुष करैं सोय सोइ प्रमाण जो
कर्तहैं चलैं लोक तिह जोय २१॥

136

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन ना
नवाप्तमवाप्तव्यं वर्त एव च कर्मणि २२॥

शांकरभाष्यं

यद्यत्र लोकसंग्रहकर्तव्यतायां विप्रतिपत्तिस्तर्हि मां किं न प
श्यसि इति न मे मम पार्थ नास्ति न विद्यते कर्तव्यं त्रिष्वपि लो
केषु किंचन किंचिदपि कस्मात् अनवाप्तमप्राप्तमवाप्तव्यं प्रा
पणीयं तथापि वर्त एव च कर्मण्यहं २२

आनन्दगिरिकृतटीका

कृतार्थस्यापि लोकसंग्रहार्थं विहितं कर्म कर्तव्यमित्यत्र तत्रैव
भागवतमुदाहरणमित्येतदुपन्यस्यति यदीत्यादिना अप्राप्तस्य प्रा
प्तये तथापि कर्तृत्वसम्भवात् न किंचिदपि विद्यते कर्तव्यमिति
कथमुक्तमित्याशंक्याह नानवाप्तमिति प्रतीकमुपादाय व्याच्ष्टे
तदा विद्यावतोऽपि कर्मप्रवृत्तिं सम्भावयति तथेत्यादिना अन्व
यार्थे प्रवर्तते सोऽनुवादः भगवतो मे नास्ति कर्तव्यमित्येतदकांता।
तां स्फोरयति कस्मादित्यादिना प्रयोजनाभावे तथापि नानुष्ठे
यं कर्मेत्याशंक्य लोकसंग्रहार्थं ममापि कर्मानुष्ठानमिति।
मत्वाह तथापीति २२॥

स्वामिकृतटीका

तत्र चाहमेव दृष्टान्त इत्याह न मे इति त्रिभिः हे पार्थ मे कर्तव्यं नास्ति
यतस्त्रिष्वपि लोकेष्वप्राप्तं प्राप्तव्यं नास्ति तथापि कर्मणि वर्त ए
व कर्म करोमीत्यर्थः २२

पैशाचभाष्यं

तद्दर्शयति न मे इति मे मम पार्थ कर्तव्यमदृष्टं त्रिषु लोकेषु
किंचन किमपि न कुत इति चेत् न मे अनवाप्तं अप्राप्तं अवाप्तव्यं।
प्रापणीयं नास्ति तथापि कर्मण्येव वर्ते २२

रामानुजभाष्यं

न मे सर्वेश्वरस्यावाप्तकामस्य सर्वज्ञस्य सत्यसंकल्पस्य त्रिषु लोके।

गी॰
टी॰
र॰

137

ष्वेवमनुष्यादिरूपेणावस्थितोवर्तमानस्य किंचिदपि कर्तव्यमस्ति
अतोनवाप्तेकर्मणावाप्तव्यंनाकिंचिदस्ति अतोपिलोकरक्षार्थेकर्म
णिवर्त्ते २२

अभिनवगुप्तकृतटीका

अपितु करणीयमिदमित्येतावता तदनुकूर्वतामपि सिद्धेर्जनका
दयोदृष्टान्ताः आमरणंयस्यपरिग्रहणमनसोपिकर्मप्रवृत्तौलो
कानुग्रहः प्रयोजनमित्यत्र श्रीभगवानात्मानमेवदृष्टान्तीक।
रोति तस्मादस्मत्कृतएवकरणीयंकर्मकुर्वीत किंच विदितवेद्यः
कर्मैवेत्यजेत् २२ ॥ परमार्थप्रपाटीका

एतत्केवलंनमद्युपदिशामिअहमपितथैवाचरामीत्याह नमे
इति भोपार्थ त्रिष्वपिलोकेषुभूर्भुवः स्वस्त्वेषु अन्यत्रवादेवपितृमनु
ष्यलोकेषु ममकर्तव्यंकिमपिनास्ति किमुद्दिश्यकर्तव्यमित्याह ना
नवाप्तमिति अप्राप्तस्यप्राप्त्यर्थंप्रयत्नः कर्तव्यस्तत्तुहिममअनवा
प्तंकिमपिनास्ति यतआप्तकामत्वात् अथकामनातीतंपरं
ब्रह्मप्राप्तव्यमिति मनोरथस्तर्हि किमुतवक्तव्यं स्वरूपेणाहमेवा।
स्मि एवंविधोप्यहंकर्मणिवर्त्तएव अतःपरिशेषाल्लोकसंग्रहार्थ।
मेवमयर्थः २२ ॥

वनमालीटीका

अहमेवात्रदृष्टान्तइत्याह नमइतिहेपार्थ मेममकर्तव्यंनास्ति।
यतस्त्रिषुलोकेषुअनागतवाप्तमवाप्तव्यं किंचननास्तीश्वरत्वात् त
थापि कर्मणिवर्त्तएवकर्मकरोम्येवेति २२

ऊक्तमवैजयन्तीटीका

आवरणंवात्रप्रमत्तप्रमाणमात्रमपेक्षितं नतुशास्त्रदारा अन्यथा
विधिनिषेधशास्त्रवैयर्थ्यंस्यात् अतएवयत्नतत्रपुराणादौ किन्तु
भगवानात्मसंदेहोलोकसंग्रहार्थंकर्मणिअर्जुनंनियुञ्जन्स्वस्यापिक
र्मप्रवृत्तौलोकसंग्रहमंतराफलान्तराभिलाषशून्यत्वंबोधयन्नात्म
दृष्टान्तेनास्यापिअवश्यकर्तव्यतांबोधयति नमेपार्थास्तीति।

त्रिभिः हे पार्थ एष्वत्र त्रिषु लोकेषु लोकेषु मे ममेश्वरस्य नारसिंहरूपेण
सेवकपावर्तमानस्य जगदुत्पत्तिसमर्थस्य जगदुद्भवविभवलयली
लस्य मम संकल्पस्य स्वतंत्रस्य सर्वेश्वरस्य मम किंचन किंचिदपि कर्त
व्यं करणीयं कर्म नास्ति न भवति पुनस्त्रिषु लोकेषु अनवाप्तमप्राप्तं।

यद्यप्याप्तव्यं वस्त्वस्ति न तत्सर्वं प्राप्तमेवास्ति +

नास्ति यत्किंचिदपि वस्तु ज्ञानेन तत्सर्वं प्राप्तमेवास्ति × तथाप्राप्तमवाप्तव्य
व्यं नास्ति+ तथापि कर्मणि वर्त एव पार्थेति सम्बोधनेनाहमवश्यतो।
पि कर्मण्येव वर्ते वर्तनं ममेश्वरस्यापेरस्य सेयः कथं न वर्तमेव इति सूचि
तं ईश्वरस्य मे कर्मणि प्रवर्तनमस्ति चेन्न हि न तादृशी वार्तानन्तयोग्य
मेवेति भावः २२ ॥

त्रिषु लोकेषु ४ ५

मधुसूदनीटीका

अत्र चाहमेव दृष्टान्त इत्याह त्रिभिः १

१ हे पार्थ मे मम त्रिष्वपि लोकेषु किमपि कर्तव्यं नास्ति यतोऽनवाप्तं फ
लं किंचित् ममावाप्तव्यं नास्ति तथापि वर्त एव कर्मण्यहं कर्म करो
म्येवेत्यर्थः पार्थेति सम्बोधयन् विशुद्धक्षत्रियवंशसमुद्भवस्त्वमप्र
माप्रमत्तेनाशंते मत्समो हमिव वर्तितुमर्हसीति दर्शयति (...)
[illegible] २२ ॥

२४

सदानंदीटीका

अथाहमेव दृष्टान्त इत्याह त्रिभिरीश्वरः मम ईश्वरस्य हे पार्थ कर्तव्यं ना
स्ति किंचन लोकत्रयेऽपि यस्मान्मे नवाप्तं नास्ति किंचन प्राप्तव्यं तद
पीशोऽहं करोम्येव जगद्धिते २ २२ ॥

नीलकंठीटीका

कर्मणि वर्त एव अहं कर्म करोम्येवेत्यर्थः २२ ॥

आनन्दीटीका

इतः परं स्वस्मिन्परमेश्वरस्वरूपता मात्स दर्शयति अलब्धलाभार्थं हि स
र्वो जनः स्वकार्येषु प्रवर्तते मम तु नित्यैश्वर्येण प्राप्तप्राप्यस्य किंचिद
प्राप्यं नास्ति तथापि विहिते कर्मणि प्रवर्तेऽहम् २२ ॥

१ तस्मात्परमार्थज्ञानेनापि न लोकसंग्रहा र्थं शास्त्रचोदितं कर्म सर्वथा त्याज्यमित्यत्र स्वात्मानं
मेवोदाहरणं कुर्वन्नाह १॥

रामकंठीटीका

१ हे पार्थ मम स्वार्थसाधनतया कर्तव्यं कार्यं न किंचिदस्ति यस्मात्त्रिषु लो

गी.
टी.
३.

138

केषु समस्तेषु जगत्सु न वा मे पूर्वमनासादितमिदानीमवाप्तव्यं स्वेच्छा
श्ररणायत्तलब्धं न किंचिदस्ति अलब्धलाभार्थी हि सर्वः कश्चित्स्व
कार्यमारभते मम तु पर्याप्तनिष्पादितनत्त्वाननिष्ठाप्रतिष्ठितस्य।
तस्य न किंचित्साध्यमस्ति अथवा तादृशोपि सन् लोकवत्कर्मणि शा
स्त्रविहिते प्रवर्ते सततमप्रयत्नो भवामि अनेन यस्मात्परतिरेवमा
त्मकार्यं न विद्यते श्रृंपकृष्य तस्मादसक्तः सततं कार्यं कर्म समा
चर [illegible]।
[illegible]।
[illegible] २२ ॥

अत्र चात्ममेव दृष्टान्त इत्याह लासिकी [illegible]टीका

मम

नेति हे पार्थ मे वर्णाश्रमभेदव्यवस्थापकस्य परस्य किंचन कर्त
व्यं नास्ति कुतः त्रिषु लोकेषु अप्राप्तमवाप्तव्यं नास्ति आप्तकामत्वात् न
थापि कर्मणि वर्त एव कर्म करोमीत्यर्थः २२ ॥

पैवोलीटीका

लोकसंग्रहकर्तव्यतायां विप्रतिपत्तिं ग्रान्तं दृष्टान्तेन परिहरति नमे
पार्थेति हे पार्थ त्रिषु लोकेषु मे मम किंचन कर्तव्यं नास्ति न अनवाप्त
मवाप्तव्यं नास्ति अवाप्तव्यं अप्राप्तव्यं नास्ति तथापि निमित्ते मित्ते कर्म
मणि अहं वर्त एव २२

रणवीरसमिष्टोधिनी ॥

अत्र चात्मानमेव दृष्टान्तयति नमे इत्यादि त्रिभिः हे पार्थ विशुद्धक्ष
त्रियवंशोद्भवः पूर्णप्रायत्वेन प्रायो मत्तमत्त्व मदृशमिव कर्मणि व
र्तितुमर्हसीति संबोधनाभिप्रायः यद्यपि मम कर्तव्यं नास्ति यत
स्त्रिषु लोकेषु विषये किमप्यनवाप्तमप्राप्तं पूर्वमवाप्तव्यं नास्ति अ
लब्धलाभार्थी हि सर्वः कश्चित्स्वकार्यमारभते मम तु कृतकृत्यत्वा
न्न किंचित्साध्यमस्ति तथाप्येतादृशोप्यहं कर्मणि वर्त एव कर्म
करोमीत्यर्थः २२ ॥

मधुभाष्य

२२

भाषा अनुवाद

इसविषयमे भगवान अपने को दृष्टान्त कहते हैं किहेपार्थ अर्जुन देखो त्रैलोकमे भीहम को कर्त्तव्य कर्म कुछ नहीं है तोभी हम कर्म्म करते ही रहते हैं और हमको त्रिभुवनमे अलभ्य तथा किसी वस्तुमे अभिलाष नहीं हैं २२

दोहा॥

हे पार्थ त्रयलोक मह पसो कर्तव्य नाहि जो अलब्ध ह्वै
लब्धमोहि वर्तौ कर्महि माहि २२॥

139

यदि ह्यहं न वर्त्तेयं जातु कर्मण्यतन्द्रितः मम वर्त्मा
नुवर्त्तन्ते मनुष्याः पार्थ सर्वशः २३ ॥

शांकरभाष्यं

यदि हि पुनरहं न वर्त्तेय जातु कदाचित् कर्मण्यतन्द्रितो ऽनलसः
सन् मम श्रेष्ठस्य सतो वर्त्म मार्गमनुवर्त्तन्ते मनुष्याः हे पार्थ
सर्वशः सर्वप्रकारैः २३ ॥

आनन्दगिरिकृतटीका

लोकसंग्रहो ऽपि न ते कर्त्तव्यो विफलत्वादित्याशंक्याह यदि हीति २३

स्वामिकृतटीका

अकरणे लोकस्य नाशं दर्शयति यदीति सर्वशः सर्वैः प्रकारैः जा
तु कदाचिदतन्द्रितो ऽनलसः सन्यदि कर्मणि न वर्त्तेयं कर्मनानुतिष्ठे
यं मम वर्त्म मार्गं मनुष्या अनुवर्त्तन्ते अनुवर्त्तेरन्नित्यर्थः २३

पिशाचभाष्यं स्पष्टार्थं २३

रामानुजभाष्यं

अतः सर्वेश्वरः सत्यसंकल्पः स्वलीलया जगदुदयविभवलयलीलो जगदु
पकृतये मर्त्त्यो जातो ऽपि मनुष्येषु शिष्टजनाग्रेसरवसुदेवगृहे ऽवती
र्णस्तत्कुलोचितकर्मण्यतन्द्रितः सर्वदा यदि न वर्त्तेय मम शिष्टजना
ग्रेसरवसुदेवसूनोर्वर्त्माकृत्स्नविदः शिष्टाः सर्वप्रकारेणायमेव ध
र्म इत्यनुवर्त्तन्ते ते च स्वकर्त्तव्यानुष्ठानेनात्मानमनुपलभ्य निरयगा
मिनो भवेयुः २३ ॥

अभिनवगुप्तकृतटीका

न लोकानां उभयैरप्येकपक्षसिद्धयत्नशिथिलित्नास्याबंधत्वेनाप्रवृत्ति
लक्षणो जायते २३ ॥

परमार्थप्रपाटीका

अप्यव्यतिरेकेण निदर्शनमाह यदीति यद्यहं जातु कदाचिदप्यतन्द्रितः
अनलसः सन्कर्मणि न वर्त्तेयं कर्मनानुतिष्ठेयं तर्हि मम वर्त्म मा
र्गं सर्वशः सर्वे मनुष्याः अनुवर्त्तन्ते अनुवर्त्तेरन् [illegible]
[illegible]

[illegible] २३ ॥

वनमालीटीका

अकरणे लोकस्य नाशमाह यदीति अहं यद्यतन्द्रितोऽनलसः सन्
जातु कदाचिन्न वर्तेयं कर्माणि नानुतिष्ठेयं तदा मम शिष्टाग्रेसरस्य श्रीव।
सुदेवसूनोर्वर्त्म मार्गं हे पार्थ मनुष्याः कर्माधिकारिणः सन्तोऽनु
वर्तन्ते प्रवर्तेरन् सर्वशः सर्वप्रकारैः २३ ॥

कृस्तमवैजयन्तीटीका

नन्वीश्वरस्य तव कर्मणि प्रवर्तनं किमर्थमिति चेत्तत्र प्रयोजनं शृ।
णु एवमाह यदीति यदि हीति निश्चयेन सर्वेश्वरोऽप्यहं यदुकुलावती
र्णो वसुदेवनन्दनो भूत्वा तन्द्रितः सावधानः सन् जातु कदाचित्स्वकुलो
चिते कर्मण्यहं न वर्तेयं न कर्म न कुर्यां नहि दृष्टो न हृष्टं मां कृत्वा हे पा
र्थ सर्वशः सर्वे मनुष्या मम वर्त्म स्वोचितकर्ममार्गरूपं मार्गमनुव
र्तेरन् २३ ॥

मधुसूदनीटीका +लोकसंग्रहोऽपि न ते कर्तव्यो विफलत्वादित्याशंक्या

+यदि पुनरहमतन्द्रितः अनलसः सन् कर्मणि जातु कदाचिन्न वर्तेयं
नानुतिष्ठेयं कर्माणि तदा मम श्रेष्ठस्य सतो वर्त्म मार्गं हे पार्थ मनुष्याः
कर्माधिकारिणः सन्तः अनुवर्तन्ते अनुवर्तेरन् सर्वशः सर्वप्रकारैः
[illegible] २३

सदानन्दीटीका

२ मार्गं सर्वप्रकारैस्ते नराः कर्माधिकारिणः सर्वदैवानुवर्तेरंस्तत्र हेतो
र्घं शृणु प्रभो ।१ यद्यहं जगतामीशः कर्माण्यनलसोऽपि सन् कदा
चिन्नानुतिष्ठेयं तदा सर्वेऽपि तन्मम ।२ २३ ॥

नीलकंठीटीका

यद्यहं कर्मणि न वर्तेयं तर्हि मनुष्याः ममैव वर्त्मानुवर्तन्ते अनुवर्ते
रन् कर्म न कुर्वीरन्नित्यर्थः अतन्द्रितः अनलसः सर्वशः सर्वप्रकारैः २३

आनन्दीटीका

श्रेष्ठेरकृतं दृष्ट्वा तेऽपि न कुर्वीरन्नित्यर्थः २३ ॥

रामकंठीटीका

इति यत्त्वात्रोक्तं तदेकान्तज्ञानरूपविषयमेवेति निःसंशयतया प्रतिपादितत्वात् अयतत्व
ज्ञोऽपि सन् भगवांल्लोकवत्कर्मणि प्रवर्तत इत्याह ॥

यद्यहं वर्णाश्रमोचितानि कर्माण्यतन्द्रितः असंजातालस्यः सन्।
कदाचिदपि न वर्तेयं न तिष्ठेयं तर्हि सर्व एव मनुष्याः कर्मण्यधिकृता
मानवाः प्रमाणभूतचरितस्य मम वर्त्म मार्गमाचारमनुवर्तेरन् अ
नुसरेयुः २३ ॥

नासिकी [illegible]टीका

व्यतिरेके नाशप्रसक्तिरित्याह यदीति हि निश्चये अहं जातु कदाचि
दतन्द्रितोऽनलसः सन् सर्वैः प्रकारैर्यदि कर्मणि न वर्तेय कर्मणा
नुतिष्ठेयं तर्हि मनुष्याः कर्माधिकारिणो ममैव वर्त्मानुवर्तेरन्नो
नुवर्तेरन्नित्यर्थः २३ ॥

पंचोलीटीका

अकरणे लोकस्य विनाशहेतुत्वं सूचयति यदि ह्यहमिति हि निश्चयेन म
हे अतन्द्रितः अनलसः सन् यदि जातु कदाचिदपि कर्मणि नित्यनैमित्तिके
कर्मणि न वर्तेयं हे पार्थ सर्वशः सर्वप्रकारैः मनुष्याः मम वर्त्म अनुवर्तन्ते २३

रणवीरसमिद्बोधिनी॥

ननु यदि कृतकृत्योसि तर्हि किमर्थं कर्म करोषि इत्याशंक्य लोकसंग्र
हार्थमेवेत्याह यदीति हि यस्मात् यद्यहमतन्द्रितोऽसंजातालस्यः
सन् कर्मणि स्ववर्णाश्रमोचिते जातु कदाचित् न वर्तेयं नानुतिष्ठे
यं तर्हि मम प्रमाणभूतचरितस्य मत्तो वर्त्म मार्गमाचारं सर्व एव म
नुष्याः कर्माधिकारिणो मानवा नानुवर्तेते नानुवर्तेरन् ना
नुसरेयुरिति २३॥

मधुभाष्य

२३॥

भाषाअनुवाद

तौ फिरि जो हम कर्म्म न करैं तौ कर्म्म न करने से जो लोगों
कीहानि होयगी सोई देखावते हैं कि जो सावधानहो कर्म्म
मे हम कभी न वर्तमान होंय तौ सबलोग हमारी ही राह
लेंय अर्थात् हमारी नाई करैं २३

दोहा॥

जोउ कदाचित ना करौं कर्म निरालस मैंह समनर मार्गतें
दिवलैं पार्थ नाहि संदेह २३॥

142

उत्सीदेयुरिमेलोकानकुर्यांकर्मचेदहं संकर
स्यचकर्तास्यामुपहन्यामिमाः प्रजाः २४ ॥

शांकरभाष्य

तथाच को दोष इत्याह उत्सीदेयुर्विनश्येयुरिमे सर्वे लोकाः लोक
स्थितिनिमित्तस्य कर्मणोऽभावात् नकुर्यां कर्म चेदहं किंच शंकर
स्य च कर्तास्यां तेन कारणेनोपहन्यामिमाः प्रजाः प्रजानामनुग्र
हाय प्रवृत्तस्तदुपहतिं उपहननं कुर्यामित्यर्थः ममेश्वरस्याननु
रूपमापद्येत यदि पुनरहमिव त्वं कृतार्थबुद्धिरात्मविदन्योवा त
स्याप्यात्मनः कर्तव्याभावेपि परानुग्रह एव कर्तव्य इति २४॥

आनन्दगिरिकृतटीका

ईश्वरस्य तव मार्गानुवर्तित्वे मनुष्याणामुचितमेवेत्याशंक्य दूषय
ति तथाचेत्यादिना ईश्वरस्य कर्मण्यप्रवृत्तौ तदनुवर्तिनामपि क
र्मानुपपत्तिरिति हेतुमाह लोकस्थितीति इतश्चेश्वरेण कर्म क
र्तव्यमित्याह किंचेति यदि कर्म न कुर्यामिति शेषः संकरकर
णस्य कार्यं कथयति तेनेति प्रजोपहतिरपि प्राप्नोति चेत् किं त
या न स्यादिति तत्राह प्रजानामिति त्वामनावर्तनमनुवर्तमानां
सर्वेषां को दोषः स्यादित्यपेक्षायामीश्वरस्य कृतार्थतया कर्मानु
ष्ठानाभावे तदनुवर्तिनामपि तदभावादेव स्थितिहेत्वभावात् पृ
थिव्यादिभूतानां विनाशप्रसंगाद्वर्णाश्रमधर्मव्यवस्थानुपपत्तेश्चा
पि कृतानां प्राणभृतां पापोपहननप्रसंगात् परानुग्रहार्थं प्रवृ
त्तिरीश्वरस्येत्युक्तं नन्वस्ति लोकसंग्रहाय कर्म कुर्वाणस्य कर्तृत्वा
भिमानेन ज्ञानाभिभवे प्राप्ते प्रमाद यदि पुनरिति कृतार्थबुद्धित्वे
हेतुमाह आत्मविदिति यथावदात्मानमवगच्छन् कर्तृत्वाद्यभि
मानाभावात् कृतार्थो भवत्येवेत्यर्थः अज्ञेनान्यत्रापि ज्ञानवति
कृतार्थबुद्धित्वे कर्तृत्वाद्यभिमानहीने तस्येत्याह अन्यो वेति त
स्य तर्हि कर्मानुष्ठानम फलत्वादनवकाशमित्याशंक्याह तस्यापी
ति कर्तव्याभावादात्मविदोऽपि परानुग्रहाय कर्तव्यमेव कर्मेत्याहेति शेषः

गी. टी. ३

143

स्वामिकृतटीका

ततः किमत आह उत्सीदेयुरिति उत्सीदेयुः कर्मलोपेन नश्येयुः त तश्च वर्णसंकरो भवेत् तस्याप्यहमेव कर्ता स्यां भवेयमेवमिमाः प्रजा उपहन्यां मलिनीकुर्यां २४ ॥

पिशाचभाष्यं

ततश्च को दोष इत्यत आह उत्सीदेयुरिति अनेन कारणेन उपहन्यामिमाः प्रजाः प्रजानामनुग्रहाय प्रवृत्तः कर्मोपहतिं कुर्यामिति ततश्च ममेश्वरस्यानुरूपमापद्येत यदि पुनरहमिव कृतार्थबुद्धिरात्म

त्सव ९ विदसौ वा तस्यात्मविदः कर्तव्याभावेऽपि परानुग्रहः कर्तव्य इत्यात्मसंभवे उच्यते २४ ॥

रामानुजभाष्यं

[illegible]
[illegible]
[illegible] सर्वे [illegible]
[illegible]
[illegible]

[illegible] २४ ॥ अहं कुलोचितं कर्म न चेत् कुर्यामेवमेव सर्वे शिष्टलो

य ९ का मदाचारायत्तधर्मनिश्चयाः कारणादेवोत्सीदेयुः नष्टा भवेयुः शा स्त्रीयाचाराणामपालनात् सर्वेषां शिष्टानां संकरस्य च कर्ता स्याम् अत एवेमाः प्रजा उपहन्यां एवमेव त्वमपि शिष्टजनाग्रेसरः पाण्डुतनयो युधिष्ठिरानुजः सन् शिष्टतया यदि ज्ञाननिष्ठायामधिकरोषि त त्वदाचारानुवर्तिनोऽकृत्स्नविदः शिष्टाश्च मुमुक्षवः स्वाधिकारम् अज्ञानेन तः कर्मनिष्ठायामनधिकुर्वन्तो विनश्येयुः अतो व्यपदेश्येन विदुषा कर्मैव कर्तव्यम् २४ ॥

अभिनवगुप्तकृतटीका

यतः कर्मवासनानां च न मोक्षे शक्तिरिति ज्ञानद्वारेण वना अपि तं प्रथ वशिथिलीभवंति २४ ॥ परमार्थप्रपा टी.

*उत्सीदेयुरिति अहं चेत् कर्म न कुर्यां तर्हि इमे लोका उत्सीदेयुः स्वक।

*नन्वसंगोदासीनस्य तव लोकैः किं प्रयोजनमित्याशंक्य वर्णाश्रमधर्मे प्रवर्तकः सन् परमकारु णिकोऽस्मीत्याह ॥

र्मलोपेन भ्रंशेयुः ततश्च यो वर्णसंकरो भविष्यति तस्य कर्ताहमे
व स्यामतश्चमेत्कृपापात्रत्वेन स्थिताः प्रजा उपहन्यां मलिनाः पहन्याः
कुर्यां यथा मार्गभ्रष्टानां नेतानां व्याघ्रचोरादिभीतिर्मार्गदर्शितिकृ
पया कोऽपि मार्गद्रष्टा भवति प्रकृतेऽपि तथैव [illegible]
[illegible] २४ ॥

वनमालीटीका

ततः किमत आह उत्सीदेयुरिति अहमीश्वरश्च यदि कर्म न कुर्यां
तदा मदनुवर्तिनां मन्वादीनामपि कर्मलोपे तल्लोकस्थितिहेतोः
कर्मणो लोका उत्सीदेयुर्विनश्येयुः तथा च वर्णसंकरस्य कर्ताह
मेव स्यां तेन चेमाः सर्वाः प्रजा अहमेव हन्याम् तन्मालनाय कृपया
प्रवृत्तोऽहमीश्वरः कथं हन्यामिति भावः २४ ॥

कृष्णमवेत्यपल्लीटीका तथा वर्त्मानुवर्तमे स्वधर्माद्भ्रष्टेन जीवानामधःपतनमित्याह ।

उत्सीदेयुरिति धर्मसंस्थापनाय सर्वधर्मकृत्तेश्च सदानक उत्तु भिस्तु
तुः प्रजापालको हं चेद्यदि स्वकुलोचि [illegible]
[illegible] तच्छास्त्रीयं कर्म न कुर्यां तर्ह
र्हि न हीमे सर्वे मदाचारकर्मकारिणो मदाचाराधीनधर्मव्यवस्था
पिता लोका जना उत्सीदेयुर्भ्रष्टाचारा भवेयुः शास्त्रीयकुलाचारभ्रष्टे
सति कुलमर्यादालोपात्संकरस्य वर्णसंकरस्य कर्ताहमेव स्यां च
रतनपव वर्णसंकरदोषतश्च मा स्वश्रिताः प्रजाः प्रजापालको भूत्वा
हन्तुमुपहन्यामधर्मकरणात् मलिनाः कुर्यां तस्माद्यथाहमेव प्रजासंरक्षणाय कर्म क

[illegible]

+ श्रेष्ठस्तत्तमार्गानुवर्तित्वमनुष्याणा मधुसूदनीटीका उचितमेव को दोष इत्यत आह

+ अहमीश्वरश्चेद्यदि कर्म न कुर्यां तदा मदनुवर्तिनां मन्वादीनामपि क
र्मानुपपत्तेः लोकस्थितिहेतोः कर्मणो लोपेनेमे सर्वे लोका उत्सीदेयु
र्विनश्येयुः ततश्च वर्णसंकरस्य च कर्ताहमेव स्यां तेन चेमाः प्रजा अह
मेवोपहन्यां धर्मलोपेन विनाशयेयं कथं च प्रजानामनुग्रहार्थं प्रवृत्तमी
श्वरो हन्ताः सर्वा विनाशयेयमित्यभिप्रायः यद्यदाचरतीत्यादौ परा नां च तुः श्लोकानाम
यथा योजनार्थं केवलं लोकसंग्रहं पश्यन्कर्तुमर्हसि अपि तु श्रेष्ठाचारत्वा
दपीत्याह यद्यदिति तथा च मम श्रेष्ठस्य यादृशाचारस्तादृश एव म

गी॰
टी॰
२

दनुवर्तिना त्वयानुष्ठेयो न स्वातंत्र्येणाम इत्यर्थः कीदृशस्त्वाचारो यो
मयानुवर्तनीयस्तमाशंकायां न मे पार्थेत्यादिभिस्त्रिभिः श्लोकैस्तत्र।
दर्शनमिति ॥ ननु तवेश्वरस्य लोकसंग्रहार्थं कर्माणि कुर्वाणस्यापि क
र्तृत्वाभिमानाभावान्न काचित्क्षतिः मम तु जीवस्य लोकसंग्रहार्थं क
र्माणि कुर्वाणस्य कर्तृत्वाभिमानेन स्वाभिभवः स्यादित्यत आह २४॥ ना॰

मधुसूदनीटीका

यद्यहं कर्मणो कुर्यां तदा मदनुवर्तिनां कर्माकरणेन लोकस्थितिहे
तोश्च कर्मणः १ लोपेनैते विनश्येयुः सर्वे कर्माधिकारिणः ततोऽक
र्ताहमेव वर्णसंकरस्य च २ इमाः सर्वाः प्रजास्तेन धर्मलोपेन सं
करात् अहमेवोपहन्यां प्रहतोऽनुग्रहाय मतः ३ २४ ॥

नीलकंठीटीका

ततश्च किमित्यत आह उत्सीदेयुरिति यद्यदाचरतीत्यादेरयमर्थो।
जना न केवलं लोकसंग्रहं पश्यन् कर्तुमर्हसि अपि तु श्रेष्ठाचारत्वाद
पीत्याह यद्यदिति तथा च मम श्रेष्ठस्य यादृश आचारस्तादृश एव म
दनुवर्तिना त्वयानुष्ठेयः न स्वातंत्र्येणेत्यर्थः कीदृशस्त्वाचा
रो यो मयानुवर्तनीयस्तमाकांक्षायां न मे पार्थेत्यादिभिस्त्रिभिः श्लोकै
स्तत्प्रदर्शनमिति मधुसूदनश्रीपादाः २४ ॥

आनन्दीटीका

ततश्च को दोषस्तमाह उत्सीदेयुः सदाचारानवगमात्स्वधर्माननुष्ठानेन वि
नश्येयुः तथा च वर्णाश्रमधर्माणां मिश्रीभावस्य मर्यादाया अनिय
मात्कर्ता स्याम् अत एव विशृंखलीकरणादिमाः प्रजा उपहन्याम्
ममेश्वरस्यानुग्राहकत्वं हीयतेत्यर्थः २४ ॥

रामकंठीटीका

किंचातइत्याह ॥ यद्यहं लोकवद्व्यवहारादिनं कर्माणाचरेयं तदमी लोकाः समस्ता।
नि भुवनानि संसारप्रकृष्टोचितं तत्तत्कर्मफलोपभोगाधिकरणम्
तान्युत्सीदेयुः उत्सादं विनाशं भजेयुः कर्मनिबन्धना हि लोकानां स्थि
तिः किंच तथाविधं कर्माकुर्वन्संकरस्य वर्णविभागमिश्रीभावस्य का।

नोप्रवर्तकोभवेयम् सर्वैर्हिपुरुषाःमांशास्त्रीयकर्माकुर्वाणमनु
वर्तमानाः स्वस्वतत्तज्जातिविहितंकर्मयद्यहमन्यजातिविहितन्वा
हिनाविरोधेनाप्याचरन्तः संकीर्णवर्णतामाप्नुयुः अतोहमेववर्ण व॰
संकरदोषस्यकर्तास्यां किंचातःस्माप्रजानाम् कर्मभूमिजन्मनः प॰
शास्त्रचोदितकर्मोपहतानांस्वीनसारिणः पुरुषानुपहन्यामु
पघातेनतृविनाशेनयोजयेयम् एताहिप्रजायथाविहितकर्मानाच
रंत्यः स्वर्गादिशुभेरयनानिसमर्गतस्तनज्ञानप्रपन्न्यकैवल्यलक्षण
उत्तमान्पुरुषार्थान्दूरवहिष्कृताः नरकतिर्यग्भावशामिलक्षणवि
नाशमाप्नुयुः (तदिम्यपरमेश्वरेच्छापरिकल्पितजगत्क्रीडानियमे।
व्युत्थापकत्वंमयैवाचरितंभवेदतः) २४

लासिकी वस्तगतीटीका

ततश्चकिम् इत्यतआह उत्सीदेयुरिति यद्यहंकर्मनकुर्यांतदिमेलो
का उत्सीदेयुः कर्मलोपेननश्येयुः कर्मनिबन्धनाहिलोकस्थितिः
ततश्चवर्णसंकरोभवेत् तस्याप्यहमेवकर्ताभवेयं ततश्चेमाःप्रजाउ
पहन्यामलिनीकुर्याम् २४ ॥

पैचोलीटीका

तमेवदोषंदर्शयति उत्सीदेयुरिति चेत् यद्यहंकर्मनिमित्तेमिन्निकं
नकुर्यांतर्हिइमेलोकाः स्थितिनिमित्तस्यकर्मणः अभावात् उत्सीदे
युः विनश्येयुः वृचनःसंकरस्यवर्णसंकरस्यकर्ताप्यहमेवस्यांभवा।
मिइमाः प्रजाउपहन्यांमयापदेवउपहताःस्युरित्यर्थः २४

सगवीरसमिहोधिनी॥

ततश्चकिमित्याहोत्सीदेयुरिति यद्यहमीश्वरः यतस्ववोदितं
कर्मनकुर्यां नाचरेयं तदमीलोकाउत्सीदेयुर्विनाशंभजेयुः
मदनुवर्तिनांमन्वादीनामपिकर्मानाचरणाल्लोकस्थितिहेतोः
कर्मणोलोपादितिभावः किंच संकरस्यवर्णविभागाभिप्रोभा

वस्तुतस्तथाविधं कर्माकुर्वन्नहमेव कर्ता स्यां मम वैदिकमदनुया
यिनो जनाः स्वंस्वं कर्म त्यक्त्वा परजातिविहितं तच्च यथेष्टं कुर्वा
णाः संकीर्णवर्णतामापद्युरिति भावः ततश्च किमित्यत आह
इमाः कर्माधिकारिण्यः प्रजा अहमेव धर्मलोपेनोपहन्यां वि
नाशयेयं अयमत्राभिप्रायः एतादृक्कर्माधिकारिण्यः प्रजा म
दनुयायित्वान्मत्तूष्णीमासीने विलोकभोगमोक्षोभयफल
कयथाविहितकर्मानाचरणात्स्वर्गापवर्गाभ्यां दूरं बहिष्कृ
ता नरकतिर्यक्प्राप्तिलक्षणं विनाशमाप्नुयुः कथं वाहमी
श्वरः सर्वत्र समः करुणामयश्चैतासामनुग्रहार्थं प्रवृत्तः सन्
अधोगतिप्राप्तिलक्षणेन विनाशेनैता योजयेयमिति अतो म
यापि लोकसंग्रहार्थमेव कृतं स्ववर्णाश्रमोचितं कर्मानुपपं
त्वमपि तदर्थमेवाचरेति ॥ २४ ॥

मधुभाष्य

२४॥

भाषाअनुवाद

तौ उसमे जो होगा सो कहते हैं कि जो हम कर्म्म न करैं तो
धर्म्मलोप हो जाय औ धर्म्म लोपसे प्रजानष्ट होयगी औ वेमर्या
द हो जाइ क्योंकि जो जिसके मनमानै सोइकरै तो संसारमे दु
राचारसे वर्णशंकर जन्मैंगे फेरि इस अनुचितके कर्त्ता भी ह
मी ठहरे अपनी प्रजा आपही नष्ट किया यही होगा २४

दोहा ॥

होय विनाश यह लोक जो कर्म करौं मैं नाहि वर्णसंकर क
र्त्ता बनौं प्रजा नाश होय जाहि २४ ॥

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहं २५

शांकरभाष्यं

सक्ता इति सक्ताः कर्मण्यस्य कर्मणः फलं मम भविष्यतीति के चिदविद्वांसो यथा कुर्वन्ति भारत कुर्याद्विद्वानात्मवित्तथा असक्तः सन् तद्वत् किमर्थं करोति तच्छृणु चिकीर्षुर्यथा कर्तुमिच्छुः लो कसंग्रहं २५॥ आनन्दगिरिकृतटीका

दृष्टान्तदार्ष्टान्तिकरूपं श्लोकं व्याकरोति सक्ता इत्यादिना असक्तः। सन् कर्तृत्वाभिमानं फलाभिसन्धिं वा अकुर्वन्निति यावत् २५॥

स्वामिकृतटीका

तस्मादात्मविदापि लोकसंग्रहार्थं तत्कृपया कर्म कार्यमित्युपसंहर ति सक्ता इति कर्मणि सक्ता अभिनिविष्टाः सन्तः अज्ञा यथा कर्म कु र्वन्ति असक्तः सन् विद्वानपि तथैव कुर्यात् लोकसंग्रहं कर्तुमिच्छुः २५

पैशाचभाष्यं

ततश्च सक्ताः असक्ताः फलाभिसन्ध्यविद्वान् ज्ञानी तथा तेन प्रकारे ण असक्तः फलाभिसन्धिरहितश्चिकीर्षुः कर्तुमिच्छुर्लोकसंग्रह ं लोकसंदेहं कर्तव्यधर्मोमादतं २५॥

रामानुजभाष्यं

अविद्वांसः आत्मन्यकृत्स्नविदः कर्मण्यसक्ताः कर्मण्यवर्जनीयसं बंधाः आत्मन्यकृत्स्नवित्तया तदभ्यासरूपज्ञानयोगेनाधिकृताः कर्म योगाधिकारिणः कर्मयोगमेव यथा आत्मदर्शनाय कुर्वते तथात्मनि कृत्स्नवित्तया कर्मण्यसक्तो ज्ञानयोगाधिकारयोग्योऽप्यव्यपदेश्यशि ष्टलोकरक्षणार्थं स्वाचारेण शिष्टलोकानां निश्चयं चिकीर्षुः कर्मयो गमेव कुर्यात् २५॥ अभिनवगुप्तकृतटी·

यतस्तेन सम्यग्ज्ञानेन युक्ताः अतो बुद्धिभेदं विगलितं नैषां परमो य मनर्थश्च स तु अश्रायभेदयेत् अपि यमेषां २५॥

परमार्थप्रपाटी·

सक्ता इति अविद्वांसः परमार्थानभिज्ञाः कर्मजडाः कर्मेषु सक्ताः

१ एवमस्मद्दृष्टान्तेन सद्भिरपि कथं वर्तितव्यमित्याह

गी॰
टी॰
२

147

संगात्कर्मणः फलावश्यंभावनियमः तेनिश्चितफलाशयाप्रवृत्ताः सन्तो यथा कुर्वन्ति एवमसक्तोपि विद्वान् तथाविधमार्गमनुलक्ष्य कुर्यात् किंभूतः लोकसंग्रहं चिकीर्षुरिति पूर्ववत् २५॥

वनमालीटीका

ननु तेनैव तानि कोपि कर्म ... विद्वत् कर्मणः को विशेषस्तत्राह सक्ता इति सकामसदीयमिदं कर्मानेनेदं फलमेव भवतीति धीमन्तः असक्तो भगवत्कारितमिदं कर्म न मदीयमनेन स्यपव श्रेयस्तामिति धीमान् लोकसंग्रहमिच्छुः कर्म कुर्यात् अतो महदेवान्तरं तत्कर्मणोरिति भावः २५॥

कर्तव्

ननु ईश्वरस्य सर्वज्ञत्वस्य स्वतंत्रस्य तव लोकसंग्रहार्थं कर्माचरणं भवति तत्तु केन प्रकारेण त्वं करोषीत्यं मम पृच्छे वनास्ति यतस्त्वया चिन्त्यस्वर्यप्राप्तिमत्वेनानन्तप्रकारत्वं परंतु अल्पज्ञानामल्पशक्तीनामनीश्वरानां परतन्त्राणां जीवानां मध्ये विद्वांसः के विद्वत्तानि नः सन्ति ते सर्वे केन केन प्रकारेण कर्म कुर्वन्तु भयेषामेव एवं प्रकारेणाभिज्ञावेति चेत्तत्राह

कुसुमवैजयन्तीटी॰

[illegible] यद्यपि मत्सदृक्लोकविन कर्मत्यागे दोषो न भवेत्समर्थत्वात् परंतु स्वकर्मत्यागेन अज्ञानां नरकादौ पतनं भवेदिति भावः स्वस्यलोकोपकारकत्वेन तु संग्रहार्थे निजकर्मकरणं दृष्टिपिता आत्मब्रह्मविद्यातो जीवन्मुक्तानां लोकसंग्रहार्थमवश्यं कर्मकरणीयमिति निजात्मावद्रुमुक्त जीवस्याचारणेन दर्शयति सक्ता इति हे भारत भरतवंशज अविद्वांसः अभुत्तवः आत्मज्ञानविरहिताः कर्माधिकारिणः आत्मज्ञानाभ्यासेष्वनधिकारिणो जनाः कर्मणि सक्ताः सन्तः फलाभिकांक्षया न लिप्यन्ते यतः सन्तो यथा कर्म कुर्वन्ति तथा विद्वान् ज्ञानिनः कर्माचरणेन निर्मलीकृतान्तःकरणेन पालब्धात्मज्ञानवान् लोकसंग्रहं स्वधर्माचरणेन लोकानां धर्मे निश्चयं चिकीर्षुः कर्तुमिच्छुः कर्मण्यसक्तः फलाभिलाषशून्यः सन् कर्म कुर्यात् ननु यस्त्वात्मरतिरेव स्यादित्यत्र तस्य कार्यं न विद्यत इति वदता भगवता आत्मनस्य आत्मनिमग्नत्वेन ऐहिकपारलौकिकफलस्पृहाशून्यत्वेन कर्तव्यं नास्तीत्युक्तं इदानीं लोकसंग्रहार्थं विदुषाप्यवश्यं कर्म कर्तव्यमित्युक्तत्वेन विरोध इति चेत्सत्यम् कर्म करणे नान्तःकरणशुद्ध्यादिफलाभावेन कर्म न करणीयम् किन्तु लोकसंग्रहार्थं तु कर्तव्यमिति सर्वत्रापि व्याख्येयम् अतएव हि लोकसंग्रहार्थमेव कर्म कर्तव्यमिति भगवतो विदुषामुपदिष्टत्वात् तर्हि यस्य विदुषः कर्म दृष्ट्वान्ये लोकाः कर्म कुर्युस्तेनावश्यं कर्तव्यं नान्येनाप।

शिष्टः+

सिद्धेनप्रसिद्धेनापि देशान्तरमुपद्रुत्यापि प्रसिद्धिं प्राप्य न कर्तव्यमि-
ति प्रतिभाति तथा चाह भगवानत्रन्तेनातः तिसमस्तानवप्या
मडतिमत्येन ब्राह्मणः स्नातीनानवसन्मध्ये नैव विधेन किंचनेति ॥ २५

+ नत्तत्वेश्वरस्य लोकसंग्रहार्थं कर्माणि कुर्वाण स्यापि कर्तृत्वाभिमानाभावात्र कापि क्षतिः ममत्वजीवस्य लोकसंग्रहार्थं कर्माणि कुर्वाणस्य कर्तृत्वाभिमानेन ज्ञानाभिभवः स्यादित्यत आह +

मधुसूदनीटीका

सक्ताः कर्तृत्वाभिमानेन फलाभिसंधिना च कर्मण्यभिनिविष्टा अ-
विद्वांसोऽज्ञा यथा कुर्वन्ति लोकसंग्रहं कर्तुमिच्छुर्विद्वानात्मविदा-
पि तथैव कुर्यात् किंत्वसक्तः सन् कर्तृत्वाभिमानफलाभिसंधिवा-
कुर्वन्नित्यर्थः भारतेति भरतवंशोद्भवत्वेन भाग्यवत्त्वेन त्वं
नवात्वं यथोक्तशास्त्रार्थबोधयोग्योसीति दर्शयति ।
२५॥

कर्म

सदानंदीटीका

नवीश्वरस्य नेव न कर्तृत्वादेरभावतः न तत्र तिमेत्वनीशस्य तन्निर्ज्ञा-
नाभिभूतिनः १ कर्मणि क्रियमाणे स्यादिमाशंक्याह माधवः यथा
फलानुरागेणाकर्तृत्वाभिनिवेशनः २ कर्मण्यभिनिविष्टाः प्रकुर्वते।
सक्ताः सकर्मतत् तथैव कर्तुमिच्छुः सज्ञानी विलोकस्य संग्रहं ३
कुर्यात्सक्ता फले रागे कर्तृत्वाभिमतिं तथा तथा च क्रियमाणेपि
कर्मण्यां विदो न हि ४ तत्तिर्नापि प्रसक्तो बाधीश्वरार्थप्रकुर्वतः।
किं न कर्तृत्वधीः कर्मफले रागश्च वेधते ५ हेतवत्स्मात्... काकुर्वं प्रो-
मोति बंधने भाग्यानेनहलनेनयथोक्तं बोद्धुमर्हसि ६ यहेतत्कहकु-
लोक्यत्रत्तथाभारतशाह्नन्दः २५ ॥

नीलकंठीटीका

यदि मादृशस्त्वं त्वं कृतार्थोऽसि तथापि परानुग्रहार्थं कर्माणि कुर्वि-
त्याह सक्ता इति कर्मणि कर्मफले कुर्वन्तीति कर्माणीति शेषः प्रस-
क्त इति च्छेदः २५॥

धानसीटीका

विद्वद्विद्वद्विशेषं दर्शयति फलादिभेदेन कर्मणि सक्ताः अवि-
द्वांसो यथा महता प्रयासेन कुर्वन्ति तथैव विद्वान् असक्तोपि लोकसं-

ग्रहं चिकीर्षुर्महता प्रयासेन कुर्यादिति नियोजनम् अविद्वद्दर्शन
मत्र महता प्रयासेन करणे दृष्टान्तमात्राय २५ ॥

रामकंठीटीका

अतो यथा येन प्रकारेणाविद्वांसो यथाकामं तत्त्वज्ञानशून्यत्वात्सुख
या विद्वत्ता रहिताः पुरुषाः कर्मणि तत्फलकस्य साधनभूते य
ज्ञादिक्रियात्मके व्यापारे सक्ताः स्वदेहे वपरत्वेन मन्यमानात्स्वात्मात्र
परिसमाप्त पुरुषार्थाः सन्तः कुर्वन्ति विहितानि कर्माण्याचरन्ति
तथैव तेन प्रकारेण सामान्यजनतुल्येन स्वहृदयसंवेधनत्वज्ञानवि
घ्नत्वानेनन्यदृशाभियोगरूपेण विद्वान्यथापेक्षितः कुर्यात्कर्माण्या
चरेत् कीदृशः सन् असक्तो निरहंकारः तत्त्वज्ञानादसक्तः तत्परिश्रम
त्वाल्लोकवत्स्वर्गादिभोगविषयेन तत्तत्कर्मफलसंगेन रहितः किम
र्थमेवं कुर्यादिति हेतुगर्भविशेषणमाह चिकीर्षुर्लोकसंग्रहम्
लोकस्यानुयायिजनस्य संग्रहं स्वपथे चिकीर्षुः प्रापयितुमिच्छुः ।
निश्चितमेव येन हि विद्वान् तत्त्वज्ञानोपदेशयोग्यतामप्यलोकेनरक

 पातादिभ्यः त्रातुं जिहीर्षुः तथा कर्माचरणीयं यथा लोकस्तदनुव
र्तमानः स्वकर्मानुष्ठानात्स्वर्गादेरपि फलात्तत्त्वयोग्यतां
[illegible] २५ ॥

लाक्षिकी [illegible]टीका

ननु तत्त्ववेत्तुरस्य लोकसंग्रहार्थं कर्म कुर्वाणस्यापि कर्तृत्वाद्यभिमा
नाभावात्कापि क्षतिः जीवन्मुक्तस्यापि कर्म कुर्वाणस्य त
त्त्विमग्रचित्ततया समाधानानुपपत्तेर्बोधहानिः स्यादित्यत आह स
क्ता इति अविद्वांसो बोधशून्याः कर्मणि सक्ताः फलाभिलाषेणा तल्ली
नचित्ताः यथा कर्म कुर्वन्ति तथा लोकसंग्रहं चिकीर्षुः पुरुषः लो
कस्यानुवर्तिजनस्य संग्रहं स्वपथे चिकीर्षुरसक्तः सत्फलाभि
लाषकर्तृत्वाद्यभिमानाभावेन तदनिमग्नचित्तः सत्कर्म कुर्यात्
तत्त्वज्ञानस्य संगराहित्ये मेव विशेषणमत आह विद्वान् आत्मज्ञान
तुलितस्वहृदयसंबोधसमाहितः तत्त्वकम् परमार्थं च मत्कारम

न्तः स्वानुभवं विनायमस्मामोवज्ञानाग्निसीधास्वादमिवद्विन इति ।
नत्कंकुलार्णवे योगिनो विविधैर्वेशैर्नराणामुपकारिणः भ्रमन्ति ।
पृथिवीमेतामविज्ञातस्वरूपिणः अलद्यादि यथालोके योन्निवद्धा
कं योगगतिः नतन्नाणांग्रहाणांवतथाहंतेनयोगिन इति २५ ॥

पंवोलीटीका

आत्मविदोपि स्वात्मनः कर्तव्याऽभावेपि परानुग्रहार्थं कर्म कर्तव्यमि
त्याह सक्ता इति हे भारत यथा अविद्वांसः अनात्मज्ञाः कर्मणि सक्ता
कर्मफले बद्धाः कर्म कुर्वन्ति तथा विद्वान् असक्तः कर्मफले निः
स्पृहः लोकसंग्रहं चिकीर्षुः लोकानुग्रहं कर्तुमिच्छन् कर्म कुर्यात् २५

रणवीरसमिद्धोधिनी ॥

यस्मादकरणेन प्रजाविनाशस्तस्मादेवं कर्तव्यमित्याह सक्ता
इति कर्मणि विषये विद्वांसः किं कर्तव्यं किंवा करणीयं किमि
दमाचरणीयमनेनेदमित्यादि विषये निश्चयहीनाः सक्ता भवा
दृष्टोपुष्कृतानुवृत्तिलक्षणसंगाः श्रेष्ठानुवर्तिनो जना यथा कु
र्वन्ति कुर्युर्विहितं कर्माचरेयुः ममवर्त्मानुवर्तन्त इति वलिउर्षे
लद् विद्वान्कर्मसु निश्चयात्मकबुद्धिविशिष्ट उक्तलक्षणं लोक
संग्रहं विकीर्षुर्भवादृशः क्षत्रियप्रवरस्तथा कुर्याद्धि हितक
र्मानुतिष्ठेत् यतो मत्तः प्रकारेणैव विलुप्तानिश्रुतेः अः विस्म
स्मिन्मयीश्वरे सक्तः मदनुष्ठितं कर्मस्वप्रवृत्तौ प्रमाणं तथा
ज्ञानं मदनुवर्तीति यावत् अयमत्राशयः यथाहं कृतकृत्यो
पि त्वानुवर्तिजनसंग्रहार्थं कर्माण्याचराम्येव एवं मत्सक्तो
पि जनस्तथा कुर्यात् यथा तदनुवर्तिनोऽन्येपि जनास्तत्कर्मा
चरणं प्रमाणीकृत्य स्वकर्मणि प्रवर्तेरन्निति २५ ॥

भाषाअनुवाद

इसवास्ते आत्मज्ञानी को भी लोगों पर कृपाकरि सिखाने के अर्थ कर्म करनाचाहिये इसी को कहते हैं कि हे भारत अर्जुन कर्ममे आसक्त होकर जैसे अज्ञानी लोग कर्म करते हैं तैसे लोगोंके उपदेश की इच्छा करि विद्वान करे ज्ञानी भी कर्मकरै तो धर्मकी मार्ग बनी रहै गी २५

दोहा॥

सक्त होय के कर्त जिम हे अर्जुन जड कर्म त्यों असक्त
होय पंडित करैं लोक हित धर्म २५॥

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनां जोषयेत्स
र्वकर्माणि विद्वान्युक्तः समाचरन् २६ ॥

शांकरभाष्यं

एवं लोकसंग्रहं चिकीर्षोर्न ममात्मविदः कर्तव्यमस्त्यन्यस्य वा लोकसं
ग्रहं मुक्त्वा ततस्तस्यात्मविद इदमुपदिश्यते नेति बुद्धेर्भेदो बुद्धिभेदः म
या इदं कर्तव्यं भोक्तव्यं चास्य कर्मणः फलमिति निश्चयरूपाया बुद्धे
र्भेदनं चालनं बुद्धिभेदस्तं जनयेन्नोत्पादयेदज्ञानामविवेकिनां कर्म
सङ्गिनां कर्मण्यासक्तानां आसङ्गवतां किं तु कुर्याज्जोषयेत् कारयेत्
सर्वकर्माणि विद्वान् स्वयं तदेवाविदुषां कर्म युक्तोऽभियुक्तः समाचरन्

२६

आनन्दगिरिकृतटीका

उक्तमनूद्योत्तरश्लोकमवतारयति एवमिति कर्तव्यं कर्मेति शेषः पूर्वा
र्द्धमेवं व्याख्याय उत्तरार्द्धं प्रश्नपूर्वकं प्रवर्तयन्व्याचष्टे किं तु कुर्यादि
ति सर्वकर्माणि कारयेदेव प्रीतिं कुर्वन्निति शेषः कथं कारयेदित्या
काङ्क्षायामाह तदेवेति २६ ॥

स्वामिकृतटीका

ननु कृपया तत्त्वज्ञानमेवोपदेष्टुं युक्तं नेत्याह न बुद्धिभेदमिति अ
ज्ञानामत एव कर्मसङ्गिनां कर्मासक्तानामकर्त्रात्मोपदेशेन बुद्धेर्भे
दमन्यथात्वं न जनयेत् कर्मणः सकाशाद्बुद्धिचालनं न कुर्यात् अपि तु जो
षयेत् सेवयेदज्ञान्कर्माणि कारयेदित्यर्थः कथं युक्तो विद्वान्
स्वयमाचरन् बुद्धिचालने कृते सति कर्मसु श्रद्धानिवृत्तेर्ज्ञानस्यानु
त्पत्तेस्तेषामुभयभ्रंशः स्यादिति भावः २६ ॥

पिशाचभाष्यं

किं च न बुद्धीति समाचरन् कर्म न कर्तव्यमिति बुद्धेरन्यथाभावं जन

न°

नोत्पादयेत्
येत् केषामज्ञानामविवेकिनां कर्मसङ्गिनामिदं विशिष्टफलसाध
नमिति कर्मसङ्गिनां किं तु कर्म जोषयेत् कारयेत् सर्वकर्माणि
यज्ञादीनि विद्वान्स्वयं तदेवाविदुषां कर्म युक्तोऽभियुक्तः समाचरन् २६

रामानुजभाष्यं

अज्ञानामात्मन्यकृत्स्नविदां ज्ञानयोगोपपादनाशक्तानां मुमुक्षूणां

कर्मसंगिनामनादिकर्मवासनयाकर्मण्येववृत्तियतनेनकर्मयोगाधि-
कारिणांकर्मयोगादन्यथात्मावलोकनमस्तीतिबुद्धिभेदंजनयेत् किं
तर्हि आत्मनिष्कृत्त्वविज्ञानयोगसत्त्वेपिस्वोक्तकर्मयोगप्रवृत्त्या
नयोगान्तिरपेक्षआत्मावलोकनसाधनमितिबुद्ध्वायुक्तःकर्मैवाचर-
न्सर्वकर्मस्वकृत्त्वविदःप्रीतिंजनयेत् २६ ॥

अभिनवगुप्तकृतटी॰

तदाह स्वयंचैवंबुध्यमानःकर्माणिकुर्यात् नचलोकानांबुद्धिभि-
न्द्यात् २६

परमार्थप्रपाटी॰

अथकृपालुतालोकानांतत्त्वज्ञानमेवकथंनोपदिशसितस्मात्शोकादय
ज्ञानांतत्त्वोपदेशाधिकारस्तस्मादाह नबुद्धिभेदमिति कर्मसंगिनांकर्म-
मार्गप्रवृत्तानामज्ञानामात्मोपदेशेनबुद्धिभेदंनजनयेत् यतस्तथा
कृतेसत्युभयभ्रष्टतास्यात् तर्हिकिंकुर्यादित्याह जोषयेदिति युक्तः
कर्मकौशलवान् विद्वानपिसमाचरन्सम्यगाचरन्सर्वकर्माणि
जोषयेत्सेवेत २६ ॥

वनमालीटीका

ननुतत्त्वज्ञानेनापिलोकोपकारःस्यादतःकथमुच्यतेकर्मणैवलोक-
संग्रहस्तत्राह नेति अज्ञानामात्मतत्त्वज्ञानशून्यानामधिकृतानांक-
र्मसंगिनांमदीयमिदंकर्मानेनेदंफलंममभविष्यतीतिकर्मण्यभि-
निविष्टानांयाबुद्धिरिदंकर्माहंकरिष्येऽनेनेदंफलंभोक्ष्यइतितस्याभे-
दं आत्मतत्त्वोपदेशेनविपर्यासंकर्माकरणेनरूपंनजनयेत् किंतुयुक्तो
वहितःसन्विद्वान्लोकसंग्रहंचिकीर्षुःस्वयंविदुषोपिकारि [illegible] काणि
सर्वकर्माणिसमाचरन् तेषांश्रद्धामुत्पाद्यजोषयेत् सम्यगज्ञानामात्म-
तत्त्वानांविपर्यास कृ विनाशोऽमुमुक्षूणां बुद्धिविचालनेनकृतेनकर्मस-
श्रद्धानिवृत्तेस्तत्त्वज्ञानस्यचानुत्पत्तेस्तेषामुभयभ्रष्टत्वंस्यादितिभावः २६ ॥

कृतमैवजयन्तीटी॰

ननुलब्धात्मतत्त्वेननिहतनिखिलद्वैतयापारमात्म्यानुभवस्य
रैवकस्मिंश्चिमञ्चाविद्वांस्त्वयमेवाज्ञंतदुःखरूपंकर्मबुद्धित्वालोकान्
ग्राहयतीतितत्रोच्यतेस्वस्मद्वेऽस्मज्ञाःस्मार्थेदुःखसहनमथैषामपि
दुःखरूपकर्मणियातनमित्येतन्नहिदुष्टमाचरणंतदशोभनंतस्मात्

र्ममात्रपित्वा लोकान् विहाय स्वयमममेयत्तानेकृतो नोपदिशेयतः
स्वस्य लोकस्यापि च सहस्वं स्यादिति वेनलाह न बुद्धिभेदमिति अज्ञाना
मनादिकालाभ्यासोपकामनिषिद्धादिकर्मकरणेनात्यन्तमलिना।
न्तःकरणानयाः विज्ञानात्मनत्वान्नोकर्मसङ्गिनामनादिकर्मवासना।
पाकर्मण्येवास्मन्नश्रद्धाजातजनयाकर्माणिसङ्कामनासमुत्थानां जना
नो बुद्धिभेदं कर्मणः सकाशाद्बुद्धिविचालनं न जनयेत् न कुर्यात् किं
तु लब्ध्वात्मतत्त्वानमेनत्तानयोगनिष्ठोपि तिरयेव: कर्मयोगएवात्मद
र्शनोपायस्तस्मवं बुद्ध्या युक्तो विद्वानात्मतत्त्वानी स्वयं सर्वकर्माणिसमा
चरन् सम्यक्सावधानतया कुर्वन्सन्नज्ञानिनां कर्माणिश्रद्धाजनयन्
जोषयेत् प्रीमासेवयेदज्ञान्कर्माणिकारयेदित्यर्थः २९ ॥

+ ननु कर्मीजुष्टा नैनेव लोकसंग्रहः कर्तव्यो मधुसूदनीटीका ननु तत्त्वज्ञानोपदेशेनेति को हेतुरत आह +

+ अज्ञानाम विवेकिनां कर्तृत्वाभिमानेन फलाभिसंधिना च कर्मसङ्गि
नां कर्मण्यभिनिविशानां या बुद्धिरहमेतत् कर्म करिष्ये एतत् फलं च
त॰ भोक्ष्य इति ताभ्यां भेदं विचालनं अकर्त्रात्मोपदेशेन न कुर्यात् किं तु अको
वहितः सन् विद्वान् लोकसंग्रहं चिकीर्षुः अविद्वदधिकारीणि सर्वा
णि समाचरन् तेषां श्रद्धामुत्पाद्य जोषयेत् प्रीत्या सेवयेत् अनधिका
रिणामुपदेशेन बुद्धिचालने कृते कर्मसु श्रद्धानिवृत्तेर्ज्ञानस्य चानुत्पत्ते
रुभयभ्रष्टत्वं स्यात् तथा चोक्तं अज्ञस्यार्धप्रबुद्धस्य सर्वं ब्रह्मेति यो वदे
त् महानिरयजालेषु स तेन विनियोजित इति [illegible]
[illegible] शेषयत् [illegible]
[illegible] २९ ॥

सदानंदीटीका

कर्म[illegible] अथात्मनदयात्मानोबन्धं
नादेः परार्थेन १ [illegible] अनुष्ठा
नेन धर्मस्य कर्तव्यो लोकसंग्रहः न तत्त्वज्ञानोपदेशेन कर्मत्यागः तान्न।
कालयेत् १ अविवेकवतां याज्ञिककर्तृत्वाभिनिवेशिनां फलाभिसंधि।
नां बुद्धिरिदं कर्म करोम्यहं २ भोक्ष्येहं तत्फलं चेति तस्याः कुर्यान्न चाल।
ने अकर्त्रात्मोपदेशेन किं तु भक्ता समाहितः ३ आत्मवित्सर्वकर्मा।

गी. णिचिकीर्षुर्लोकसंग्रहं कुर्वंस्तेषामज्ञमायग्रज्ञोपीम्मावमेवयेत् ४
टी. अकर्तात्मोपदेशेन हतेबुद्धेर्विचालने कर्मश्रद्धानिवृत्त्यास्यादुभयभ्रंशो
र. जनस्ततः ५ वित्तशुद्धेरभावात्स्याज्ज्ञानानुत्पत्तिहेतुता ३ उभयभ्रष्टता।
पुंसां स्याल्लोकमहर्षिणा ६ अतस्त्वाडंबरडस्य सर्वंब्रह्मेति योवदे
त् महानिरयजालेषु सतेनविनियोजितः ७ २६ ॥

152

नीलकंठीटीका

विद्वान्युक्तानां कर्मस्वासक्तानां बुद्धिभेदं बुद्धेश्चालनं न जनयेत्नो
त्पादयेत् किंतर्हि तान्सर्वाणि कर्माणि जोषयेत्सेवयेत् कथं युक्त आ
हितोभूत्वा समाचरन् २६ ॥

आनन्दीटीका

यदि चार्यं कर्म न कुर्याद् स्तानां बुद्धिभेदः अनेन कथं नु कर्तमितिवि
मोहः स्यादित्याह विद्वान्युक्तः सर्वोकेकर्मयोगे समाहितः सर्वाणि
कर्माणि नियतानि कुर्वाणः अज्ञानामपरमार्थविदामतएव कर्म
संगिनाम् बुद्धिव्यामोहं भ्रमं न जनयेत् सर्वकर्माणि जोषयेत् स्वद
ष्टान्तदर्शनेन यथावद्विहितेषु कर्मसु प्रोत्साहयेत् तदुक्तम् स्वयं
पथ्याशि कस्य स्याद्वालरोदहभेषजैः यथा नयेवसम्बोधः स्वको
पायेन स्वल्पधीः २६ ॥

+ अयोगयस्तत्वज्ञानोपदेशो विना **रामकंठीटीका** आयैवपर्यवसेदित्याह +

+ विद्वान्स्वबुद्धेष्वको यथोक्तान्मतानसमाहितः सन्नस्यबध्याश्रा
स्त्रज्ञातादि नियतानि कर्माण्याचरन्तिष्ठन् अज्ञानांस्वभावतएव
वसंप्रति परमेश्वरेच्छानुगृहीतत्वात्तनाविभिन्नोविवेकज्ञानाना
अतएव कर्मस्वयत्नादिसाधनभूतेषु भोगेस्वर्येषु सक्तत्वा दिनाहेतुना
संगिनां तथैव सक्तानां बुद्धेः सत्ताप्यभेदं नादृष्णात्संगाभ्यास्यावनेनो
त्पादयेत् तेस्युक्ताः सन्तो यदि नत्वज्ञाने कर्ममागमार्गेणाश्रुतायन्ते
तत्रेषाम ज्ञात्वादेवतमस्तात्वप्रतिष्ठामलभमानानां स्वर्गादिहेतोश्च।
कर्मसंगात्प्रच्युतेः बुद्धिभेदश्चाभासस्यभयप्रंशायैवपर्यवसेत् अ
तस्तांस्तथाविधानतान्सर्वाणि कर्माणि यथुहिते गृहीतासंगास्ता
न्जोषयेत्प्रीत्यासेवयेत् स्वयंतदनुष्ठानप्रख्यापनेन रसंयपरमेश्वरेच्छा

नियमितजगयवस्थाधुमानविक्षेदायस्वस्मिन्स्वस्मिन्कर्मणि
लोकमनुवर्तयितेप्रवृद्धस्यापिलोकवहिर्हितानांकर्मणा
मवृषणमनुष्ठानमुपपादितम् [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] २६ ॥

लासिकी [illegible]टीका

अविद्वां

ननुकृपयाज्ञानमेवोपदेष्टुंयुक्तंनेत्याह नेति विद्वान्बुद्धोयु
क्तात्मा न त्वेव समाहितः सम्यक्वर्णाश्रमस्वधर्मसमाचरन्कर्मकुर्वा
णः कर्मसंगिनांफलाभिलाषेणतत्पराणामज्ञानामीश्वरनिरो
धानशास्त्रावबोधरूपाणांबुद्धेः प्रज्ञाया आत्मोपदेशेनभेदंनाशमने
गात्म्यावनंनजनयेत् किन्तुसर्वकर्माणिजोषयेत्प्रीत्यासेवयेत् अ
न्यथाकर्मसुश्रद्धानिवृत्तेर्बोधस्यचानुत्पत्तेस्तेषामुभयभ्रंशः स्यादिति
भावः नत्रूक्तं श्रुतस्वार्थप्रवृद्धस्यसर्वंब्रह्मेतियोवदेत् महानिरय
जालेषुसतेनविनियोजितस्मृति २६ ॥

पंबोलीटीका

द्व

ननुआत्मविदाकृपयापरस्यब्रह्मज्ञानमेवोपदेष्टव्यंकिंदुःखात्मके
कर्मणिस्वयंप्रेरणपरमवर्तनेनइत्याशंक्याअनधिकारिणंप्रत्येमाह नबु
द्धिभेदमिति विद्वान्आत्मवित्कर्मसंगिनांकर्मण्येवसक्तानामज्ञानांवि
हांबुद्धिचालनंनजनयेत् कर्मणिश्रद्धाभंगंनकुर्यात् विद्वान्आत्मा
वित् युक्तः अभियोगपरः सर्वकर्माणिनित्यनैमित्तिकानिसमाचर
न् अज्ञान्जोषयेत्कर्मकारयेत् २६ ॥

153

किंच न बुद्धीति कर्मसंगिणां कर्माधिकारिणां कर्मतत्परा णां वा ज्ञानां देहेंद्रियाद्यनभिज्ञानां जनानां बुद्धिं श्रेष्ठानुष्ठित वर्णाश्रमोचितं कर्मावश्यं विधेयमित्येवं निश्चयात्मिकां भि नत्ति चालयतीति बुद्धिभेदो देहेंद्रियवादस्तं न जनयेत्। किंतु वि द्वान्निश्चयात्मकवेदनविधिप्रोद्युक्तः कर्मसक्तफलः स्वयमे व कर्माणि योग्योग्यात्मकानि स्ववर्णाश्रमोचितानि सम्यग्य थादेशकालमाचरन् तान्स्वानुवर्तिनो जनानपि तानि कर्मा णि जोषयेत्प्रीत्या सेवयेदिति २८

मधुभाष्य

२८॥

भाषाअनुवाद

तो फेरि सब को तत्वज्ञान ही का उपदेश करना चहिये ऐसा कही सो नही यह कहते हैं कि अज्ञ जो कर्म्म मे आसक्त हैं तिनको आत्म उपदेश देकर बुद्धिका भेद उत्पन्न कभी न करे अर्थात् कर्मसे उन को न छुड़ा वै बल्कि उनसे औरभी कर्म करा वै तो फेर उनसे किसतरह कर्म करावै सो कहते हैं। कि आप सावधान हो कर्म्मका आचरन करत उनसे करवा वै नही तो उनकी बुद्धि चल विचल करावनेसे फरि कर्म मे उनकी श्रद्धा चलीजायगी और जो ज्ञानकी भी उत्पत्ति न भई तो उनकी दोनो राह नष्ट भई विचारे अज्ञानी उधर के भी न भये और इधरसेभी गये यही होगा २६

दोहा॥

कर्मसंगिको अज्ञकोन बुद्धिभेद सोकरत सेवतहै सभ
कर्मकों पंडित युक्ताचरत २६॥

154

प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्वशः ।
अहंकारविमूढात्मा कर्ताहमिति मन्यते २७ ॥

शांकरभाष्यं

अविद्वान् अज्ञः कथं कर्मसु सज्जते इत्याह प्रकृतेरिति प्रकृतेः
प्रकृतिः प्रधानं सत्वरजस्तमसां गुणानां साम्यावस्था तस्याः प्रकृ
तेर्गुणैर्विकारैः कार्यकरणरूपैः क्रियमाणानि कर्म्माणि लौकिका
नि शास्त्रीयाणि च सर्वशः सर्वप्रकारैरहंकारविमूढात्मा कार्यक
रणसंघातात्मप्रत्ययोऽहंकारस्तेन विविधं नानाविधं मूढः आत्मा
न्तःकरणं यस्य सोऽयं कार्यकरणधर्मा कार्यकरणाभिमान्यविद्यया
कर्म्माण्यात्मनि मन्यमानस्तत्तत् कर्मणामहं कर्तेति मन्यते २७ ॥

आनन्दगिरिकृतटीका

अज्ञानां कर्मसंगिनामित्युक्तं तेनेतरस्याज्ञस्य संगतिमाह अवि
द्वानिति कर्तृत्वमात्मनो वास्तवमित्युपगमाद्विद्वान् कथं कुर्व
न्नेव तस्याभावं पश्यतीत्याशंक्याह प्रकृतेरिति कर्मस्वविदुषः श
क्तिप्रकारं प्रकटयन् व्याकरोति प्रकृतेरित्यादिना प्रधानशब्देन
मायाशक्तिरुच्यते अविवेकभयतः संबध्यते २७ ॥

स्वामिकृतटीका

ननु विदुषोऽपि चेत्कर्म कर्तव्यं तर्हि विद्वदविदुषोः को विशेषः इत्याशं
क्योभयोर्विशेषं दर्शयति प्रकृतेरिति द्वाभ्यां प्रकृतेर्गुणैः कार्यैरि
न्द्रियैः सर्वप्रकारेण क्रियमाणानि यानि कर्माणि तान्यहमेव कर्ता
करोमीति मन्यते अत्र हेतुरहंकारेण देहेन्द्रियादिष्वात्माध्यासेन वि
मूढ आत्मा बुद्धिर्यस्य सः २७ ॥

पिशाचभाष्यं

इदं च कर्तृत्वमात्मनोऽपरमार्थरूपं कथं प्रकृतेरिति प्रकृतेरव्यक्तस्य
गुणैः सत्वरजस्तमोभिः क्रियमाणानि कर्माणि लौकिकानि शा
स्त्रीयाणि च सर्वशः सर्वप्रकाराणि अहंकारविमूढात्मा अहंकारः अव्य
क्तकारणसंघातेषु नात्मनि अहमिति बुद्धिस्तेनाहंकारेण विमूढः या

मूढआत्मायस्यसोऽयमहंकारविमूढात्माकर्ताअहमेषांकर्मणामि
तिकर्तव्यमितिमन्यते २७ ॥

रामानुजभाष्यं

अथकर्मयोगमनुतिष्ठतोविदुषोविदुषश्चविशेषंदर्शयन्कर्मयो
गापेक्षितमात्मनोकर्तृत्वानुसंधानप्रकारमुपदिशतिप्रकृतेरिति
प्रकृतेर्गुणैःसत्वादिभिःस्वानुरूपंक्रियमाणानिकर्माणिअहंकार
विमूढात्माहंकर्तेतिमन्यते अहंकारेणविमूढआत्मायस्यासौअ
हंकारेणाहमर्थेप्रकृतावहमित्यभिमानेनाज्ञातात्मस्वरूपोगु
णकर्मस्वहंकर्तेतिमन्यतइत्यर्थः २७ ॥

अभिनवगुप्तकृतटी॰

अज्ञानमिश्रत्वेनदृष्टांतंदर्शयति प्रकृतिसंबंधिभिर्गुणैःसत्वा
द्यैःकिलकर्माणिक्रियंते मूढस्त्वहंकर्तेतिअध्यवस्यतिमिथ्यैवात्मा
नेवभाति २७ ॥

परमार्थप्रपाटीका

अथकर्मकरणेसर्वेषांविधिस्तुल्यएवतथापि विद्वदविदुषोःकोभे
दइत्याह प्रकृतेरितिद्वाभ्यां प्रकृतेर्गुणैःप्रकृतिकार्यैरिंद्रियैःक्रि
यमाणानिसर्वाणिकर्माणितान्यहमेवकरोमीति अहंकारेणेंद्रि
यादिष्वात्माध्यासेनविमूढआत्माबुद्धिर्यस्यसअहंकर्तेतिमन्यते
कर्तृत्वाभिनिवेशोभवतितेनबध्यते २७ ॥

वनमालीटीका

विद्वदविदुषोःकर्मानुष्ठानसाम्येपिकर्तृत्वाभिमानतदभावाभ्यांवि
शेषंदर्शयन्नसक्ताःकर्मणीतिश्लोकार्थंविवृणोति प्रकृतेरितिद्वाभ्यां।
प्रकृतेःसत्वादिगुणैस्तज्जनितदेहेंद्रियादिभिरुच्चावचयानिकर्माणि
क्रियमाणानिसर्वशःसर्वाणि अहंकारेणदेहादावहंममेत्यभिमा
नेनविमूढःस्वरूपविवेकासमर्थआत्मामनोयस्यतानिकर्माणि।
अहमेवकेवलंकर्मेति मन्यतेजीवस्तेनायंविद्यादेहेंद्रियादावहंमम प॰
त्वाभिमानसंजनितकर्मण्यपिमदीयमिदमनेनेदंफलंभोक्ष्यइतिधीः।
ततःसुखदुःखकर्तृत्वादिकंमन्यतेतेउमत्रअविद्यामहत्कृतस्वामित

संबंधेन सत्यमेव वर्तते न त्वात्माविद्याप्रयुक्ताभिमानाभावे जीव
स्यादृष्टादेः संबंधाभावाद्दृष्टवदित्यसंबंधेन जीवे कर्तृत्वाद्यभा
वात् स्वतोऽकर्ता जीव इति भावः २७ ॥

कृस्तमैवैजयन्तीटी·

ननु विद्वदविदुषोरुभयोरपि कर्माचरणे तु साम्यमेव भवतु नैकस्या
शक्तत्वमन्यस्य शक्तत्वमिति तत्त्वशक्तमिव तत्त्वज्ञापणेममभासते इ
माशंक्य नयोर्विशेषं दर्शयन्नात्मदर्शनस्याकर्तृत्वादिरूपमसाधा
रणस्यापत्तिमित्याह प्रकृतेरिति द्वाभ्यां प्रकृतेरिति कर्तृत्वभोक्तृ
त्वादिधर्माश्रयोऽहमर्थरूपो सान स्वरूपोऽप्यहंकारविमूढात्माहं।
कारेणाप्रकृतिकार्यरूपेणाविमूढो विशेषेणाभ्रमशकस्यात्मविवेय
स्यासो जनः प्रकृतेर्भगवतो मममायायाः मायां तु प्रकृतिं विद्यान्मा
यिनं तु महेश्वरमिति श्रुतेः गुणैः कार्यरूपैः सत्वरजस्तमोभिर्देहे।
न्द्रियप्राणैर्वा भगवद्रूपैः कार्यकारणरूपैः सर्वशः सर्वप्रकारैः क्रि
यमाणानि लौकिकानि वैदिकानि च कर्माणि अहमस्मदर्थकः
कर्ता स्वतन्त्रः कर्तानन्यप्रयोज्यश्रमन्यनाप्रकारेण मन्यते ज्ञानातिक
मेणामिति वक्रथ्यसति कर्तैलितृन् प्रम्प्येन न लोकाव्ययनिष्ठाख
लर्पत्वामिति सूत्रेण षष्ठीप्रतिषेधः अयं भावः आत्मनोऽतात्त्व
कर्तृत्वादिधर्मवत्त्वम्यनादिकालप्रवृत्तप्रकृतिसम्बंधेनेनतत्कार्य
भूताहंकारेण संकुचितत्वात् विधर्मिणात्मस्वरूपधर्मादिस्मरणे
नम्यादनस्वस्वरूपायत्तानादनात्मसजडवर्गेषु प्रकृतिकार्येषु बु
द्धीन्द्रियदेहादिषु स्वकीयत्वात् स्वकर्तृत्वादिकमारोप्यते स्माहंकी
भूत्वाहं ज्ञानाहं कर्तेत्येवमत्तानीजनो मन्यते वस्तुतस्तु कर्तृत्वा
त्वार्थत्वादिसद्भावात्मन एव कर्तृत्वादिकं सम्भवति ननु बुद्ध्या
दीनां तेषामचेतनत्वजडत्वादिधर्मवत्त्वेन स्वात्मत्वकर्तृत्वादिधर्मा
श्रयत्वासम्भवात् उपाधिरूपेणाबुद्ध्यादेः कर्तृत्वादिकं येन मन्यते
तेन तत्त्वानि न मा इति २७ ॥

दित्या^

+ विद्वदविदुषोः कर्मानुष्ठानसाम्येऽपि मधुसूदनीटीका कर्तृत्वाभिमानतदभावाभ्यां विशेषं दर्शयन् सक्ताः कर्म
+ प्रकृतिर्मायासत्वरजस्तमोगुणमयी मिथ्यात्मानात्मिकापार एणीति सोकार्थे विवृणोति द्वाभ्यां +

मीश्वरी शक्तिः मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति श्रुतेः
तस्याः प्रकृतेः गुणैर्विकारैः कार्यकारणरूपैः क्रियमाणानि लौकि
कानि वैदिकानि च कर्माणि सर्वशः सर्वप्रकारैः अहंकारेण कार्य
कारणसंघातात्मप्रत्ययेन विमूढः स्वरूपविवेकासमर्थ आत्मा
न्तःकरणं यस्य सोऽहंकारविमूढात्मा अनात्मन्यात्माभिमानी तानि क
र्माणि कर्ताहमिति मन्यते कर्तृध्यासेन कर्ताहमिति तृन्प्रत्ययः तेन न
लोकाव्ययनिष्ठाखलर्थतृनामिति षष्ठीप्रतिषेधः ([illegible]) २७ ॥

सदानंदीटीका

कर्मानुष्ठानसाम्येऽपि विशेषख्यापनाय तत्त्वयोः अध्यासतदभावाभ्यां क
र्तृत्वादेः प्रदर्शयन्ते १ मिथ्यातत्त्वात्मिका मायाप्रकृतिः पारमेश्वरी का
र्यकारणरूपेण तस्याः परिणतैर्गुणैः २ क्रियमाणानि कर्माणि श्रौता
नि लौकिकानि च सर्वप्रकारैस्तत्रायकार्यकारणसंहतौ ३ आत्मनाध्या
सतः स्वात्मविवेकाक्षममानसः तानि कर्माणि कर्ताहं करोमीत्य
भिमन्यते ४ अविवेककर्तृताध्यासादात्मा तानाहंतो जनः जन्मम
रणमयीं घोरां संसृतिं याति दुःसहां ५ २७ ॥

नीलकंठीटीका

अविद्वान्कथं कर्मसु सज्जत इत्यत आह प्रकृतेरिति प्रकृतेः पार
मेश्वर्याः सत्त्वरजस्तमोगुणात्मिकायाः देवात्मशक्तिं स्वगुणैर्निगू
ढामिति श्रुतिप्रसिद्धायाः शक्तेर्गुणैः कार्यकारणसंघातात्मकैः ।
क्रियमाणानि कर्माणि अहंकारेण सर्वस्मिन्नध्यासेन विमूढः तदीयान्
कर्तृत्वादीनात्मधर्मत्वेन पश्यन् आत्मनश्च असंगानंदसंविद्रूपता।
मपश्यन् आत्मा अहंकारेण विमूढश्चासावात्मा चेति विग्रहः अ
हं कर्माणि कर्मणां कर्तेति मन्यते कर्तृध्यासेन कर्ताहमिति तृन्
प्रत्ययेन न लोकाव्ययनिष्ठाखलर्थतृनामिति षष्ठीनिषेधः अय
थार्थत्वप्रत्यये कर्मणां कर्ताहमिति षष्ठ्यभावः २७ ॥

आनंदीटीका

अविद्वषः कर्मकरणप्रकारदर्शनप्रस्तावेन प्रकृत्यात्मके पारमे

+ अतश्चाप्रबुद्धप्रबुद्धयोस्तुल्यमेव कर्तृत्वं तुल्यान्येव च कर्माणि असक्तत्वकृतस्तु फलभेद इति
स्थिते तुल्ये कर्तृत्वे तुल्येषु च कर्मसु क्रियमाणेषु कथं फलभेद इत्या[illegible]नवधारितप्रबुद्धा
प्रबुद्धविशेषस्याज्ञस्य संशयमाशंकमानः संसारिणो योगिनश्च समानेऽपि व्यवहारे यथा
फलभेदोपपत्तिस्तथा विभज्य विशेषं प्रतिपादयितुमाह +

स्वरूपं सविकारमुद्दिशति योऽप्यादारभ्याह्नं प्रकृतेर्देवास्
रसर्गविभागेन वक्ष्यमाणैर्गुणैः क्रियमाणानि अधिष्ठानं तथा
कर्ता करणं च पृथग्विधम् विविधाश्च पृथक्चेष्टा दैवं चैवात्र पंचमम्
इत्यादिपुरा क्रियमाणानि कर्माणि लौकिकानि वैदिकानि च अहंका
रेण सत्त्वाभिभवादज्ञलमसोहदेकेण विमूढः अनात्मनि कार्यका
रणसंघाते आत्मबुद्ध्या मोहे प्राप्त आत्मा अन्तःकरणं यस्य सः कर्ताह
मिति मन्यते पंचकमध्ये केवलमात्मानं कर्तारं जानाति २७॥

रामकंठी टीका

+ इह यत्किंचिच्छारीरं वाचिकं मानसं वा शास्त्रीयमशास्त्रीयं वा क
र्म येन केन चित् क्रियते न तत्रात्मा केवलः कारणं किं त्वधिष्ठानं त
था कर्तेत्यादिना वक्ष्यमाणाः पंच पदार्थाः कारणं तेन सर्व एव सत्त्वरज
स्तमोलक्षणप्राकृतगुणमयाः एवेति वक्ष्यति अतः प्राकृतैः सत्त्वादि
कर्माणि भिर्गुणैः क्रियमाणानि सर्वाणि व्यवस्थितानि कर्मभागशः सात्त्विक
मधिष्ठानादिकारणं सात्त्विकं कर्मारभते रजोमयं राजसं तमोमयं ता
मसमिति विभागेन कर्तुरपि मुक्तसंगोऽनहंवादीत्यादिना त्रैगुण्य
स्य वक्ष्यमाणत्वाद्गुणानामेव कर्तृत्वं पर्यवसितं अहंकारेण शरीरा
दिष्वात्मभ्रमेण विमूढात्मा अप्रबुद्धस्वभावः संसारी अहमेव केवलः
कर्तेत्यधिष्ठानादिकारणान्तरनिरपेक्षं कर्तृत्वं शरीरादिरूपे कृत्रि
मे स्वात्मन्यारोपयति एवं गुणपरतन्त्रे नाट्यपात्रमहंकारमारोपय
न् गुणेष्वेव सक्तः न कदाचित्संसारबंधहेतुभ्यो विमुच्यते २७॥

लाक्षणिकी ~~[illegible]~~ टीका

ननु विदुषोऽपि चेत्कर्मकर्तृत्वं तर्हि विद्वदविदुषोः को भेद इत्यत आह
प्रकृतेरिति द्वाभ्यां प्रकृतेः सत्त्वादिगुणैर्गुणविकारैः अधिष्ठानं
तथा कर्तेत्यादिना वक्ष्यमाणैरिन्द्रियादिभिः सर्वाणि कर्माणि क्रिय
माणानि भवन्ति अहंकारेण देहादिष्वात्माध्यासेन विजडं यस्य स्वरूपेण
विमूढात्मा अप्रबुद्धस्वभावो तत्तत्र कर्ताहमिति मन्यते जानाति शु
द्ध एव स्वस्वरूपे कर्तृत्वमारोपयतीत्यर्थः २७॥

गी॰
टी॰
र

पंचोलीटीका

अविद्वान्कथं कर्मसु सज्जते इत्याह प्रकृतेरिति अहंकारविमूढा
त्मा देहेऽयात्मबुद्धिः अहंकारलेन मोहितचित्तः प्रधानप्रकृतेःगुणैः
विकारैः देहेंद्रियैः कर्माणि लौकिकानि शास्त्रीयाणि च सर्वप्रका
रैः क्रियमाणानि अहं कर्तेति मन्यते २७ ॥

रणवीरसमिद्धायिनी ॥

पुनरपि निश्चयदार्ढ्यार्थं तमेवार्थमाह प्रकृतेरिति त्रिभिः
प्रकृतेरिति ल्यब्लोपे पंचमी तथा च प्रकृतिं प्रधानव्यापारं वि
लोक्य गुणोऽन्यासत्त्वरजस्तमश्च रजोसत्त्वादेर्गुणैर्देवहवैभीमइंद्रि
ये तूपादावप्रधाने च दोषान्यस्मिन्विषेषणोऽन्यत्र प्रमासना गुणैः
कर्मेंद्रियैः क्रियमाणानि कर्माणि शास्त्रप्रयोगादीन्व्यापारान्कर्ता
हं भवेयमिति मन्यते निश्चिनोति कर्माधिकारी त्वत्रियादिरिति
शेषः कथंभूतः अहंकारविमूढात्मा हमित्यव्ययं शोर्थे अस्याप
चमहासिंहदेवीचंडमथावत शब्दीत्वाचास्यके शेभुषिरस्तेनाः
सिनाच्छिनदित्यादिवत् तथा च हंकरणं हंकारः शोर्यपूर्वको
व्यापारस्तत्र विमूढ आत्मा यस्य सः ततो नञ्समासः शौर्येण प्रा
स्त्रप्रयोगादिकुर्वाणोऽन्यार्थः यद्वा प्रकृतिसंबंधिभिर्गुणैः सत्त्वर
जस्तमोभिः क्रियमाणानि सर्वाणि सात्त्विकराजसतामसानि यथा
कर्म त्रिवर्णैर्विहितानि कर्माणि अहंकारेण विमूढ आत्मा अंतः
करणं यस्य सतादृग्योऽहं कर्तेति मन्यते अयमभिप्रायः परमेश्वरे
ण यथा वर्णवोदितानि त्रिविधानि कर्माणि तादृशी प्रकृतिमुपा
यतदधिकारिणः कार्यंते न पुनः स्वातंत्र्येण तेऽकुर्वते किंतु मोहि
तांतःकरणत्वात्तत्र स्वातंत्र्यं मत्वा तत्पुण्यपापफलभाक्त्वाभिमाने
न स्ववर्णाश्रमविरुद्धं प्रकृतिविहितान्यपि निहंति कामयंते अतस्तव
मपि राजसप्रकृतिकोऽमये श्रेयेण प्रदितोऽस्वतंत्रश्च राजसयुद्धादिरूपं
कर्म कुरु तत्र प्रनते पापसंबंधः इति २७ ॥

151

प्रकृतेरिति प्रकृतेर्गुणैरिंद्रियादिभिः प्रकृतिमपेक्ष्य गुण
भूतानि द्वितानि तत्संबंधीनि च नहि प्रतिबिंबस्य क्रिया
कर्मभेदस्य गुणभेदस्य च तत्त्ववित् गुणा इंद्रियादीनि गु
णेषु विषयेषु प्रकृतेर्गुणेषु इंद्रियादिषु सम्मूढाः इंद्रिया
द्यभिमानाद्विषयादिसंगः गुणकर्मसु विषयेषु कर्मसु
च बाह्यानां इंद्रियाणामध्यात्मतयाध्यासभानि च अप्रधानानि
च गुणानि गच्छंते निकृष्टिगैरित्यभिधानात् सत्वाद्यंगीकारे
गुणागुणेषु श्लिष्टमुक्तः स्यात् अतः सर्वाणि कर्माणि मय्येव
संन्यस्याध्यात्मजीवेऽध्यारोपितानि मय्येव वर्तित्यस्य भगवाने
व सर्वाणि कर्माणि करोतीति मत्सूत्रेणैव आत्मानमधि
कृत्य यच्चेतस्तदध्यात्मचेतः संन्यासस्त्वं भगवान्करोतीति
ति निर्ममत्वेनाहं करोमीति फलमाह ३०॥

158

भाषा ग्रन्थकार

जो कहो कि इस प्रकार जो ज्ञानी कर्म करै तो अज्ञानी औ
ज्ञानीके बीच क्या विशेष रहा इसी अभिप्राय पर दो श्लोकसे
दोनो का अन्तर देखावते हैं कि देखो मूर्खलोग प्रकृति जो
माया सो इन्द्रियोंके द्वार जो सब कर्म करतीहै उन कर्मो को
हम करते हैं ऐसा मानि लेते हैं मानिलेने का कारण यह
है कि अहङ्कार से इन्द्रियों मे आत्मा का अध्यास अर्थात इन्द्रि
यों को आत्मा जानि कर उन की बुद्धिमूढ़हो गईहैं २७॥

दोहा॥

माया गुणकर होतहै उत्पत सभहिकर्म करैं हंकार विमू
ढ़मन मानेहौं कर्ता हैं पर्म २७॥

159

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः गुणा
गुणेषु वर्तन्त इति मत्वा न सज्जते २८ ॥

शांकरभाष्यं

यः पुनर्मन्यते विद्वान् तत्त्वविदिति तत्त्ववित्तु महाबाहो कस्य तत्त्ववि
त् गुणकर्मविभागयोर्गुणविभागस्य कर्मविभागस्य च तत्त्ववि
दित्यर्थः गुणाः करणात्मकाः गुणेषु विषयात्मकेषु वर्तन्ते नात्मेति
मत्वा न सज्जते सक्तिं न करोति २८॥

आनन्दगिरिकृतटीका

अतत्त्वस्य कर्मसु शक्तिमुक्त्वा विद्वस्तदभावमभिदधाति यः पुनरिति
तत्त्वं याथात्म्यं वेत्तीति व्युत्पत्त्या तत्त्वविदिति न शब्दादिशिष्टो निर्दिष्टः
प्रश्नपूर्वकं द्वितीयपादमवतार्य व्याचष्टे कस्येत्यादिना गुणानामेव
गुणेषु वर्तमानत्वमयुक्तं निर्गुणत्वात्तेषामिमाशङ्क्य विभजते गुणा
इति कार्यकरणानामेव विषयेषु प्रवृत्तिरात्मनस्तु कूटस्थत्वान्नैव
मिति मत्वा तत्त्ववित् कर्मसु इष्टतरं कर्तव्याभिमानं न करोती
त्यर्थः २८

स्वामिकृतटीका

विद्वांस्तु न तथा सज्जत इत्याह तत्त्ववित्त्विति नाहं गुणात्मक इति गु
णेभ्य आत्मनो विभागः न मे कर्माणीति कर्मभ्योप्यात्मनो विभाग।
स्तयोर्गुणकर्मविभागयोर्यस्तत्त्वं वेत्ति स तु न सज्जते कर्तृत्वाभिनिवेशं।
न करोति तत्र हेतुः गुणा इन्द्रियाणि गुणेषु विषयेषु प्रवर्तन्ते नाहमिति
मत्वा शेषं स्पष्टं २८ ॥

पैशाचभाष्यं

तत्त्ववित् कर्तास्वरूपवित् गुणाः सत्त्वादयः गुणानां कर्तृभूतानां कर्म
णां च कार्यभूतानां विभागयोः सतोः गुणाः सत्त्वरजस्तमांसि गुणेषु त
त्कार्येषु गमनागमनादिकर्मसु कर्तृत्वेन वर्तन्त इति मन्यमानः न स
ज्जते नाहं कर्तेति मन्यत इत्यर्थः २८ ॥

रामानुजभाष्यं

गुणकर्मविभागयोः सत्त्वादिविभागेन तत्कर्मविभागेन च तत्त्ववित् गुणा

गी॰ टी॰ र॰

160

मि॰

सत्वादयः स्वगुणेषु स्वेषु कार्येषु प्रवर्तन्त इति मत्वैवं गत्वा गुणकर्मस्वहंक
र्तेति न सज्जते २८॥ अभिनवगुप्तकृतटीका

गुणकर्मविभागतत्त्ववित्प्रकृतिः करोति मम किमायातमित्या
त्मानं मोचयति २८॥ परमार्थप्रपाटीका

अथ तस्मात्तितो विशेषं दर्शयति तत्त्वविदिति गुणकर्मविभागयो
स्तत्त्ववित्त्वाहं गुणात्मक इति गुणेभ्य आत्मनो विभागो इति विभक्त
त्वे न मे कर्माणीति कर्मभ्य आत्मनो विभागस्तयोस्तत्त्ववेत्तीति तत्त्ववि।
त् गुणा इन्द्रियाणि गुणेषु विषयेषु वर्तन्ते स्वभावतः प्रकृतानि इति
मत्वा न सज्जते कर्तृत्वाभिनिवेशं न करोति तदुक्तं धूलिधूमाम्बुदैर्य
द्वन्मलिनीक्रियते नभः परामृष्टस्तथैवात्मा विशुद्ध आत्मा तैर्गुणैरि
ति २८॥ वनमालीटीका

विद्वांस्तु न तथा न मन्यत इत्याह तत्त्वविदिति तत्त्वं याथात्म्यं गुणकर्म
विभागयोर्वेत्तीति तत्त्ववित् गुणा देहेन्द्रियान्तःकरणानि कर्माणि
तद्व्यापाररूपाणि गुणकर्मेति द्वन्द्वैकवद्भावः तेभ्यो विभज्यते मम दे
हो मम देहेन्द्रियमनस्त्वमाहिना भिद्यते स विभागस्तत्तोऽस्य न विलक्ष
ण आत्मा तयोरात्मानात्मनोर्याथात्म्यवित् गुणा इन्द्रियाद्याः गुणे
षु विषयादिषु वर्तन्ते हृदि ज्ञानादि केवलं भेते आत्मा हृद्यादिविका
रशून्यः केवलोऽकर्तेति मत्वा देहात्माभिमानादिना कर्मकर्तृत्वतत्फ
लभोगादौ न सज्जते २८॥ कृष्णभट्टैवंजयन्तीटी॰

एवं ते तानीन भवन्तीति तत्रेवाह तत्त्वविदिति हे महाबाहो विदुषो गु।
णकर्मविभागयोः गुणाश्च कर्म च गुणकर्मणी विभागश्च विभागो
गुणकर्मणोर्विभागो तयोर्गुणकर्मविभागयोः विभागो भेदः गुण।
विभागस्य गुणभेदस्य कर्मविभागस्य कर्मभेदस्य वतत्त्वं स्वरूपं वेत्तीति
तत्त्ववित्स त्वादि गुणकार्यरूपाणि त्रिविधाहंकारबुद्धीन्द्रियमनांसि का
नि शरीरप्राणादि जडवर्गरूपाणि तत्तत्कर्माणि वाहं न भवामि यतः
तानि मम प्रकाश्यानि अहं त्वेतेषां प्रकाशकः स्थिरानंदज्ञानस्वरूप

विभागस्य

कर्त्तेति वेत्तीत्यर्थः॥ गुणास्सत्वादयस्त्रय ईश्वरशक्तिरित्याख्यास्ते तो गुणेषु तत्तत्का
र्य्येषु देहकारादिषु वर्त्तन्ते प्रवर्त्तन्ते न त्वात्मा तत्त्वज्ञो गुणोऽतिमत्वा तेषु न सज्जते न
तु विद्विवाशक्तिं न करोति॥ महाबाहो इति संबोधनेन त्वमपि सुद्धिकाल
त्वाणं बोत्स्यमपि न वित्वेन ष्वभिनिवेशमकाशुदिकं कर्म कुर्वित्ति स
वितम् २८॥

मधुसूदनीटीका विद्वांस्तु न मन्यत इत्याह॥

तत्त्वं यथात्म्यं वेत्तीति तत्त्ववित् न शास्त्रेण तस्मात् देशिनमाह कस्य
तत्त्वमित्यत आह गुणकर्मविभागयोः गुणा देहेन्द्रियान्तःकरणानि
अहंकारास्पदानि कर्माणि च तेषां व्यापाररूपाणि ममकारास्पदानी
ति गुणकर्मणी तयोर्द्वन्द्वैकवद्भावः विभज्यते सर्वेषां जडानां विकारिणां भा
सकत्वेन पृथग्भवतीति विभागः स्वप्रकाशज्ञानरूपः संगश्चात्मा गु
णकर्मवद्विभागस्तयोरिति द्वन्द्वः तयोर्गुणकर्मविभागयोर्भास्यभास
कयोर्जडचेतनयोर्विकारनिर्विकारयोस्तत्त्वं याथात्म्यं वेत्ति सः गुणाः
करणात्मका गुणेषु विषयेषु वर्त्तन्ते विकारित्वान्न तु निर्विकार आत्मे
ति मत्वा न सज्जते स किं करोमीत्यभिनिवेशं न तत्त्वविदिव नेदं करोति
महाबाहो इति संबोधयन् सामुद्रिकोक्तसत्पुरुषलक्षणयोगित्वा
त्वं पृथग्जनसाधारणेन त्वमविवेकी भवितुमर्हसीति सूचयति गु
णविभागस्य कर्मविभागस्य च तत्त्ववित् इति वा अस्मिन् पक्षे गुणकर्म
णोरिति संबन्धो वा नैव निर्वाहे विभागपदस्य प्रयोजनं चिंत्यं (…)
विदुषः [illegible]
[illegible] २८॥

सदानंदीटीका

विद्वांस्तु मन्यते नैवं तत्त्ववेत्ति यतः परे कस्य तत्त्वं तदिमाह गुणकर्म
विभागयोः १ अहंकारास्पदा एव गुणा देहेन्द्रियादयः तेषां व्यापाररू
पाणि कर्माणि विविधानि च २ ममकारास्पदान्येव वा द्यामाभ्यन राति
व ३ द्वन्द्वैकवद्भावे गुणकर्मेति बुध्यतां भासकत्वेन सर्वेषां जडानां
हि विकारिणां विभज्यते विभागोऽयं पृथग्भवति विग्रहः ४ स्वप्रका
शतया संगश्चात्मा जडविलक्षणः भास्यभासकयोरेवं जडचेतनयोर्द्व
योः ५ याथात्म्यं वेत्ति यो विद्वान् भाष्यभवप्रक्रियाभिः विकारित्वेन वर्त्ते

तेगुणाहिकरणात्मकाः ९ गुणेषुविषयेषुवर्तन्तेनत्वात्मा विक्रियतेतः
आत्मनोनिर्विकारत्वगुणानांचविकारितां ७ ज्ञात्वाकर्तृत्वबुद्धिंनकरो
तेऽविमूढवत् यामूढिकोकसक्तिंबध्नातित्वंविमूढवत् कर्तृत्वाभि
निवेशंमाकार्षीरितिमहाभुज ९ २८ ॥

नीलकंठीटीका

161

एवंमज्ञस्यकर्माचरणेऽप्रदर्श्याज्ञस्यतत्त्वदर्शयति तत्त्ववित्तिति गु
णकर्मविभागयोः गुणविभागस्यकर्मविभागस्यचतत्त्वविदितिभाष्यं
नाहंगुणात्मकइति गुणेभ्यआत्मनोविभागः नाहंकर्मात्मकइतिकर्म
भ्यआत्मनोविभागः तयोर्गुणकर्मविभागयोस्तत्त्ववेत्तीतिश्रीधरः म
धुसूदनस्तुगुणाः देहेंद्रियांतःकरणानि अहंकारास्पदानि कर्माणि
चतेषांव्यापाररूपाणि ममकारास्पदानि गुणकर्मेतिद्वंद्वैकवद्भावः वि
भज्यतेसर्वेषांजडानांभासकत्वेनपृथक्भवतीतिविभागःस्वप्रकाश
ज्ञानरूपोऽसंगआत्मा गुणकर्मचविभागश्चेतिद्वंद्वः तयोर्जडाजडयोस्त
त्त्वंयोवेत्तिसः गुणाःकरणात्मकाःगुणेषुविषयेषुवर्तन्तेइतिमत्वानस
ज्जतेकर्तृत्वाभिनिवेशंनकरोतीत्यर्थः गुणविभागस्यकर्मविभागस्य
चतत्त्वविदितिपक्षेगुणकर्मणोःरिमेवसिद्धेविभागपदंव्यर्थमिति
यद्वातत्त्ववित्सगुणाःगुणेषु वर्तन्तइतिमत्वा गुणविभागेकर्मवि
भागेचनसज्जतेइतियोजना गुणानांसत्वरजस्तमसांविभागोबुद्ध्यहं
कारस्तानेंद्रियकर्मेंद्रियविषयरूपेणविभज्यावस्थानंतस्मिन्नसज्जते इ
दमहमितिनमन्यते तथाहि शरीरेगौरेऽहंगौरोस्मि हस्ताभ्यांमानेम
येदमानयमितिवक्षोराद्वेष्मयेदेहमितिच अहंकारेणाभिमतेनममेद
मित्यभिमन्यते बुद्धेविक्रियमाणायामहंसुखीतिचसर्वेषुबुद्ध्यादि
षुविभज्यगत्समारोपयित्वैकंमन्यमानमस्याहमिदमितिममेदं।
कर्मेतिचमन्यते एतेनकर्मविभागोऽप्यावृतत्वेनव्याख्यातः श्रम
भावितात्म्यमेवआत्मनाऽदिकर्तृत्वेनदुःखादिमत्त्वंचापनति अयंचकर्म
विभागःअन्यत्रापिदर्शितः अर्थोमणिमविंदत् तमनंगुलिराववयत्।
अग्रीवःप्रत्यमुंचत् तमजिह्वाऽभ्यपूजयत् इति अर्थःस्वयंप्रकाशहीनोऽपि
वत्रादिर्मणिंरूपादिकेविषयमविंदत्प्रकाशयति अनंगुलिःकाष्ठ

लोष्टादिवत् जडत्वात् स्वयं कर्म कर्तुमशक्तोपि पर्णादिः आव
पत्स्वासीयत् विषयं उपादत्ते यथैव छिन्नशिरस्कवत्रिमीवा
हंकारस्तु प्रथमं चेतन्यथीवा धारयति मयेदं लब्धमिति मन्यते
अज्ञो जिज्ञासुधीयातः जडत्वात् स्वयं स्वगतं सत्त्वादिः एवं योगे पंटश्च स्वग
तद्रूपादेः प्रकाशते अस्मदर्थोपि अहं सत्त्वादिः सत्तीति चानुभवति
तथा च आत्मानात्मनोर्योगे यात्मता वा हत्येष हंकारादिषु तत्कर्मस
चाभिमानादिषु कुर्वन्मेव सत्त्वमिवानुवर्तमानमात्मानं तेभ्यः पृथ
क् भूतं जानन् गुणा यथैव तत्त्वरादयो गुणेषु एवं रूपादिषु वर्तते न
त्वात्मेति मत्वा न सज्जते इदमेव तत्त्वादिभिर्यातन्द्रूपाममेवेदमादा
नादिकं कर्मेति न सक्तो भवतीत्यर्थः २८ ॥

आनन्दीटीका

सात्त्विकस्तु न थानाभिमन्यते स्मात तत्त्ववित्त्वान्नस्वभक्तिप्रकरण
समाप्तिं यावत्तत्पिण्डमानस्य गुणानां सत्त्वादीनां विभागस्य क
र्मणः सत्त्वादिकार्यस्य प्रकाशादेश्च विभागवित् सत्त्वं सत्त्वसंसर्गेन
वभाति इत्यादि विशेषं जानन् गुणाः सत्त्वादयो गुणार्थे प्रकाशादौ
वर्तन्ते गुणानामेवायं भावः आत्मनस्तु निर्विकारस्य न किमपीति
मत्वा न सज्जते औदासीन्येन तिष्ठति सर्वमिदं चतद्देशे गुणातीतल
क्षणे प्रादुर्भावयिष्यति भगवान्स्वयम् २८ ॥

रामकंठीटीका

गुणविभागस्य कर्मविभागस्य च तत्त्ववित्परमार्थवेदी योगी तु
गुणाः सत्त्वादयः गुणार्थे स्वप्रयोजने देहेन्द्रियविषयाद्यात्मके व
र्तन्ते न तैर्वर्तितव्यम् नात्मनः सर्वदा स्वतन्त्रस्यस्तत्रस्य विन्मात्रस्वभा
वस्यस्वोपरागमर्पयितुं प्रभवन्तीति सर्वदा समात्मप्रतिष्ठानयान
गुणेषु कर्मसु सज्जति अहंकारममकारौ तेषु न करोतीत्यर्थः अ
थ कीदृशो गुणानां विभागः कीदृशश्च कर्मणां किं वा तत्त्वमिति
व्याख्यायते इह परमेश्वरेणाविभक्ते स्वाविलसितस्वभावात्म
कसकलजगत्प्रपंचकारणत्वेनावभासितयापारमार्थिकात्म

५४

तत्त्वाभेदाख्यातिमात्रशरीरतया ऽ तएव भिन्नार्थविषयत्वात्तत्क्रिया
नियमात्मकसत्त्वादिगुणमयप्रक्रमाख्यया अनाद्यविद्याश्रवय
सम्बद्धज्ञानामीश्वरेच्छयैवात्मभेदेनावभासमानानांजीवानांगुणारे
वारब्धतत्तुकरणभुवनभोगादिकलापत्वात्सर्वमेवगुणाधीनमिति
प्रायेणगुणप्रवर्तकत्वेषांकर्तारः इत्थंतेषुतत्तद्विषयत्वेनगुणविभागः
तथाविधास्तेजीवायानिकर्माण्यारभन्तेतेऽविषयस्वत्वेनत्स्मात्र
तयासजन्ति तद्बाधकत्वेनद्वेषेणपराभवन्तीति एतावन्मात्र।
नियतविनहन्तिनाहिंसकाभवन्तीति तद्विषयत्वेनसर्वकर्माणिरा
गद्वेषमोहात्मकत्वात्संसारबन्धकारणतयापर्यवस्यन्तीमयमेषां
कर्मविभागः समाप्ततत्त्वप्रतिष्ठितबुद्धीनांयोगिनामस्याशुण
नोकर्मणांचविभागः तथाहि तेगुणाःसत्त्वादयोगुणानामेवार्थप्र
योजनेसंसारिविषयत्वेनजगत्प्रपंचविरचनारूपेणवर्तन्तेनास्म।
द्विषयत्वेनैषांसर्वदानन्तमिनसंविन्प्रकाशमात्रव्यतिरिक्तंकिंचिद्रू
पान्तरंनभवन्तीतिमन्वाना तेनिरतिशयनिजानन्दनवस्वधामा
दैनेकनिरताः कथंतेषुरागादिविषमविषरसमयेषुसजन्तीति
योगिविषयत्वेनगुणानगुणत्वेनस्फुरन्तीति अयंयोगिविषयो
गुणविभागः एवंविधाहितेयानिकर्माण्यारभन्ते तानिक्रियमा
णान्येवयथोक्तज्ञानाग्निदग्धत्वात्संसारकारणतामापादयितुमे
षांप्रभवन्तीतियंयोगिविषयःकर्मविभागस्तादृशोहियोगीगुणा
तीतउच्यते यदुक्तमिति तदेहिसंप्रहृतानिनिहतानिकोदानि उदा
सीनवदासीनोगुणातीतःसउच्यते तत्तमयेनतयागुणकर्मविभाग
योरेतद्व्याख्यानेनेवव्याख्यानमिति [illegible]
[illegible]
[illegible]
[illegible]) २८ ॥

नात्तिकी [illegible]टीका

विद्वांस्तुनयानमज्जतइत्याह तत्त्वविदिति तद्व्यतिरेकेगुणकर्म

विभागयोस्तत्त्ववित् याथात्म्यवित् नाहंगुणात्मको नमेकर्मा
णीत्येवं गुणागुणकार्याणीन्द्रियाणिगुणेषुतत्कार्येषुविषयेषुव
र्तन्ते [illegible] स्वभावतः
प्रवृत्तिंभजन्ते नथावस्थितिः परांचित्वानिवात्टणंस्वधर्म्मरिति
त्वा इत्येतत्त्वानसज्जते अहंकारममकारौतेषुनकरोतीत्यर्थः २८॥

पंचोलीटीका

विद्वांस्तथानमन्यतेइत्याह तत्त्वविदिति हेमहाबाहोगुणकर्म
विभागयोः तत्त्ववित्गुणविभागस्यकर्मविभागस्ययाथात्म्यवेत्ता
गुणाइंद्रियाणिगुणेषुविषयेषुवर्तन्ते नात्माइतिमत्वानसज्जते।
नाहंकरोमीतिमन्यते २८

रणवीरसमिद्धोधिनी॥

तत्त्वविदिति हेमहाबाहोगुणकर्मविभागयोः गुणाःसंख्याद
यःषट् शौर्यगांभीर्यादयश्चकर्माणिकर्मेन्द्रियव्यापारास्तेषां
विभागयोस्तत्त्ववेत्तियःसनसज्जते केनविस्मृतिबंधकारिणा
सहसक्तोनभवति नकेनविनष्टाष्टतिप्रतिरोधःक्रियतइति
यतःगुणाःशौर्यादयोगुणेषुधीरत्वगांभीर्यादिषुवर्तन्ते यद्वा
गुणाःशौर्यादयउत्साहकारणीभूतागुणेषुसंख्यादिषुनीति
प्रकारेषुसमस्तवर्तन्तेप्रवृत्तिविषयीभवंतिइतिमन्यते अयमभि
प्रायः नीतिपूर्वमुपयोगीसर्वमप्रशुभंभवतीति २८॥

मधुभाष्य

२८॥

भाषाअनुवाद

ओर ज्ञानी ऐसा नहीं मानते हैं सोई कहते है कि तत्वज्ञा
नी तो हम इन्द्रिय रूप नहीं हैं ऐसे विचार करि इन्द्रियोंसे
आत्माको जुदा जानते हैं और हमारे कोई भी कर्म नहीं है
ऐसे विचार से कर्मों से अपने को पृथक मानते हैं अर्थात्
इसप्रकार इन्द्री औ कर्मोंसे पृथक बुद्धि हो कर जो तत्व व
त्त सो जानते हैं हे अर्जुनवे और फेरि कर्म मे आसक्त न
ही होते अर्थात् हम कर्म करते हैं यह विचारनहीं करते
इसका हेतु यह कि माया के द्वारा सब इन्द्री विषयों मे
मग्न हैं हम सबसे अलग हैं यह उनका जाना है २८

दोहा ॥

हे अर्जुनगुणकर्मको जोउंतत्व वेत्ता होय गुणमे गुणव
र्तेयह मनन वंधावे सोय २८

प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्मसु। तान-
कृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेत् २९॥

शांकरभाष्यं

ये पुनः प्रकृतेरिति प्रकृतेर्गुणैः सम्यङ्मूढाः संमोहिताः सन्तः सज्जन्ते गुणानां कर्मसु गुणकर्मसु वयं कर्म कुर्मः फलायेति तान् कर्मसंगिनोऽकृत्स्नविदः कर्म्मफलमात्रदर्शिनो मन्दान् कृत्स्नविदात्मवित् स्वयं न विचालयेत् बुद्धिभेदकरणमेव चालनं तन्न कुर्यादित्यर्थः २९॥

आनन्दगिरिकृतटीका

विद्वानविद्वानिव भावयन्निति प्रकृत्य विद्वानविदुषो बुद्धिभेदं कुर्या-दित्युपसंहरति ये पुनरिति प्रकृतेरुक्तायाः गुणैर्देहादिभिर्विकारैः संमूढास्तानेवात्मत्वेन मन्यमानाये तेगुणानां तेषामेव देहादीनां कर्मसु व्यापारेषु सज्जन्ते सक्तिं दृढतरामात्मीयबुद्धिं कुर्वन्तीत्याह प्रकृतेरित्यादिना तेषामनात्मविदां स्वयमात्मविद्बुद्धिभेदं नापादयेदित्याह तानित्यादिना २९॥

स्वामिकृतटीका

न बुद्धिभेदं जनयेदित्युक्तमर्थमुपसंहरति ये प्रकृतेर्गुणैः सत्वादिभिः संमूढाः सन्तो गुणेष्विन्द्रियादिषु तत्कर्मसु च सज्जन्ते तानकृत्स्नविदो मंदमतीन्कृत्स्नवित्सर्वज्ञो न विचालयेत् २९॥

पिशाचभाष्यं

ये पुनः प्रकृतेर्गुणैः वयं कर्तार इति संमूढाः सन्तः सज्जन्ते गुणानां कर्मसु वयं कर्म कुर्मः फलायेति सज्जंते सक्तिं ते तान् अकृत्स्नविदः कर्मफलमात्रदर्शिनः मंदान् मंदप्रज्ञान् कृत्स्नवित् सर्ववित् ब्रह्मवित् न विचालयेत् बुद्धिभेदकरणमेव चालनं तन्न कुर्यादित्यर्थः २९॥

रामानुजभाष्यं

अकृत्स्नविद आत्मदर्शनाय प्रवृत्ताः प्रकृतिसंसृष्टतया प्रकृतेर्गुणैर्यथावस्थितात्मनि संमूढाः गुणकर्मसु क्रियास्वेव सज्जंते न त

गी. टी. ३.

165

हि प्रकाशात्मस्वरूपे प्रतिष्ठितान् योगारूढान प्रभवं तेन कर्मयोग एव एतेषामा-
धिकारः एवंभूतांस्तान् मंदान् अकृत्स्नविदः कृत्स्नवित् स्वयं तान् योगारूढा-
न विचालयेत् ते किल मंदाः श्रद्धालवः अनुवर्तिनः कर्मयोगव-
स्थितमेनं दृष्ट्वा कर्मयोगात् प्रचलितमनसो भवेयुः अतः श्रेष्ठः स्व-
यमपि कर्मयोगतिष्ठन्नात्मयाथात्म्यज्ञानेनात्मनोऽकर्तृत्वमनुसं-
दधानः कर्मयोग एवात्मावलोकने निरपेक्षसाधनमिति दर्शयि-
त्वा तानकृत्स्नविदो जोषयेदित्यर्थः २९॥

अभिनवगुप्तकृतटी·

प्रकृतिसंबंधिभिर्गुणैः सत्त्वाद्यैः कृतेषु कर्मसु मूढाः सज्जंति सत्त्वा-
दिगुणमाहात्म्यात् २९॥ परमार्थप्रपाटी·

अथ बुद्धिभेदं जनयेदित्युपसंहरति प्रकृतेरिति प्रकृतेर्गुणैः स-
त्त्वादिभिः संमूढाः मोहं प्राप्ताः संतो गुणकर्मसु गुणेष्विंद्रियेषु त-
त्कर्मसु दृष्टश्रोत्रादिषु विषयेषु सज्जंते तान् अकृत्स्नविदः एकैकें-
द्रियेण सकामान् कृत्स्नं वेत्तीति कृत्स्नवित् कृत्स्नं सर्वेंद्रियचालकमा-
त्मानं वेत्ति स न विचालयेत् २९॥

वनमालीटीका

नन्वेवं विद्वदविदुषोः कर्मानुष्ठानसाम्ये न विद्वानविदुषो बुद्धिभेदं ज-
नयेदित्युक्तमुपसंहरति प्रकृतेरिति प्रकृतेर्गुणैः सत्त्वादिभिस्तत्का-
र्यैर्देहेंद्रियादिभिश्च संमूढाः अहं स्थूलो देहः कृशो मदीयमिदं कर्मानेन
नेदं फलं भोक्ष्य इत्यभिमानवन्तो गुणकर्मसु गुणानां देहेंद्रियादीनां
व्यापारेषु मदीयोऽयं व्यापारोऽनेनेदं फलं प्राप्स्यामीति सज्जंते कीदृशा-
न् अकृत्स्नविदः कृत्स्नानामात्मानात्मनोर्याथात्म्यमजानतस्तान् मंदान् शुद्ध-
चित्तत्वेन तत्त्वाधिकारमप्राप्तांस्तान् कृत्स्नवित् आत्मानात्मयाथात्म्यवि-
त् न विचालयेत् कर्मश्रद्धातो न प्रच्यावयेत् २९॥

कृतमवैजयन्तीटी·

एवं यो गुणकर्मविभागवित्स गुणकर्मसु न सज्जत इत्युक्त्वेदानीं येन
गुणकर्मसु सज्जंते तान् अज्ञान् ज्ञानी गुणकर्मभ्यो न विचालयेदिति व-
दन् बुद्धिभेदं जनयेदित्येतदुपसंहरति प्रकृतेरिति ये कृत्स्नविदोऽल्प-

कर्मसंगिनामित्युक्तं कर्मसंगित्वं दर्शयति

तः

४ तत्कर्मणि करचरणव्यापारं कुर्वतः कुरुधानपश्यंशी न श्रावयेत् श्रुतिरपि प्राणपणी स येन एकै
कमुपास्ते न स हैदा ह्यकृत्स्नो येषां न एकैकेन भवत्यात्मेत्येवोपासीतात्र ह्येते सर्व एकी भवन्ति तदे
तत्पदनीयमस्य सर्वस्य यदयमात्मा तेन ह्येतत्सर्वं वेद यथाह वै पदेनानुविंददेव कीर्तिं श्लोकं
विन्दते य एवं वेदेति भाष्यं पूर्व श्रुतौ प्राणन्नेव प्राणो नाम भवतीत्यादिना सर्वेन्द्रियाण्यात्मन एव
कर्मनामानि भव[illegible]न्तीत्युक्तं तत्र य एकैकमुपास्ते आत्मानमितः स तु एकैकेंद्रियोपास
नां करोति न स वेद न जानाति एवमेकैकेंद्रियेण अकृत्स्नो भवति अथ कृत्स्नः केन प्रकारेण
भवतीत्याह आत्मेति सर्वेन्द्रियेषु स्वस्वविषयं गृ[illegible]त्सु सत्सु पदार्थभासको य मेवेत्येवोपा
सीत यतोऽत्र आत्मनि सर्वे विषयः प्रतीतिरूपेण एकी भवन्ति तदेतदस्यात्मनः पदनीयं
ज्ञातव्यं स्थापनीयं यस्मात्कारणादस्य स जगतो य मात्मा अनेनात्मना सर्वं वेद जानाति
अतो रूपरसादि सर्वपदार्थग्रहणे प्रतीतिरूपेणात्मैव ज्ञातो भवति तत्र दृष्टान्तमाह यथे
ति यथा पदेन गोपदानुसारं गच्छतो गो ज्ञानं य एव वेद स कीर्तिं श्लोकं यशश्च विन्दति
प्राप्नोति तैत्तरीयकेपि अन्तःप्रविष्टः शास्ता जनानामेकः सन् बहुधा विचारः शांतं
सृष्टानि यत्रैकी भवन्ति सर्वे वेदा यत्रैकी भवन्ति अत्र बहुप्रकारमिन्द्रियमार्गे विचरन्ति
सृष्टानि इन्द्रियवृत्तयः शोभं स्पष्टम् ॥ २१

166

न्ताः येत्वेवं श्रमायेनानात्मनि देहादावात्मबुद्धयः प्रकृतेर्मायाया
गुणैः सत्वादिभिरहंकारादिभिर्वा आत्मस्वरूपे संमूढाः सम्यङ्मोहि
ताः गुणकर्मसु गुणानां देहेन्द्रियादीनां कर्मसु क्रियासु गुणेषु देहादि
षु कर्मसु तेषां व्यापारेषु वा सज्जन्ते वयं सकामकर्मणे वयं क्रिया
मः किमात्मदर्शनेनेत्येवमनात्मविषयेषु गुणकर्मसु निरतिशय
मतिं कुर्वन्ति तेत्तानयोगशास्त्रनहोः कर्मण्येवाधिकारिणस्ता
न्मन्दानात्मज्ञानग्रहणधारणासमर्थान् कृत्स्नविद्यथात्मस्वरूपज्ञाना
न विचालयेत् तेषां ज्ञानानधिकारिणां कर्माधिकारिणामात्मविमु
खत्वेनानात्मतादात्म्येन कर्मयोग एवाधिकारः कर्मयोगव्यतिरेकमा
त्मज्ञानमेतानुपदेष्टुमिच्छेन्नहि तेषामनधिकारित्वेनोपदेशो विफ
लो भवेदिति निषिध्य विद्वान् स्वयमेवात्मावलोकनसाधनभूतानि स
र्वाणि कर्माणि कृत्वा तानपि कर्माणि कारयेत् स्वयमोभयतो विभ्रष्टत्वे
नैनेनस्त्वं नित्यमपि विद्वानतः कर्म कुर्वित्यर्थः ॥२९॥

+ तदेवं विद्वदविदुषोः कर्मानुष्ठानसा **मधुसूदनी टीका** म्येन विद्वानविदुषो बुद्धिमोहं न कुर्यादित्युक्तमुपसं
हरति + प्रकृतेः सर्वकार्याकारेण परिणामिन्या मायाया गुणैः कार्यैर्देहेन्द्रियादिभिर्विकारैः दि॰
संमूढाः स्वरूपास्फुरणेन तानेवात्मत्वेन मन्यमानाः तेषामे
व गुणानां देहेन्द्रियान्तःकरणानां कर्मसु व्यापारेषु सज्जन्ते सक्तिं
यं कुर्मः कर्म तत्फलायेति दृढतरां मात्मीयबुद्धिं कुर्वन्ति ये तान् क
यो॰ र्मसङ्गिनः अकृत्स्नविदोऽनात्माभिमानिनो मन्दान् अशुद्धचित्त
त्वेन ज्ञानाधिकारमप्राप्तान् कृत्स्नविन्परिपूर्णात्मवित् स्वयं न विचा
लयेत् कर्मश्रद्धातो न प्रच्यावयेदित्यर्थः ये तु मन्दाः शुद्धान्तःकरणाः
ते स्वयमेव विवेकोदयेन विचलन्ति तानधिकारे स्थापयितुमभिप्रायः
कृत्स्नाकृत्स्नविदौ आत्मानात्मपरतया यथाक्रमं यथानुसारेण वार्तिककृद्भि
र्व्याख्यातौ तदेवमादिवाक्येभ्यः कृत्स्नं वस्तु यतोऽद्वयं संभवत्यतो विदुः
अकृत्स्नाः कृत्स्नमप्यन्ये यस्मिन्न्हेयप्रदेशोऽपि सन्नदन्तश्च शिष्यते
न प्राप्तं दृष्टेऽपि दृष्टः स्यात् कृत्स्नस्ताद्गव्यमस्तिति श्रुतिनाना नःसावयव
त्वादनेकधर्मवत्त्वादेकेन विदुः धर्मेणैकेन विदेशं पदेनवा विशिष्टेन ना
स्मिन्नेकस्मिन्नघटादौ तानपि नेयं मानं तेनैवापवादान्तरेण वा विशिष्टः

गी॰
टी॰
३॰

167

सप्ताः सन्तोऽवशिष्यन्ते तदमः व्यपसादिरसन्तोऽवशिष्यन एव तथा तस्मिन् घटादावसत्त्वेऽपि पटादिसत्त्वेन सादिति न सत्त्वेऽपि तत्सामान्यस वाःसत्तानामदसत्त्वेऽप्ययसत्तानात्स्वसोकृत्स्न उज्यते कृत्स्नस्व्रदयशालेम वनज्ञानेकस्यचिद्विशेषस्याभावादितिसोकदयार्थः [illegible]

[illegible] २

[illegible]।

[illegible] ॥ २९ ॥

सदानंदीटीका

मायायाः कार्यरूपेण गुणैः परिणतैर्जनाः देहेंद्रियादिभिः सम्य। ग्मूढास्तत्राभिमानिनः १ तेषां देहेंद्रियादीनां व्यापारेषु भ्रमाहृताः स्वी यां बुद्धिं प्रकुर्वंति मान्मूढाः कर्मसंगिनः २ मंदान्शुद्धविनात्देहाद्या त्माभिमानिनः नानाधिकारमर्यादामास्थितांस्तानविनिश्चयं ३ नैव चा लयेत्कर्मश्रद्धातोऽत्मविदोजनान् ४ २९ ॥

नीलकंठीटीका

एवं सकामाकामयोः कर्माणि विभज्य सकामकर्मानुवादपूर्वकं न बुद्धि भेदं जनयेदज्ञानामित्युपक्रांतमुपसंहरति प्रकृतेरिति गुणै रहंकारादिभिः स्वस्मिन्नध्यस्तैः संमूढाः एकीभावेन अभेदाध्यासे नमूढास्त प्रकृतेः प्रकृतिसंबंधिषु गुणेषु देहादिषु कर्मसु गमना दिषु च सज्जंते अहमयं ब्राह्मणो ममेदं यज्ञादिकं कर्मेति सज्जंते स क्ता भवंतितान्मूढत्वात् अकृत्स्नविदः आत्मज्ञानहीनान् आत्म। विद्धि कृत्स्नवित् आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितमिति श्रुतेः मंदान् शास्त्रार्थग्रहणासमर्थान् कृत्स्नवित् आ त्मवित् न विचालयेत् कर्मनिष्ठातो न प्रच्यावयेत् तेषामुभयभ्रष्टत्वा पत्तेः प्रकृतेर्गुणैः संमूढाः गुणानां कर्मसु सज्जंत इति शाकोयोजना २९

आनंदीटीका

श्रि॰ प्रकृतेर्गुणैः सात्विकराजसतामसैः कृत्स्नैः संमूढा मिथ्यात्ता नात्वात्मनि कर्तृत्वाभिमानिनः गुणकर्मसु सज्जंते सर्वाद्याशाया श्री॰ विषयेभ्यः स्पृहयन्ति तानकृत्स्नविदः अनात्माभिमानिनः मन्दान्

+ अबुद्धां बुद्धयोर्लेपेण कर्मसु क्रियमाणेषु मोक्षसंसारलक्षणं फलभेदमुपपाद्येदानीमबुद्धस्य यथाप्रतिपादितज्ञानकर्मसमुच्चयानुष्ठानपरिनिष्ठितबुद्धेर्लौकिकविषयं व्यवहारं नियमयितुमाह +

परमार्थज्ञानमशक्तान् ज्ञानवित्तत्त्वदर्शी न विचालयेत् तेषां लो
कानामविदुषां संग्रहार्थं स्वयं नियतं कर्म कुर्वाणस्तानपि कारयेत्।
यथा नैते नैनं तस्य नैष्कर्म्यदर्शनान्निष्कर्मीभूय पतिताः स्युरित्यर्थः २५

रामकंठीटीका

+ प्रकृतेः कर्मलक्षणायाः सम्बन्धिभिर्गुणैः सत्त्वादिभिरनादिसम्बन्ध
परिचितत्वादात्मनाहृपतया शरीरारम्भकतया च व्यतिरिक्तत्वेनावस्थि
तैः संमूढा आत्माहं गुणमय एव शरीराद्वात्मस्वरूपलक्षणं स।
म्मोहमापन्नाः संसारिणो गुणमयेष्वेव कर्मसु स्वर्गमर्त्यभावतिर्यक्त्वा
दिफलहेतुषु सज्जन्ते विवेकज्ञानाभावादेव परत्वेन मन्यमानास्त।
थाभिमानवन्तस्तानकृत्स्नविदो गुणपरिस्पन्दपरिमितीकृतज्ञान।
त्वात्स्वहेयोपादेयरूपं ज्ञानमजानानानत एव मन्दानल्पधियः
कृत्स्नवित् समस्तज्ञेयतत्त्ववेदी न विचालयेत् यथैव गुणात्मके कर्म
णि फलेच्छासक्तास्तानोन प्रच्यावयेत् तेषां बुद्धिभेदपरिहाराय स्वयं विहि
तं कर्मातिष्ठे[illegible]
[illegible]
[illegible] २९ ॥

लातिकी [illegible]टीका

त्रिगुणसाम्यं प्रकृतिः तत्सम्बन्धिभिर्गुणैः सत्त्वादिभिः समाऽसंमूढा ले
षेवैन्नुत्ये न तिरस्कृतस्वस्वरूपा गुणेषु गुणकार्येषु देहादिषु तत्कर्म
सु च सज्जन्ते अहंकारममकारौ भजन्ते तान्कर्मसंगिनोऽकृत्स्नविदः
कृत्स्नपरिमितदेहाद्यात्मत्वेन मन्यमानान् तनुपवमन्दान् जडान् ज्ञानाधि
कारमप्राप्तान्कृत्स्नविमर्शिणोत्मवित् न विचालयेत् आत्मोपदेशेन कर्म
श्रद्धातो न प्रच्यावयेत् कृत्स्नाकृत्स्नशब्दौ हि आत्मानात्मपरतया श्रुत्य।
र्थानुसारेण वार्तिककृद्भिर्व्याख्यातौ २९ ॥

पंचोलीटीका

ननु बुद्धिभेदं जनयेदित्युक्तमुपसंहरति प्रकृतेरिति प्रकृतेर्मायायाः गुण
संमूढाः गुणैरतिशयेन मोहिताः गुणकर्मसु देहेन्द्रियादीनां व्यापारे

गी॰
टी॰
३

षु सज्जंते एवंभूतकर्मस्वित्यर्थः तान् अकृत्स्नविदः अकृत्स्नकर्मफ
लमात्रदर्शिनः कर्मसंगिनः मंदान् कृत्स्नवित् आत्मवित् न चाल
येत् न प्रेरयेदित्यर्थः २९ ॥

रत्नावीरसमिद्धोधिनी ॥

168

प्रकृतेरिति ल्यब्लोपे पंचमी अगुणकर्मस्विति छेदः तथा चा
यमर्थः ये गुणसंमूढाः गुणो मौर्व्यामप्रधाने रूपादौ सूदइं
द्रिये त्यागे शौर्यादि संध्यादि सत्वाद्यावृत्तिरज्जुषु शुक्लादावपि
बुध्यां चेति हैमकोशात् गुणो बुद्धिः सा चात्र निश्चयात्मिका तत्सं
मूढा निश्चयहीनाः संदिहाना इति यावत् ते प्रकृतेः प्रकृष्ट
कृतिं प्रधानव्यापारं प्रमाणीकृत्य अगुणकर्मसु न गुणा अगुणाः
प्रधानानि तेषां कर्मसु यद्वा गुणकर्मस्विति यथास्थितमेव पदं
गुणाः कर्मेंद्रियाणि तेषां कर्मसु शास्त्रप्रयोगादिव्यापारेषु सज्जंते
सक्ता भवंति प्रधानस्य वर्णाश्रमोचिते कर्मणि प्रवृत्तिं प्रमाणी
कृत्यान्येपि तदनुवर्तिनस्तत्र प्रवृत्तिमंतो भवंति प्रधानानुवर्ति
नो गुणा इति न्यायादिति तात्पर्यं अतस्तु कृत्स्नवित् लब्धसर्वपु
रुषार्थः तान् अकृत्स्नविदः अलब्धलब्धव्यान् न विचालयेत् स्व
यं शमदमसाध्यत्वात् स्वज्ञानोद्भवितकर्मानाचरणेन स्वकर्मणः स
काशात् न प्रच्यावयेदिति अतस्त्वयापि स्वात्मानं कृतकृत्यं मन्य
से तथापि लोकसंग्रहार्थं कर्म कुर्वित्यभिप्रायः यद्वा प्रकृतेः प्र
धानाकृतेः स्ववर्णाश्रमोचितेषु कर्मसु प्रवृत्तिस्तस्यां ये गुणाः
स्वर्गादिभोगकीर्त्यादिरूपाणि फलानि तत्र संमूढाः अन्यथात्वेन
विप्रतिपन्ना नरकादिपापफलाभिमानिनः ये जना गुणेष्वप्रधा
नेष्वन्यवर्णोचितेषु भिक्षाचरणादिषु कर्मसु सज्जंते तत्परा भवं
ति यद्वा आकारप्रश्लेषः न विद्यंते गुणा महावीरसंभावितत्वरूप
कीर्तिराज्यभोगादि लक्षणा ऐहिकाः स्वर्गादिभोगलक्षणा

आमुष्मिकाश्चयेषुतान्युपस्थानि अपकीर्त्येयोगतिलक्षणोभ
यलौकिकदोषोत्पादकानिकर्माणितद्वादीनांभिन्नाचरण
दीनितेषुसज्जंते देहतत्त्वविन्न विन्नविनौ विचारिते अस्वक्षुधास
नात् विन्नंविचारितंकृत्स्नंकर्मजातंयेन सद्दुष्यद्राज्ञातस वे
कर्मतत्त्वदेहेनतान्मंदान्जडान् अकृत्स्नविदःसकामान् अ
भावेस्वल्पभावेचसादृश्येवविपर्यये कृत्स्नायामपिनम्रजेयो
तिष्ठेदेवसुभोक्षिप्रियनुष्ठानस्थानाविंदार्थेनम् तथाच करणं
कृत् भावेक्विप् नकृत् अकृत् निंदितकर्माचरणं तयस्नाति
निमज्जति अकृत्स्नानिंदिताचारनिमग्नावितन्संविन् निश्चयस्त
स्याःसकामान्हिचालयेत् स्वजात्युचितकर्मानुष्ठानेनभवाह
माःश्रेष्ठइतिबोधः नान्यकर्मणिप्रवर्तयेदितिभावः २९॥

मधुभाष्य

२९॥

169

भाषा अनुवाद

सो कहते हैं कि प्रकृति जो माया तिसके गुण जो सत्व र
ज तम तिन से सम्यक मूढ कहे मोह को प्राप्त जो जन हैं
तेई गुणो के कर्म्म मे अर्थात् सात्विक राजस तामस त्रिगु
ण कर्म्म मे आसक्त होय कर्म्मका सङ्ग करते हैं तिन अ
संपूर्ण ज्ञानी मन्दमति मनुष्यों को उस कर्म्म के आनंदसे म
गनमन जनों को कर्म्म करने से उनको कृत्स्नवित कहे स
म्पूर्ण ज्ञानी सो न चलावे अर्थात उनको कर्म्म रहित न करै २९

सोरठा ॥

माया गुण कर मूढ बांधे जो गुण कर्म महि मंद अल्पज्ञ
हिं मूढ ते हिन चालें सर्ववित २९ ॥

170

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा नि
राशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ ३० ॥

शांकरभाष्यं

कथं पुनः कर्मण्यधिकृतेनाज्ञेन मुमुक्षुणा कर्म कर्तव्यमित्युच्य
ते मयीति मयि वासुदेवे परमेश्वरे सर्वज्ञे सर्वात्मनि सर्वाणि कर्मा
णि संन्यस्य निक्षिप्याध्यात्मचेतसा विवेकबुद्ध्याहं कर्तेश्वराय भृत्य
वत् करोमीत्यनया बुद्ध्या किंच निराशीः त्यक्ताशीः निर्ममो मम
भावश्च निर्गतो यस्य तव स त्वं निर्ममो भूत्वा युध्यस्व विगतज्वरो
विगतसन्तापो विगतशोकः सन्नित्यर्थः ॥ ३० ॥

आनंदगिरिकृतटीका

यद्यपि कर्मण्यज्ञोऽधिक्रियते तथापि मोक्षमाणेन तेन कर्म
न कर्तव्यं मोक्षस्य कर्मासाध्यत्वात् न तेन कर्म कर्तुं शक्यं कर्मणः
सापेक्षत्वविरोधित्वादिति शंकते कथमिति श्लोकेनोत्तरमाह उ
त्तरमिति यथोक्ते परस्मिन्नात्मनि सर्वकर्मणां समर्पणं कारण।
माह अध्यात्मेति उत्तरमिति यथोक्ते परस्मिन्नात्मनि सर्वकर्मणां
समर्पणं कारणमाह अध्यात्मेति विवेकबुद्धिमेव व्याकरोति अह
मिति दर्शितरीत्या कर्मणि प्रवृत्तस्य कर्तव्यान्तरमाह किंचेति त्यक्ता
शीः फलप्रार्थनाहीनः सन्नित्यर्थः निर्ममो भूत्वा पुत्रभ्रात्रादिष्वभिनिवे
शः तत्र युद्धे नियोगो नोपपद्यते पुत्रभ्रात्रादिहिंसानिमित्तस्य संता
पहेतोः नियोगविषयत्वायोगादिति तत्राह विगतेति ॥ ३० ॥

स्वामिकृतटीका

तदेवं तत्त्वविदापि कर्म कर्तव्यं न तु तावतापि तत्त्ववित् पुनः कर्मैव कु।
र्विमाह मयीति सर्वाणि कर्माणि मयि संन्यस्य समर्प्य अध्यात्मचेत
सा अन्तर्याम्यधीनोऽहं करोमीति दृष्ट्या निराशीर्निष्कामो न त एव ममफल
साधनं मदर्थमिदं कर्मेत्येवं ममताशून्यश्च भूत्वा विगतज्वरः त्यक्तशो।
कश्च भूत्वा युध्यस्व ॥ ३० ॥

पैशाचभाष्यं

तेन कर्माधिकारी मयीति मयि वासुदेवे परमेश्वरे सर्वज्ञे सर्वकर्मभो

गी॰ टी॰ २

मयिसर्वाणिकर्माणिसंन्यस्याध्यात्मचेतसाविवेकबुद्ध्यानिराशी
र्निर्ममःकर्मणिनफलेवाममत्ववर्जितःयुध्यस्वविगतज्वरःविगत
संतापः ३० ॥

रामानुजभाष्यं

ज्ञानयोगाधिकारिणोपिज्ञानयोगादस्यैवकर्मयोगस्यज्यायस्त्वं
सर्वमेवोक्तं अतोव्यपदेश्योलोकसंग्रहायत्वमेवंप्रकृतिविवि
क्तात्मस्वभावनिरूपणेनगुणेषुकर्तृत्वमारोप्यकर्मानुष्ठानप्रका।
रउक्तः गुणेषुकर्तृत्वानुसंधानंचेदमेवआत्मनोनस्वरूपप्रयुक्तमि
दंकर्तृत्वमपितुगुणसंबंधकृतमितिप्राप्ताविवेकेनगुणकृत।
मित्यनुसंधानं इदानीमात्मनांपरमपुरुषशरीरतयातन्नियाम्य
त्वस्वरूपनिरूपणेनभगवतिपुरुषोत्तमेसर्वात्मभूतेगुणकृतंच
कर्तृत्वमारोप्यकर्मकर्तव्यतामाहमयीतिमयिसर्वेश्वरेसर्व।
भूतात्मभूतेसर्वाणिअध्यात्मचेतसासंन्यस्यनिराशीर्निर्ममोवि
गतज्वरोयुद्धादिकंसर्वमेवचोदितंकर्मकुरुष्व आत्मनियच्चेतस्तद।
ध्यात्मचेतः आत्मस्वरूपविषयेणश्रुतिशतसिद्धेनज्ञानेनेत्यर्थः।
तै॰१ अंतःप्रविष्टःशास्ताजनानांसर्वात्माअंतःप्रविष्टंकर्तारमेतं यआ
वे त्मनितिष्ठन्नात्मनोन्तरोयमात्मानवेदयस्यात्माशरीरंयआत्मानमंतरो
यमयतिसतआत्मान्तर्याम्यमृतःइत्येवमाद्याश्रुतयःपरमपुरुषप्रवर्ति
म॰१ तच्छरीरत्वंतन्नियाम्यत्वंपरमपुरुषंचप्रवर्तयितारमावेदयंतिस्मृत।
यश्चप्रशासितारंसर्वेषामित्याद्याःसर्वस्यचाहंहृदिसंनिविष्टःईश्वरः
सर्वभूतानांहृद्देशेर्जुनतिष्ठति भ्रामयन्सर्वभूतानियंत्रारूढा
निमायया इतिवक्ष्यते अतोमच्छरीरतयामत्प्रवर्त्यात्मस्वरूपानुसंधा
नेनसर्वाणिकर्माणिमयैवक्रियमाणानीतिमयिपरमपुरुषेसं।
न्यस्यतानिचकेवलमदाराधनानीतिकृत्वातत्फलेनिराशस्तत।
एवतत्रकर्मणिममतारहितोभूत्वाविगतज्वरोयुद्धादिकंकुरुष्व
स्वरूपेण स्वकीयेनात्मनाकर्त्रास्वकीयैश्चकरणैःस्वाराधनैकप्रयोजनायभगवा
यःपरमपुरुषःसर्वेश्वरःस्वयमेवकर्माणिकारयतीत्यनुसंधाय
कर्मस्वममतारहितःसन्अनादिकालप्रवृत्तानंतपापसंचयेनक
थमहंभविष्यामीत्येवंभूतमनोज्वररहितःपरमपुरुषएवकर्मभिरारा

यितोवयान्मोण्ववार्युस्मरन्कर्मयोगमेवकुरुष्वेत्यर्थः ३० ॥

अभिनवगुप्तकृतटी॰

तस्माद्युक्तः सन्सर्वमेतत्कर्मोक्तमुक्तं तत्र कथमिति स्फुटयति
मयि सर्वाणि कर्माणि नाहं कर्तेति संन्यस्य स्वतंत्रः परमेश्वर एव
कर्ता नाहं कश्चिदिति निश्चित्य लोकानुग्रहे चिकीर्षुर्लोकाचार
प्रसिद्धात्मकमनुतिष्ठ ३० ॥

परमार्थप्रपाटीका

तत्कर्मणीत्यादिरूपरणायावाचेत्पूर्वोक्तंतत्रमावश्यंसंन्यस्यवेत्
सुधिरश्रीपूर्वमपर्णीत्वयेतत्पकेवाश्रुणामेवनतत्कस्मादेवंत।
एकैकेनभवगान्नुचेवोपासीनाद्वत्रोचेत्सर्वपर्वाभवेतितदेतत्वमनी
पतमास्पर्वेस्यपदेमानात्मेवलेतत्वंवेदेयथाहंवैपदेमानुविदद
वकीर्तिःसोकेविदते यथंवेवेति माये हवंनुलोपाणवेवम
लोनामभवतीसारिनात्वंद्वियालयानवपवदृमेवतानितिमवं।
तीतवते तवयपकेक्ष्वपलेन्नात्मानाभिसःतनुपदेकेदिवेत्यासवं
करोति नसवेदनज्ञानाति पश्यवेकेकोदृष्येणत्रकृत्वानवतिद्रुय
हात्वः देवनवकोवेणभवतीतादृ आतेति सर्वेहिपेष्वस्यविव
यंतरकत्वात्म्यतत्वपदार्थमासवेकोयमेवेवेवेपासीत यतोयात्मवि
तदेविवधाः मतीतिरूपेणोवीमवंतितदेवदेशमात्मनः यदनीयंक्ता
तदेवस्यात्मनीवैनात्मारणारतत्वेजगतोयमानां यवेत्पात्मनात
वेदेदज्ञानानी यतोहपरमादिदविवेदार्थवद्रुणोमनीविद्वेमान
दलानेभवति वेवदेवलतावनयवेति पयापदेवतोपरदातुरू
रंगकतोत्मेत्मानंदपवेदेमकीर्तिलोकेयरावविदंतेयमेवात्मा ने
निवेदकेति वेतःप्रविष्टः पातालकमानामेवदःसुरुक्रद्वाविवरः।
एतंसुवातानिपवेवीमवंतितदेवयदेवलत्वयेवीयवंति दयवदामा
रवतेदिद्वयमोपेविद्वेवीतनुवानोनिद्विपेहलयवेत्पवे अध्यात्मचेत
मनुसरति मयीति सर्वाणिकर्माणिमयि संन्यस्य समर्प्य अध्यात्मचे
तसा अंतर्यामिन्यधीनोऽहंकरोमीति दृष्ट्या निराशी अमुकं मे भूयादिति
कामरहितः तथा यद्विभिन्नं तव जरः समुदितो ममत्वदिपयेनिर्ममः

172

ममताशून्यो भूत्वानतो विगतज्वरः सन् युध्यस्व
३० ॥ वनमालीटीका

एवं जीवः प्रकृतिगुणसहितएवकर्ता न केवलोऽतः आत्मानात्मविवे
केन गुणेष्वेव कर्तृत्वमिति मनुसंधाय मुमुक्षुणावश्यं कर्म कार्यमि
त्युक्तमिदानीं मत्तः सर्वमिति ज्ञानेन विकर्तृत्वं निधाय कर्म कार्यमित्याह ।
मयीति आत्मानं परमात्मानं मयि विक्षपवेन तदध्यात्मचेतसा तेन श्रीमा
त्स्वतंत्रकर्तृत्वेन प्रतीयमानानि कर्माणि भगवानेवातः स्वः कारय
ति न केवलोऽहं करोमीति बुद्ध्यानेन सर्वकर्मापणमिति विधिना मय्ये
व संन्यस्य समर्प्य मत्प्रसादभिन्नकामशून्यो निराशीर्निर्ममः अहंक
रोमि ममेदं कर्मेति भावशून्यः विगतज्वरः संतापहेतुत्वाच्छोक एव
ज्वरस्तद्रहितोऽतः ऐहिकपारलौकिकनिंदापवादहेतुकशोकशून्यो भूत्वा
युध्यस्व स्वधर्मानुष्ठानं कुरुष्व ३० ॥

ऊसमवैजयन्तीटी॰

इमे वैस्वस्वाभाविकं यमेभूतं कर्तृत्वं प्रकृतिगुणेष्वारोप्य गुणए
व कर्मकर्तारो नाहमित्यात्मानं मत्वा विद्वान् कर्म समाचरेदित्युक्तमथ
वर्तकर्मत्तानादप्यधिकमित्यपि नियतं कुरु कर्म त्वमित्यादिना पूर्वं
मेवोक्तमिदानीं गुणारोपितमपि स्वतंत्रतानि सर्वाणि कर्माणि चे
श्वरे भगवत्यारोप्य सर्वेषामात्मनामीश्वरपरतंत्रात्मत्वमस्वभावापने
सर्वे जीवाः स्वस्यैवात्मीयास्तदधीना भवंतीति एवं भावेन भक्त्यावितनेकर्म
कुर्विमाह मयीति अध्यात्मचेतसा आत्मनि यच्चेतस्तदध्यात्मचेतस्तेन
विभक्त्यर्थेऽव्ययीभावः अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा अन्तः प्र
विष्टं कर्तारमेतं यः आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा।
त्मानमन्तरो यमयति स ते आत्मान्तर्याम्यमृतः प्रशासितारं सर्वेषां
वशे नैव सर्वस्य वाहं हृदि सन्निविष्टः ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ति
ष्ठति भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया एवमादिनेक श्रुतिस्मृति
भिः पुरुषोत्तम एव सर्वेतरात्मीयभूतमात्मानं पुरुषोत्तमं च तत्स्ववशं
यितारमित्येवं प्रतिपाद्यमानेन स्वस्वरूपविषयभूतेन तत्त्वज्ञानेन सर्वाणि स्व
वीयानि कर्माणि लौकिकवैदिकानि च मयि सर्वान्तरात्मनि सर्वात्म।

भूते सर्वेश्वरे ब्रह्मणि संन्यस्य समर्प्य तदात्मीयत्वेन तत्स्वरूपानुसं स-
त्स्वरूपानुसंधानपूर्वकत्वेन त्वत्कारितानि कर्माणि मया कृतानि मयाहं
करोम्यथ इति करिष्यामि तेषां सर्वेषां तदर्पणमस्त्विति एवं मयि सर्वा-
णि कर्माणि समर्प्य निराशीः केवलं मत्प्रीतिमित्तां यत्कृतानां मत्स्वलब्ध-
फलाभिलाषशून्यः अत एव निर्ममः स्वफलप्राप्त्यर्थं ममत्वं निसाध-
नानि मया कृतानीमे एवं ममत्वरहितो भूत्वा विगतज्वरः ~~[illegible]ता।~~
~~त्वर्त्तावित्तानि निरयसाधनभूतानि मत्त्वत्तानि पापानि मया कृतानीमे~~
~~देममत्वरहितो भूत्वा विगतज्वरः~~ अनादिकालसंचितानि निरय-
साधनभूतान्यनन्तानि पापानि मया कृतानीमे एवं न पते भ्योहं कदा-
पि कथमपि मुक्तो न भविष्यामीमे एवंभूतज्वररहितः अत एव नमप-
वकर्मभिर्मयाराधितो भूत्वा मामेभ्यो मोचयिष्यतीनाम इमेवंस्म-
रन्नमपि रूढविश्वासः सन् युद्धलक्षणं कुरुष्व ३०॥

+ एवं कर्मानुष्ठाने साम्येन ज्ञानविज्ञयोः कृत्स्न- रणत्वेनोपेतया भगवदर्पणं फलाभिसंध- त्वाभिनिवेशनदभावाभ्यां विशेष उक्तः इदानीं तस्यापि शुद्धो- भावं च विशेषं वदन्नज्ञतयाऽर्जुनस्य कर्माधिकारं द्रढयति +

मधुसूदनीटीका

+ मयि भगवति वासुदेवे परमेश्वरे सर्वज्ञे सर्वनियन्तरि सर्वात्मनि स-
र्वाणि कर्माणि लौकिकानि वैदिकानि च सर्वप्रकाराणि अहं कर्ता। अध्यात्मचेतसा
न्तर्याम्यधीनस्तस्मा एवेश्वराय राज्ञे इव भृत्यः कर्माणि करोमीत्यनया
बुद्ध्या संन्यस्य समर्प्य निराशीः निष्कामः निर्ममो देहपुत्रभ्रात्रादिषु स्वीये-
षु ममताशून्यः विगतज्वरः संतापहेतुत्वाच्छोक एव ज्वरशब्देनोक्तः
ऐहिकपारत्रिकदुःखशोनरकपतनादिनिमित्तशोकरहितश्च भूत्वा त्व-
मुमुक्षुर्विहितानि कर्माणि कुर्वित्यभिप्रायः अत्र भगवदर्पणं
निष्कामत्वं च सर्वकर्मसाधारणं मुमुक्षोर्निर्ममत्वं विशोकत्वं च कर-
मात्रे प्रकृतत्वादिति द्रष्टव्यं अत्र ममताशोकयोरप्रसक्तत्वात्
[illegible]
[illegible]
[illegible] ॥३०॥

सदानंदीटीका

कथं मुमुक्षुणा ज्ञेन कर्मणि प्रवृत्तेनैव कर्तव्यं कर्मेत्याशङ्क्याह मि-
त्याशाहरमाणतिः । मयि सर्वात्मनि वासुदेवे सर्वज्ञे परमेश्वरे श्रौतानि
सर्वकर्माणि लौकिकानि समर्प्य अहं कर्तेश्वराधीनस्तदर्थं भृत्यवत्त

टा करोमीत्यनया बुद्ध्या निष्कामो ममतोज्झितः ३ दुर्यशोनस्कश
मिहेन शोकविवर्जितः युध्यस्वेति विधेयानि कुरु कर्माणि शाश्व
तः ४३० ॥

नीलकंठीटीका

मयीति त्वेतद्यतो मम त्वमपि सर्वान्तर्यामिणि सर्वाणि कर्मा
णि संन्यस्य समर्प्य अध्यात्मचेतसा आत्मानमधिकृत्य यद्वर्तते शास्त्र
अध्यात्मं तत्र प्रवणेन चेतसा णाकपार्थिवादिवन्मध्यमपदलोपी स
मासः आत्मानात्मविवेकवतेत्यर्थः ईश्वरप्रेरितोहं करोमीत्यनया
बुद्ध्या निराशीः फलमनिच्छन् निर्ममो लब्धे ममताभिमानशून्यः
भूत्वा युध्यस्व विगतज्वरो विशोकः सन् ३०

173

आनन्दीटीका

एवं नियतस्य कर्मणो वश्यकरणीयतां प्रतिपाद्य प्रकृते नियोजयति ।
मयि परमात्मनि वासुदेवे सर्वाणि कर्माणि अध्यात्मचेतसा वस्तुशीः फ
लस्पृहाहीनः निर्ममः त्यक्तकर्तृत्वाभिमानः अतएव विगतज्वरः त्य
क्तशोकमोहः युध्यस्व इत्यमेव चेतसा मयि सर्वकर्माणि संन्यस्येत्यष्टा
दशे सिद्धान्तयति ३० ॥

४ मायाब्रह्मार्पणयुक्त्या संन्यस्य सम्यक्कया न्यासं निर्लेपमिव स्थापयित्वा अतएव मोक्षं प्राप्स्यन् निरा

+ इति लोकसंग्रहापेक्षया अनुष्ठीयमानमपि आत्मकर्म पि ज्ञाननिष्ठत्वेन कर्मानुष्ठानम

रामकंठीटीका

कर्मयोगिनो यथा कैवल्यायैव पर्यवस्यति तथा तस्या ज्ञेनत्वेन निश्चिन्वन्नाह +

+ सर्वाणि शास्त्रविहितानि यज्ञदानतपः प्रभृतीनि कर्माणि अध्या
त्मचेतसा यथा प्रतिपादितस्वरूपात्मनिष्ठेन मनसा मयि परमकारणे नः
परमगुरौ संन्यस्य समर्प्यत्वमथैक एव परमेश्वरः अद्यमाध्याये प्रतिपा
दितस्वरूपः सर्वप्राणिभिः क्रियमाणानां सर्वकर्मणां कर्ता स्वेच्छामात्रे
णास्वप्नादिविभवरूपाणां निर्माता मतव्यतिरेकेण कश्चिदपि कर्तृ
त्वे पारमार्थिकमस्ति गुणापरतन्त्रतया तु देहादौ तदभिमानो मायावि
लसित एवेत्यनया भावनया सन्न्यासविधिं सम्पाद्य अतएवाशंसनी
यवस्तु विरहान्निराशीः आशीर्भिः प्रार्थनाभ्यो निष्क्रान्तो नएव सर्वभा
वेषु परिग्रहाभावान्निर्ममो ममेदमिति संसारिपुरुषोचिताया अतिप
त्तेर्निष्क्रान्तो भूत्वा विगतज्वरः यथोक्तचित्तानामस्ता वगाहनान्निहतस
देहादि समस्त सन्तापः सन्युध्यस्व समरात्मकमवसरोपनतमवश्यका

र्थं स्वकर्मानुतिष्ठेत् [illegible] प्रायः परिसमाप्तौ [illegible]
[illegible] ज्ञानात्मक उपदेशः सारो यतः प्रथमेनात्मानात्मविवेकस्य
नि[illegible] द्वितीयेन ज्ञानस्वरूपं विविदिनम् तृतीयेन तत्संस्कृतस्य
कर्मणोऽवश्यानुष्ठेयत्वे निमित्तमाह भगवान् सर्वपरमरहस्यभूतस्य।
[illegible] भावनया प्रतिपादनार्थं [illegible] मत्तमाह) ३०॥

लासिकी[illegible]टीका

एवं लोकसंग्रहार्थमपि कर्मानुष्ठीयमानं यथा योगिनः कैवल्यायैव पर्यवस्यति तथार्जुनमुद्दिश्य शास्त्रमपि कर्मयोगमुपदिशति। शान्तिमयीति त्वं प्रबुद्धत्वात् निराशीर्निष्कामो निर्ममः सर्वभावेषु ममताशून्यो भूत्वा सर्वाणि कर्माणि लौकिकानि वैदिकानि वाध्यात्मचेतसा (ति) त्मनिष्ठेन मनसा मयि परमेश्वरे परमगुरौ संन्यस्य समर्प्य ईश्वरायैव कर्म तुष्टं ब्रजत्वनेनाहमेव करोमीत्येवं तथा वागमेऽप्युपदिष्टम् शिवो भूत्वा शिवं यजेदिति एतदेव ब्रह्मणि कर्मणां समर्पणम् तथा विगतज्वरः सक्तशोकाद्यभावः स्वस्वकर्मानुतिष्ठ ३०॥

पंचोलीटीका

कथं पुनः कर्मण्यधिकृतेन तत्र मुमुक्षुणा कर्म कर्तव्यमित्याह मयि सर्वाणीति हे अर्जुन अध्यात्मचेतसा ईश्वरायैवं कर्म करोमीति बुद्ध्या मयि परमेश्वरे सर्वाणि समस्तानि कर्माणि संन्यस्य निराशीः मुक्तफलेच्छः निर्ममः ममतारहितो भूत्वा विगतज्वरः विगतशोकः सन् युध्यस्व ३०॥

रणवीरसमिद्धोधिनी॥

मयीति सर्वाणि लौकिकानि वैदिकानि च कर्माणि स्वजात्युचितानि अध्यात्मचेतसा यत्नाधिकृतेन चेतसा निश्चित्य कृतानि मयीश्वरे समर्प्य एतेन स्वधर्माचरणेनेश्वरः प्रीयतामिति निराशीः सिद्ध्यसिद्ध्योः समः निर्ममो देहपुत्रादिषु ममतारहितः

अन्यथाशोकोत्पत्तिप्रसंगेनकर्माकरणप्रसंगात् अतएव विगतज्वरःशोकज्वररहितःसन् युद्ध्यस्वस्वधर्मभूतंसमरकर्मानुतिष्ठेत्यर्थः ३०॥

मधुभाष्य

३०॥

भाषा अनुवाद

सो ऐसो तत्त्वज्ञानी कोभी कर्म्म करना उचित है औ कहते आये हैं और तुमतो अभी ऐसे कुछ तत्त्वज्ञानी भयेभी न हीं हो इससे अच्छी तरह कर्म्म करो कर्म करने मे तो तु मारा अधिकार ही है यह भगवान कहते हैं कि आत्मामे चि त्तदे सब कर्म्म हमारे मे अर्पण करके अर्थात् हम अन्तर्या मी भगवानके आधीनहोय कर्म्म करते हैं और यह हमा रा काम है हम करते हैं इस विचार औ फलकी आशाको छ्ुकर तथा शोक दूर करि तुम वे खटक युद्ध करो यह क हा ३०

सोरठा॥

मोमहिकर्महिंत्यागसमझुं निश्चय चित्तकर छोनिराशम महोहकरहुं युद्धतं विगतज्वर ३०॥

175

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः श्रद्धा
वन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्म्मभिः ३१॥

शांकरभाष्यं

यदेतन्मम मतं कर्म्म कर्तव्यमिति सप्रमाणमुक्तं ततथा ये। ये म इति
मदीयमिदं मतमनुतिष्ठन्ति अनुवर्तन्ते मानवा मनुष्याः श्रद्धा
वन्तः श्रद्दधानाः अनसूयन्तोऽसूयामपि परमगुरौ वासुदेवेऽकु
र्वन्तो मुच्यन्ते तेऽप्येवंभूताः कर्म्मभिर्धर्माधर्माख्यैः ३१॥

आनन्दगिरिकृतटी॰

प्रकृते भगवतो मतमुक्तप्रकारमनुसृत्यैवानुतिष्ठतो क्रममुक्ति
फलं कथयति यदेतदिति शास्त्राचार्योपदिष्टे अदृष्टार्थे विश्वास
वत्त्वं श्रद्धावत्त्वं गुणेषु दोषाविष्करणमसूया अपि यथोक्ताया
मुक्तेरमुख्यत्वद्योतनार्थः ३१॥

स्वामिकृतटीका

एवं कर्मानुष्ठाने गुणमाह ये मे मतमिति मदाज्ञां श्रद्धावन्तोऽनसूयन्तो
दुःखात्मके कर्मणि प्रवर्तयतीति दोषदृष्टिमकुर्वन्तश्च मे मदीयं मतम
कर्म कुर्वाणः नुतिष्ठंति तेऽपि शनैः सम्यक् ज्ञानिवत् कर्मभिर्मुच्यंते ३१

पिशाचभाष्यं

यदेतन्मम मतं कर्म कर्तव्यमिति सप्रमाणमुक्तं त तथा ये म इति ये
ऽधिकारिणः मे मम मतमिदं उक्तस्वरूपं नित्यं सदा अनुतिष्ठंति मा
नवाः श्रद्धावंतोऽनसूयंतो मयि वासुदेवे उपदेष्टरि असूयारहिताः
तेऽपि कर्मभिः सकलकिल्बिषैर्मुच्यंते ३१॥

रामानुजभाष्यं

तमीश्वराणां परमं महेश्वरं पतिं विश्वस्यात्मादिश्रुतिसिद्धं हि सर्वेश्व
रत्वं सर्वशेषित्वं ईश्वरत्वं नियंतृत्वं पतित्वं अयमेव सारतः उपनिषदा
रम्भतोऽर्थ इत्याह ये मे मतमिति ये मानवा आत्मनिःश्रेयसार्थिनः शास्त्राधिकारि
तत्पापपुण्यानुसारेणैव प्रेरणं भवति न तु सर्वेषां पापैकक
र्मणि पापं तु पापिनं पवर्जनेन। यानि कर्माणि कारयति न तु एव
वतः पापं पापेन पुण्यं पुण्येनेति श्रुतेः तस्मात्केन केन विदृष्टिदिष्टे
न पुरुषेण प्रयुक्तः सन्प्रेरितः सन्नयमिमं गुणादिनिर्देशेन स्वस्वे।
वात्मानमस्यैते पृष्टान्त्र्यो धर्नस्वदोरातं स्म स्वाततमेवांगुणास्वभावे।
नैव दर्शयतीति योगस्ते अयं ज्ञानयोगयोग्योतः मेधावानात्मविवेकासा
दिभिः पुत्रः पुत्रधर्मत्व परिहीणोपि उपायो धनोवा एवं पुरुषः पुरुषः शरीरस्थो
देवासेयहृदिलिंवसोऽहं वाज्याः दिस्याद्येतिहक अनिच्छन्नपीहानाममावः तु

गी॰
टी॰
२॰

201

फलरूपेण शास्त्रनिषिद्धं धर्मं कर्तुमिच्छामोऽपि बलात्‌ नियोजित इव
लेन शरीरं च तत्परवशं भवत्ययमनुशरीर्यस्यपि यथा कश्चिद्बलवत्तरः पुरुषः
कंचिद्दुर्बलजनं कस्मिंश्चित्कार्ये नियोजयति तथा केन बलवत्तरेण प्र
योजकेन नियोजितः प्रेरितः प्रयोज्योऽयं पापं निरपेक्षं करोति आचर।
ति हे वार्ष्णेय यथा त्वं वार्ष्णेयस्तथाहमपि वार्ष्णेयीपुत्रोऽतः स्वगोत्रमपि
मां त्वत्केनापि चिन्तितमिति मत्वोपनाशयः येन प्रेरितस्तत्रायं जीवात्मा
पापं चरति तस्य स्वरूपं वदेत्यर्जुनप्रश्नाभिप्रायः ३६॥

तत्र काम्यप्रतिषिद्धकर्मप्रवृत्तिकारणमपृच्छ **मधुसूदनीटीका** यद्भगवान्मतमत्र वर्तितं तत्र कारण
वधारणाय+

+ध्यायतो विषयान्पुंसः इत्यादिना पूर्वमनर्थमूलमुक्तं सोऽप्यनेन प्रश्न
तेऽर्जुनेन संमुखात्मादिना बहुविधं कथितं तत्र किं सर्वाण्यपि सम
प्राधान्येन कारणानि अथवैकमेव मुख्यं कारणमितराणि तु तत्स
हकारीणि केवलं तत्र सर्वेषां पृथक्कारणत्वे महान्प्रयासः स्यान्
अन्यथैकस्मिन्नेव निराकर्तव्ये कृते सर्वस्यापि निवृत्तिरिमेकेन हेतुना प्रश्न ऽन्तर्नो॰

कः प्रेरितोऽयं पुरुषः कर्मणामनधिकारी विमूढः पुरुषः पापमन
र्थानुबन्धि सर्वफलाभिसन्धिपूर्वः संकल्पपूर्वकादिशास्त्रबाध्यस्य
तत्प्रयोगादिप्रतिषिद्धं च कलञ्जभक्षणादि बहुविधं कर्माचरति स्व
यं कर्तुमनिच्छन्नपि नन्तानिवृत्तिरूपं परमपुरुषार्थं तु बध्नितु मपदि
ष्टं कर्मेच्छन्नपि करोति तत्प्रयोजकं विना न संभवति अतोऽपेक्षितत्वा
द्बलादिव नियोजितो राज्ञेव भृत्यस्तन्मत विरुद्धं सर्वानर्थानुबन्धि तं जा
नन्नपि नादृशं कर्माचरति तमनर्थमार्गप्रवर्तकं मे प्रतिबूहि त्वं ज्ञा
तमुक्तेरागतादि यमिन्द्रियार्थः हे वार्ष्णेय वृष्णिकुलेऽवतीर्णोऽस्मान्महत्कुलेक्रु।
पयावतीर्णोऽसि सर्वोऽपि मनोरथः वार्ष्णेयी मन्नो हत्वयानोपेक्षणीय इति
सूचयति [illegible]
[illegible]
[illegible] ३६॥

सदानन्दटीका

ययपानर्थमूलं प्राग्ध्यायतो विषयानिति श्लोकेन यावन्नाराग

द्वेषौ शत्रू प्रकीर्तितौ १ प्रकृतेर्गुणसंमूढाः इमादौ बहु विस्तरात्
पुंसः एष क्रम उक्तं सर्वेषां विनिवारणे २ महापापस्य एव स्यात्तः
सर्वस्य कारणं किमेकं परित्रिहृत्मा स्यात्कृन्तन्तः मनमेजसा ३ मम
माशायवानात् हहरि प्रश्नं जेनोक्तः केनायं हेतुभूतेन प्रेरितः प्रकृ
षो वशः ४ अनिष्टहेतकं कर्म निषिद्धं चरति स्फुटं अनिच्छन्नपि यं
कर्तुं धर्मो राज्ञे वयेन सः ५ बलान्नियोजितो जानन्नप्यनिष्टानुबंधि
नत् कर्मानुचरतीत्येनं प्रेरकं ब्रूहिमां प्रति इति विशेषवतीर्गात्वा
श्रोपेत्पोहहरेत्वया ३९ ॥

नीलकंठटीका

ईश्वरो धर्मो धर्मौ रागद्वेषौ वा पुरुषस्य प्रवर्तको भवतु तस्मात्तनो ऽस्वा
तंत्र्यमत्वा अर्जुन उवाच अथ केनेति केन ईश्वरादीनां मध्ये केन ।
वा प्रयुक्तः प्रवर्तितः सन् अयं पुरुषः पापमनिष्टं चरति करोति अ ।
निच्छन्नपि अनेन रागद्वेषयोः प्रवर्तकत्वं निरस्तं सति हि रागे इच्छा
भवति अतः इच्छाया अभावाद्रागाभावः रागस्याप्रवर्तकत्वेन ।
मूलभूतसंस्कारहेतोर्धर्माधर्मयोरप्रवर्तकत्वेन न अतन्त्रापेक्ष
स्येश्वरस्यापीति सर्वेषामाक्षेपः तस्मात् कस्तं प्रवर्तक इत्यत्राह
मिमर्थः बलादिव नियोजितः विशिष्टहीनश्चेत्यर्थः ३९ ॥

आनन्दीटीका

तयोः रागद्वेषौ परिपन्थिनौ श्रेकौ तयोः कृतः उक्तमिति इत्यर्जुन उवाच
अथ यद्येवं स्वधर्मो दुःखदः परधर्मो दुःखदः इति ज्ञात्वा पुरुषो निच्छ ।
न्नपि बलादिव व्यापारितः केनायं प्रेरितः पापमेव कृतेऽकर्मैवा
चरति ३९ ॥

+ एवमात्मनिष्ठतया शास्त्रबोदितस्वकर्मात्र रामकंठटीका ज्ञानमपवर्गसिद्धिहेतुरिति भगवत्प्रतिपादितसकलप्रकरण
+ अथैवं भगवता प्रतिपादितलक्षणो धर्मात्मा केन स्वामिनेव प्रयु सिद्धांतेष्कत्वा प्रतिपादित
क्तः प्रेरितः सन् कुकर्माकर्मं स्पष्टं पापं दुर्गतिफलं किल्बिषमनिच्छ स्वरूपस्यात्मनो धर्मस्यापार
पि॰ न्नपि भक्ष्याभक्ष्यबलदाक्रमपहारादि दृष्टविषयमहानिनिवार्यनियो तंत्र्यमेवं विधमत्रापद्यत्रम
जितोऽप्यपि रिरिनयवाचरति अत्रनिहति [illegible] ३९ न्यमानोऽर्जुन उवाच +

लासिकी वल्लभमती टीका

गी॰
टी॰
र॰

ननुशास्त्रदृष्टिमेधनस्यप्युनिरुद्धोयिपुरुषस्यप्रतिषिद्धाचरणे
कोहेतुरितिमेवंपिपृच्छिषुरर्जुनउवाच अथेतिप्रश्ने हेवार्ष्णेयवृष्णि।
वंशावतीर्णायंपुरुषोनिरुद्धोपिकेनप्रयुक्तःप्रेरितःसन्स्वामिने
वभृत्यश्चादिष्टःपापंशास्त्रनिषिद्धमाचरन्नातिष्ठति ३९॥

पंचोलीटीका

यद्यपिध्यायतोविषयान्पुंसःपरिपंथिनावित्यादिनारागद्वेषौसं
सारपातहेतुत्वादनर्थमूलमित्युक्तंतथापिविदितमेवअनर्थकारित्वंच
नउक्तं इदानीमेतिमनिश्चितवेदमेवनितनउक्तेरापत्तानिमिरुद्धुर्न
नउवाच अथेति अथअयंपुरुषकेनप्रयुक्तःपापंचरतिहेवार्ष्णेयअ
निरुद्धोपिवलादिवनियोजितःइत्यादिबलाद्प्रेरितः ३९॥

रसावीरससिद्धोधिनी॥

अथप्रतिषिद्धकर्मप्रवृत्तिकारणापनोदार्थंभगवन्मतमनुव
र्तितुंतत्कारणंज्ञातुमर्जुनउवाच अथेति अथशब्दःप्रश्ने अयं
मनुष्यत्वाज्जनःस्वतःपौरुषगुणविशिष्टोपि अनिच्छन्नपा
पंकर्तुमनभिलषन्नपि बलाद्दुरादिवेष्टविषयांप्रवृत्तिंनि
वार्यनियोजितोव्यापारितःकेनस्वामिनेवभृत्यःप्रेरितःसन्
पापंप्रतिषिद्धंस्वधर्मपरिहारपूर्वंपरधर्मरूपंपापायकंक
र्माचरत्यनुतिष्ठति तंमांप्रतिब्रूहि यतोहंज्ञात्वातन्मूलोच्छेदा
यप्रयतेयेतिप्रश्नाभिप्रायः वार्ष्णेयेति संबोधनेनमन्मातुलकु
लेवृष्णिकुलेत्पन्नत्वेननोपेक्षणीयोहमितिस्वस्यप्रसाद
पात्रतांदर्शयति ३६॥

मधुभाष्य

अथेति अथेत्यर्थांतरं तयोर्नवशमागच्छेदितिप्रश्नाप
पंके यत्तुबलवान्सर्वानर्थकःसप्रश्नःकामःक्रोधोप्येषएव

तज्जन्यत्वात् कामात्क्रोधोभिजायत इत्युक्तं यद्यपि प्र
क निंदादिनिमित्तः क्रोधो यत्तथापि भक्तिनिमित्तनिंदाका
मनिमित्त एव येत्वन्यथा वदंति ते संस्काररत्न मूढाज्ञा
नंति उक्तं च स्मृते कामानक्रोधपापा जायंते इतिक एवं वने
ति महाशनः महद्धि कामभोग्यं महान्स्त्वस्याद्यादिका
रणात्वान्महापाप्मा सर्वपुरुषार्थविरोधित्वाद्वैरी कथं
विरोधी सः इदमनेनावृतं यथा धूमेनाग्निर्वृतः प्रकाश
रूपोप्यस्य सम्यगदर्शनाय तथा परमात्मा यथादर्श
मलेनावृतो व्याभिव्यक्तिहेतुर्भवति तथांतःकरणप
रमात्मादर्शतिहेतुर्भवति कामेनावृतं यथोल्बेना
वृत्य बद्धो भवति गर्भस्तथा कामेनजीवः प्रावृतोजात
मपिज्ञानं परमात्मनो परोक्षायनप्रकाशते कामेनावृतं
ज्ञानिनोपि किमल्पज्ञानिनः कामरूपेण कामात्मकेन
नित्यवैरिणा दुष्पूरेण दुःखेनहि कामः पूर्यते नहींद्र
यादिपदरववेन लभ्यते यद्यपींद्रादिपदं प्राप्तः पुनर्ब्र
ह्मादिपदमिच्छतीत्यलंबुद्धिनाशित्वात्त्वनलः उक्तं च ना
नस्य ब्रह्मणश्चाग्नेर्धूमो बहे मलं तथा आदर्शस्याथ जी
वस्य गर्भस्योल्बादिकामक इति ३८॥

203

भाषा अनुवाद

तयोर्न वशमागच्छेत् इस श्लोकसे कहा कि राग द्वेष के वश न होना फेरि विशेष हेतक पुरु को स्वधर्म करि आज्ञा देते हैं इस पर अर्जुन कहते हैं कि हलि वंशमे अवतीर्ण हे वार्ष्णेय हे कृष्ण अनर्थरूप पाप करने मे इच्छा न रहतेभी किसी की। प्रेरणासे यह पुरुष पाप आचरण करता है काम क्रोधको वि। चार बलसे रोक के भी मनुष्यकी पापकर्म करने मे फेरि प्रवृत्ति देख पडती है इस से यह जानि पडे है कि कोई उस कामूल भूत कारण होगा जो बलकर के करवाता है इह संभावना पर सन्देह करते हुये अर्जुन ने प्रश्न कियाहै ३६

दोहा॥

किसको प्रेरित पुरुष यह पाप करत है नित विन इच्छा हे
हलिभव परवश जो इत चित ३६॥

204

श्रीभगवानुवाच काम एष क्रोध एष रजोगुण समुद्भवः महाशनो महापाप्मा विद्ध्येनमिह वैरिणं ॥ ३७

शांकरभाष्यं

शृणु त्वं तं वैरिणं सर्वानर्थकरं यं त्वं पृच्छसि भगवानुवाच ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः वैराग्यस्याथ मोक्षस्य षण्णां भग इतीङ्गना ऐश्वर्यादि षट्कं यस्मिन् वासुदेवे नित्यमप्रतिबद्धत्वेन सामस्त्येन च वर्तते उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति उत्पत्त्यादिविषयं च विज्ञानं यस्य स वासुदेवो वाच्यो भगवानिति काम इति काम एष सर्वलोकवशं कुर्वन् शत्रुर्यन्निमित्ता सर्वानर्थप्राप्तिः प्राणिनां स एष कामः प्रतिहतः केनचित् क्रोधत्वेन परिणमते ऽतः क्रोधोऽपि एष एव रजोगुणसमुद्भवो रजश्च तद्गुणश्च रजोगुणः समुद्भवो यस्य सः कामो रजोगुणसमुद्भवो रजोगुणस्य वा समुद्भवः कामो ह्युद्भूतो रजः प्रवर्तयन् पुरुषं प्रवर्तयति तृष्णया ह्यहं कारितः इति दुःखिनां रजःकार्ये सेवादौ प्रवृत्तानां प्रलापः श्रूयते महाशनो महदशनमस्येति महाशनो ऽत एव महापाप्मा कामेन प्रेरितो जन्तुः पापं करोति अतो विद्ध्येनं काममिह संसारे वैरिणं ३७ ॥

आनन्दगिरिकृतटीका

सम्प्रति प्रतिवचनं प्रस्तौति शृण्विति तस्य वैपरीत्यं स्फोरयति । त्वं इति शृणु तत् किमिति प्रश्नपूर्वं तत्राह यं त्वमिति भगवच्छब्दार्थं निर्धारयितुं पौराणिकं वचनमुदाहरति ऐश्वर्यस्येति समग्रस्येत्येतत् प्रत्येकं विशेषणैः सम्बध्यते श्रीशब्दस्य यशःशब्दपर्यायः समुच्चयार्थः मोक्षशब्देन तदुपायो ज्ञानं विवक्ष्यते उदाहृतवचसस्तात्पर्यमाह ऐश्वर्यादीति स वाच्यो भगवानिति सम्बन्धः तत्रैव पौराणिकं वाक्यान्तरं पठति उत्पत्तिमिति भूतानामिति प्रत्येकमुत्पत्त्यादिभिः सम्बध्यते कारणार्थो बोधन्ति प्रलयशब्दो क्रियामात्रस्य

गी॰
टी॰
३॰

205

पुरुषान्तरगोचरत्वसम्भवादागतिर्गतिश्चेमागामिमेमोसमस्यापदेशो स
द्येते वाक्यान्तरस्यापि तामर्थमाह अमन्नाहीति वेमीन्नुक्तः सात्वाका
शविज्ञानमिन्द्युते समग्रैश्वर्यादिसम्पत्तिसमुच्चयाद्यंश्च कारः उक्त
लक्षणो भगवान् विमुक्तवानिति तदाह काम इति कामस्य सर्वलो
कशत्रुत्वं विशदयति यन्निमित्तेति तथापि कथं तस्यैव क्रोधत्व म
ताह सएषइति कामक्रोधयोरेव हेयत्वयोनतार्थे कारणं कथय।
ति रजोगुण इति कारण द्वारा कामादेरेव हेयत्वमुक्ता कार्यद्वा
रापि तस्य हेयत्वं सूचयति रजोगुणस्येति कामस्य पुरुषप्रवर्तक
त्वमेव रजोगुणजन्यत्वमित्याशंक्याह कामो हीति तदेवानुभवानु
सारिणीं लोकप्रसिद्धिं प्रमाणयति त्वस्यापीति तस्य योग्यायो।
ग्यविभागमन्तरेण बहुविषयत्वं दर्शयति महाशन इति बहुविष
यत्वप्रयुक्तं कर्म निर्दिशति अतइति सर्वविषयत्वेपि कुतोऽस्य पा
पत्वमित्याशंक्याह कामेनेति कामस्योक्तविशेषणद्वये फलितमा
ह अतइति ३७॥

स्वामिकृतटीका

अत्रोत्तरं श्रीभगवानुवाच काम इति यस्त्वया पृष्टो हेतुः स एष कामः।
व नतु क्रोधोपि पूर्वत्वयोक्तः इन्द्रियस्येन्द्रियस्यार्थे सत्यमत्र अतो न तत्तः
पृथक् किंतु क्रोधोप्येष काम एव हि केनचित्प्रतिहतः क्रोधात्म
नापरिणमते अतः पूर्वं पृथक्केनोक्तोपि क्रोधः कामज एव क्रोधस्ज।
इत्यभिप्रायेण कामैषैकीकृत्योच्यते रजोगुणात्समुद्भवतीति तथा।
नेन सत्ववृद्ध्या रजसि क्षयं नीते कामोपि लीयत इति सूचितं एतं काम
मिह मोक्षमार्गे वैरिणं विद्धि अयं च वक्ष्यमाणक्रमेण हन्तव्य एव यतो
नासौ दानेन संधातुं शक्यते यतो महाशनः महदशनं यस्य दुष्पूर
इत्यर्थः न चासौ साम्ना संधातुं शक्यः यतो महापाप्मा अत्युग्रः ३७॥

प४

पिशाचभाष्यं

आत्मप्रवृत्तिकारणं श्रीभगवानुवाच काम इति एषः कामः क्रोधो
रजोगुणसमुद्भवः महाशनः महदशनं यस्य स महाशनः विष

यस्मेवानुपश्यतः अतएव महाशनो महापाप्मा पापायेयस्माद्भवति
स महाशनो महापाप्मा एनं कामक्रोधमिह अधिकारे मुमुक्षूणां विषये
शत्रुं विद्धि ३७ ॥

रामानुजभाष्यं

अस्योद्भवाभिभवरूपेण वर्तमानगुणमयप्रकृतिसंसृष्टस्या
स्य ज्ञानयोगस्य रजोगुणसमुद्भवः प्राचीनवासनाजनितशब्दा
दिविषयकामो महाशनो नैव विशेषेष्वेनं कर्षयति एष एव प्रता
तिहतमभूतं चेतनं प्रतिक्रोधरूपेण परिणतो महापाप्मा परहिं
सादिषु प्रवर्त्तयति एनं रजोगुणसमुद्भवं ज्ञानयोगविरोधिनं
वैरिणं विद्धि ३७ ॥

अभिनवगुप्तकृतटी·

अत्रोत्तरं श्रीभगवानुवाच एष खल्वसौ परः शत्रुर्देहिनामिन्द्रियैः
सह स्वस्वनेन्द्रवासी नो मोहयन्नावतिष्ठति कामक्रोधमयो घोर
स्तम्भहर्षसमुद्भवः अहंकारोभिमानात्मा दुस्तरः पापकर्मभिः
हर्षमस्य निवर्त्यैष शोकमस्य ददाति च भयं चास्य करोत्येष मोहयंश्च
स्तु मुहुर्मुहुः स एष कलुषः क्षुद्रच्छिद्रप्रेक्षी धनञ्जयः रजःप्रवृत्तो
मोहात्मा मानुषाणामुपद्रवः एष तावत्स्वस्त्वउत्पत्तिसमये लक्ष्य
इन्द्रियेषु एवं वर्त्तमाने स्वस्वे तेजयति निर्वैरयते वस्तुतस्तु
रेवमोहमयत्वाम सत्वात् अतएव मोहयन् कामेति स्तवं कुला
यभिमान स्तत्कृतो योहर्षः अहमीदृश इति अतएवाह अहंकार
इति अतएव गर्वोदर्पते भिमानस्वभावः स्वस्व द्विप्रकारेणाक्रा
यत इति त्रयः प्रश्नाः परिहृताः स एष इति छिद्राणि प्रेक्षतेऽस्मु
नाच्छिद्रेणास्येहलोकपरलोकौ नाशयामीति तथा च मां तथा मे
षु यत्क्रोधनैर्यजते यद्ददाति यद्धानयस्तप्यते यज्जुहोति वेदस्तन्नस्त
हरते स सर्वं मोघः श्रमो भवति क्रोधनस्येति रजसः प्रवृत्तस्तमो
रूपश्चायं ३७ ॥

परमार्थप्रपाटीका

मोचालीयहलिजालोमवहलपावकांशनिझानि वपुषः से

यदाविवेकिनोपि पुरुषस्य सत्त्वगुणः प्रक्षीणो भवति तदा रजोगुणः प्रादुर्भवति तस्मात्कामक्रोधावुत्पद्येते तयोः क्रमेण स्वरूपमाह महाशन इति तत्र कामो महाशनः दुष्पूरत्वात् क्रोधस्तु महापाप्मा अतिक्रूरत्वात् अनयोरुभयोर्दुर्जयत्वं त्वं जितं एव मेनं कामं क्रोधं वा वैरिणं विद्धि तथाच पात्रुरेव पापे प्रवर्तयति न तु मित्रं यथा त्वं बंधुसुहृद्विषयकामेन स्वधर्मत्यागरूपे पातके प्रवर्तयसीत्यर्थः

अनुवृत्तिः

गी॰ टी॰ र॰

~~[illegible]~~ ~~[illegible]~~ अनोत्तरं भगवानाह काम एष इति ॥ ३७ ॥

वनमालीटीका

काम एव बलवान् मूलकत्वात् क्रोधादीनामित्यभिप्रायेणाह काम इति स त्वया दृष्टो हेतुर्बलादनर्थमार्गप्रवर्तकः स एष काम एव महान् शत्रुः यन्निमित्ता सर्वानर्थप्राप्तिः प्राणिनां काम एव केनचिद्धेतुना प्रतिहतः क्रोधोप्येष काम एव पुनस्तेनैव महाशनो विवारितः सर्वपुरुषार्थप्राप्तिरित्यर्थः तन्निवारणोपायत्वानाय तत्कारणमाह रजोगुणसमुद्भवः दुःखप्रवृत्तिबलात्मको रजोगुण एव समुद्भवः कारणं यस्य यद्यपि तमोगुणोपि तस्य हेतुस्तथापि दुःखप्रवृत्तौ च रजस एव प्राधान्यात्तस्यैव निर्देशः यद्वा गुणो रजसः प्रवृत्त्यात्मकस्य समुद्भव उद्भवो यस्मात् कामो हि विषयात्मकः उद्भूतो रजः प्रवर्तयति पुरुषं दुःखात्मके कर्मणि प्रवर्तयति तेनायमेव वर्णे हेतुरस्य इति भावः सामदानभेददंडाख्यास्त्वारउपायास्तत्र प्रथम त्रिकसाध्ये भवेद्दंडः प्रयोक्तव्य इति वक्तुं दर्शयन्नाम संभवेत्युपयति महाशनो महापाप्मेति महत्त्वात् अशनेषु प्रस्थितः यत्प्रियोद्धो हि यं वंदिरणंप्रणवः नाले लोकस्य तत्सर्वं मिति मत्वा सामेत्यजेदिति स्मृतेः अतो न दानेन समाधाने नापि साम भेदाभ्यां यतो महापाप्मा स्त्वग्रः अतः इह मोक्षमार्गे बलवंतमेनं वैरिणं विद्धि ३७ ॥

कृष्णमैजयन्ती टी॰

एवमर्जुनेन पृष्टो भगवानर्जुनस्योत्तरमाह काम इति योनादिकालप्रवृत्तशुभाशुभकर्मवासनाजनितशब्दादिविषयाभिलाषः सोयं कामः पापे कर्मणि पुरुषस्य प्रेरको भवति नान्यः ननु क्रोधोपि शत्रुमित्रादिके विवादे मारणायैव केवलं पुरुषं प्रेरयंति कथमस्योक्तिस्त्यज्यते इति चेत्तत्राह क्रोध एष इति यएषः कामः स एव एषः क्रोधः कामाद्भिन्नो न भवति यथा जलं निमित्तभूतैर्देशकालवस्तुभिर्मेघकाकर्पूरगरलादिरूपेणामरणादिपरिणामं भजते यथाग्निमित्तविना

स्वरूपेणैव तिष्ठति न तु परिणमते तथा कामोऽपि प्रियेऽर्थे देशकाला
निमित्तैः क्रोधरूपो भवति प्रियेऽर्थे शत्रादिभिस्तु स्वरूपेणैव तिष्ठति न तु
क्रोधरूपं परिणाममाप्नोति तस्मात्केनचिद्विघ्नितवस्तुना सहेतुभूतेन
विघ्नेन काम एव क्रोधो भवतीत्यर्थः कीदृशो रजोगुणसमुद्भवः रजो
गुणेन सह समुद्भवः उत्पत्तिर्यस्य तथा सः सत्त्वगुणवृद्ध्या रजोगुण
जयात् कामस्य जयो नायासेनैव भवेदित्यर्थः ननु दृष्टादिदानेन
कामजयः सुलभो भवेत्तत्र रजोगुणजयेनातिप्रयासेन किंस्या
दिति चेत्तत्राह महाशन इति महदशनं भोजनं यस्य तथा सः स
मस्तविषयप्रदानेनाप्यस्योदरपूर्तिर्न भवेत् दुःपूरत्वादिति भावः ए
वं चेत्तर्हि सामभेदाभ्यामस्य जयो भवेदिति चेत्तत्राह महापाप्मेति
अतिदारुणो यः सहसा परधनपरदारादिहरणे गोब्राह्मणादि
हिंसादिषु च पुरुषं प्रवर्तयति स सामभेदाभ्यां तदधीनैः पुरुषैर्जेतुं
कथं शक्यो भवेत् यतोऽस्य जयस्त्रिभिरुपायैर्न भवेदतस्तुर्योपाय
चिंतयते नैव शक्यो नान्योपायेनेत्यर्थः नन्वस्य पापत्वेऽपि मित्रं कोदा
सीनादिवदनुपेक्ष्यस्ति रक्षकः सच्च स्वकार्यं कुर्यादस्य जयं विना का
वा क्षतिर्भवेदिमाशंकानोपेक्षणीयोऽयं महाञ्छत्रुः स्यादित्याह ए
नमिति एनं काममिहास्मिन् ज्ञानयोगे संसारे वा वैरिणं महान्तं श
त्रुं विद्धि त्वं जानीहि यथा पूर्वं प्राह विषाशत्रुरूपेण यो धनमुपेक्ष्य त्व
यावत्त्वं मातादिरूपेण रक्षकः प्राक् पुनरिदानीमपि तमुपेक्ष्यत्वं त्वमा
रयिष्यसि चेत्तर्हि यत्कामनापेक्ष्य हतिष्यसि एव तथायं जीवोऽप्यनादिश
वैः एवं मित्ररूपो भोगशत्रुभूतेन कामेनापेक्षैहामुत्रफलभोगवाञ्छ
या नानायोनिषु स्वर्गादिनरकपशुपक्षिसरीसृपादिषु पुनः पुनर्भ्रा
मयित्वा नरहितपमस्तदुःखादिके फलं भुक्त्वा पुनर्जन्ममरणरूपे
संसारचक्रे भ्रमति इदानीमपि कामजयमकृत्वा तत्रैव भ्रमति तथा
ग्रेऽपि भ्रमिष्यति तस्माद्विवेकवान् कोऽपि कदापि कामरूपस्य शत्रोरु
पेक्षां न कुर्यात् किन्तु सर्वप्रकारेण तं हन्यादेवेति भावः ३७

मधुसूदनी टीका

एवमर्जुनेन पृष्टे प्रयोजकत्वाङ्कः काममय एवायं पुरुषः इति श्रुतेर्मे वेदमग्र आसीदेक एव सो
कामयत जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेत्यादि श्रुतिसिद्धमुत्तरं ॥

यत्त्वया पृष्टो हेतुर्बलादनर्थमार्गप्रवर्तकः स एष काम एव महान्।
शत्रुरिति भिन्नः सर्वानर्थप्राप्तिः शरीरिणां ननु क्रोधोऽप्यभिचारादौ
प्रवर्तको दृष्ट इत्यत आह क्रोध एष काम एव केनचित् हेतुना प्रतिहतः
क्रोधत्वेन परिणमते। ततः क्रोधोऽप्येष काम एव एतस्मिन्नेव महावैरि
णि ज्ञाते सर्वपुरुषार्थप्राप्तिरित्यर्थः तन्निवारणोपायज्ञानाय त
त्कारणमाह रजोगुणसमुद्भवः दुःखप्रवृत्तिबलात्मको रजोगुण
एव समुद्भवः कारणं यस्य अतः कारणानुविधायित्वात् कार्यस्य सोऽपि
तथा यद्यपि तमोगुणोऽपि तस्य कारणं तथापि दुःखप्रवृत्तिचरत्वेन स
एव शास्त्रान्तरेषु निर्देशः एतेन सात्त्विक्या वृत्त्या रजसि क्षीणे सोऽपि
क्षीयत इत्युक्तं भवति तस्य कथमनर्थमार्गप्रवर्तकत्वमित्यत आह र
जोगुणस्य दुःखप्रवृत्त्यादिलक्षणस्य समुद्भवो यस्मात् कामो हि विष
याभिलाषात्मकः स्वयमुद्भूतो रजः प्रवर्तयन् पुरुषं दुःखात्मके कर्म
णि प्रवर्तयति तेनायमवश्यं हन्तव्य इत्यभिप्रायः ननु सामदानभेदद
ण्डाः चत्वार एव उपायाः तत्र प्रथमत्रिकस्यासंभवे चतुर्थो दण्डः प्रयोक्त
व्यो न तु हठादेवेत्याशंक्य त्रयाणामसंभवं वक्तुं विशिनष्टि महाशनो
महापाप्मेति महदशनमस्येति महाशनः यत्पृथिव्यां व्रीहियवं हि
रण्यं पशवः स्त्रियः नालमेकस्य तत्सर्वमिति मत्वा शममुपव्रजेदिति स्मृ
तेः अतो न दानेन संधातुं शक्यः नापि सामभेदाभ्यां यतोऽयं पाप्माऽत्युग्रः
तेन हि बलात्प्रेरितो निष्फलमपि जानन् पापं करोति अतो विद्धि जा
नीहि एनं काममिह संसारे वैरिणं तदेतत् सर्वं विहन्तेवार्तिककारेण
त्मैवेदमग्र आसीदित्यादिश्रुतिव्याख्याने प्रवृत्तो चैतद्यथोक्तस्याधिका
रिणः स्वातंत्र्येऽसति संसारस्तोकस्मात्प्रवर्तते ननु निःशेषविध्वस्तसं
सारानर्थवर्त्मनि निहन्तिलक्षणे वाच्यके नायं प्रेर्यते ऽवशः अनर्थपरि
पाकत्वमपि जानन् प्रवर्तते पारतंत्र्यमते दृष्टा प्रवृत्तिर्नेष्यते क्वचित्।
तस्मात्केनाप्यनिष्टेन प्रेरकोऽनिष्टकर्मणि वक्तव्यस्तन्निरासार्थमित्यर्थास्मा
समाकृतिः अनात्मपुरुषार्थाय प्रतिःशेषानर्थसंकुलः इत्यकाम एवेता
नाप्यास्पदमर्थान् साधयन् जन्तुः जिहासति तथानर्थान् विहानात्मनि।

नि:

चं

207

मंत्रा(?)...का

महा:

निव...


ष्ठितान् प्रविंयोद्भूतकामः सत्त्वयोरवस्थितिबक्कृतिः प्रकामतः
क्रियाकाचिदृश्यते नेहकस्यचित् यद्यद्धिकुरुते जंतुस्तत्तत्कामः
स्यचेष्टितं काम एष क्रोध एष इत्यादिवचनस्तेतः प्रवर्तको नापरो
नःकामादन्यः प्रतीयत इति आकाम तरतिमनुवचने अमनूस्य
हे (...) ३७ ॥

टी॰ सदानंदीटीका

एवंपृष्टेर्जुनेनाह भगवान् उरवूवः अयोरवलाङ्गरिसादिष्कृतिसिद्ध
मतेशाये १ श्रृणुतेवैरिणंयेन एकस्यंपनडुःसहे बलादनर्थमा
र्गेस्मिन्काम एष प्रवर्तकः २ सर्वानर्थपरिप्राप्तिनिमित्तेशत्रुरात्म
नः केनचिद्धेतुनाकामःप्रतिबद्धःसएवहि ३ क्रोधःपरिणतोभाति
तस्मिन्कामेनिवारिते सर्वश्रेयःपरिप्राप्तिस्तेनास्यस्मरणंकारणं ४
चलमहतिडःखात्मायस्यहेतू रजोगुणः यदारजोगुणस्यापकार
णोलाभरूपध्रुक् ५ नायंसमादिभिःसाध्योहंतव्योदंडतोरिपुः महा
शनत्वाद्दानेनसंधातुंनेषशक्यते ६ यत्पृथिव्यांव्रीहियवंहिरण्यंपश
वःस्त्रियः नालमेकस्यतत्सर्वमितिमत्वाशमंव्रजेत् ७ संधातुंसा
मभेदाभ्यामत्युग्रत्वान्नशक्यते तेनायंमेरितोजंतुर्महापापेप्रवर्तते
अतोजानीहिसंसारेकाममेनंहिवैरिणं तदेतद्धिहतेसर्वंवार्तिके
श्रीमत्सुरेश्वरैः आत्मैवेदमितिज्ञात्वाव्याख्यातेनिर्मलैःपदैः प्रहृतो
वतिहेतोचयथोकस्याधिकारिणः ९ स्वातेत्रेमतिसंसारस्तेनोकस्मा
त्प्रवर्तते नतनिःशेषविध्वस्तसंसारानर्थवर्त्मनि १० निवृत्तिलक्ष्ण
णोवाच्येकेनायंप्रेर्यतेवशः अर्थेपरिपाकत्वमप्यज्ञानस्यवर्तते ११
यारतेयमतेदृष्टाप्रवृत्तिर्नेदृशीक्वचित् तस्माद्धेयोर्थिनःपुंसःप्रेरको
निष्कर्मणि १२ वक्तव्यस्तन्निरासार्थमित्यर्थोस्यामराक्कृतिः अना
त्मधर्मरूपाद्यैर्यतिःशेषानर्थसंकुलः १३ इयकामयनानामात्मसर्थी
स्वाधनेजंडः जिहासतितथानर्थानविद्वानात्मनिस्थितान् प्रवियो
द्भूतकामःसत्त्वयोरवस्थितिवक्कृतिः अकामतःक्रियाःकाश्चिद्दृश्यं
तेनेहकस्यचित् १५ यद्यद्धिकुरुतेजंतुस्तत्तत्कामस्यचेष्टितं काम एष
क्रोध एष इत्यादिवचनस्तेतः प्रवर्तकोनापरोतःकामादन्यःप्रती

८

न४



अत्रोत्तरं काममय एवायं पुरुष इत्यादि श्रुतिसिद्धं भगवानुवाच काम
एष इति एष श्रुतिसिद्धः कामः सोऽकामयत जाया मे स्यादथ प्रजायेयाथ वि
त्तं मे स्यादथ कर्म कुर्वीयेति श्रुतेरिदं मे भूयादिदं मे भूयादिति तीव्राभि
लाषहेतुभूतश्चित्तस्यावस्थितता पाहकोऽहमिति विशेषः सर्वचेतोरूप ए
व कामः संकल्पस्तदुपक्रम्य एतत्सर्वं मन इत्युपसंहारात् स एष कामः
केनचिन्निमित्तेन प्रतिहतः क्रोधरूपेण परिणमतेऽतः क्रोधोऽभिज्ञ।
लनात्माप्येष एव तमेनमिह शरीरे नः स्थितं वैरिणं विद्धि कुतो वैरी।
यतः रजोगुणसमुद्भवः रजो रंजनात्मकः शाक्तो गुणः तस्य गुणो।
कार्यभूतो रत्स्यासंयोगेनावेश उद्भवो यस्य सः रजःकार्यत्वात् दुःखैकफ
लो यमतो वैरी यद्वा रजोगुणस्य लोभप्रवृत्त्यादिलक्षणस्य समुद्भवो य
स्मात् न तु विषयाभिलाषात्मकः कामो विषयार्पणेन शाम्यति वि
षयस्पर्शे लब्धनिःश्रेयसत्वत एव वा निवर्तते श्रेयः इत्यदूरदर्शनाभिला
षादिमाशंक्याह महाशनो महापाप्मेति महत् नदानमपारणीयं अ
शनमस्य स तथा यथोक्तं न जातु कामः कामानामुपभोगेन शा
म्यति हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते इति यत् पृथिव्यां व्रीहि
यवं हिरण्यं पशवः स्त्रियः नालमेकस्य तत्सर्वमिति मत्वा शमं व्र
जेदिति तथा महापाप्मा अत्युग्रः सहि सहसैव शः प्रवोधितोऽपि न
निवर्तते न हृदयमपि दुश्चिकित्स्यः महाशनत्वान्नायं वैरी दानसाध्यः
नापि सामभेदसाध्यः अत्युग्रत्वात् अतो हंतव्य एवेति ३७॥

आनन्दीटीका

अत्रोत्तरं भगवानुवाच एष प्रोच्यमानस्वरूपः कर्ताहमस्मीत्यभिमत
नस्वरूपोऽहंकार एव कामः भोक्तैव वस्तुनि संकल्प इदं मे भूयादिति रा
गो रजोगुणान्वितत्वं चलत्वादुत्पन्नोऽस्ति तथा रजोगुणसमुद्भव ए
षोऽहंकार एव प्राप्तस्य कामस्य कुत्रचित् प्रतिघातात् क्रोधः स्मिन्नलनरू नं४
पो भवति एषः कीदृशः महाशनः उत्पद्यमानैर्विषयभोगैर
दमः महापाप्मा सर्वथानर्थहेतुः इहत्वा तमेनं वैरिणं विद्धि अस्मा
दे शास्यविकल्पोऽयं अथास्यस्वरूपजिज्ञासमर्जुनेनउवाच भवत्येष कथं

त्मकः कथं चैव विवर्धते किमात्मकः किमाचारस्तन्ममाचक्ष्व पृच्छ
तः एतत्सर्वं तत्वप्रश्नक्रमेणोत्तरं भगवानुवाच एष सूक्ष्मः परः श
त्रुर्देहिनामिन्द्रियैः सह सुखतन्त्र इवासीनो मोहयन्पार्थ तिष्ठति
पार्थेहंकारः सूक्ष्मा इन्द्रियाणि पराणीत्युक्तमानात्सूक्ष्मत्वेन दुर्ल
क्षः परः शत्रुः देहिनामिन्द्रियैः सहितः सुखतन्त्र इवासीनः क्रोधेन
दुःखेनापि रागेन केवले सुखेनैवोपविष्टः मोहयन् अनात्मनि दे
वा॰ हादावात्मबुद्धिं जनयंस्तिष्ठति कथंभवतीत्यस्योत्तरम् कामक्रोध
मयो घोरः स्तम्भहर्षसमुद्भवः अहंकारोभिमानात्मा दुस्तरः पाप
कर्मभिः कामक्रोधमयः कामक्रोधाभ्यां परस्परमव्यभिचाराद्दुर
लः घोरः पर्यन्ते भयकृत् स्तम्भान्मिथ्याश्लाघया बुद्धेः हर्षं द्विविधप्रमा
देन निरंकुशत्वात् समुद्गतो दुर्दिनस्य अभिमानः अतस्मिंस्त
त्वमतिर्मिथ्याज्ञानेनात्मनात्मस्वरूपं पश्यन्नयमहंकारः पापकर्मभिस्त
र्कशास्त्रैश्चारैस्तमुद्रैरवदुस्तरः कथं वर्धते इत्युत्तरम् हर्षमस्यानि
वर्धवशोकमसद्दत्वानि च भयं चास्य करोतेषमोहयंस्तु मुहुर्मुहुः
अस्य देहिनः मुहुर्मुहुर्मोहयन्नेषोहंकारः हर्षाय कामेषु हन्तस्यन्ते द
र्वितिर्वमर्केन वितरभिधानेन हृरीकृत्य कथं चिन्त्यामममपीदं नह्यमि
ति शोकं च ददाति अनपवर्गश्चास्य भयं च करोति किमाचारस्तुतर
म् सपापकल्मषः दुःखः छिद्रान्वेषी एनं जय रजः प्रहतो मोहात्मा
मनुष्याणामुपद्रवः सपापोहंकारः कल्मषो दोषकारित्वाद्दखिल
तमोरूपत्वात् दुःखदोषमः छिद्रान्वेषी दोषावकाशं दृष्ट्वान्तः प्रवि
श्य स घोरहतो मोहमयात्वाना रूपः मानुष्याणामुपद्रवः ३० ॥

रामकंठटीका

तृतीये च भगवानुवाचार्जुन येन प्रयुक्तो यमुकस्त्वरूपानाय वि।
चादिके वापापापरवशः पुरुषः पापमाचरति सपापकामः परि
णाम विरसतत्क्षणिकसुखलवसाधनभूतविषयाभ्युदयः संकल्पः
एष एव चेतनाचेतनरूपप्रतिपत्तप्रतिहन्यमानत्वात्क्रोधः तद्ब
पधानपहतिरहितहेतुः सम्पद्यते सोयमिच्छाद्वेषात्मको दोषार

गी.
टी.
ह.

209

जोगुणसमुद्भवः रजोगुणाद्धि विषयसंबंधाभिलाषात्मकरागद्वेषहेतोः
प्रकृतिधर्मात्समुद्भवति अत एव महाशनः अन्येनानवरतं विवर्धमानग
र्वेनात्मकरदपवसितमशनं विषयाहरणं तस्मादेव दाशोयस्य स
तथा ततश्च सर्वस्य तस्य भोगस्य दुःखैकविपाकत्वान्महापाप्मा गुरु
तरपातकमयो दुर्गतिहेतुत्वात् तदेवंविधमिह संसारे वैरिणं दुस्तरदा
रुणदुःखदायिनादाननार्थिनं विद्धि जानीहि येन प्रयुक्तोयं पुरुषः पा
पमाचरति अथ तस्यैव स्वस्य स्वरूपं जिज्ञासुरर्जुन उवाच भवत्येष
कथं कुत्र कथं वै विवर्धते किमात्मकः किमाचारस्तत्स्वभावस्तत्प्र
कृतः एषैवेरित्वेन प्रतिपादितः कामाद्यात्मको दोषः कथं भवति के
न प्रकारेण स्थितिलक्षणं सत्तामनुभवति केन प्रकारेण विवर्धते।
प्रसरति कश्चास्यात्मा स्वरूपं कश्चास्याचारः किमाचरतीति तत्सर्व
मसंशयं पृच्छतो ब्रूहि अथ प्रश्नवचनानन्तरं क्रमेणोत्तरं भगवानुवाच।
एष स्थूलः परः शत्रुर्देहिनामिन्द्रियैः सह सुखतन्त्र इवासीनो मोहय
न्पार्थ तिष्ठति कामक्रोधमयो घोरः स्तम्भहर्षसमुद्भवः अहंकाराभि
मानात्मा दुस्तरः पापकर्मभिः हर्षमस्य निवर्त्येष शोकमस्य ददाति च
भयं चास्य करोत्येष मोहयंस्तु मुहुर्मुहुः एष रजोगुणप्रभवः काम
क्रोधरूपतया प्रसन्नो दोषः शरीरिणामतिप्रयासत्रत्वेपि दुर्लंतत्वा
त्परः स्थूलः शत्रुः सवाहंकारएव पर्यवस्यति यतः इन्द्रियाणि परा।
ण्याहुरित्यादिना तस्यैव परमसूक्ष्मत्वं प्रतिपादयिष्यति किमात्म
कइति प्रश्ने किमात्मकत्वमेवास्याभिधेनेनाभिधत्ते सचैवंविधः शत्रुः प
रिवारभूतैरिन्द्रियैः सहितः कामक्रोधादिनिशातशास्त्रप्रहारिभिः
तैरेवायं सर्वप्राणिनो विशसति तस्य दुर्जयत्वप्रतिपादनार्थं सर्वश
त्रुविलक्षणमवस्थानमाह सर्वदुःखहेतुत्वेमतिसुखतन्त्रं सुखात्म
के वर्गे इवासीन उपविष्टोत एव मोहयंस्तिष्ठति देहाद्यात्मप्रत्ययल
क्षणो विपर्ययज्ञानमार्गेणयस्थितिमनुभवतीति भवत्येष कथ।
मित्यस्य प्रश्नस्योत्तरमेतद्व्याख्यानम् अथ कथं विवर्धत इत्यस्य व्याख्या
यते कामक्रोधमयः कामक्रोधावेकरूपो प्रकृतिर्यस्य स तथाविधः

स्तम्भस्य गर्वस्य नयाहर्षस्य विषादस्य विरागमस्य प्रमोदस्य समुद्भ
वउत्पत्तिस्थानम् एतत्पदवचोर्दारुणाएव कामक्रोधलम्भहर्षा
दिदोषात्मनाविवर्धते उत्क्षायेभजतीम्नुक्केभवति अथ किमात्म
करस्य सपत्नस्यानन्देवाव्याख्यायते एषसर्वदेहिनांशत्रुः अहंकारसे
नोभिमानात्माभिमानोजातमात्याव ञ्चेदम्भाजितगुणत्रयमयत्वात्।
निमादिदोषैकसमाश्रयेणशरीरादावहंबुद्ध्यरणाहंदेवदत्तोहमभिज
नवानहंवसुमानहंविदग्धोहमाध्यास्वेवमाध्यनात्ममात्मप्रतिप
त्तिनिबन्धनंमिथ्याज्ञानेसन्धानमात्माभावोपसत्ताद्दृशा एतदेवाह।
पक्रमेभिर्दुस्तरः सम्यग्ज्ञानाभावादुद्देयाघादेयविवेकशून्यत्वेसति
पापमनन्तमयुंषोरसंसारनिरयनिपातनिमित्तमनेककर्मचेष्टितेये
षोताहंदेशोरस्तैरसर्गभजद्भिः पुरुषैर्दुरतिक्रमः अथ किमाचारस्य
शोनेवाव्याख्यायते प्रस्तेजस्तस्यैषोहंकारात्मः शत्रुर्हर्षसमात्मसं
विदुपलभ्यमानानन्दनिवर्तमपमायंशोकेशाचनेददातिसमर्पय
ना४ ति एनेनहिशत्रुणामेहितः शरीरात्मात्वेनप्रतिपन्नेव्याधिशिय
विषयोगायुपद्रवोपहन्यमानमनुशोचति कष्टंविनष्टोस्मीतिप
रिदेवते एतदेवाशेषशत्रुभेयमधिकरोति हविषयोपवानहेत
भ्यः सत्तासमुत्पादयति किंकुर्वन्नेवमाचरति प्रतिक्षणमोहयन्
यथाप्रतिपादितविपर्ययलक्षणंबुद्धिविभ्रममर्पयन् इमेनेनाहंकारा
ख्येनशत्रुणेन्द्रियपरिवारेण स्वविपक्षावस्थितेनकामक्रोधलोभ ष४
मोहहर्षादिदोषात्मनाविवर्धमानेनहर्षापहादिकमाचरताप्रवक्तः ण४
सन्ततेन्ततःपापमाचरतीमर्जेनपश्चविनिर्णीयतस्येवाहंकारस्य।
विनत्वस्वरूपंप्रतिपादयितुमाह लपषकलषःस्वदृष्ठिदृष्टेलोप
नेजय रजःप्रभृतोमोहात्मामनुष्याणामुपद्रवः सपषयथाप्रति
पादितस्वरूपोहंकारः समस्तमर्मणामुपद्रवः सर्वदोषविधानसं
साराहेतुत्वात् यतः कलुषः गुणत्रयात्मकत्वान्निममलिनः ननएव
वातिमत्वात् दुःखभंगुरः तथाच्चिद्रूपेतीवाधावकाशज्ञानगहकः
शिष्टस्याप्यर्थम [illegible] १० ॥

210

त्मासिकी वल्लभी टीका

अथोत्तरं श्रीभगवानुवाच काम एष इति प्रतिषिद्धाचरणे प्रस्तुतः पृष्टो
हेतुः स एष कामो विषयोन्मुखः संकल्परूपोऽभिलाषः ननु क्रोधोप्यभि
चारादौ हेतुर्दृष्ट इत्यत आह क्रोध एष काम एव केनचित्प्रतिहतः क्रोधा
त्मना परिणमते स एष रजोगुणसमुद्भवः रजोगुणात्संभवतीति न
केवलं प्रतिषिद्धाचरणे प्रवर्तक एव किंतु हिंसेनमिह वैरिणम् इह मोक्ष
मार्गे एनं कामं वैरिणमात्मनाशिनं जानीहि नन्वस्य शिवस्तवे च अभि
लाषाष्टहृद्गतिः सेवास्यस्येति तत्रेयं सामादिभिरुपायैरुपशमं हा
तव्यः तत्र हयोरसंभवं विशेषणद्वारा ह महाशनो महदशनं यस्य
स नासौ दानेन संधातुं शक्यते इत्यर्थः तथा च स्मृतिः यत्पृथिव्यां व्री
हि यवं हिरण्यं पशवः स्त्रियः नालमेकस्य तत्सर्वमिति मत्वा शमं व्र
जेत् इति अयं च महापाप्मा स्वस्य सर्वलोकस्य दुःखरूपस्यात्मसुखरूपस्य
वाः शत्रुत्वाद्यथायक इति नदण्डेन यच्च कामसुखं लोके यच्च दिव्यं मह
त्सुखम् तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलामिति न
यानापि साम्ना संधातुं शक्यः यतो महापाप्मा अत्युग्रः ३७॥

पंचोलीटीका

सर्वलोकवैरिणं सर्वानर्थहेतुमर्जुनेन पृष्टे भगवानुवाच काम इति एष
एष कामः सर्वलोकशत्रुः यत्प्रभवाः संसारव्याधयः एष कामः शाणेना
स एव कामः केनचित्प्रतिहतः क्रोधो भवति अतः क्रोधोपि काम एव
रजोगुणसमुद्भवः रजोगुणादुद्भवः रजोगुणस्वभावहेतुः महाशनः म
हत् अशनं यस्य तृष्णात्मत्वात् एव महापाप्मा महापापहेतुः इह सं
सारे एनं वैरिणं विद्धि [illegible] ३७

रणवीरसमिद्बोधिनी॥

अथोत्तरं भगवानुवाच काम इति येन प्रयुक्तस्त्वं पापं कर्तुं स
ज्जो भवसि एष कामः पुत्रमित्रादिविषयः स्नेहः तदर्थं कामादि

तराज्यभोगादेर्दुर्हेतेषां मरणसंभावनया तैर्विनाभिद्वेषस्तज्जीवि
तकामनास्वैकराज्यभोगापेक्षणलक्षणश्च गुर्वादिवधेन मा
परलोकभ्रंशोभूदिति तेषामहिंसया तत्राप्यभिलाषलक्षण
श्चानेकविधः किंनो राज्येन गोविंदेत्यारभ्य यावदध्यायसमाप्ति
द्वितीयाध्यायिकेन कथं भीष्ममहं संख्ये इत्यादिश्लोकद्वयेन च भ
गवताश्रमेण मिथ्यासंभावितः समग्रुरिव तत्र च पापे प्रवर्तयति
यन्निमित्तैषानर्थप्राप्तिश्च भवता तावदस्तीत् नतु कोयोपि पाप
प्रवर्त्तको दृष्टश्रुत इत्यत आह एष काम एव केनचिद्धेतुना प्रति
हतः सन् क्रोधरूपेण परिणमते ततश्चात्मज्ञानायनर्थजाते।
प्रवर्त्तयति यतोयं रजः रंजयति निश्चयमाहृणोतीति संज्ञायां क
प्रत्ययः धूलिवन्निश्चयात्मकालोकावरकः नष्टेतेन व्यासः
किं विशेषजातं विचारयति रजमाहोदं तत्र लिंगोपि तथा चोत्त
लिनी इष्टेरेणो गुणे चैव रजोयं रजसा सदेति रजोयं रजसा सा
यं स्त्री इष्टगुणा धूलि खिति जयपञ्च ननु कुतोस्योत्पत्तिरित्यत आ
ह गुणेभ्यः सत्वादिभ्य इंद्रियेभ्यः समुद्भवउत्पत्तिर्यस्य सः चत
पादिग्रहादि प्रसक्तं ग्रहात्विहतेन्त्रवतथैव जातेतिभावः एत
गुणोत्यकारप्रश्लेषः तथा चायमर्थः गुणाः पौर्वादयः पौरुषल
क्षणव्यंजकास्तेषामभावोगुणं अव्ययं विभक्तीति समासः अगु
णास्य समुद्भवो यस्मात्स जीवतापादक इत्यर्थः अत एव महाश
नः महीनयं तरे भूमौ महद्भव तेजसो विस्यन्नपाणसनादकारं।
नपुंलिंगो महदणाहृअत्र वतेजोवाचकः महत्तेजो ग्रातिकवली
करोति तेजोग्रासकर इति यावत् अत एव महदस्य पुष्टो सर्वस्य।
नाप्यनइति किं चायं महापाप्मा महतः पाप्मानो यस्मिन्निदं।

तेसः महापापप्रवर्त्तकश्रुतियावत् तस्मादेनसुफलत्तणंका
मभिद्दश्यारभ्यमाणोस्वधर्मभूतेषुहेवैतिरंविद्विजानीहिश्रेयो
तिमितात्तस्मात्तद्भावनादितिभावः अतश्चार्थंसर्वथादृतव्य
इतितात्पर्यं ३० ॥

मधुभाष्य

३० ॥

भाषा अनुवाद

अर्जुन ने जो पूछा कि इच्छा बिना भी किसी की प्रेरणा से। पुरुष पापाचारमे प्रवृत्त होता है इसीका उत्तर भगवान करते हैं कि सब को अपने वश करने वाला औ प्राणियों का परम शत्रु सकल अनर्थ प्राप्तिकारी यह काम जो कामना सोई किसी कारण से प्रतिहत भया अर्थात् कामना जो सिद्ध नभई तो वही काम बदलकर रजोगुण से है जन्म जिसका ऐसा क्रोध रूप होय पुरुष को अहंकार के वश कराय रजोगुण की सेवा मे डालदेता है वहक्रोध फेरि महाशन हैं अर्थात् महत् भोजन है जिसका सो ऐसा महापापा कहे पाप रूप परम शत्रु है यह। तमजानो तात्पर्य यह हैं कि कामही जीवों की प्रेरणा देता है परन्तु सतोगुण की वृद्धि होने से रजोगुण की क्षय होती है फेरि रजोगुण का कार्य काम कहे कामना का जन्म नहीं होता है सो इस मोक्षमार्ग के वैरी कामरूप शत्रु को पूर्व कथित उपाय से नाश करना ही उचित हैं देखो कामना के अनुरूप भोग मिलने से भी उनका भोग चिरकाल करते भी सन्तोष नहीं होता है इसी से कहा कि महदशनकहे बड़ा खाने वाला काम। सो भोग करने से भी पूर्ण नहीं होताहै ३७ ॥

दोहा ॥

काम क्रोध यह रजोगुण हूंसे संभव होय महाभक्षीमहा पाप हूं जाण वैरि इन कोय ३७ ॥

धूमेनाव्रियते वह्निर्यथादर्शो मलेन च यथो
ल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥ ३८ ॥

शांकरभाष्यं

कथं वैरीति दृष्टान्तैः प्रत्याययति धूमेनेति धूमेन सहजेनाव्रियते वह्निः प्रकाशात्मकोऽप्रकाशात्मकेन यथा वादर्शो मलेन च यथोल्बेन गर्भवेष्टनेन जरायुणा आवृत आच्छादितो गर्भस्तथा तेनेदमावृतं ॥ ३८ ॥

आनन्दगिरिकृतटीका

उक्तश्लोकमवतारयति कथमिति अनेकदृष्टान्तोपादानं प्रति। पत्तिसौकर्यार्थं सहजस्य धूमस्य प्रकाशात्मके वह्नौ सति आवरकत्वमित्यर्थं विशिनष्टि अप्रकाशात्मकेनेति ॥ ३८ ॥

स्वामिकृतटीका

कामस्यैव वैरित्वं दर्शयति धूमेनेति यथा धूमेन सहजेन वह्निराव्रियते आच्छाद्यते यथा वादर्शो मलेनागन्तुकेन यथा चोल्बेन गर्भवेष्टनचर्मणा गर्भः सर्वतो निरुद्धस्तथा प्रकारत्रयेणापि तेन कामेनावृतमिदं ॥ ३८ ॥

पिशाचभाष्यं

कथं स वैरीत्यत आह धूमेनाव्रियते विव्रियते वह्निर्यथा यथा वादर्शो दर्पणः मलेन च कालिमाख्येन व्रियते यथा चोल्बेन जरायुणा गर्भाशयगतः प्राणी तथा तेन कामेन क्रोधेन चेदं विवेकप्रभवं ज्ञानमावृतमाच्छन्नं सकलपुरुषार्थप्रकाशकज्ञानावरणद्वारेण एव कामः क्रोधश्च वैरीत्यभिप्रायः ॥ ३८ ॥

रामानुजभाष्यं

यथा धूमेन वह्निराव्रियते यथा वादर्शो मलेन यथा चोल्बेन गर्भस्तथा तेन कामेनेदं जन्तोर्ज्ञानमावृतं ॥ ३८ ॥

अभिनवगुप्तकृतटी·

दृष्टान्तत्रयेणाद्युरणसर्पणम्। कार्यकारत्वेन गुणस्यरत्वेवोक्तं ३८

परमार्थप्रपाटी·

[illegible] …र्थः । अथा

सत्वप्रकाशनेदृष्टांतत्रयमाह धूमेनेति यथाग्निरिंधनोपाधिप्रस
तेन धूमेनाग्निरावियते यथावा प्रतिबिंबदर्शकआदर्शो मलेना।
व्रियते यथाउल्वेनगर्भावरणीभूतचर्मणागर्भआवियते तथाते
नकामेनज्ञानं धेनचरदं सत्वोमयेत्तानमावियते ३८

वनमालीटीका

नदेवदृष्टान्तेनस्पष्टयति धूमेनेति यथाधूमेनावृतोऽग्निर्देशेनदृश्य
नेतथैवदेहदृष्टिस्थितेपरमात्मस्वरूपंजीवस्ययथार्थस्वरूपंवाहमेव
परोऽयंलोपी सर्वकामाविष्टेननदृश्यतइत्यर्थः यथावामलावृतआदर्शो
मुखादिप्रतिबिंबाभिव्यक्तिहेतुर्नभवति तथैवदेहमेवात्मीकरणेनजीवस्वरूपाभिव्यक्ति
हेतुर्नभवति यथोल्वेनगर्भवेष्टनेनावृतोगर्भः संकुचितत्वान्नस्व
व्यापारक्षमोनभवति तथैवदेहंजीवस्यस्वरूपंमनस्तत्वेनोपरिसंबंधेनस्व
क्रियमाणेनकामेनावृतेस्वव्यापारात्प्रत्यावृत्तेनपरमेश्वरोपदेशेवक्त २०
मेनभवतीत्यर्थः ३८ ॥

ऊत्तमैवेजयन्तीटी॰

ननुवेदेनकामस्यहिंतस्यजयः केनाप्युपायेनशक्यश्चकाभावेज्ञानाभावोः
ज्ञानाभावेतत्तरोमोक्षाभावस्तदभावेशास्त्रावाप्तोपदेशस्वयसा।
वैसाधनकदंवमयर्थेनइत्यर्थः सतिजगतांप्याप्यमात्सर्वेषांसुमादि
धर्ममर्यादालोपात्सर्वजगदुःखस्यानुहेसमस्तावीर्यमनुष्यांस्या।
क्तिनष्टाति कामोऽस्मिन्निमित्तोपरमादिरूपविवेचनाकर्तरभा
वत्वेनकामजयस्याप्यभावः साधनोब्रह्मशिवादीनांदेवानामपिका
माधीनत्वमुपतरमाशंकायांतस्यज्ञानावरकत्वेनावश्यजयंवदं
स्तज्जयोपायमाह धूमेनेति यथावह्निरवलोधूमेनसहजेनाव्रियते

वे॰

प्रकाशकत्वेन धूमस्यातिकोमलत्वाद्वह्निधर्मः प्रकाशोऽस्या
च्छिन्नेनाहतोऽप्यति सूक्ष्ममलिनरूपः सन्वह्निः प्रसरत्येव तथा च दा।
भ्यंतरस्य दीपकवदनुल्बणः प्रकाशश्च भवति न हन्यते ह्येतेनाति
सूक्ष्मेन कामेनेदं ज्ञानमाच्छादितमपि स्वपरस्वरूपं गृह्णात्येवे।
ति तस्य प्रथमावस्था स्तविता यथा वादर्शो दर्पणो मलेनागंतुके
नाव्रियते तथानेन कामेनेदं ज्ञानमावृतमित्यनेन च यथा धूमा
पेक्षया मलस्य कठिनत्वात् दर्पणोपयास्थितप्रतिबिंबं दर्शयितुं
न शक्नोति तथा पूर्वावस्थापेक्षया कामस्यातीव्रत्वात् ज्ञानं स्वप
रतत्वं प्रकाशयितुं न शक्नोतीति तस्य मध्यावस्था स्तविता यथा वा।
गर्भ उल्वेन जरायुणावृतो वेष्टितस्तथा तेन कामेनेदं ज्ञानमावृत
मित्यनेन च यथा मलापेक्षया जरायोरतिस्थूलत्वात् गर्भः करचर
णाद्यंगानां प्रसारयितुं न शक्नोति स्वयमप्यपरैर्न दृश्यते तेन तथा
मध्यावस्थापेक्षया कामस्यातिनरस्थूलत्वात् ज्ञानं बहिः प्रसा
रयितुमपि तमत्र भवेत्स्वरप्रकाशकमप्येः स्वयं दर्शयं च कथंचि
दपि न भवतीति तस्य तृतीयावस्था स्तविता एवमवस्थात्रयरूपस्य का
मस्य ज्ञानावरकत्वेपि दुर्जेयत्वेपि केनचिदुपायेन विचारेणातस्य
जयोपि संभवेत् तथा हि यथा यावत्काष्ठादिप्रक्षेपो वह्निस्ताव
देव धूमोत्पत्तिः स्यात्काष्ठाद्यभावे सति धूमोद्गारस्याप्यभावस्तथा
यावद्विषयेंद्रियसंयोगस्तावत्तेनास्यात्तर्वदेव कामस्यात्तदभावे
कामस्याप्यभावो यतस्तज्ज्ञानस्य परोक्षविषयत्वम् ननु कामस्या
पि परोक्षविषयत्वमस्त्येवेति चेत्तत्संशाकृतविषयरहितस्य तस्या
कामरूपत्वेन मोहसाधकत्वादभीष्ट एवास्माकं कामस्य क्षयः य
था वा गतस्तु कमलशुक्रो दर्पणः सिंहादिद्रव्येणामार्जितः सत्प्रति
बिंबं ग्रहीतुं न शक्नोति तथा भगवदाराधनरूपेणात्मविवेकेन कर्मणा
मार्जितं कामामलरहितं ज्ञानमात्मतत्त्वं ग्रहीतुं न शक्नोत्येव एवं च ग
र्भोपि यावदुदरे तिष्ठति तावज्जरायुं मोचयितुं न शक्नोति यदा तदु
दरं हित्वा भूमौ पतति तदैव जरायुं त्यक्त्वा स्वस्वरूपेणातिष्ठत्य एव माने

गी॰
टी॰
३

214

देशाभः सत्वमानपिमालस्पिशादीनानेदयति तथायावत् ज्ञानवि
षयेषुवर्ततेतावत्कामंममकेनशक्नोतियदातुविषयसंगात्रिस्स्मा
त्मस्वरूपेतिष्ठतितदातुसहजेनैवकामेमजतीत्यभिप्रायः ३८

+ तस्यमहापाप्मत्वेनवैरित्व मधुसूदनीटीका मेवदृष्टांतैः स्पष्टयति +

+तत्रशरीरारंभात्प्रागंतःकरणस्थालब्धवृत्तिकत्वात्सूक्ष्मःका
मः शरीरारंभकेनकर्मणास्थूलशरीरेर्व्यक्तिं लब्धवृत्तिकेनांतः
करणेनाभिव्यक्तिः सन्स्थूलोभवति सएवविषयस्याभिध्या
नतावस्थायांपुनः पुनरुद्रिच्यमानः स्थूलतरोभवतिसएवपुन
र्विषयस्यभुज्यमानतावस्थायामत्यंतोद्रेकंप्राप्तः स्थूलतमोभव
ति तत्रप्रथमावस्थायांदृष्टांतः यथाधूमेनसहजेनाप्रकाशात्म
केनप्रकाशात्मकोवह्निराव्रियते द्वितीयावस्थायांदृष्टांतः यथा
दर्शोमलेनासहजेनादर्शोत्पत्त्यनंतरमुद्भिकेन चकारोवांतरवैष
म्यसूचनार्थः आव्रियतइतिक्रियानुकर्षणार्थश्च तृतीयावस्थायां
दृष्टांतः यथोल्बेनजरायुणागर्भवेष्टनचर्मणातिस्थूलेनसर्वतो
निरुद्धावृतोगर्भः तथाप्रकारत्रयेणापितेनकामेनेदमावृतंप्रथ
मेनावृतोपिवह्निर्दाहादिलक्षणंस्वकार्यंकरोतिमलेनावृतस्त्वा
दर्शःप्रतिबिंबग्रहणलक्षणंस्वकार्यंनकरोति स्वच्छतायामस्मात्र
तिरोधानात्स्वरूपतस्तूपलभ्यतएव उल्बेनावृतस्तुगर्भोनहस्ता
पादादिप्रसारणरूपंस्वकार्यंकरोतिनवास्वरूपतउपलभ्यतइति
शेषः ([illegible]) ३८ ॥

सदानंदीटीका

महापाप्मत्वात्स्पष्टयतिवैरितां दृष्टांतैस्तत्रकामोयंचतुर्धो
प्राप्नोतिक्रमात् १ प्रथमः लब्धवृत्तिनाशरीरारंभतः पूर्वं सूक्ष्मःका
मःशरीरेवाप्तोस्थूलः सवृत्तिकः २ विषयेचिंत्यमानेसान्त्कामःस्थू
लतरस्ततः भोगस्यावसरेप्यंतोद्रिक्तः स्थूलतमस्ततः ३ अप्रकाश
नधूमेनसहजेनानलोयथा प्रकाशात्मावृतोदाहमुखंकार्यंकरोति
च ४ मलेनागंतुकेनासावादर्शस्त्वावृतः स्वकं प्रतिकायाग्रहेका

येंकुरोतियथास्फुटं ५ स्वकृतायमेमात्रस्यतिरोधानवशात्स्व
रूपोपलम्भनप्रवासौ स्वस्वरूपेणावरणेन ६ जरायुणावृतोगर्भः स्वरू
पेणनलभ्यते हस्तपादादिचेष्टांचनकरोतियथोहतः ७ तत्प्रकार
त्रयेणेदंकामेनावृतमेनतथा ८ ३८ ॥

नीलकंठीटीका

अस्यैवैरित्वमेवविवृणोति धूमेनेत्यादिना उल्बेनगर्भवेष्टनेनज
रायुणा तेनकामेनइदंविवेकज्ञानंआवृतं आवरणीयसत्वेवि
द्यात तदनुगुणंदृष्टांतत्रयंज्ञेयं ३८ ॥

आनन्दीटीका

उपद्रवत्वमुपमयाह अनेनाहंकारेणायमात्मावृतस्तिरोहितः ३८

+ तेनास्यक्षेत्रज्ञस्यकिंकृतमित्याह ॥

रामकंठीटीका

+ यनेनाहंकारेणायंसंसारिपुरुषाणामात्मा तथावृतो निरुद्धशक्तित्व ३८
मापादितः उपमानैस्तत्प्रकटयति कथमावृतः यथेन्धनत्वा
दिदोषजन्मनाकलंकेनधूमाख्येनवह्निरग्निराव्रियते निरुद्धभास्वर
शक्तिः सम्पद्यते तथैवायमात्मामायाप्रभवेणानेनैवाहंकारात्मकेन
दोषेणनिरुद्धस्वस्वरूपप्रथनसमर्थात्मकस्वशक्तिः क्रियते तथाय
थादर्शोदर्पणोरजोनिःश्वासादिसम्बन्धजन्मनामलेनाव्रियते ।
निरुद्धयथावस्थितभावस्फुरणलक्षणस्वशक्तिपरमार्थः क्रिय
ते तथैवायमात्मानेनाव्रियते निरुद्धजगत्प्रदर्शप्रथनसामर्थ्यः
क्रियते तथा यथा जननीकोष्ठवर्तीजीव उल्बेन गर्भशय्ययाव्रियते
निरुद्धसर्वेन्द्रियपरिस्पन्दनशक्तिः क्रियते तथैवायमात्मानेननि
रुद्धसर्वकर्तृत्वलक्षणस्वशक्तिः क्रियत इत्यनेनोपमानत्रयेण ।
हंकारस्यात्मनंप्रति स्वभावसर्वज्ञत्वसर्वकर्तृत्वलक्षणस्वरूपमेत्रय । ९५
निरोधकत्वंप्रतिपादितम् ([illegible]) ३८

ला[illegible]टीका

अस्यैवैरित्वमेवदृष्टान्तैः स्पष्टयति धूमेनेति यथा धूमेन सहजेन
वह्निराव्रियते उत्पन्नमर्पणात् निरुद्धभास्वरशक्तिः क्रियते तद्

माहेनापि वह्निर्दाहादिलक्षणं स्वकार्यं करोतीत्यत आह यथा गन्ध
केन मलेन निःश्वासादिजन्मनादर्शोऽव्रियते निरुद्धप्रतिबिम्बग्र
हणलक्षणकार्यः क्रियते न तु स्वच्छतामात्रतिरोधाने स्वरूपस्व।
रूपतस्त्वादर्श उपलभ्यत एवेत्यत आह यथा जरायुणा सदेहोल्बेन जरा
युणा गर्भो निरुद्धक्रियस्तिरोहितस्वरूपश्च क्रियते तथा तेन काम
न सहजत्वाद्दुरपसर्पेणाविषयाशुम्भितत्वाश्चागन्धकेन मोहनि
रोधकत्वाज्जरायुस्थानीयेनेदं ज्ञानमाहृतम् निरुद्धशक्तिक्रियास्वरू
पेक्षनम् ३८ ॥

पंबोलीटीका कथं वैरिणमिति दृष्टान्तेन प्रत्यायपयति

धूमेनेति यथा धूमेन वह्निः आव्रियते वपुतः आदर्शः मलेनाव्रि
यते यथा उल्बेन गर्भवेष्टनेन गर्भः आव्रियते तथा तेन कामेनेदमा
त्मज्ञानमावृतं देहिनमाक्रादिति ३८ ॥

रणवीरसमिद्धोयिनी ॥

अथास्य वैरित्वं दृष्टान्तैः स्पष्टयति धूमेति यथा धूमेन सहजे
न वह्निः प्रकाशकः आव्रियते निरुद्धभास्वररूपशक्तिः संपाद्यते
यथा वादर्शो दर्पणो मलेनागन्तुकेन रजो निश्वासादिसंभ
वजन्मनाव्रियते निरुद्धयथावस्थितभावस्तुग्रहणलक्षण
स्वशक्तिः क्रियते यथा च गर्भो मातृकुक्षिकोष्ठवर्ती जीवउ
ल्बेन कललेनाव्रियते निरुद्धसर्वेन्द्रियपरिस्पन्दनशक्तिः
क्रियते तथैव तेनोक्तलक्षणेन कामेनेदं वस्त्वमाणं निश्च
यात्मकं ज्ञानमाव्रियते निरुद्धस्वधर्मविषयप्रवृत्तिजनक
तालक्षणस्वशक्ति क्रियते इत्यर्थः ३८ ॥

मधुभाष्य

३८ ॥

भाषा अनुवाद

अब विशेष रूपसे काम की शत्रुता देखावते हुये कहते हैं। कि जैसे धूमसे आग औ मल से दर्पण उल्वा जो झिल्ली चमड़ा तिससे गर्भ आहत करे लपटे हैं तैसे ही काम जो कामना तिस से यह ज्ञान भी आहत करे घेरा है ३८॥

दोहा॥

अग्नि छपै ज्यों धूमसें मलसें दर्पण होय गर्भ ढके ज्यों
जेरसें त्यों आहत तिहसोय ३८॥

21b

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा काम
रूपेण कौन्तेय दुष्पूरेणानलेन च ३९ ॥

शांकरभाष्यं

किंपुनस्तदिदंशब्दवाच्यं यत् कामेनावृतमित्युच्यते आवृतमिति आ
वृतमेतेन ज्ञानं ज्ञानिनो नित्यवैरिणा ज्ञानी हि जानात्यनेन अहमन
र्थे प्रयुक्तः पूर्वमेवातः दुःखी च भवति नित्यमेव अतोऽसौ ज्ञानिनो
नित्यवैरी न तु मूर्खस्य स हि कामं तृष्णाकाले मित्रमिव पश्यंस्तत्का
र्ये दुःखे प्राप्ते जानाति तृष्णयाहं दुःखित्वमापादित इति न पूर्वमे
वातो ज्ञानिन एव नित्यवैरी किंरूपेण कामरूपेण कामः इच्छैव रू
पमस्येति कामरूपस्तेन दुष्पूरेण दुःखेन पूरणमस्येति दुःपूरः
नस्तेनानलेन नास्यालं पर्याप्तिर्विद्यत इत्यनलस्तेन ३९ ॥

आनन्दगिरिकृतटीका

सामान्येनोनिर्दिष्टं विशेषतो निर्दिष्टं आकांक्षापूर्वकमनन्तरश्लोकमव
तारयति किंपुनरिति कामस्य ज्ञानं प्रत्यावरणत्वमित्यर्थे ज्ञानिनो
नित्यवैरिणेत्यादि विशेषणं प्रतीकमादाय व्याचष्टे आवृतमित्यादिना
ज्ञानिनो प्रति वैरित्वेऽपि नित्यवैरित्वं कामस्य कथमित्याह ज्ञानी
हीति अनर्थप्राप्तिमनन्तरेण कामस्य प्रसंगावस्था पूर्वमेवेत्युच्यते
अतःशब्देन कामप्रसक्तिरेव परामृश्यते नित्यमेवेत्युत्तरावस्था का
र्यावस्था च कामस्य कथ्यते ननु सर्वस्यापि कामात्मना न प्रशस्ते
ति कामो नित्यवैरी भवति ततः कुतो ज्ञानिविशेषणमित्याशंक्याह
न त्विति अतस्य नासौ नित्यवैरीत्येतदुपपादयति सहीति कार्य।
प्राप्तिप्रागवस्था पूर्वमित्युक्ता अन्ते प्रतिवैरित्वे सत्यपि कामस्य नि
त्यवैरित्वाभावे फलितमाह अत इति स्वरूपतो नित्यवैरित्वाविशेषे
पि ज्ञानाज्ञानाभ्यामवान्तरभेदसिद्धिरित्यर्थः आकांक्षाद्वारा प्रकृतं
वैरिणामेव स्फोरयति किंरूपेणेत्यादिना ३९ ॥

स्वामिकृतटीका

इदंशब्दनिर्दिष्टं दर्शयन्वैरित्वं स्फुटयति आवृतमिति इदंविवेकज्ञा

गी॰
टी॰
स॰

217

नमावृतमेतेन ज्ञानस्य खलु भोगसमये कामः सुखहेतुरेव परिणामेन
वैरित्वात्प्रतिपद्यते ज्ञानिनः अज्ञस्तु कालमप्यनर्थानुसंधानात्तु दुःख
हेतुरेव परिणामेन [illegible]
[illegible] रेवेति नित्यवैरिणेत्युक्तं किंच विषयैः पूर्य
माणोपियोदुष्पूरः आपूर्यमाणस्तु शोकसंतापहेतुत्वादनलवा।
लः अनेन सर्वाश्रयत्वनित्यवैरित्वमुक्तं ३९ ॥

पिशाचभाष्यं

आवृतं विहितं विवेकज्ञानं एतेन कामेन क्रोधेन च ज्ञानिनोपि किंतु
नमूर्खस्य नित्यवैरिणा नित्यं वैरिणेन नित्यवैरित्वं ज्ञान[illegible]पि यथा नहा
रकं कामरूपेण दुःपूरेणानलेन च दुःखेन पूर्यते न रतिदुष्पूरः न विद्यते
अलं पर्याप्तिर्यस्य सोऽनलः भूयो भूयो विषयसेवया वर्धमानेन कामेन प्र
च्छन्नः श्रेयोर्थी पुरुषः पापं चरनीयमर्थः ३९ ॥

२४

रामानुजभाष्यं

आवरणप्रकारमाह असृजेनोज्ञानिनो ज्ञानस्वभावस्यात्मविषयं।
ज्ञानं एतेन कामाकारेण विषयव्यामोहजननेन नित्यवैरिणा आवृतं दुः

न२

पूरेण प्राप्त्यनर्हविषयेणानलेन च पर्याप्तिरहितेन ३९ ॥

अभिनवगुप्तकृतटीका

अयमिमात्मा कामरूपश्छायायां यतश्चरति अनलेन वाग्निनेव प्रसा
रयितुमशक्येन दुष्पारदुष्प्रयत्नाहत्वात् ३९ ॥

परमार्थप्रपाटीका

अथैतदेव विविच्याह आवृतमिति पूर्वं कामक्रोधयोर्द्वयोरपि रूपि
तयोरथैकत्वमाह यतः कामएव केनाप्यहतिमः सन्क्रोधत्वेन परिणम
ति एवमेकेन कामरूपेण ज्ञानमावृतं किंभूतेन ज्ञानिनः पुरुषस्य
नित्यवैरिणा अज्ञस्य भोगावसरे कामः सुखहेतुर्भवति परि[illegible]
[illegible]
[illegible] णामे दुःखरूपः ज्ञानिनस्तु अनर्थानुसंधानेन नित्यं
दुःखहेतुत्वात् नित्यवैरिणेत्युक्तं किंभूतेन दुःपूरेणानलेन च दुःपू
रेण दुर्भरेण विषयप्राप्त्यावनले नाग्निरूपेण [illegible] अथ कामस्य
स्वरूपं दुष्पूरत्वं च निरूपयितुं शातपथी श्रुतिरपि एतावान्वै कामो नेतस्य नातो भूयो विंदेत्तस्मा
दप्येतर्ह्येकाकी कामयते जाया मे स्यात्कामयते प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेति
स यावदप्येतेषामेकैकं न प्राप्नोत्यकृत्स्न एव तावन्मन्यते तस्याकृत्स्नतेति भाष्यं पूर्वं स्मृत्यानि
रूपितः कामएतावान् एतावान् एतादृशः अत्र नेदिति निपातो निषेधार्थः सकामः सन्न भवति
तथापि अतः कामात्तत्काश्यात् भूयो महत्तरं न विंदते न जानाति यत एवं तस्मात्कामात्रयमे
काकी मातृगर्भादेकएवोत्पन्नः अनंतरं जाया मे स्यादिति कामयते अथानंतरं प्रजायेय प्रजात्वे
न भूयासं आत्मा वै पुत्र नामासीति श्रुतेः तत्पोषणार्थं वित्तं मे स्यात्तदर्थं सेवाकृष्यादि कर्म कु
र्वीयेत्येतावान् काम इति पूर्वेणान्वयः अथ कामस्य दुष्पूरत्वमाह सयावदिति सकामयमानः
तेष्वमित्येतावान् कामानां मध्ये यावदेकैककामं न प्राप्नोति तावदहं महत्तत्वएव अहं कृता
कृतः एतेषां पूर्वोक्तानां कामानां मध्ये यावदेकैककामं न प्राप्नोति तावदहं [illegible]

तथातेनेदमावृतमित्युक्तं विवृणोति आवृतमिति ज्ञायतेनेने
ति ज्ञानमंतःकरणं एतेन कामेनावृतम् तथाप्यापातत सुखहेतुत्वा
दुपादेयः स्यादत आह ज्ञानिन इति अज्ञो विषयभोगकाले कामं मि
त्रमिव पश्यंस्तत्कार्ये दुःखप्राप्ते वैरित्वं वेत्ति कामेनेदं दुःखमनुप्रापि
तमिति ज्ञानी तु भोगकालेऽत्परिणामे च दुःखी भवतीति ज्ञानिनो
सौ नित्यवैरी कीदृशेन कामरूपेण काम इच्छाकारस्तस्सैव रूपं यस्य ते
न न तु विवेकिनः स्वदेहत्वात्र तत्त्राणतुविन सत्या आह दुःपूरेणान
लेन ... च वरवार्थ्यं नविद्यते लं ... शामियस्या नलो ग्निः सयथा स्व
विषयपूरयितमशकास्तथांमपि भोगेनेमर्थः अतो निरंतरसंतापहे
तु विवेकिनश्चाविवेकिनोपि हेयएवासौ नत्वात् कामः कामाना
मुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धत इति
स्मृतेः यद्वेकाया विषयसिद्धि निवर्त्यं वादिकाह्रपः कामो विषयभो
गेन स्वयमेव निवर्तिष्यते किं तज्जातियत्नेनात उक्तं दुःपूरेणालेन
चेति विषयसिद्ध्यातत्कालमिकानिह्नमावपिपुनरुत्पत्तिसंभ
वात्र विषयसिद्धिरिच्छानिवर्तिका किं तु विषयदोषदृष्टिरेवेत्य
तिभावः ३९ ॥

जस्तमैवेजयन्ती टी॰

एवं दृष्टांतत्रयेण कामेन ज्ञानस्यावरणं कामस्य जयोपायं वोक्त
दानीमपि दार्ष्टांतिकरूपेण कामेन ज्ञानस्यावरणमेवाह आवृतमि
ति ज्ञानिन आत्मस्वरूपानुसंधानशीलस्य ज्ञानमिदमर्थमात्मवि
षयमेतेन पूर्वोक्तेन कुत्सितरूपेणावृतं वेष्टितं तत्तु यत्न कुत्सिताभ्यां यो
निर्दिष्टः सकलकुस्मपेक्षायानस्य स्वरूपमाह कामरूपेणेच्छाभि
लाषादिरूपेण न त्वेवमस्य रूपेस्यात्तेनहि सर्वेषां प्राणिनामिदमुप
व सत्त्वे भोगप्रदत्वेनाप्यपरममित्रमभवेत्महापापाविष्ट नमित्यवै
रिणमिति तदुक्तं तत्कृतत्रनाशकापामाह नित्यवैरिणा नित्यवैरी न
कदाचिदपि दुःखदत्वाद्यं तन्नित्यमेव तदारं तथामेव साधनसिद्ध्या
वस्थायां वाजन्ममरणांतेवाप्रदेशेनेपिय त्र यत्र देवनिर्यग्मनुष्येना

गी॰
टी॰
३॰

दियोनिषु स्वर्गनरकादिषु लोकेषु जीवो याति तत्र तत्र जीवेन सह का
मोपि गच्छतीत्येवं रीत्या नित्यवैरी शत्रुस्तेन न तु जीवेन सह गच्छतीति चे
न्न च्छन्नकाल निरन्तरं यथा राज्ञा सह भृत्यो गच्छति तत्र तदैनं राजा बाधेतोपि
तो राजस्यानुकूलं कर्म कुर्वन्तस्मै सुखमेव ददाति न तु दुःखं यतोऽस्य
रस्य सर्वप्रकारेण भोगेन भस्मेच्छापरिपूरकस्य तृप्तेः शत्रुरपि वशी
भूतस्सन्सदनुकूलमेवाचरति तथा कामोपीति चेत्तत्राह विशेषणा
भ्यां दुःपूरेणानलेन चेति दुःपूरेण दुःखेन पयसा दरम्प्रश्यितं शक्यं स्तेन
न कुतएवं यतोऽनलेनानलत्वेन यथानलस्य समस्तं ब्रह्माण्डमपि
भक्तितो तथाप्यस्योदरपूर्तिर्न भवेत्तथायमपीत्यर्थः वशीकृतार्थेद
ष्टभूतोऽनलः काष्ठादिं विनाशमप्युपशुद्धरानलो वाह्याहारे विनैवं वर्द्ध
ते आहारे प्राप्ते सति शाम्यति कामरूपोऽनलस्त्वाहारभूते स समस्त ब
ह्माण्डेऽप्याप्य पर्यं शान्तोपि दिवारात्रौ वर्द्धते एवं केनाप्युपायेन क
थंचिदपि न शाम्यतीति समुचितम् ३९ ॥

+ तथा तेनेदमाहृतमिति सेग्रह मधुसूदनीटीका वाक्यविहरणेति +

+ ज्ञायतेनेनेति ज्ञानमन्तःकरणं विवेकविज्ञानं वा इदं शुद्धमपि दृष्ट।
तः ५ मेतेन कामेनावृतं तथाप्यापातसुखहेतुत्वादुपादेयः स्यादिति न। काम: ५
आह ज्ञानिनो नित्यवैरिणा अज्ञो हि विषयभोगकाले कामं मित्रमिव मि ५
पश्यन्तत्कार्ये दुःखे प्राप्ते वैरित्वं जानाति कामेनाहं दुःखित्वमापा
पि ५ दित इति ज्ञानी तु भोगकालेऽपि जानात्यनेनाहमनर्थे प्रवेशित इति अ
तो विवेकी दुःखी भवति भोगकाले च तत्परिणामे चानेनेति ज्ञानिनो
नित्यवैरीति सर्वथा तेन हन्तव्य एवेत्यर्थः तर्हि किंस्वरूपोऽसावित्य
त आह कामरूपेण कर्मेन्द्रियमिच्छामात्ररूपमेव स्वरूपं यस्य तेन कौन्तेयेति हे ५
संबन्धाविष्कारेण प्रेमाणं सूचयति ननु विवेकिनो हन्तव्योऽप्यविवे
किन उपादेयः स्यादित्यत आह दुःपूरेणानलेन च चकार उपमार्थः
न विद्यतेऽलं पर्याप्तिर्यस्येत्यनलो वह्निः स यथा हविषा पूरयितुमश
क्यः तथायमपि भोगेनेत्यर्थः अतो निरन्तरं संतापहेतुत्वाद्विवेकिन इवा
विवेकिनोपि हेय एवासौ तथा च स्मृतिः न जातु कामः कामानामुपभोगेन

शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिवर्धत इति अयं वा इका
या विषयसिद्धिनिवर्त्यं नास्तिको नृपः कामो विषयभोगेन स्वय
मेव निवर्तिष्यते किं तत्रातिनिर्बन्धेनेत्यत उक्तं दुःपूरेणानलेन
चेति विषयसिद्धावनन्तकालमिच्छातिशेष्यानेपि पुनः प्रादुर्भावा
न्न विषयसिद्धिरिच्छानिवर्तिका किंतु विषयदोषदृष्टिरेव तन्निवर्ति
भावः ([illegible]
नात्) ३९ ॥

सदानंदीटीका

तथानेनेति वाक्यं च विवृणोति हरिः स्वयं इदंशब्दोदितं ज्ञानमंतः
करणमेव वा १ कामेनाख्यादितं तत्त्वज्ञानिनो नित्यवैरिणा ज्ञानो
हि भोगकाले तं प्रपश्यन्मित्रमिवाधमे २ पश्चात्तु दुःखं तत्कार्यं वैरि
णो वेत्ति दुःखितः ज्ञानी तु भोगकालेपि वेद्मि तेनाहमाशहान् १ अ
नर्थेष्विह प्रवृत्तोस्मीत्यतो तस्य सदा रिपुः ३ कामरूपादिरूपेण मोह
नरूपः सर्वथा ततः ४ न विद्यतेलं पर्याप्तिर्यस्य सोसौ तु दुर्भरः यथा
पूरयितेनेव हविषा शमितेनलः ५ तथायमपि भोगेन नेदृशस्त
स्माद्विवेकिना न ज्ञात कामः कामानामुपभोगेन शाम्यति ६ ह
विषा कृष्णवर्त्मेव भूय एवाभिवर्धते इति स्मर्यापि कामस्य भाग
एव विशिष्यते ७ दोषदृष्ट्या हि भोगेषु तु भोगासक्तिरासुरी ८ ३९

नीलकंठीटीका

आवृतमिति ज्ञानमंतःकरणस्थं स्फीर्थीभाति मे तत्त्वमेतद
वेति श्रुतेः एतेन कामेन रजोगुणात्मकेनावृतं ज्ञानिनः अंतः
करणविशिष्टस्य प्रमातुः नित्यवैरिणा कामरूपेण दुष्पूरेणापूर
यितुमयोग्येन अयं हि सर्वमात्मना ध्यानेव प्रभवेत् अनलेन।
अथापि पूर्यते चेत् अनलः नास्यालं पर्याप्तिर्यस्य सतथा तेनानले
न न स्यूनलः काष्ठैस्तर्पयितुं शक्यः किंतु वर्धत एव तद्वदयमपीत्य
र्थः अयं भावः अंतःकरणस्थं हि वह्निवत्प्रकाशात्मकं तत्सहजे
न कामेन वह्निरिव धूमेनावृतं चेत्प्रमातारं अनर्थे पातयति अ
यथा तदेव स्वभावशुद्धत्वात् विवेकवैराग्योपगमत्वात्तु शुद्धं तत् अ

गी॰ टी॰ ट॰

णोयंकामोज्ञानिनोनित्यवैरीति ३९

आनन्दटीका

ज्ञानाच्छन्नात्माकथमावृतमित्याह एतेनाहंकारेणकामरूपेण
मायाविनेवस्वेच्छाकृतनानारूपेण दुष्पूरेणाःनपेक्षुपूरेण
दुःखाख्वनिरगाधेयंदुष्पाकेनदुर्यंते यामहद्भिरपितिभिः दुरतोरे
वलक्ष्यते इत्यादिस्मरणात्पूरयितुमशक्येनानलएवसर्वभक्षत्वाद्दा।
हकत्वाच्चानलेनाग्निनानित्यवैरिणाज्ञानिनोज्ञानगुणस्यात्मनो।
ज्ञानमाच्छादितम् ३९ ॥

219

+ यद्यपिसर्वशक्तिनिरोधकोयमात्मने रामकंठीटीका हंकाराख्योदोषस्तथाविज्ञानस्यप्राधान्यविव
क्षयेदमाह +

+ एतेनयथाप्रतिपादितेनदेहाद्यात्मप्रत्ययलक्षणेनशत्रुणाज्ञानिनः
स्वात्मसंवेदनलक्षणंमुख्यंज्ञानंवृतः येनलक्षणादृशमुख्येज्ञान
माहृतेनिरुद्धं यतःकामोबाह्यार्थनिबन्धनोभिलाषोरूपंयस्या
नएवासोदुष्पूरःकेनचिद्विषयेनसन्नापूरयितुंशक्यः यतोस्याद्धि
यमाणाविषयारागंविवर्धयन्तइन्द्रियाणांवोनरोनरविशिष्टतर
विषयरसतृष्णोऽन्नसलभ्योविरतिमापादयन्ति अतएवानलः
नास्यालंभावोविषयेभ्योनिवारणमस्तीति एवंविधेनानेनस्वभा
वसंवेदनलक्षणंमुख्यंज्ञानमावृतम् तस्मिंश्चावृतेसर्वाःशक्त्यो।
घोस्याकृताइतितात्पर्यम्

३९ ॥ लासिकी[illegible]टीका

तथाप्यनेनेत्यस्मात्कृतं इतिवाक्यंविवृणोति आवृतमिति एतेनेतिका
मरूपेणाभिलाषात्मनाज्ञानिनःस्वात्मसंवेदनमुख्यंवृतंत्वेतानि। ता
त्यवैरिणासहजशत्रुणाज्ञानंस्वस्वभावसंवेदनलक्षणं मुख्य
ज्ञानमावृतं ननुज्ञानिनाहन्तव्योप्यज्ञस्यरूपादेयएवेत्यतआह दु
ष्पूरेणानलेनचेतिच उपमानार्थः अग्निरिवदुष्पूरयितुमशक्यः।
मर्थः तथाचस्मृतिः नजातुकामःकामानामुपभोगेनशाम्यति
हविषाकृष्णवर्त्मेवभूयएवाभिवर्धतेइति अथवानलेनचनवि
द्यते लंभावोविषयेभ्योनिवृत्तिलक्षणपर्याप्तिर्यस्यतेन अतो।
हन्तव्यः ३९ ॥

पंचोलीटीका

किंचनकेवलंरिरंसाकृवाध्यंयत्कामेनावृतेनतदाह आवृतमिति हेकौंते।
यएतेनकामेननित्यवैरिणासर्वदाशत्रुरूपेणदुःखेनपूरणीयस्सः ते
नकामरूपेणकामःकारणीयस्सःकामरूपःकथंभूतेनतविघ्नेन च
लेनविपूर्णेनायस्सःतेनज्ञानिनःज्ञानमस्सतानमाज्ञानतानमावृत
माच्छादितेज्ञानमतःकामंसर्वदावैरिणंजानानीमर्थः ३९

रसवीरसमिद्धोधिनी॥

पुनरपिवैरित्वंस्फुटयति आवृतमिति एतेनप्रोक्तलक्षणेन।
कामरूपेणनित्यवैरिणाज्ञानिनोगुणदोषविदोपिस्वयमवि
वरणनिश्चयवतोपिवासंवंधिज्ञानेगुणदोषविषयंनिश्चयात्म
कंवा आवृतमाच्छादितंहेकौंतेयअतएवायंदुष्पूरः सर्वसंला
भनसायस्याउप्याविश्वाहरतस्यः निश्चयमात्रविनाशनेनस
र्वस्यैहिकपारत्रिकस्यभोगापवर्गलक्षणस्यपुरुषार्थस्यविना
शनादिति किंवायमनलोदहनवत्संतापजनकः यद्वानालि
अलंनिवारणमस्येत्यनलोनिवारणीयः अतश्चायंनित्यवैरी
भवताहंतव्यइतिभावः ३९॥

मधुभाष्य

३९॥

220

भाषा अनुवाद

फेरि भी काम का वैरित्व प्रकाश करते हैं कि विवेक ज्ञान स
काम से आहत होता है यद्यपि अज्ञानी मनुष्य को यह काम
भोगसमय मे सुख का हेतु है पर तो भी शेष मे वैरभाव प्रग
ट करता है इसी से ज्ञानी लोगों को भोगकाल मे भी अनर्थ ही
जानि पड़ता है क्यों कि यह काम दुःख का कारण है कौन्तेय अ
र्जुन देखो यह काम अनेक दिन विषय भोग करते भी सन्तोष
नही पावता दिन दिन और और इच्छा बढ़ती ही जाती जैसे
आग इन्धन पाय अधिकर बढ़ती है औ सन्तुष्ट नही होती है
और जो कदाचित विषय भोग न मिला या असामर्थ्य से भोग ही
न कर सकै तो शोक सन्ताप होता इस से आखिर मे तो दुःख।
कोइ सुख लेस भी नही है ३९॥

दोहा॥

एक यो ज्ञान दुनज्ञानी को ज्ञानी को नित वैरि हे अर्जुन दुःप
र जो काम अग्नि इहहदे रि ३९॥

221

इन्द्रियाणिमनोबुद्धिरस्याधिष्ठानमुच्यते एतै
र्विमोहयत्येषज्ञानमावृत्यदेहिनं ४० ॥

शांकरभाष्यं

किमधिष्ठानः पुनः कामो ज्ञानस्यावरणत्वेन वैरी सर्वस्येत्यपेक्षा
यामाह ज्ञाते हि शत्रोरधिष्ठाने सुखेन निबर्हणं कर्तुं शक्यत इति इ
न्द्रियाणीति इन्द्रियाणि मनोबुद्धिश्चास्यकामस्याधिष्ठानमुच्यते ए
तैरिन्द्रियादिभिराश्रयैर्विमोहयति विविधं मोहयत्येषकामोज्ञानमा
वृत्याच्छाद्य देहिनं शरीरिणं ४० ॥

आनन्दगिरिकृतटीका

कामस्य निराश्रयस्य कार्यकरत्वाभावं मत्वा प्रश्नपूर्वकमाश्रयं द
र्शयति किमधिष्ठान इति कामस्य नित्यवैरित्वेन परिजिहीर्षितस्य
किमित्यधिष्ठानं ज्ञाप्यते तत्राह ज्ञाते हीति इन्द्रियादीनां कामाधि
ष्ठानत्वं प्रकटयति एतैरिति नन्वेताभिरिति वक्तव्ये कथमेतैरि
त्युच्यते तत्राह इन्द्रियादिभिरिति ४० ॥

स्वामिकृतटीका

इदानींतस्याधिष्ठानंकथयंस्तज्जयोपायमाह इंद्रियाणीतिद्वाभ्यां
विषयश्रवणदर्शनादिभिः संकल्पेनाध्यवसायेनचकामस्याविर्भा
वात् इंद्रियाणिमनश्चबुद्धिश्चास्याधिष्ठानमुच्यते एतैः इंद्रियादि
भिः दर्शनादिव्यापारवद्भिराश्रयभूतैः विवेकज्ञानमावृत्यदेहिनं
विमोहयति ४० ॥ पिशाचभाष्यं

किंचास्यकामस्यकारणमुच्यते इंद्रियाणिलोचनादीनिचक्षुरा
दीनिमनःसंकल्पात्मकंबुद्धिरध्यवसायात्मिकाअस्यकामस्याधि
ष्ठानंकारणमुच्यते इंद्रियेणगृहीतेप्रथमंमदलीढंविषमालोच्य
मनसातस्यस्वरूपेहेतुत्वेसंकल्प्याहमनेनेंद्रियेणानेनविषयंसेवइति
बुद्ध्याध्यवस्यपुरुषः कामयतेनेनतस्मादिंद्रियादीनिकामस्याधिष्ठा
नंकारणं एतैरिंद्रियादिभिः कारणैरेनंदेहिनंविमोहयति मोहं
नयतिएतैर्हिकारणंभवतीतिज्ञानंसम्यग्ज्ञानमावृत्याच्छाद्यएन

गी० टी० र० 222

एवमनः ४० ॥ रामानुजभाष्यं

अनेकरूपकरैयंकाम आत्मानमनुतिष्ठतीत्याह अधिष्ठानमेभि
रयंकाम आत्मानमिंद्रियाणि मनो बुद्धिरस्याधिष्ठानं एतैरिंद्रिय
मनोबुद्धिभिः कामाधिष्ठानभूतैर्विषयप्रवणैर्देहिनं प्रकृतिसंसृ
ष्टज्ञानमाहृत्य विमोहयति आत्मनो विमुखं विषयानुभवपरं क (नंहृत्य)
रोतीत्यर्थः ४० ॥ अभिनवगुप्तकृतटीका

अस्य निवारणे उपायमाह आदाविंद्रियेषु सन्तिष्ठति यथाव
त्विषयाशक्त्यै हृदिंद्रियप्रदेशप्रवकोपमात्मनो जनयति ततो मन
सि संकल्पे ततो बुद्धौ निश्चये पतद्वारेण मोहं जनयत् ज्ञानं नाशयति ४०

परमार्थप्रपा टी०

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] अथ कामा
त्मनः प्रकारं निर्दिश्य तस्याधिष्ठानमाह इंद्रियाणीति अस्य काम
स्याधिष्ठानं आश्रयभूता स्थाना भवंति दर्शनादाविंद्रियाणि संकल्पे
मनः आत्मभावे बुद्धिः एतैस्त्रिभिरधिष्ठानभूतैः कृत्वा ज्ञानमाह

मद्देहिनं जीवं विमोहयंति ४०॥

वनमालीटीका

शत्रोरधिष्ठाने ज्ञाते हि सुखेन विजेतुं शक्यः स इति तदधिष्ठान
माह इंद्रियाणीति इंद्रियाणि श्रोत्रादीनि मनः संकल्पात्मकं।
बुद्धिरध्यवसायात्मिका अस्य कामस्याधिष्ठानमाश्रय उच्यते ए
तैरिंद्रियादिभिः स्वव्यापारवद्भिः स्वाश्रयैर्विविधं मोहयति ए
ष कामो ज्ञानं विवेकमावृत्याच्छाद्य देहिनं देहाभिमानिनं पुरु
[illegible] ४०॥

ॐ स्मम वैजयन्तीटी·

ननु वैरी तु दुर्गादिस्थाने स्थितो शस्त्रास्त्राद्यैरुपायैर्निरंजय
त्ययं तु कामरूपी शत्रुः कुत्र तिष्ठति केनोपायेन च जीवं जयती
त्येतस्या कामस्याधिष्ठानमुपायं च वदन्नावासेन जयोपायमाह
द्वाभ्यां इंद्रियाणीति इंद्रियाणि दशेंद्रियाणि इहलोके परलोके
श्रवणयामदारैश्वर्यविद्यागुणादिश्रवणेन तत्प्राप्तिकामो जायते
गीतवादित्रस्त्र्यादिश्रवणेन मदुकाठिन्यादिस्पर्शविचित्रविचित्र
रूपमधुरादिरससुगंधादिशास्त्राद्युपायादीनां श्रवणेन च तन्मल
ब्धये कामउत्पद्यते श्रुत्वा च ब्रह्मरुद्रेंद्रादिसुरासुरनागादीनामैश्व
र्यं श्रवणेन तत्तनदेवांगनादिरूपस्तनयानादिश्रवणेन च त
त्प्राप्तये कामोत्पत्तिर्जायते एवमिह च परदारादिनीलपीतादिरूप
दर्शनेन पायसादिवस्त्रदर्शनेन चन्दनादिगंधदर्शनेन कोमलादि
वस्त्रदर्शनेन वा कामो जायते एवं च मधुराम्लादिरसेन कामो जाय
ते मृदुकोमलादिस्पर्शेन कामो जायते चन्दनपुष्पादिगंधेन कामो
जायते एवं च कर्मेंद्रियाणामपि तत्तद्विषयाणां श्रवणस्पर्शरसन
दर्शनघ्राणवचनादानविहरणानन्दोत्सर्गे कामो जायते इमे वैरी
णः कामस्याधिष्ठानमिंद्रियाणि भवंतीत्यर्थः एवं मनसः तेनादृष्टा
दृष्टानां च श्रवणदर्शनेन न संकल्पेन कामस्योत्पत्तिर्जायते एवं बुद्धे
श्च वस्तुगुणदोषादिनिश्चयेन कामोत्पत्तिस्यादित्येवं प्रकारेणेंद्रिया

गी. टी. र.

णिच मनश्च बुद्धिश्चास्य कामस्याधिष्ठानं स्थानमुच्यते शास्त्रैरिति। शेषः एतैरिंद्रियमनोबुद्धिभिः स्वस्वाभिलाषितवस्तुविषयव्यापारैर्ज्ञानमात्मनो धर्मभूतं ज्ञानमावृत्याच्छाद्यैषः कामो देहिनं देहाभिमानिनमात्मानं विमोहयति विविधप्रकारेण मोहयति वैचित्र्यं करोति ४० ॥

+ ज्ञाते हि शत्रोरधिष्ठाने सुखेन स जेतुं शक्यत इति तदधिष्ठानमाह +

मधुसूदनीटीका

+इंद्रियाणि शब्दस्पर्शरूपरसगंधग्राहकाणि श्रोत्रादीनि वचनादानगमनविसर्गानंदजनकानि वागादीनि च मनः संकल्पात्मकं बुद्धिरध्यवसायात्मिका च अस्य कामस्याधिष्ठानमाश्रय उच्यते एतैरेतैरिंद्रियादिभिः स्वस्वव्यापारवद्भिराश्रयैर्विमोहयति विविधं मोहयति एष कामो ज्ञानं विवेकज्ञानमावृत्याच्छाद्य देहिनं देहाभिमानिनं ([illegible]) ४० ॥

223

युक्तः कामो ज्ञानाच्छा
एतद्द्वारेण ४

सदानंदीटीका

ज्ञाते शत्रोरधिष्ठाने स जेतुं शक्यते जसा। तदधिष्ठानमेवाहममान्यानींद्रियाणि च १ शब्दादिग्राहकाण्येवं वचनादिकराणि च संकल्पात्ममनो ज्ञेयं बुद्धिर्निश्चयरूपिणी २ कामस्यास्याश्रयो यस्मादेतैः सोपींद्रियादिभिः स्वस्वव्यापारवद्भिस्तैराश्रयैर्मोहयत्यसौ ३ विवेकज्ञानमाच्छाद्य मूढं देहाभिमानिनं ४४·

[illegible]

नीलकंठीटीका

किंच इंद्रियाणीति अयमर्थः इंद्रियमनोबुद्धयो हि कामेनाधिष्ठिता वासार्थं प्रवणा भवंति तेष्वनष्टेष्वयं कामः ज्ञानं विद्याकाशरूपं। आदर्शतलप्रख्यं यत्र योगिनो व्यवहितं विप्रकृष्टमतीतमनागतं वा पश्यंति यथोक्तमाचार्यैः विश्वं दर्पणदृश्यमाननगरीतुल्यं निजांतर्गतं पश्यन्नात्मनीति निजांतर्गतं शरीरांतर्गतं आत्मनि हार्दाकाशाख्ये बुद्धौ ततमलेनादर्शमिवाच्छाद्य देहिनं देहाभिमानिनं विशेषेण मोहयति विशब्दात् देहाभिमानशून्यं योगिनमपि मुग्धावस्थायां किंचिन्मोहयतीति गम्यत इति अक्षरयोजना स्पष्टा ४० ॥

आनंदीटीका

किमाश्रित्याह तमित्याह आदौ स्ववर्णादिकं च त्वगादीन्द्रियविषयी करोति तदनु मनसा गृहीतं संकल्पते ततो ग्राह्यमिदमिति बुद्ध्या विचार्य ग्रहणाय चेष्टते क्रमेण ज्ञानमावृत्यैतैरिन्द्रियादिभिर्देहिनमात्मानमेषोऽहंकारो मोहयति ४० ॥

रामकंठीटीका

अथ किमधिष्ठायायं ज्ञानमस्या वृणोतीत्याह ॥

अस्याहंकारस्य प्रतिपादितस्वरूपस्थितिविवृद्धिलक्षणचतुष्टयस्येन्द्रियाणि च त्वगादीनि वागादीनि तथा मनः संकल्पात्मकं बुद्धिरध्यवसायात्मिकाधिष्ठानं एतेषु कृतस्थितिरेष यथोक्तं ज्ञानमावृत्य देहिनं तेषु चनं मोहयति स्वरूपानभिज्ञत्वं किंचिज्ज्ञात्वं किंचित्कर्तृत्वकारित्वमोहेनाज्ञानेन युनक्ति [illegible] मारः ४० ॥

लाभिषी[illegible]टीका

ज्ञाते हि शत्रोरधिष्ठाने सुखेन जेतुं शक्य इति तदधिष्ठानमाह ॥ इन्द्रियाणीति विषयदर्शनेन संकल्पेनाध्यवसायेन च कामस्याविर्भावादित्येतान्यधिष्ठानानि एतैरिन्द्रियादिभिर्दर्शनादिव्यापारवद्भिराश्रयभूतैरेष यथोक्तं ज्ञानमावृत्य देहिनं तेषु चनं मोहयति स्वरूपानभिज्ञत्वदेहाद्यध्यासादिना मोहेन युनक्ति ४० ॥

पंचोलीटीका

शत्रोरधिष्ठाने ज्ञाते शत्रुनिवर्हणं कर्तुं शक्नोतीति कामशत्रोरधिष्ठानमाह इंद्रियाणीति इंद्रियाणि श्रोत्रादीनि मनश्चांतःकरणं बुद्धिर्ज्ञानं अस्य कामस्याधिष्ठानमाश्रय उच्यते एतैरिंद्रियादिभिः एष कामः ज्ञानमाच्छाद्य देहिनं प्राणिनं मोहयति ४० ॥

224

रणवीरससिद्धोधिनी॥

अथैतज्जयोपायं कथयति इंद्रियाणीति द्वाभ्यां इंद्रियाणि च
क्षुरादीनि मनः संकल्पात्मकं बुद्धिर्विषयाध्यवसायलक्षणा ए
तानि अस्य कामस्याधिष्ठानमुच्यते आदौ रूपशब्दादिभिर्विष
यैश्चक्षुःश्रोत्रादीनामिंद्रियाणां सन्निकर्षणाद्दर्शनश्रवणादु
त्पत्तिः ततो मनसा तथाविधसंकल्पोत्पत्तिस्ततोऽध्यवसाये
न कामस्योद्भव इति क्रमः एवं काम एतैरिंद्रियादिभिराश्रय
भूतैर्ज्ञानं निश्चयात्मकं उपदेशं विषयं वा संतमेवावृत्याच्छा
य देहिनं शरीरिणं भवदादिलक्षणं कर्माधिकारिणं कमेव
महत्तं विमोहयति शोकसंतापाद्युत्पादनेन आरभ्यमाणा
त्तस्मात्प्रच्यावयतीति ४०॥

मध्वभाष्य॥

यथार्थप्रयोगेरधिष्ठानमाह इंद्रियाणीति एतैस्त्रीनमाह
त्युद्ध्यादिभिर्हि विषयैर्ज्ञानमावृतं भवति इन्द्रनाधिष्ठा
नो हि प्रजुर्नयपाति प्राङ्ददनने श्रानुयद्भूपत्तान वक्तुंत्रेय
माह ४०॥

भाषा अनुवाद

अब काम के रहने की जगह और इसके जय करने की उपा
य दो श्लोक से कहते हैं कि विषयों का इन्द्रियो के द्वारा भो
ग होना है और मन से संकल्प हुए विषय वासना मानसिक
कर्म्म तथा बुद्धि से निश्चय होना अर्थात् यह काम अब एक
है गे इन सब बातोंसे जानागया कि मन बुद्धि औ इन्द्रीये ।
कामनाके आधार स्थान हैं अर्थात् उसकि औ रहने की जगह
हैं सोई काम विवेक ज्ञान को आच्छादन करे पेरि के देही
जो आत्मा उसको मोह युक्त कर देता है ४०

दोहा ॥

इंद्रिय मनअरुबुद्धिजो याहिके हे स्थान यासें करहें मोह य
ह ढकें जीवको ज्ञान ४० ॥

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ पाप्मा
नं प्रजहि ह्येनं ज्ञानविज्ञाननाशनं ४१ ॥

शांकरभाष्यं

यतएवं तस्मादिति तस्मात्त्वमिन्द्रियाण्यादौ पूर्वं नियम्य वशीकृ
त्य भरतर्षभ पाप्मानं पापाचारं कामं प्रजहि परित्यज हि यस्मा
त् एनं प्रकृतं वैरिणं ज्ञानविज्ञाननाशनं ज्ञानं शास्त्रत आचार्यत
श्च आत्मादीनामवबोधः विज्ञानं विशेषतस्तदनुभवस्तयोर्ज्ञानवि
ज्ञानयोः श्रेयःप्राप्तिहेत्वोर्नाशनं नाशकरं प्रजहि आत्मनः प
रित्यजेत्यर्थः ४१ ॥

आनन्दगिरिकृतटीका

का तेषामाश्रयत्वे सिद्धे साश्रयस्य तस्य परिहर्तव्यत्वमाह यत इति त
स्मादिन्द्रियादीनामाश्रयत्वादिति यावत् पूर्वं कामनिरोधात् प्रागवस्था
यामित्यर्थः तेषु नियमितेषु मनोबुद्ध्योर्नियमः सिध्यति तत् प्र
हाणे पितत्पहानिर्व्यतिरेकेणाफलत्वादिति भावः पापमूलतया का
मस्य तत्त्वहेतुत्वाद्यथात्मत्वेन कामस्य परित्याज्यत्वे वैरित्वं हेतुत्वमेव
हेतुं साधयति ज्ञानेति ज्ञानविज्ञानशब्दयोरर्थभेदमावेदयति ज्ञा
नमित्यादिना ४१ ॥

स्वामिकृतटीका

यस्मादेवं तस्मादिति आदौ विमोहात्पूर्वमेवेन्द्रियाणि मनोबुद्धिं च
नियम्य पाप्मरूपमेनं कामं हि स्फुटं प्रजहि घातय यद्वा प्रजहि परित्य
ज ज्ञानमात्मविषयं विज्ञानं शास्त्रीयं तयोर्नाशनं यद्वा ज्ञानं शा
निदिध्यासनं स्त्राचार्योपदेशजं विज्ञानं विज्ञाय प्रज्ञां कुर्वीतेति श्रुतेः ४१

पिशाचभाष्यं ति

यस्मादिन्द्रियाणि रागद्वेषमूलानि तस्मात्त्वमादौ प्रथमं नियम्य निरु
रुध्य एनं प्रकृतं वैरिणं पाप्मानं सकलपापहेतुं कामं प्रजहि ४१ ॥

रामानुजभाष्यं

यस्मात्सर्वेन्द्रियव्यापारोपरतिरूपे ज्ञानयोगे प्रवृत्तस्यायं कामरूपः श
त्रुर्विषयाभिमुखीकरणेनात्मनि वैमुख्यं करोतीति तस्मात्प्रकृतिसंस

गी॰
टी॰
२

प्रतयेंद्रियव्यापारप्रवणत्वमादौ मोक्षोपायारंभसमय एवेंद्रियव्यापा
ररूपेकर्मयोगेइंद्रियाणि नियम्येनेज्ञानविज्ञाननाशनं शास्त्रस्वरू
पविषयस्य ज्ञानस्य विवेकविषयस्य च नाशनं पाप्मानं कामरूपं वै
रिणं प्रजहि नाशय ४१॥

अभिनवगुप्तकृतटीका

तदिदानीमिंद्रियं अतः पाप्मानं क्रोधं सज अथवा ज्ञानेन मनसा
विज्ञानेन बुद्ध्या नाशनं वारणं कुर्वन्ति क्रियाविशेषणं इंद्रियेष्वसन्नं
संकल्पे न गृह्णीयात् कस्मिन्नेवान्निषिद्धेतु यादिति तात्पर्यम् ४१

परमार्थप्रपाटीका

अथ क्रमेणास्योपशमप्रकारमाह तस्मादिति यस्मादयं बुद्धिपर्यं
तं गतिस्तस्मात्कारणादादौ प्रथमतः इंद्रियाणि वत्स रादीनि नियम्य
विषयपराङ्मुखानि कृत्वा पाप्मानममुं एकामं प्रजहि यान
यकिंभूतं ज्ञानविज्ञाननाशनं ज्ञानं शास्त्रजं विशेषज्ञानमनुभवस्त
योः प्रतिबंधकीभूतं ४१॥

वनमालीटीका

तस्मात्त्वमादौ मोहत्वात् प्रागेवेंद्रियाणि नियम्य वशीकृतेषु तेषु।
मनोबुद्ध्योरपि वशीकरणं स्यात् संकल्पाध्यवसाययोर्बाह्येंद्रियप्र
वृत्तिद्वारैवानर्थहेतुत्वात् पाप्मानं पापमूलमेनं वैरिणं प्रजहिहिय
तः ज्ञानं परोक्षं विज्ञानमपरोक्षं तयोर्नाशनम् ४१॥

ॐ समवैजयन्तीटीका

यस्मादिंद्रियक्रियोपरतिरूपे ज्ञानयोगसाधने प्रवृत्तस्यैव सः कामो
वैरी विषयसंमुखीकरणेन योगान्निविमुखीभावं करोति तस्मादि
ति हे भरतर्षभ राजर्षिवंशोद्भवस्य ते नूतनकामविजयप्रयासो न भ
विष्यतीति सूचितम् तस्मात्कारणात्प्रकृतिसंबंधेनेंद्रियक्रियाभि
मुखस्त्वमादौ योगसाधनारम्भकाले सकलेंद्रियव्यापाररूपकर्मयो
गे इंद्रियाणि श्रोत्रादीनि नियम्य वशीकृत्य वाह्येंद्रियेषु वशीकृतेषु म
नस्तत्करणानि स्वयमेव वशे भविष्यंतीति भावः पाप्मानं पापरूपमेनं का
मं शत्रुं प्रजहि त्यज तथा परिमज्य वा कृतपर्वं हि यस्मात् ज्ञानविज्ञानना

स्मा

णि नियमयेत् क्रोधादिकमिन्द्रियेषु प्रथमं न गृह्णीयात् ज्ञानं ब्रह्मविज्ञानं च भगवन्मयीं क्रियां नाशयतीति द्वियन्तः

तस्मादिन्द्रियाधिष्ठानः कामो देहिनं मोहयति

न॰

७०

226

ष्ठानम् ज्ञानेच विज्ञानेवज्ञानविज्ञानयोर्नाशनस्तेज्ञानेशास्त्रीयं
(ना) तत्संशनं स्त्रीपुत्रधनादीनां प्राप्तिकामा तल्ले तद्देहस्मानरुद्रयःश्रु
रुषोः नेकष्ययत्वेनाध्ययनादिना सम्पादिते शास्त्रज्ञाने तद्देवलोक
नाध्ययनावसराभावाद्विस्मारेतीत्यर्थः विज्ञानमात्मविषयं तस्यना
शनं कस्यचित्स्मरणप्रसंगाद्धासनपवबोमजैामत्नायकामं इंद्रि
यद्वाराजीवं विषयाःभिमुखंकृत्वाः तपिवसोभायादिवदात्मवे
मुख्यत्वेनात्मज्ञानं नयपतिज्ञानशिरोमणीनामनवरतात्मावलो
कनेपराणामजादीनामपियोज्ञानं नाशयति सोःन्येषांविषयान
त्मनोज्ञानं नाशयतीति किमुवक्तव्यं तस्मादिंद्रियनियमेनेनाशएव
ह्रिंगनताभावाद्यतोजन्मनवैवायंलीयतइत्यभिप्रायः ४१॥

मधुसूदनीटीका

(यस्मादेवं) यस्मादिंद्रियाद्यधिष्ठानः कामो देहिनं मोहयति तस्मात्त्वमादौ
मोहनात्पूर्वं कामनिरोधात्पूर्वमिति वा इंद्रियाणि श्रोत्रादीनि निय (नि:)
म्यवशीकृत्य तेषु हि वशीकृतेषु मनोबुद्ध्योरपि वशीकरणं सिद्ध्य
ति संकल्पाध्यवसाययोर्बाह्येंद्रियप्रवृत्तिद्वारेणैवानर्थहेतुत्वात् अ
तः इंद्रियाणि मनो बुद्धिरिति पृथङ्निर्दिष्टानीद्रियाणीत्य
त्रोपलक्षणे इंद्रियत्वेन तयोरपि संग्राहो वा हे भरतर्षभ महावंशप्रसू
तत्वेन समर्थोसि पाप्मानं सर्वपापमूलमेनं कामं वैरिणं प्रजहि हि (हि)
परित्यज हि स्फुटं प्रजहि प्रकर्षेण जहि मारयेति वा जहि शत्रुमित्यु
पसंहाराच्च ज्ञानं शास्त्राचार्योपदेशजं परोक्षं विज्ञानमपरोक्षं तत्
फलं तयोर्ज्ञानविज्ञानयोः श्रेयःप्राप्तिहेत्वोर्नाशनं ४१॥

सदानंदीटीका

यतोस्मादिंद्रियाधारः कामो मोहयदेहिनः तस्मात्त्वंमोहनात्पूर्वंश
ग्वाकामनिरोधतः १ श्रोत्रादीनींद्रियाण्येववशीकृत्य सवंशज पाप
मूलेरिपुंकामंमारयेतमशेषतः २ ज्ञानंपरोक्षमित्युक्तंशास्त्राचा
र्योपदेशजं अपरोक्षं हि विज्ञानं श्रेयःसाधनयोस्तयोः ३ नाशनं दुष्ट
मप्येतं तत्त्वसाक्षिरिपुंशठं तत्त्वज्ञानेसमग्रस्वेसविज्ञानेयदानरो वा

थितात्ज्ञानं तत्कार्यं चेति ह्यस्मात्कीर्तितिश्चलं कामस्यास्यतिमात्रेण तु।
स्यनाशः कथं भवेत् ५ वेदांतमानसंसिद्धे ज्ञाने विज्ञानसंभवे कामा।
दिमात्रनाशं चेहृ यातव्यपरिश्रमः ६ ज्ञानेव स्वप्रमायत्ते साधिते ब्रह्म
विद्वरैः तत्कथं न श्यतीति हि पस्ततिमानेववस्तति ७ किं ज्ञानस्य नाशे
न प्रतिबद्धि समुद्भवः यथा दीपप्रभानाशे तिमिरस्य समुद्भवः ८ न
हि हृदमतिर्वीद्यानां येकाज्ञानवादिनां प्रमादिभावरूपस्याज्ञानस्यास्य
जनिः कथं ९ श्रवणाभ्यासमेव स्वसिद्धे तत्तनिर्भवेत् वा फं ज्ञाने सवि
ज्ञाने ज्ञातज्ञानं न नश्यति १० तदुक्तेः कामनिस्तहिं स्मरणात्वशुक्तितः स्फु
टं ज्ञानविज्ञानवादित्वं कामस्येव नो हरेः ११ नामयं किं त्वकामस्य दु
ष्टस्यायं ततनिंद्या हेयत्वे स्त्यत्याता काभेदः ज्ञानतएवव १२ ततज्ञा
ने समुत्पन्ने जीवन्मुक्त मुने रयं कामाभासः समुत्पन्नो यदि प्रारब्धक
र्मणा १३ अन्यत्र ज्ञाननाशेन सावतमोज्ञाननाशने न व्याप्यं न वि
ज्ञानस्यः कामस्यैवकथ्यते १४ मुमुक्षोरूपदेशार्थं हरिणा श्रोतिहा
रिणा स्यमत्रास्ति निकर्षो भगवद्वचसो मतः १५ बाध्याप्यज्ञानवा
धातुकृति शिरवरवीजमवाधेन कामो वा मायं मोहमार्गो प्रवलत
रचित्तैवविद्यासयोग्यः तम्मार्गे मन्मुमुक्षोरत्रहदिनमधिकं यत्नमा
स्थायवोधः साध्यो विज्ञानपूर्वो हरिरितिवदतीब्रह्मविद्याप्रदाता १६
पदाकामस्य परोक्षज्ञानसर्वमिदं तवर्पणे तमामागायतया शब्दज्ञान।
विज्ञाननाशने १७ ज्ञानविज्ञानशब्दाभ्यां तत्फलं मुक्तिरुच्यते सा हि द्वि
विधा सदेहैका विदेहान्यतिनजव १८ असन्नेतन्न विज्ञाने साक्षात्कारापरा
भिधे श्रवणमेव भवेन्मुक्तो देहपातादनंतरं १९ जीवन्मुक्तिफलं काम
क्रोधादिभिर्विद्विषादिभिः प्रतिबध्यत एवेति दर्शनार्थं निरूप्यते २०
ग्रहो कामस्य दुष्टत्वं किमु वाच्यमतः परं यदयं ज्ञानविज्ञानफले।
समर्पितत्वात् २१ उद्भूतः प्रतिबध्नाति जीवन्मुक्तिसुखं मुनेः यस्माद्
तो सम्यक्ल्हादो जीवन्मुक्तिसुखाभिधः २२ प्रारब्धवशात् नेनेन ह्यावि
र्भावित्वात् यदि नव्यागतः कामो दुष्टप्रारब्धकर्मणा २३ तल्लक्षणेन
सर्ववासो प्रतिबध्नाति बोधिनः नज्ञाने स्थितेन तत्रसविज्ञाने तत्वेन नसि २४

कथं कामोऽद्भवं स्तत्र संभवेदिति चेच्छृणु । प्रारब्धकर्मणा वस्तु का
मो नास्ति निर्जितेनश्चि २५ सति मिथ्यात्वबोधेपि विषयेषु च संभवेत्
ननु तत्त्वविदो विन्ने कामः प्रारब्धकर्मणा २६ जायते दृश्यमाणे कि
म्मिति वेत्को हरेर्वचः सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि २७
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति न चैवाकर्मणा सिद्धिर्नि
र्वाणोऽकं भवाकतः २८ तस्मात्तस्य च देहस्य यावद्देहमयं क्रमः लोक
वद्व्यवहारो यं शास्त्राशास्त्राथवा सदा २९ ये परिज्ञानगतयो ये वान्ताः
पशुधर्मिणः लोकस्य व्यवहारेषु ते स्थिता लोकजालवत् ३० व्यवहा
रे यथैवाज्ञस्तथैवाखिलपण्डितः वासनामात्रभेदश्च कारणं बंध
मोक्षयोः ३१ यावच्छरीरं नावद्धि दुःखं दुःखं सुखं सुखं श्रमं सम
त्यिवोधीरादर्शयंत्य मनुष्यवत् ३२ नथैवमाघ्ये भामसंगाचायमर्यो
निदर्शिनः पश्वादिभिश्चाविशेषादिमजानिस्फुटं तथा ३३ विदेव
कृतिर्मुक्तिर्भ्यो देहादिभ्यो विलक्षणं विशुद्धं परमं गात्मानं ब्रह्मैका
विद्वतः स्ववं ३४ प्राणश्वासात्पयमं तद्व्यवहारे विरोधवराः नानिवर्तते
स्मादेभाम सानिणः यः स्मृतः प्रारब्धकर्मणा नानातु धावामस्य
थायथा वर्तनेनेत शास्त्रार्थं भ्रमितः व्यनपडिते ३६ स्वस्वकर्मानु
सारेण वर्ततां तेन तथानथा प्रविशिष्टः सर्ववोधः समा मुक्तिरिति
स्थितिः ३७ इत्यादिभेदा ये ते रथमध्यै उदीरितः ज्ञाते पि तत्त्वविज्ञा
ने प्रारब्धाख्येन कर्मणा ३८ जीवतः कथमस्यास्ति विमयमोक्षने।
कथं रागद्वेषादिकः क्लेशहेतुर्नाद्वेषु न द्विषः ३९ सन्वाधिनासुह
स्यापि वंधो भवति तत्क्षणे वितहत्ति निरोधेन तस्य योगेन वा शण
प्रोक्तं बहुविधं शास्त्रे जीवन्मुक्तिसुखाप्तये अतः कामोद्भवाज्जीव
न्मुक्तेः स्यान्न प्रतिबंधने ४० न दर्पो हरिणा प्रोक्तं ज्ञानविज्ञाननाशनं
चित्तस्य सर्वदोषाणां राजा कामउदीरितः ४१ नत्रिशाकरणेनैव स
र्वदोषनिराकृतिः जीवन्मुक्तिसुखं न स्याच्चेत्तस्याविभवमपि यच्च।
कामसुखं लोके यच्च दिव्यं महत्सुखं तृष्णाक्षयसुखस्यैते नार्हतः षो
डशीं कलां ४४ कामोद्भवो मुमुक्षोर्हि तत्त्वधीप्रतिबंधकः न तु तस्या
त्मसुखावाप्तिप्रतिबंधकरोयं ते ४५ न दर्पस्तस्य नाशाय यत्नश्चास्य

यश्चादरात् मुमुक्षूणामवोधायनसेनाल्पसरवायच ४८ इति
श्रीकरुणासिंधोर्हरेरद्भुतकर्मणः तात्पर्यं गम्यते विस्तोःशास्त्र
योनेःरमापतेः ४९ नवज्ञानेपिजानेश्रुमतिमिरहरेशांतिदेसज्जना
नाभ्नीवन्मुक्तापिभावेपरमसुखदेयासर्वविक्षेपनाशात् नत्रप्रा
रब्धदोषाघटिभवतिमनोकामशंभोःप्रचारेमोहोभावेनकाले
त्वपिसपदिपरेरहहुःखननश्यत् ४० अथगानजिज्ञासोरुपदेशा
योमेवहि कामनिंदाष्टपक्कानाम याहिश्रीहरेर्मतेन कामस्तस्मात्
पर्यायोक्तःसुरोपचुरितिष्ठति ज्ञानविज्ञानयोस्तत्रयंगोयोध्यामंगडले
भः ५१ वदत्येवहरिःसाक्षात्षोडशेकाममुक्षतो त्रिविधंनरकस्य
देद्वारंनाशनमात्मनः ५१ कामक्रोधस्तथालोभस्तस्मादेतत्त्रयंत्य
जेत् एतैर्विमुक्तःकौन्तेयतमोद्वारैस्त्रिभिर्नरः ५२ आचरत्यात्मनः
श्रेयस्ततोयातिपरांगतिं कामलोभावुभावत्रकामशब्देनकीर्तितौ
क्रोधस्तस्मात्तुजोप्यत्रकाममूलंतुरितः कामःपक्षकोपपक्षश्चसह
रिणास्त्वयं ५४ तस्मात्कामरिपावेनर्भूतलेनैववर्तमानो नश्यति
नरोयोपिश्रेयसःसाधनस्यवा ५५ अतएवनरिपुंकामंविनियम्यहि
याणिच नाशयत्वेत्साचाप्येपौरुषेणावलीयसा ५६ नचेंद्रिय
निरोधेनकथंकामस्यनाशने सतिकामनिरोधोपितेषामानीहृदु
र्वटः ५७ काममूलमिदंयस्मात्त्वावल्पदीदियाश्रयं केनोपायेनतनी
वेणातमःस्यात्कामनाशने ५८ इत्यत्राहहरिःसाक्षाज्ज्ञानविज्ञानना
यन्नं नाशनेबाधनेज्ञानविज्ञानेस्वस्वबेयतः ५९ ज्ञानविज्ञान रूपा
भ्यांसाधनाभ्यांसमूलतः नाशनेयस्यकामस्यतत्रवंयत्नवान्भव ६०
देहेंद्रियादिसंघातेनपावरस्यात्मधीर्दृढा कामोपिनावदेवास्तिब
लवानतिदुःखदः ६१ अविद्याहेतवःकामाःकाममूलाःमहत्भयः
धर्माधर्मौचतन्मूलोदेहोनयोप्युपस्ततः ६२ अतोविद्यानिरोधेस्या
न्निरोधोविदुषःसदा निःशेषकर्मदेहानोविकाराणांतदैववत् ६३ इ
त्वकेवात्तिकेस्यदेहेनरीयकभाष्यगे अहंकारविरात्मानाविकीक
माविवेकतः ६४ इदंमेस्यादिदंमेस्यादितीक्षाकामशब्दिता देहादि
भ्योविविद्यानोज्ञानेबस्यात्मवस्तुनि ६५ समूलमेवकामस्यनाशने

भवति स्वयं प्रनोमुख्य उपायो येन भयं सम्यक्पद्दिपणते ९९ ज्ञानेशा
ह्लीयमाश्रित्तनत्वमस्मादिवाकाजे देशिकोक्तनयेश्रकं विज्ञाने स्वाउ
भूतजे ९० नाशयन्न मिमं शत्रुं कामं पोरुषमास्थितः इत्येवं वाक्यपा
सियोत्नात्ययंश्रीहरेर्विभोः ९८ संदर्भस्योत्तरस्यापि यमोत्तिल्पत्नपव
हि स्वारस्यं तत्रविज्ञानोजेउवगोद्धिवेचनं ९९ स्वात्तानाप्यत्नदेहहय
महमितिसंश्रित्यपस्यास्तिपावत्कामक्रोधादिदोषः प्रभवतिभयद
त्तस्यतावन्मुमुक्षोः देहादिभ्यो विविच्यात्मयपदमलंतत्त्वमाश्राय
सम्यक् धलेस्तानेनकार्ये स्यपनयति सुधीः कामशत्रुं सुखेन ७
कशास्त्रंगीताख्यंहरिमुखसरोजाद्विगलितं कवास्मकं बुद्धिविष
यविषयकेतुपतिता तथापिश्रीकांतप्रभुरगुणलक्ष्मीविरचितैक
टाक्षेस्वकाक्षयत्तुस्तनवतोकितमलभे ३१ ४१॥

नीलकंठीटीका

तस्मादिति यस्मादिंद्रियाण्यस्याधिष्ठानं सामेन सवर्गो दुर्जयो।
इति तस्मात्त्वमेव नियम्य वशीकृत्य पूर्वं कामं हि निश्चयेन प्रजहि
यः प्रकर्षेण नाशं गिरिदुर्गादीन्स्वायत्तीकृत्येव तस्य सामेनेत्येति
राजानमस्यदत् हेतुमाह हे नः पाप्मानं सम्यक्त्वेनत्वापि हेतः ज्ञानवि
ज्ञाननाशनमिति ज्ञानस्य शास्त्राचार्योपदेशजस्य परोक्षस्य विज्ञा
नस्य निदिध्यासनपरिपाकजस्यापरोक्षस्य च नाशनं ४१॥

आनन्दीटीका

गुरुशास्त्रोपदेशजन्यमवबोधो ज्ञानं स्वात्मना साक्षात्कारो विज्ञानं
तयोर्नाशनमेनं महत्कारं जहीहि ४१॥

तदेवमेवंविधः शत्रुः कथं निर **रामकंठीटीका** स्कार्य इत्याह ॥

यतएव विधो सौ ततोस्याधिष्ठानभूतानि मनो बुद्धिसहितानि बुद्धीन्द्रि
यकर्मेन्द्रियाणि सर्वेष्वेव प्रथमं नियम्य यथोक्तमात्मस्वरूपस्थिति।
ष्ठात्मप्रत्ययतया रागद्वेषादिदोषाप्रभनिषेधेन तिरस्कृत्येन पाप्मान
मज्ञानमयं महाकिल्बिषं प्रथमतएव ज्ञानस्य शास्त्रादिद्वारेण पर
मार्थबोधस्य तथा ज्ञानस्य स्वात्मसाक्षात्कारलक्षणस्य विशिष्टस्य
ज्ञानस्य नाशने तिरस्कारिणम् परमं वैरिणं प्रजहीहि तिरस्कुरु

द्वि

एषचपरमसूक्ष्मत्वात्प्रेरणोयोगेनामप्रमादादिनाच पराजयः शत्रु
वितो (बिनोसूक्ष्मतोमतिपादयितुमाह) ४१ ॥

लासिकी [illegible]टीका

यद्यमेवंविधः शत्रुस्तत्कथंहन्तव्यइत्यतआह तस्मादिति तस्मात्
प्रथिष्ठानभूतानीन्द्रियाणिमनोबुद्धिसहितानिधीकर्मेन्द्रियाणि आ
दौमोहनात्पूर्वमेवनियम्य समात्मस्वरूपप्रतिष्ठानमकेनप्रयत्नेन।
निगृह्यपापरूपमेनंकामंज्ञानय कीदृशंज्ञानस्यशास्त्रीयस्यविज्ञा।
नस्यस्वात्मसाक्षात्कारलक्षणस्यनाशनंतिरस्कारिणम् तथाचमंकिः
कामजानामिनमूलंसंकल्पात्किलजायसे नत्वांसंकल्पयिष्यामिस
मूलोनभविष्यसीति ४१ ॥

पंचोलीटीका

अधिष्ठाननिग्रहेकामस्यनिग्रहइत्याह तस्मादिति हेभरतर्षभतस्मा
त्कारणात्त्वमादौइन्द्रियाणिनियम्यपस्मारेनेसंविज्ञाननाशनंशास्त्राचा।
र्योपदेशजनितंज्ञानंतस्यप्रमसाजुभवःविज्ञानंतयोःविनाशकमेनं
पाप्मानंपापिनंप्रजहिपरित्यज ४१॥

रसवीरसमिद्धोधिनी॥

तस्मादिति यस्मादिन्द्रियादित्रिकमेवाश्रित्यासौविमोहयति त
स्मादादौविमोहात्पूर्वमिन्द्रियाणीतिमनोबुद्ध्योरप्युपलक्षणं
इंद्रियादित्रिकंनियम्यस्ववशोविधायनपुनस्तदायत्तोभवेदिति
यावत् एनंपाप्मानंपापकर्मणिप्रवर्तकमुक्तलक्षणंकाम
रूपंनित्यवैरिणंप्रजहिप्रकर्षेणत्यजेर्थमात्मव्यतिरिक्तयपरित्यज
प्रपूर्वोजहातेर्लोण्मध्यमैकवचनेप्रजहिहीतिरूपं यतोएनंज्ञा
नस्यनिश्चयस्यविज्ञानस्यच प्रतीतेप्रथितस्यातिविन विज्ञात
विप्लुताइत्यवधानमनादिपूर्वस्यजानातेः ख्यात्यर्थकतया पौरु
षेयोवेदिगुणविशिष्टोयंदृढनिश्चयोनकदाचिदर्धमेशत्रुमम
पिमनोविदधातीत्यादिरूपायाः सर्वत्रप्रसिद्धेश्चनाशनः ४१॥

মধুমাস

৫৮॥

230

भाषा अनुवाद

तिस कारण से मोह होने के प्रथम ही ये सब इन्द्री औ मन तथा बुद्धि को नियम्य करके काबू कर या रोक कर इस पापरू प काम को हे भरतर्षभ अर्जुन अच्छी तरह नाश करो अ थवा त्याग करो क्यों कि यह काम आत्मज्ञान और शास्त्रोक्त जो विज्ञान तिन दोनों का नाशक है ४१ ॥

दोहा ॥

तातेइंद्रियप्रथमहंबसकरभारतश्रेष्ठ नाशकज्ञानवि
ज्ञानकोहेयहपापगरिष्ठ ४१ ॥

231

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥४२॥

शांकरभाष्य

इन्द्रियाणि आदौ नियम्य कामं शत्रुं जहि इत्युक्तं तत्र किमाश्रयः कामं जह्यादित्युच्यते इन्द्रियाणीति इन्द्रियाणि श्रोत्रादीनि पंच देहं स्थूलं बाह्यं परिच्छिन्नं चापेक्ष्य सौक्ष्म्यान्तरत्वव्यापित्वाद्यपेक्षया पराणि प्रकृष्टान्याहुः पण्डितास्तथेन्द्रियेभ्यः परं मनः संकल्पात्मकं तथा मनसस्तु परा बुद्धिर्निश्चयात्मिका तथा यः सर्वदृश्येभ्यो बुद्ध्यन्तेभ्योऽभ्यन्तरो यं देहिनं इन्द्रियादिभिराश्रयैर्युक्तः कामो ज्ञानावरणद्वारेण मोहयतीत्युक्तं परतस्तु सः स बुद्धेर्द्रष्टा परमात्मा ॥४२॥

आनन्दगिरिकृतटीका

पूर्वोक्तमनूद्य कामत्यागस्य दुष्करत्वं मन्वानो [illegible] मज्ञोक्तमेव स्पष्टीकर्तुं प्रश्नपूर्वकं श्लोकान्तरमवतारयति इन्द्रियाणीत्यादिना पंचेति ज्ञानेन्द्रियवत् कर्मेन्द्रियाण्यपि वागादीनि गृह्यन्ते किमपेक्षया तेषां परत्वं तत्राह देहमिति तथापि केन प्रकारेण परत्वं तत्राह सौक्ष्म्येति आदिशब्देन कारणत्वादि गृह्यते इन्द्रियापेक्षया सूक्ष्मत्वादिना मनसः स्वरूपोक्तिपूर्वकं परत्वं कथयति तथेति मनसि दर्शितं न्यायं बुद्धावतिदिशति तथा मनसस्त्विति यो बुद्धेरित्यादि व्याचष्टे तथेत्यादिना आत्मनो यथोक्तविशेषणस्याप्रकृतत्वमाशंक्याह यं देहिनमिति ॥४२॥

स्वामिकृतटीका

एवं विनयप्रणिधाने नेन्द्रियाणि नियंतेश कामं एतदात्मस्वरूपं देहादिभ्यो विविच्य दर्शयति इंद्रियाणीति इंद्रियाणि देहादिभ्यो ग्राह्येभ्यः पराणि श्रेष्ठान्याहुः सूक्ष्मत्वात्प्रकाशकत्वाच्च अत एव तद्व्यतिरिक्तत्वमप्यर्थोक्तं भवति इंद्रियेभ्यश्च संकल्पात्मकं मनः परं तत्प्रवर्तकत्वात् मनसस्तु बुद्धिर्निश्चयात्मिका परा निश्चयपूर्वकत्वात् संकल्पस्य यस्तु बुद्धेः परतस्तत्साक्षित्वेनावस्थितः सर्वांतरः स आत्मा

परः विमोहयति देहिनमिति देहिशब्दोक्तस्यात्मनः स इति परामृष्टपणे

पिशाचभाष्यं

येनात्मरूपमात्मानं कामश्छादयतीति तस्य स्वरूपमाह इंद्रियाणि श्रोत्रादीनि पराणि प्रकृष्टानि सूक्ष्मत्वात् सकलदेहव्यापित्वाद्बाह्याद्
कार्येतिनेभ्योऽपि इंद्रियेभ्यः परं प्रकृष्टं मनः आहुः संकल्पपूर्वकत्वादिंद्रियाणां प्रवर्तकत्वेन मनसोऽपि परा बुद्धिः बुद्धिर्व्यवसायात्मिका तत्प्रवर्तकत्वान्मनसः यो बुद्धेः परतो बोद्धा स कामेनावृत इत्यभिप्रायः ४२

रामानुजभाष्यं

ज्ञानविरोधिषु प्रधानमाह ज्ञानविरोधिनां प्रधानानींद्रियाण्याहुः यत इंद्रियेषु विषयव्यापृतेष्वात्मनि ज्ञानं न वर्तते इंद्रियेभ्यः परं मनः इंद्रियेषूपरतेष्वपि मनसि विषयप्रवणे आत्मज्ञानं न भवति मनसस्तु परा बुद्धिः मनसि विषयान्तरविमुखेऽपि विपरीताध्यवसायप्रवृत्ता। यां बुद्धिं नात्मज्ञानं प्रवर्तते सर्वेषु बुद्धिपर्यन्तेषूपरतेष्वपीच्छापर्यायः कामो रजःसमुद्भवो वर्तते चेत् स एवैनानिंद्रियादीन्यपि स्वविषये वर्तयित्वात्मज्ञानं निरुणद्धीति दृश्यते यो बुद्धेः परतस्तु स इति बुद्धेरपि परमः काम इत्यर्थः ४२॥

अभिनवगुप्तकृतटीका

अत्र युक्तिः श्लोकद्वयेनाह यत इंद्रियाणि शत्रुलक्षणाद्विषयाद्दूरस्थानि तेभ्यश्चात्मनः तस्मादपि बुद्धेर्व्यतिरेकः बुद्धेरपि प्रत्यात्मस्वभावत्वेनात्मा एवमिंद्रियो मत्रेन कोऽपि येन कथं मनसा बुद्ध्यात्मनो वा तामर्हतीति यथालोचये दिमर्थः ४२॥

परमार्थप्रपाटीका

सर्वेन्द्रियाण्युपलक्ष्यन्ते यतः कामो जेतुं न शक्यते अत्र तस्माद्विविक्तमात्मानं दर्शयति इंद्रियाणीति इंद्रियाणि देहादिभ्यो ग्राह्येभ्यः पराण्युत्कृष्टान्याहुः सूक्ष्मत्वाद्दृश्यप्रकाशकत्वाज्ज्ञानपवाह्यो व्यतिरिक्तत्वं भवति इंद्रियेभ्यश्च संकल्पात्मकं मनः परमुत्कृष्टं तत्प्रवर्तकत्वात् मनसस्तु बुद्धिर्निश्चयात्मिका परा निश्चयपूर्वकत्वात् संकल्पस्य। यस्तु बुद्धेः परतस्तत्साक्षित्वेनावस्थितः सर्वान्तरः सआ

न्मायुक्तार्थकं दर्शयन्तीयाह श्रुतिः इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च प
रं मनः मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः महतः परमव्यक्त
मव्यक्तात्पुरुषः परः पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः ए
व सर्वेषु भूतेषु गूढात्मा न प्रकाशते दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया
सूक्ष्मदर्शिभिः इति ४२ ॥

वनमालीटीका

श्रोत्रादीनि तानीन्द्रियाणि स्थूलदेहमपेक्ष्य सूक्ष्मत्वात्पराण्याहुः पण्डि
ताः श्रुतयो वा तेभ्य इन्द्रियेभ्यः परं मनः संकल्पविकल्पात्मकं तत्प्र
वर्तकत्वात्सूक्ष्मत्वाच्च मनसः परा बुद्धिरध्यवसायात्मिकाध्यवसायो
हि निश्चयस्तत्पूर्वक एव संकल्पादिर्मनोधर्मः यो बुद्धेः परः सूक्ष्मत्वा
त्प्रवर्तकत्वात्स ज्ञेयः परमात्मा इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं
मनः मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः महतः परमव्यक्त
मव्यक्तात्पुरुषः परः पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति
श्रुतेः आत्मा महत्पदार्थो महत्तत्त्वमुक्तं अव्यक्तं प्रधानं सूक्ष्मत्वात्स
र्वप्रवर्तकत्वात्सर्वस्य नियंत्रधिष्ठानत्वात्पुरुषोऽन्तर्यामी हरिरव्यक्ता
त्परः अत्र परमेश्वरस्य परत्वमात्रेणान्यथा मन इन्द्रियेभ्यः परा अर्था
इति स्थाने र्थेभ्यः पराणीन्द्रियाणीति विवक्षाभेदेन भगवदुक्तिर्न वि
रुध्यते रसोऽप्यस्य परं दृष्ट्वा निवर्तत इति भगवदुक्तावस्येन्द्रियजये हेतुता
याउक्तत्वात् ४२ ॥

उत्तमवैजयन्तीटीका

ननु इन्द्रियमनोबुद्धीनां कामाधिष्ठानभूतानां जये सति अधिष्ठेय
रूपस्य कामस्यापि जयो भवेदिति यदुक्तं तत्राधिष्ठानाधिष्ठे
ययोरुभयोरपि स्वरूपमभिन्नं वा भिन्नं वा अभिन्नं चेत्कथमपि न घ
टते यतस्तयोरधिष्ठानत्वेन्द्रियत्वविषयग्राहकत्वज्ञानत्वकर्मत्व
संकल्पत्वनिश्चयत्वमननत्वबुद्धित्वादिनैकधर्मो विशिष्टत्वेनाधिष्ठे
यत्वे विकारत्वादिधर्मो विशिष्टत्वेन च स्वरूपैक्याभावात् यदि भिन्न
त्वं भण्यते भवता तर्हीन्द्रियमनोबुद्धिजयेऽपि कामजयो न भ
वेत्तयोर्भिन्नस्वरूपत्वेन देवदत्तजये यज्ञदत्तजयवदेकस्य जयेतरस्य

रस्य ज्ञया भावादिमां शंकायां नस्यतेषां च भिन्नाभिन्नस्वरूपत्वेन काम
स्य जयोपायमाह द्वाभ्यां इंद्रियाणीति इंद्रियाणि श्रोत्रादीनि ज्ञानेंद्रिया
णि स्थूलदेहात्परागणी माहुः देहेंद्रियस्वरूपताः कुतः स्थूलदेहापेक्षयेंद्रि।
याणामपि सूक्ष्मरूपत्वात्प्रकाशकत्वाच्च इंद्रियेभ्यः संकल्पविकल्पा
त्मकं मनः परमाहुरेतदपि कुतस्तस्य विषयेष्विंद्रियप्रवर्तकत्वात्स्वप्ने
पि वर्तमानत्वाच्च मनसस्तु प्रकाशात्वबुद्धिर्निश्चयात्मिका परा यतो वि
षयप्रवणं मनो विचारणात्मप्रवणं करोति अस्याश्च सा यात्मिका
या बुद्धेर्यः परतो वर्तते सत्त्व रक्षात्मकः कामो भवति कुतो वस्तुनि
श्चये पूर्वं तयदीतां स्मानदेवबुद्धिर्निश्चयं करोति तास्य याज्ञयत्नेभ्यः प
र उत्कृष्टः काम एव वशाहृनाशेयं विवक्षा कामा पिष्ठान भूता नामिंद्रि
यमनोबुद्धीनामिंद्रियत्वज्ञानत्वकर्मत्वमननत्वसंकल्पबुद्धित्वनिश्चया
त्मत्वादि धर्मावच्छिन्नत्वेन नतत्स्वरूपत्वेन च कामस्य च कामत्वादि धर्माव
च्छिन्नत्वेन तत्तत्स्वरूपत्वेन च मदंपे भिन्नाभिन्नमपि हरिकथाश्रवणेन मा
मेच्छास्ति हरिदर्शनेन ममेच्छाऽतिनम्रस्मरणे ममेच्छास्ति हरिप्र
सादगंधतत्त्वस्यादौ मम घ्राणेच्छास्ति नरगास्पर्शेनेममेच्छास्ति भग
वत्कर्मणे ममेच्छास्ति हरिमंदिरगमने ममेच्छास्ति हरिगुणकीर्त
नेममेच्छास्ति हरिदर्शनसंकल्पे ममेच्छास्ति भगवत्स्वरूपगुणादि
विचारनिश्चये ममेच्छा वर्तनेन इत्यादिप्रकारेण कामस्य तदपेक्षयान
त्वव्यापकत्वात्तत्तत्स्ववर्तकत्वात्तदपेक्षयत्वात्त्वतेषांतव्याप्यत्वात्।
स्ववर्तत्वात्तदधीनप्रवृत्तिकत्वात्मस्यपिष्ठानत्वाच्च कामादृष्टपकृष्ट
इत्रूपत्वेन तस्य तेषां चाभिन्नरूपमित्येवरीमाभिन्नाभिन्नरूपको यः स
बुद्धेः परः काम इति केचित्तु यत्नबुद्धेः परस्तज्ञामकत्वेनावस्थितो यं दे
हींद्रियादिभिराश्रयभूतैर्युक्तः कामो ज्ञानावरणद्वारेण मोहयती
ती त्युक्तं स बुद्धेर्द्रष्टा परमात्मा स एव इह सविदृशस्तिवव्यवहितस्यापि
देहिनस्तदापरामर्शः अत्रार्थे श्रु इंद्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं म
नः मनसश्च परा बुद्धिर्बुद्धेरात्मा महान्परः महतः परमव्यक्तमव्यक्ता
त्पुरुषः परः पुरुषान्न परः किंचित्सा काष्ठा सा परा गतिरित्येवं वदंति
तदसंगतं प्रकरणविरोधात् तथाहि अथ केन प्रयुक्तोयं पापं चरति

पुरुष इत्येवमर्जुनेन प्रश्ने कृते सति कामप्रेषः क्रोधप्रेषः इत्यप
क्रमप्रश्ने मनाश्रियनेव क्रियाहतेत्तानमेतेन कामरूपेण कौन्तेयेंद्रि
याणि मनो बुद्धिरस्यानमित्यादि याण्यादौ विंद्रियाणि पराण्याहुः पु
वेबुद्धेः परस्तु हृत्याघ्नेनेत्रसेन महाशनं महापाप्मा वैरिणमेने
नत्तानमाहृतं निमवैरिणा कामरूपेण ३ः दूरेणानलेनपाप्माने ता
न विज्ञाननाशनं चाशं कामरूपं उरामदमित्यादिविशेषणरूपस्य।
कामस्येव विहुंजहीमादि क्रियापदे नजयोपायं कृपयन्नास्य स्वभा
ववर्णनद्वारेण प्रश्नस्योत्तरं दत्ते यद्यपि न तु सम्यनिर्णयस्य प्रयोज
नमस्तिन यापि देहिनमिति पदस्य परामर्शकत्वात्तेऽरागुहेणाय
थार्थो व्याख्या कृता मनीषिभिः ननु श्रुतिरपीमां व्याख्यां करोति
तदनुसारेणास्माभिरपि कृतास्याकं ३ राग्रहत्वेक थमिति चेन्न श्रु
त्यर्थविरोधात् श्रुतिस्तु अव्यक्तात्प्रधानात् पुरुषः पुरुषान्न मतःपर
मात्मेश्वरः पर इति वक्ति न तु बुद्धेः पर इति तस्मात् श्रुतिसम्मताप
व्याख्यायां अभावनात्तेषामनामनेन ३ रागृहत्वेसिद्धे ननु यथास्मा
कंव्याख्यायाः श्रुतिसंमतं नाहि मेनापपोष्णेन तथा ३ व्याकमपि
यतः कामस्य बुद्धेः परत्वं कुतापश्रुतत्वादिति चेन्न बुद्धिकारणका
रणास्येरभगवतीश्वरेपि कामाविर्भावश्रवणात् तथाहि सोऽका
मयत बहुस्यां प्रजायेयेति स मकामो महात्मा सम्यकामः सत्यसंक
ल्प इत्यादि श्रुतिशतप्रामाण्यात् कामस्य बुद्धिपरत्वकथने यथार्थमे
वातः एवैकदेशग्रस्तत्वात्तेषां व्याख्यानमयथार्थमेव सिद्धं यद्यपि
सर्वः अस्येन तथापि बुद्धेरपि परतोस्ति सदेही जीवात्मा चिन्मात्रत्वेन
देहादिबुद्ध्यन्तविविक्ततया तु मतः सत्रिधाने च कामतत्त्वहेतुर्भव
तीति वदन्ति न तु संगतमेव जीवस्वभाववर्णनाभावेन पूर्वापरग्र
न्थविरोधात् एवैकदेशसामान्याद्भगवदाशयानभिज्ञाः अस्मदर्थं
व्याख्यानं कारिणस्तेवैयथार्थ्यामेवव्याख्यातं वक्ष्यति स्म न संगत
वदन्ते वा रे: ४२ ॥

मधुसूदनीटीका

ननु यथा कथं चिदात्मेंद्रियनियमनसंभवेपात्तरत्वस्याप्यागोति

गी॰
टी॰
३॰

234

दुष्कर इति चेन्न रसोऽप्यस्य परं दृष्ट्वा निवर्तत इत्यत्र परदर्शनस्य रसाभि
धानीयकत्वस्यात्मागमसाधनस्य प्रागुक्तेः तर्हि कोऽसौ परो यद्दर्शनात्कामस्या
त्यंतनिवृत्तिरित्याशंकायामाह शुद्धमात्मानं परशब्दवाच्यं देहादिभ्यो विविच्य
दर्शयति । श्रोत्रादीनि ज्ञानेंद्रियाणि पंच स्थूलं जडं परिच्छिन्नं बाह्यं च
बहुत्वात् देहमपेक्ष्य पराणि सूक्ष्मत्वात्प्रकाशकत्वाद्व्यापकत्वादंतस्थत्वाच्च प्र
कृष्टान्याहुः पंडिताः श्रुतयो वा तथेंद्रियेभ्यः परं मनः संकल्पविकल्पा क॰
त्मकं तेषां प्रवर्तकत्वात् तथा मनसस्तु परा बुद्धिरध्यवसायात्मि
काध्यवसायो हि निश्चयः तत्पूर्वकत्वात्संकल्पादिर्मनोधर्मः
यस्तु बुद्धेः परतस्तु सर्वसाक्षितयावस्थितः यं देहिनमिंद्रियादिभिराश्र स्वस्वव्यापारवन्नि
यैर्युक्तः कामो ज्ञानावरणद्वारेण मोहयतीत्युक्तं स बुद्धेर्द्रष्टा परमात्मा।
त्मा स एष इह प्रविष्ट इतिवत् व्यवहितस्यापि देहिनस्तच्छब्देन परामर्शः
अत्रार्थे श्रुतिः इंद्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः मनसस्तु प।
रा बुद्धिर्बुद्धेरात्मा महान्परः महतः परमव्यक्तमव्यक्तात्पुरुषः परः
पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति अत्रात्मनः परत्व
स्य वक्तव्यतया विषयत्वादिंद्रियादिपरत्वस्यार्थेभ्यः परा ह्य
र्था इति स्थानेऽर्थेभ्यः पराणींद्रियाणीति विवक्षाभेदेन भगवदुक्तेन
विरुध्यते बुद्धेरस्मदादिव्यष्टिबुद्धेः सकाशात् महानात्मा समष्टिबु।
द्धिरूपः परः मनो महान्मतिर्ब्रह्मा पूर्बुद्धिः ख्यातिरीश्वर इति वायु
पुराणवचनात् महतो हिरण्यगर्भबुद्धेः परमव्यक्तमव्याकृतं सर्वज
गद्बीजं मायाख्यं मायां तु प्रकृतिं विद्यादिति श्रुतेः तद्धेदं तर्ह्यव्याकृत।
मासीदिति च अव्यक्तात्सकाशात्सकलजडवर्गप्रकाशः पुरुषः पू
र्ण आत्मा परः तस्मादपि कश्चिदन्यः परः स्यादित्यत आह पुरुषान्न पर
किंचिदिति कुत एवं यस्मात्सा काष्ठा समाप्तिः सर्वाधिष्ठानत्वात्सा
परा गतिः सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमित्यादिश्रुतिप्र
सिद्धा परा गतिरपि स एवेत्यर्थः तदेतत्सर्वं यो बुद्धेः परतस्तु स इत्यने
नोक्तं ४२ ॥

सदानंदीटीका

स्वस्मिन्नेवात्मत्वविज्ञानात्स्वात्मानं देहादिविवेकतः भोग्यसौंदर्यसंभ्रांता

विवक्षातत्वा

कामोयंजायतेरणं १ प्रत्यगात्माविविद्यातोदृष्टवोंतर्पियान
पैः कामशत्रुविनाशायनिजानेरामयेतया २ देहेंद्रियमनोधीभ्यः
पृथक्रूपविवेकतः सर्वसाक्षीपरोदृश्याद्दृष्टादृष्टवध्यादरात् ३
अमेगात्मानमाश्रित्यभोग्यमिथ्यात्वबोधनः हेयःकामःपरःशत्रु
रिमाहभगवान्हरिः ४ स्थूलेजडेपरिछिन्नेवागात्मेदेहमपेक्षाहि प्र
काशकत्वात्सूक्ष्मत्वाद्व्यापकत्वात्प्रसाणीव ५ इंद्रियाणींद्रियेभ्यस्त
थ्रेकेरंतात्मनःपरं मनसस्तुपराबुद्धिर्निश्चयैकस्वरूपिणी ६ यस्तु
द्धेःपरस्तस्याभासकत्वेनविदप्तुः यमविद्याहृतेकामःसाक्ष्यैमी
त्यमसौ ७ बुद्धेर्दृष्टापरःसोयमात्मास्मातीतिविद्यमानां अशायमति
निकर्षःसाक्षितत्वविवेचने ८ देहःस्थूलोजडोयंजनिमरणयुतोना
यमात्माकदाचित्लिंगादपराच्योअप्रमपाशनवलितोवेक्रूनोना
यमात्मा स्वप्नादौभावहीनस्तदिवगलितोत्तानमात्रेकदेहःसा
क्षीनस्याप्यभावंस्वविवेचनवशात्तावेनितद्भिन्नबोधः ९ विश्वावेशा
नरोयंव्यभिचरतियत्नोजागरेविप्रणष्टस्तत्रात्मानेजसोपिस्वप्न
मिहगलतियत्तर्हेसंप्रसादे प्राज्ञेशोमप्रबोधेस्वलवनविछ्येस
लयप्राप्तनस्थप्रत्यग्ब्रह्मवयादयात्मास्वयमिहनिगमाछिष्यतेश्री
तिभूयः १०४२

नीलकंठीटीका

नकेवलंबाह्येंद्रियजयेनैवकृतार्थतेकिंतुमनोबुद्ध्योरपिजयः
कर्तव्यःकामस्यसमूलोच्छेदायत्रिशाकारदुर्गस्यसामंतस्ये
वाभ्यंतरप्राकारद्वयजयेन अतोमनोबुद्ध्योर्जयार्थंयोगंदर्शयति
इंद्रियाणीति अत्रपरत्वंसूक्ष्मत्वेनकारणत्वेनवाबोध्यं इंद्रिया
णिवक्तरादीनिपराणिस्वविषयेभ्यःपृथिव्यादिस्वाश्रयसहिते
भ्योगंधादिभ्योविनश्वरशरीरेभ्यश्च तेषांतत्कारणत्वात् तथाचश्रु
तीतत्किंतःसमासनेतिब्राह्मणे प्राणेभ्योदेवादेवेभ्योलोकाइति ।
सूत्रंतीमत्रुषस्यते प्राणेभ्यइंद्रियेभ्यःदेवास्तदधिष्ठात्र्यो देवताउ
त्पद्यंते देवेभ्यश्चलोकाःभूतभौतिकाउत्पद्यंतइतिश्रुत्यर्थः इंद्रिये
भ्यःपरंमनः मनसाह्येवपश्यतिमनसाशृणोतीतिश्रुतेरिंद्रियाणि

गी॰
टी॰
२॰

235

मनोविकारत्वात् तेन बाह्यार्थेभ्य इंद्रियाण्याकृष्य मनसि प्रविलाप
नीयानीति दर्शितं केवलं परत्वमात्रमत्र प्रतिपाद्यते प्रयोजनाभावात् म
नसस्तु परा बुद्धिः तस्माद्व्यापकत्वान्मनोमयात् अन्योन्तर आत्मा विज्ञा
नमय इति श्रुतेः मनसः प्रविलापनेन तत्कारणे बुद्धौ कर्तव्यमित्यर्थः
समष्टिबुद्धेरप्येवैवोन्नभावः यो बुद्धेः परतस्तु सः यस्तु तथाभा
स्य वर्गान्तबुद्ध्यादेर्भासकस्तस्यानस्यैवलत्वं गमयति यो बुद्धेरपि प
रतः सः ज्ञानपदाभिधेयः कामेनोल्बेन गर्भ इवावृत इति व्यवहि
तेन संबंधः तथा च श्रुतिः यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आ
त्मनि ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनीति एतदुक्तं भव
ति वागादिबाह्येंद्रियव्यापारमुत्सृज्य मनोमात्रेणावतिष्ठेत म
नोपि विषयविकल्पाभिमुखत्वं त्याजनात्मशङ्कोदितायां बुद्धौ धारयेत्
तामपि महत्यात्मनि समष्टिबुद्धौ धारयेत् ततस्तं महान्तमात्मानं
शांते निष्कले परस्मिन्स्रोतिषिप्रत्यगात्मनि धारयेदिति ४२ ॥

आनंदीटीका

अथ मतिस्थत्वमत्वेनउक्तयो मायावी शत्रुर्दुष्प्रापवधानेन तं जेयस्माह ।
इन्द्रियाणि बलवंतीति पराणि स्थूलदेहस्य प्रेरकाणि विषयोपल
ब्धिद्वारेण वोपलब्धत्वात्स्थूलाद्रूपाणि सूक्ष्माणीत्यर्थः इन्द्रियेभ्यः
परं सूक्ष्मं मनः इन्द्रियाणां प्रेरकमणुत्वाच्चंचलत्वाच्च मनसोपि प
रा सूक्ष्मा दुर्लक्ष्या मनः प्रेरयन्ती बुद्धिर्व्यवसायात्मिका एवं बुद्धेर
तिसूक्ष्मतया यः परः प्रेरकः अमरो जरापेतयानितरां सूक्ष्मो दुर्विज्ञेय
श्च यः कश्चित्सोहंकारस्त्वन्वयः ४२ ॥

अस्य तां सूक्ष्मतां प्रतिपादयि रामकंठीटीका त्वमाह ॥

विषयाः शब्दादयस्तावदिंद्रियद्वारेण सर्वस्य कस्यचिदुपलभ्यमाना उ
पगच्छन्ति अतस्तदपेक्षयेन्द्रियाणि पराणि तेभ्यः सूक्ष्माण्याहुः क
थयन्ति तद्विदः नहीन्द्रियाणि शब्दादिवत्स्वात्ता उपलभ्यानि क
स्यचित् तेभ्यस्तथाविधेभ्यः सूक्ष्मेभ्य इन्द्रियेभ्यो मनस्तत्र हि निंकार निमित्तं
णं सूक्ष्मतरं यथेन्द्रियाणि कथं विज्ञम्यन्ते न तथानितिं च चलं मनस्त

यया विद्यावमनसो बुद्धिः परा सूक्ष्मतमेत्यर्थः यथा हि मनः क
ल्पे विकृष्यते न तथा निर्विकल्पकसमस्ततत्त्वावस्थाध्यवसायात्मि
का बुद्धिस्तस्माद्धैवंविधाया बुद्धेर्यः परतः परमसूक्ष्मत्वेन स्थितः
स सर्वान्तरो हंकाराख्यः शत्रुः यथा हि बुद्धिः कस्मैचित्प्रकटैर्ग
म्यते न तथायमविद्याप्रथमाङ्कुरः केनचित्सूक्ष्मस्थितः परमेश्व
रानुग्रहप्रभवत्वात्तानवत्वणालक्ष्मीकर्तुमपि शक्यते [illegible] ४२॥

लासिकी [illegible] टीका

ननु सा मनोनाम्योऽमन्यानेयपयमशक्यः तर्हि केनोपायेनायं प्र
तिकार्यः स्याशक्यतेषां परस्परं भेदः संहन्नेव दर्शनेनवधश्यमाह
इन्द्रियाणीति द्वाभ्यां इन्द्रियाणि देहविषयादिभ्यः पराणि सूक्ष्म
त्वात्प्रकाशकत्वात्क्लेशनिवृत्तिरिक्तानि वाहुः पणिधानकुशलाः
एवमुत्तरत्र इन्द्रियेभ्यः संकल्पात्मकं मनः परं तत्प्रवर्तकत्वात् म
नसस्तु बुद्धिर्निश्चयात्मिका परा निश्चयकत्वात् यस्तु बुद्धेः परत
स्तन्मात्रितेनावस्थितः सर्वान्तरः स आत्मा विमोहयति देहिन
मिति देहिरिणाहोक्त आत्मा स इति परामृश्यते ४२॥

पंचोली टीका

तत्र किमाश्रयः कामं जयादित्याशंक्याह इन्द्रियाणीति द्वाभ्यां इन्द्रियाणि
श्रोत्रादीनि बाह्यविषयदेहापेक्षया पराणि उत्कृष्टानि आहुः इन्द्रियेभ्यः
श्रोत्रादिभ्यः मनः परं उत्कृष्टं नः मनसः श्रेष्ठः करणात् बुद्धिर्ज्ञाने उ
त्कृष्टयो बुद्धेः परतः स आत्मा उत्कृष्टः ४२

रणवीरसमिद्धोधिनी॥

अथ यास्याति सूक्ष्मत्वात्पराजये प्रमादिनां भूतापरमो योगमाश्र
यितव्यः तस्यु परिमाणंस्तामेवातिसूक्ष्मतां प्रतिपादयितुमाह इं
द्रियाणीति इंद्रियाणि वस्तुनादीनि पराणि अर्थापेक्षया सूक्ष्मा
णि आहुः कथयंति इंद्रियद्वारेण हि ग्राह्यादय उपलभ्यंते न तु तैः

ग्राह्यादिवदिंद्रियाणि केनचित्साक्षादुपलभ्यंत इति इंद्रियेभ्यः सकाशान्मनः संकल्पात्मकं परमतिसूक्ष्मं इंद्रियाणां कथं चिदुपलंभेपि तस्यातिचपलत्वात्तथानुपलंभादिति भावः मनःसकाशाद्बुद्धिरध्यवसायात्मिका परा सूक्ष्मतरा लक्षणमात्रवर्तित्वात्तस्याः योबुद्धेः सकाशात्परतः परमसूक्ष्मत्वेनाश्रितः स उक्तलक्षणः कामरूपः शत्रुः समाहितेन भूत्वा परमो योगमाश्रित्य भवता पुनापराजय्य इति भावः ॥ ४२॥

मधुभाष्य

इंद्रियाणीति प्रसंगज्ञानासिमादाय तरति पारमितीत्युक्तं शरीरादींद्रियाणि पराण्युक्तानि न केवलं बुद्धेः परः श्रुत्युक्तप्रकारेणाव्यक्तादपि अव्यक्तात्पुरुषः पर इति श्रुतिः न च तत्र तत्रैकैकदेशज्ञानमात्रेण भवति मुक्तिः सार्वत्रिकगुणोपसंहाराद्धि भगवतापरोक्ष[illegible]पादेऽभिहितः आनंदादयः प्रधानस्येत्यादिना तथा चान्यत्र अपौरुषेयवेदेषु विभुवेदेषु वेदिषु सर्वत्र ये गुणाः प्रोक्ताः संप्रदायागताश्च ये सर्वेशे सह विज्ञाय ये प्रपश्यंति परं हरिं तेषामेव भवेन्मुक्तिर्नान्यथा न कथंचनेति गारुडे तस्मादव्यक्तादपि परत्वेन ज्ञेयः न चायं जीव उच्यते रसोऽप्यस्य परं दृष्ट्वा निवर्तत इत्युक्तत्वात् अपि ज्ञात्वा परमतो जयः कामस्यैवोक्त इति च अतः परमात्मज्ञानमेवात्र विवक्षितं आत्मानं मनः आत्मना बुद्ध्या ४२ ॥

भाषा अनुवाद

अब जिस मे मनुष्य चित्त को सावधान करि आत्मा मे लगा य इन्द्रियों को वश करनेसकै सोई आत्माका स्वरूप देहादि से भिन्न देखावते हैं कि देहआदि वाह्य कहे वाहर के स्थूल पदार्थों से इन्द्री सूक्ष्म औ पर हैं अर्थात् श्रेष्ठहैं और इन्द्रियोंसे। भी सङ्कल्पात्मक मन इन्द्रियों को विषयोंमे प्रवृत्ति करा वनेवाला पर है अर्थात् सूक्ष्म औ श्रेष्ठ है अथवा इन्द्रियों से भिन्न जानो और मनकी अपेक्षा निश्चय शक्तिरूप बुद्धि श्रेष्ठ है वा भिन्नहै क्यों कि मन के संकल्प को यह बुद्धि रोक सकती हैं और जो बुद्धि से भी परे अर्थात् श्रेष्ठ किम्वा पृथक् और साक्षी रूप हो सवके अन्तर मे टिका है सो आत्मा है तिस को यह दुष्टकाम मोहयुक्त करना हैं ४२॥

दोहा॥

इंद्रिय हूंकोपरकहै इंद्रियपरमनहोय मनहिंसें परे
जुबुद्धि है यबुद्धिसें परसोय ४२॥

237

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना जहि
शत्रुं महाबाहो कामरूपं दुरासदं ४३ ॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासि
क्यां भीष्मपर्वणि श्रीभगवद्गीतासूपनिषत्सु ब्रह्म
विद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मयो
गो नाम तृतीयोऽध्यायः ३ ॥

शांकरभाष्यं

ततः किं एवमिति एवं बुद्धेः परमात्मानं बुद्ध्वा ज्ञात्वा संस्तभ्य सम्यक्
स्तम्भनं कृत्वा स्वेनैवात्मना संस्कृतेन मनसा सम्यक् समाधायेत्यर्थः
जह्येनं शत्रुं महाबाहो कामरूपं दुरासदं दुःखेनासदः आसादनं प्रा
प्तिर्यस्य तं दुरासदं दुर्विज्ञेयानेकविशेषमिति ४३ ॥

तीः इति भगवद्गीताभाष्ये तृतीयोऽध्यायः ३ ॥

आनन्दगिरिकृतटीका

इन्द्रियादिसमाधानपूर्वकमात्मज्ञानात् कामजयो भवतीत्युपसंह
रति एवमित्यादिना संस्कृतं मनो मनःसमाधाने हेतुरिति स्तब्धेति
संस्तभ्येति प्रकृतं शत्रुमेव विशिनष्टि कामरूपमिति तस्य दुरा
सदत्वे हेतुमाह दुर्विज्ञेयेति अनेको विशेषस्तादृशो मत्स्यशनत्वा
दिस्तदनेनोपायभूता कर्मनिष्ठा प्राधान्येनोक्ता उपेया तु ज्ञाननि
ष्ठा गुणत्वेनेति विवेक्तव्यं ४३ ॥

इति आनन्दगिरिकृतटीकायां तृतीयोऽध्यायः ३ ॥

स्वामिकृतटीका

ेव उपसंहरति एवमिति बुद्धेर्विषयेन्द्रियादिजन्याः कामादिवि
ेका क्रियाः आत्मानं निर्विकारः तस्मादेवं बुद्धेः परमात्मानं बुद्ध्वात्म
नैवंभूतनिश्चयात्मिकया बुद्ध्यात्मानं मनः संस्तभ्य निश्चलं कृत्वा

गी॰
टी॰
३॰

कामरूपं शत्रुं जहि मारय दुरासदं दुःखेनासादनीयं दुर्विज्ञेय
गतिमित्यर्थः ४३ इति श्रीभगवद्गीतासुबोधिन्यां टीकायां
कर्मयोगो नाम तृतीयोऽध्यायः ३ [illegible] ४३

पिशाचभाष्यं

एवं बुद्धेः संभवे यतः बुद्धेः परं बोद्धारमात्मानं बुद्ध्वा ज्ञात्वान्तःकरण
मात्मनैव संस्तभ्य कामरूपं शत्रुं जहि दुरासदं दुःखेनासाद्यं नेविना
शयते इति दुरासदं ४३ इति पैशाचभाष्ये तृतीयोऽध्यायः ३ ॥

रामानुजभाष्यं

एवं बुद्धेरपि परं कामेन ज्ञानविरोधिनं बुद्ध्वात्मानं संस्तभ्य आत्मना बुद्ध्या
कर्मयोगे व्यवस्थाप्यैनं कामरूपं दुरासदं शत्रुं जहि नाशयेति ४३ ॥
इति श्रीमद्रामानुजाचार्यविरचिते गीताभाष्ये तृतीयोऽध्यायः ३

अभिनवगुप्तकृतटीका

रहस्यविनिवेशनाशयः बुद्धेर्यः परत्र वर्तते परोऽहंकारः सर्वमह
मस्मि भेदात्मा स खलु परमो भेदः अत एव च परिपूर्णास्वरूपत्वात्स्वभा
वात्र क्षोभः उदयते अतः परमहंकारं परमात्मा हंसं विदित्वा
केऽग्रहीना क्षोभमविद्यात्मानं शत्रुं जहीति शिवम् अयमत्र संग्र
हः यता निरासं देहं च योग्यत्वेनाधिगच्छति किं नाम न साक्षाद्वेत्ति
क्षोभाय चाश्रितविभ्रमा ४३ ॥
इत्याचार्याभिनवगुप्तविरचिते श्रीभगवद्गीतार्थसंग्रहे तृतीयः ३

परमार्थप्रपा टी॰

अथोक्तार्थमुपसंहरति एवमिति भो महाबाहो पुरुषार्थं न प्र
वमनेनाप्रकारेण बुद्धेः परं बुद्धेरतिरिक्तेन ज्ञात्वा ज्ञात्वा परमात्मानं
बुद्ध्वा आत्मनाप्येवंभूतनिश्चयात्मिकया बुद्ध्या आत्मानं मनः संस्त
भ्य निश्चलं कृत्वा कामरूपं दुरासदं दुर्जेयं शत्रुं जहि मारय अयमत्र
बृहदारण्यके यथा मनो देवासुरसंग्रामव्याजेन हयास्य प्राजापत्या
इत्यादिदशभिः कण्डिकाभिः प्रतिपादितं तदेवोपसंहारः श्रुतिश्च अ
थ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उद्गा
यत्ते विद्वरनेनैव न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन्स

238

यथास्मान् मत्वा लोको विध्वंसते नैवं देवे विध्वंसमानेर्विध्वंसो विने
शत्रुतो देवा अभवन् परासुरा अभवन्नात्मना परास्य द्विषन् भ्रातृव्यो
भवति य एवं वेदेत्यादि भाष्यं यथानेनेतरेह शाह्लाहृतातयातनार्थः
मोच प्रयत्नास्तेरवारसंग्रामसंसमीपेवनेमानेसर्वैर्द्विषद्भिर्लकेसु
खशरणाय त्वमात्मानं शाह्यपदेशं प्रतिरुद्धः त्वद्गंधापयेति त्वद्गा
स्मरणेसु मज्ञानेकुरु तस्मोऽज्ञानम मणा वहृपेतेनसापिह्वं वद
द्गायत नरकेकोदोग्ये अर्थध्यात्म यथवायंसु खशरणत्वम्।
न्नीयमुपासीतोमितीति अथनेमाणउद्गातारेतान्वाकामक्रोधा।
सुरास्तमभिद्भु मम विधान्नेवपितवेतोविध्वंस मानाविशीर्यमा
णाविध्वंसोपिविध्वस्मिन्नेचेतितविध्वंसोनानागनयोविने :वि
नाशं प्राप्ताः अत्रदृष्टांतमाह यथा प्रमाने पाषाणमृत्पाशाष्टलो
केष्टपांसुपिंडः विध्वंसते तथैव मुख्यप्राणाभिहतास्तेदैमानाशं
प्राप्ता इत्यर्थः अत्रैतदुक्तं भवति प्राणेनेजीवनेकरोतीति प्राणः
वागाद्यपिदेवतानां शक्तिमादंकोहिरण्यगर्भः तथा कामेदीनां
प्रसरस्तु बुद्धिपर्यंतमेव तदर्थेकामादीनामभावएव संभवतीत्य
र्थः एवमुक्तमकारंदैवासुरसंग्राममेवेदस्तात्मनाभवतिकामादी
नपरास्यपराभवंस्वेनात्मनाकृतामेपयेनेतकामाद्यैः एवमात्म
तानसंपत्तोत्रात्मायोनस्मद्विषद्वेष्टापिभ्रातृव्योभवतीति अथमे
वार्थः सामवेदैकदेशसाम्नापप्पादितः हाउ मेतत्सर २ उत्तरात्
दानेनादाने २ हाउ ३ अहमस्मिप्रथमजा ऋतस्या हाउ मेतत्स
र २ उत्तरात् २ अहोयेनकोधमित्यादि भाष्यं यथाजलप्रवाह
प्रतिबंधकासेतवोभवेतिनद्वरसंदैकरसानुभवेचत्वारः सेतवः
सेति नेत अदानक्रोधाश्रद्धानतानि तोत्तरः सेतत्सर ३ लेच
यः तत्प्रथमसेतोरुल्लंघनेउपायमाह दानेनेति यदृच्छयाप्रेण
त्वेनदीयते तदानप्राप्तस्यपदेपपि ततोऽन्यजापाप्रवाययेवगदी
क्रियते तदानं एवंदानेनकृतानदानमिदप्रदानमपि बस्यापेण

णत्वेन गणयेत्यर्थः यतोऽहंकारस्य महत्तस्य ब्रह्मणः प्रथमजः प्रथमतो यत्व
[illegible]त्वेनोपस्थितो हिरण्यगर्भोऽस्मि यत्किंचिद्दीयते तत्सर्वं मदर्पण
मेव भवतीत्यर्थः तथैव क्रोधं तथा [illegible] हिंसीयते तत्क्रोधेन तत्समर्पणात्क
ल्याणे रेति श्रुत्युक्तं देवेभ्यो नमस्तस्य नाभावस्मादिक्रतो[illegible]स्वामिभिः प्रा
तस्योक भाष्ये सम्यग्व्याख्यातः संति तदुक्तं क्रमेण नवाप्वाशिरस्मो
नम्बूले न विनतायो न तनोर्विमर्दः नचापि हिंसादिरनर्थयोगः।
म्याख्यापरं क्रोधयज्ञे हमेकी "अथाध्यायतात्पर्यं यज्ञाद्यैवर्णाधर्मो
चित्तमपि नियतं कर्म [illegible] मत्पदं स्यात्तस्मात्संकार्यमेतद्धिरण्यम।
पियतो कर्मणः कर्मशस्तं जीवन्मर्त्यः कदाचित्करखरणगुणेनैव
निहत्य कर्मातत्स्वाङ्केपादस्वपमी गुडपतिगदितश्चिन्मगुरो त्ट।
तीये ४३ इति श्री परमार्थप्रपाटीकायां तृतीयोऽध्यायः ३॥

वनमालीटीका

फलितमाह एवमिति रसोऽप्यस्य परं दृष्ट्वा निवर्तत इत्युक्तो
यः परस्तं परिपूर्णमनंतगुणालयमानंदविग्रहं सौंदर्यलावण्य
सीमानं बुध्यादेः परं श्रीहरिं बुद्ध्वा निःकामकर्मोपादितभक्त्या प्र
सक्तेसात्तात्कृतात्मनाप्नत्[illegible]निश्चयात्मिकया बुद्ध्यात्मानं
मनः संस्तभ्य स्थिरीकृत्य शत्रुं कामरूपं जहि मारय हे महाबाहो श
त्रुहनने कुशल कीदृशं दुरासदं दुःखेन जेतुं शक्यम् ४३॥
इति श्रीगी॰ वनमालीटीकायां तृतीयोऽध्यायः ३॥

अथ वैजयन्तीटी॰

उपसंहरति एवमिति एवमुक्तप्रकारेण बुद्धेर्व्यवसायात्मिका
याः परं श्रेष्ठं कामं बुद्ध्वा ज्ञात्वा आत्मना निश्चयात्मिकया बुद्ध्या
त्मानं मनःसंकल्पात्मकं मनः संस्तभ्य कर्मयोगो संस्थाप्य दुरासदं दुः
खेनासादनीयमतिदुर्धर्षं कामरूपं कामाकारं शत्रुं रिपुं जहि मा
रय महाबाहो इति संबोधनेन तवातिनरबलवत्वादिन्द्रियमनोबु
द्धिभ्यः परोऽपि दुरासदोऽपि कामरूपः शत्रुर्यथा दुर्योधनेन राज्यादिवि

विषयलोभेन मनो विक्षिप्तं कृत्वा सर्वं मोहकरोति न च याम्यदभिमुखं मनस्त
हाय तो ब्रह्मकृष्टं ध्यायापिप्रेत्य यविषयेनापि लोभेन मकुर्वन्तं
स्वयमेव वशे भविष्यत्यसयेन न कश्चिदपि प्रयासो न भविष्यती
ति स्थितिमत् कामरूपं शत्रुं जहि यत्नेन न च राज्यकामत्वात् त्वं उद्धर्त्तुं या
यतोऽपि कामरूपः शत्रुः कर्णशकुनिदुःशासनादीनि सर्वाणि से
नानीन्द्रियस्थानानि न्दूर्णवाणि मनोरूपो बुद्धिस्थानापन्नो भीष्म
पनेवाद्युयोधनाधीनप्रवृत्तिकत्वात् दशवर्त्तित्वात् दुर्योधनः प
रः सर्वैश्लोकैर्बलवत्तरस्त्यजनयत्नश्च प्रथमं कर्णादीनि सेनानि ह
न॰ त्वा पुत्रोणं भीष्मं च जित्वा तिः कामकर्मरूपेण भीमेन अश्वत्थाम
रूपं दुर्योधनं शत्रुं नाशयन्ति भगवदभिप्रायः सूचितः ४३ ज्ञान
योगसमं कर्मयोगं योगजेन सारथिः अर्जुनेनापावरणैवेदेहेनं।
गृहे विशे १ इति श्रीभगवद्गीतार्थकृसमवेतकर्मयोगो ना। म
तृतीयोऽध्यायः ३ ॥ जय

मधुसूदनीटीका

फलितमाह सोऽयं सपरं इष्टा निवर्त्तनं स्वयं जयः परशाहेतो कालमेवं भूतं स्व।
र्णमात्मानं बुद्धेः एवं बुद्ध्वा साक्षात्कृत्य संस्तभ्य स्थिरीकृत्यात्मा
नेमनः आत्मना एतमार्गेणात्मिकया बुद्ध्या जहि मारय शत्रुं
महाबाहो सर्वपुरुषार्थशातनं हे महाबाहो महाबाहो हि शत्रुमारणे स्वकरमिति या
गसंबोधनं कामरूपं तृष्णारूपं दुरासदं दुःखेनासादनीयं दुर्वि
ज्ञेयानेकविशेषमिति यत्नाधिक्याय विशेषणं उपायः कर्मनि।
ष्ठवशाधान्येनोपसंहृता उपेयाज्ञाननिष्ठा तु गुणत्वेन कीर्त्तिता ४३
इति श्रीमत्परमहंस श्रीमधुसूदनसरस्वतीविरचितायां श्रीभ
गवद्गीतार्थगूढार्थदीपिकायां तृतीयोऽध्यायः ३ ॥

सदानंदटीका

एवं बुद्धेः परं शुद्धं साक्षात्कृत्य स्वयाधिया स्थिरीकृत्य मनः कामं
शत्रुं मारय सर्वथा । सम्यग्लोकरनेन तस्य मारणेन त्वबोधनः र
सारूपं च दुर्ज्ञेयानेकभेदभ्रमप्रदं २ प्रयत्नाधिकमाश्रित्य नाशये

गी.
टी.
३.

240

न

यं सर्वव्यापिनुः ३ ४३ ये योगी श्रद्दधानः कलुषितश्चिपिवर्जितश्चि नसुश्रे
तिमोहं ते सोऽयो यत्रिष्णुमामा परिमितपदस्थी मंजतिसेव्यसत्कोऽब्यौ ।
यत्स्माकामशत्रुस्सपदयंति सुधीः सात्विणो तविविधं त्वांनेतं
दीनवंधुं गुरुमति महद्देवं सेविन्ने कलमीडे इति भावप्रकाशे
श्रीसदानंदविदा कृते ज्ञाननिष्ठाप्रधानो यं तृतीयोऽध्यायः ३ ॥

नीलकंठी टीका

योगफलमाह एवमिति आत्मानं मनः हार्दाकाशे पिनस्थाप्य त्रि
मात्रकामान् कामयानं श्रूयते हि दहरविद्यायां हार्दाकाशे प्रकृत्य
यत्रास्ये हास्ति यच्च नास्ति सर्वं तदत्र गत्वा विंदते इति तत्र स्थानां का
मानां सत्वे तेषां वसत्यते तस्मे सत्याः कामा इति श्रुतेः आत्माने
मनः आत्मनामन सैव बुद्ध्यैव वासंस्तभ्यानिहेति केचित्त्वाबुद्धेः परे
परमात्मानं बुध्या समस्तवाने कामरूपं शत्रुं शान्तयितारे जहि ना
शय हे महाबाहो इति संबोधयंस्तन्नाशे न वसामर्थ्यमस्तीति द
र्शयति अयमर्थः यावत्कामस्य मूलस्य अज्ञानस्योच्छेदः आत्मतत्व
ज्ञानेन क्रियते तावत्सर्वेन कामस्य निर्मूलोच्छेदो न भवतीति बुद्धेः
परं बुध्वा कामो नाशनीयः तस्मिन्नसने हि संसारा न यो उच्छेदो भव
तीति उरासदं परबोधं विनादुःखेनापि नाशयितुमशक्यं उपायः
कर्मनिष्ठानुष्ठानेनोपसंहृत्य उपेयास्तानिष्ठानंतरं ज्ञानत्वेन
कीर्तिता ४३ ॥ इति नैलकंठीये भारतभावदीपे तृतीयोऽध्यायः ३

आनंदीटीका

उपसंहरति एवं बुद्धेः परं तुलत्वमबुद्धिगोचरमहंकारं मत्वाऽत्मना
स्वयमेवात्मानं मनः संस्तभ्य विषयेभ्यो निवर्त्य शत्रुमहंकारं कामा
रूपं दुर्लक्ष्यं नानारूपमतएव दुरासदं जहि महाबाहो इत्यामंत्रणेनेदं
ध्वनितं यथा कामरूपा मायया नानारूपं कृत्वा ग्राप्त एव दुरासदा नि
वातकवचादयः शत्रवः इन्द्रादिभिरपि दुर्जया स्तत्या हताः तथैवमहं
कारमपि जहि इति तु त्रियत्नं परमं अस्माद्भावयितः ४३ ॥
इति आनन्दी टीकायां तृतीयोऽध्यायः ३ ॥

रामानंदीटी·

तस्मात् एवं यथोक्तप्रकारेण बुद्धेः परमेनं शत्रुं बुद्ध्वा सहजं लेशात्वा परमदुर्जेयं
मत्वा तपवा मनेवात्मात्मानं संस्तभ्य धैर्यं लब्धापि तं दुरासदं दुःखेनासा
दयितव्यं परिभवितुमशक्यमेनं जहि त्वात्मयकी ईदृशं कामरूपं कामो वि
षयेषु अभिलाषो रूपं यस्य तं तथा विधः एवं हि कामक्रोधयोर्यात्मनास्या
वस्थितिरुक्ता तेन पृथग्पर्यवस्थत्वात् दुर्जेयः तथापि पूर्वोक्तेन प्र
कारेण कामात्मिकामवस्थितिं निरस्य हि हननेसमर्थो भविष्यसी
त्यर्थः एवं भगवता त्रियोविनेनेवं प्रकारेणार्जुनः प्रश्नोपदे
शाफलशामि प्रतिबन्धिनो हेकारस्य निर्बर्हणे समनुस्मारितः तथा हि
महदेहेनापि दुर्जयो बहवः शत्रवः सहाय निरपेक्षेण बहुशो निपाति
ताः तदेनमपि शत्रुमात्मैकसहायो निपातयितुमर्हसीत्याम् विज्ञा
नननवनुपनीयगुणप्रकर्षप्रख्यापनेन कनिकषेनि जकर्मयोगः प्र
स्मिन्नेणाप्रकटितः परमार्थसिद्धेसाध्यायपषविहितो विधिवदन्तीयः ४३
इति श्रीमद्रामानन्दरामविरचितायां गीताविहृतो तृतीयोऽध्यायः ३॥

...टीका

एवं यथोक्तप्रकारेण बुद्धेः परमात्मानं बुद्ध्वात्मनैवात्मनिरपेक्षेणैव स्व
स्वरूपेणात्मानं स्वस्वभावं संस्तभ्य हत्वा यावद्बहुपरामृश्य दुरासदं दुः
खेनासादनीयं दुर्विज्ञेयगतिं कामरूपिणं शत्रुं स्वात्मपरामर्शरूपेण
दाणेन जहि मारय एवं भगवता त्रियोचितेनैवंप्रकारेणार्जुनमुद्दि
श्य कामनिवर्हणोऽस्माद् उपदिष्टश्रेयसम् यवस्थायनात्मकात्मा
मर्शापरिशुतिम् कर्मयोगमवोचयत्तवन्द्रकलमव्ययम् ४३
इति वसुगमीटीकायां तृतीयोऽध्यायः ३॥

पंजोलीटीका

एवं बुद्धेः परं उत्कृष्टमात्मानं बुद्ध्वात्मनात्मनामनसात्मानं मनः
संस्तभ्य समाधाय एहि महाबाहो दुरासदं दुर्विज्ञेयानेकविशेषणं काम
रूपं शत्रुं वैरिणं जहि परिभज ४३ इति पंजोलीयां तृतीयोऽध्यायः ३॥

रणवीरसमिद्धोधिनी ॥

उपसंहरति एवमिति एवमुक्तप्रकारेण बुद्धेः सकाशात्परं परमसूक्ष्मं कामं ज्ञात्वा । यद्वा बुद्धेर्निश्चयात्मिकायाः परं शत्रुभूतं प्रव्यावर्तकं कामं बुद्ध्वा आत्मानं निश्चयात्मिकां बुद्धिमात्मना धैर्येण संस्तभ्य दृढीकृत्य कामरूपं दुरासदं दुःखेन परिभवितं शक्यं दुर्जयमिति यावत् शत्रुं जहि घातयेति भद्रं ४३ ॥ इति रणवीरसमिद्धोधिन्यां श्रीगीताव्याख्यायां तृतीयोध्यायः ३ ॥

मधुभाष्य ॥

४३ ॥ इतिश्रीमदानंदतीर्थभगवत्पादविरचितगीताभाष्ये तृतीयोध्यायः ३ ॥

241

भाषा अनुवाद

अब कहते हैं कि विषय औ इन्द्रियों से काम आदि विकारयुक्त बुद्धि ही होती है और आत्मा निर्विकार बुद्धि का साक्षीरूप और उससे पृथक है इस से आत्मा को श्रेष्ठ मानि और ऐसी निश्चयरूप बुद्धि से मन को निश्चल करके हे महाबाहो दुखका दरवाजा निवारण करने के योग्य इस कामरूपी दुष्ट दुर्जेय शत्रु को जीतो ४३ ॥

इति श्रीमद्भगवद्गीतायां पण्डित जगन्नाथ सुकुल विरचितायां मनभावनी टीकायां तृतीयोऽध्यायः ३ ॥

दोहा ॥

ऐसें बुद्धि सें परे दृढ़ कर मन को जान अर्जुन दुर्जन को तजो कामरूप हि मान ४३ ॥ इति ॥